© Dharmarth Trust J&K Digitized By eGangotri

© Dharmartha Trust J&K. Digitized By eGangotri

१ गदा १ सौप्तिक १ स्त्री पर्व।
राजधर्म। आपद्धर्म।। इह पंज
वजीरे ज़ोरावर दे की भेजे भंते
खजाने पहुते दे पत्रे हाथे।।
ज्येष्ठ, प्रविष्टे ८ ।।

1

© Dharmartha Trust J&K. Digitized By eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

ग० १

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ धृतराष्ट्रउवाच हतेषुसर्वसैन्येषु
पांडुपुत्रैरणाजिरे ममसैन्यावशिष्टास्तेकिमकुर्वतसंजय २ कृतवर्माकृपश्चैवद्रोणपुत्रश्चवीर्यवान् दुर्योधनस्तुमंदात्माराजा
किमकरोत्तदा ३ संजयउवाच संप्राद्रवत्सुदारेषुक्षत्रियाणांमहात्मनां विद्रुतेशिबिरेशून्येभृशोद्विग्नास्त्रयोरथाः ४ निशम्य
पांडुपुत्राणांतदाविजयिनांस्वनं विद्रुतंशिबिरंदृष्ट्वासायाह्नेराजगृद्धिनः ५ स्थानंनारोचयंस्तत्रततस्तेह्रदमभ्ययुः युधिष्ठिरोपिध
र्मात्माभ्रातृभिःसहितोरणे हृष्टःपर्यचरद्राजन्दुर्योधनवधेप्सया मार्गमाणास्तुसंक्रुद्धास्तवपुत्रंजयैषिणः ७ यत्नतोन्वेषमा
णास्तेनैवापश्यंजनाधिपं सहितीक्ष्णवेगेनमहापाणिरपाक्रमत् ८ तेह्रदंप्राविशच्चापिविष्टभ्यापःस्वमायया यदातुपां
डवाःसर्वेसुपरिश्रांतवाहनाः ९ ततःस्वशिबिरंप्राप्यव्यतिष्ठंतससैनिकाः ततःकृपश्चद्रौणिश्चकृतवर्माचसात्वतः १० सन्नि
विष्टेषुपार्थेषुप्रयातास्तंह्रदंशनैः तेतंह्रदंसमासाद्ययत्रशेतेजनाधिपः ११ अभ्यभाषंतदुर्धर्षंराजानंसुप्तमंभसि राजन्नु
त्तिष्ठयुध्यस्वसहास्माभिर्युधिष्ठिरं १२ जित्वावापृथिवींभुंक्ष्वहतोवास्वर्गमाप्नुहि तेषामपिबलंसर्वंहतंदुर्योधनत्वया १३
प्रतिविद्धाश्चभूयिष्ठंयेशिष्टास्तत्रसैनिकाः नतेवेगंविसहितुंशक्तास्तवविशांपते १४ अस्माभिरभिगुप्तस्यतस्मादुत्तिष्ठभारत गम० १
दुर्योधनउवाच दिष्ट्यापश्यामिवोमुक्तानीदृशात्कुरुपक्षयात् १५ पांडुकौरवसंमर्दाज्जीवमानान्नरर्षभान् विजेष्यामोव
यंसर्वेविश्रांताविगतक्लमाः १६ भवंतश्चपरिश्रांतावयंचभृशविक्षताः उदीर्णंचबलंतेषांतेनयुद्धंनरोचये १७

CC-0. Dharmarth Trust J&K. Digitized by eGangotri

नत्वेतद्भुतंवीराप्रहृष्टोमहदिदंमनः अस्मासुचपराभक्तिर्नतुकालःपराक्रमे १८ विश्रम्यैकांनिशामद्यभवद्भिःसहितोरणे प्रति
योत्स्याम्यहंशत्रून्ख्यानेमेस्त्यत्रसंशयः १९ संजयउवाच एवमुक्तोब्रवीद्द्रौणिराजानंयुद्धदुर्मदं उत्तिष्ठराजन्भद्रंतेविजेष्यामोवयं
परान् २० इष्टापूर्तेनदानेनसत्येनचजपेनच शपेराजन्यथाह्यद्यनिहनिष्यामिसोमकान् मास्मयज्ञकृतांप्रीतिमाप्नुयांसज्जनोचि
तां यदीमांरजनींव्युष्टांनहिहन्मिपरान्रणे २२ नाहत्वासर्वपांचालान्विमोक्ष्येकवचंविभो इतिसत्यंब्रवीम्येतत्तन्मेशृणुजनाधिप २३
संजयउवाच तेषुसंभाषमाणेषुव्याधास्तंदेशमाययुः मांसभारपरिश्रांताः पानीयार्थंयदृच्छया २४ तेहिनित्यंमहाराजभीमसेनस्य
लुब्धकाः मांसभारानुपाजह्रुर्भक्त्यापरमयाविभो २५ तेतत्रविष्ठितास्तेषांसर्वंतद्वचनंरहः दुर्योधनवचश्चैवशुश्रुवुःसंगतामिथः
२६ तेपिसर्वेमहेष्वासाअयुद्धार्थिनिकौरवे निर्बंधंपरमंचक्रुस्तदावैयुद्धकांक्षिणः तांस्तथासमुदीक्ष्याथकौरवाणांमहारथा
न् अयुद्धमनसंचैवराजानंस्थितमंभसि २८ तेषांश्रुत्वाचसंवादंराज्ञश्चसलिलेसतः व्याधाभ्यजानन्राजेंद्रसलिलस्थंसुयोध
नं २९ तेपूर्वंपांडुपुत्रेणपृष्टाह्यासन्सुतंतव यदृच्छोपगतास्तत्रराजानंपरिमार्गताः ३० ततस्तेपांडुपुत्रस्यस्मृत्वातद्भाषितंतत
दा अन्योन्यमब्रुवन्राजन्मृगव्याधाःशनैरिव ३१ दुर्योधनंख्यापयामोधनंदास्यतिपांडवः सुव्यक्तमिहनःख्यातोह्रदेदुर्योध
नोनृपः ३२ तस्माद्गच्छामहेसर्वेयत्रराजायुधिष्ठिरः आख्यातुंसलिलेसुप्तंदुर्योधनममर्षणं ३३ धृतराष्ट्रात्मजंतस्मैभीमसेनाय
धीमते शयानंसलिलेसर्वेकथयामोधनुर्भृते ३४ सनोदास्यतिसुप्रीतोधनानिबहुलान्युत किन्नोमांसेनशुष्केणपरिक्लिष्टेन

© Dharmartha Trust J&K. Digitized by eGangotri

ग॰
२

शोणिता ३५ एवमुक्त्वा तु ते व्याधाः संप्रहृष्टा धनार्थिनः मांसभारानुपादाय प्रययुः शिबिरं प्रति ३६ पांडवापि महाराज लब्ध
लक्ष्याः प्रहारिणः अपश्यमानाः समरे दुर्योधनमवस्थितं ३७ निकृतेस्तस्य पापस्य ते पारं गमनेप्सवः चारान्संप्रेषयामासुः सम
न्तात्तद्रणाजिरे ३८ आगम्य तु ततः सैन्यं नष्टं दुर्योधनं नृप न्यवेदयंत सहिता धर्मराजस्य सैनिकाः ३९ तेषां तद्वचनं श्रुत्वा चाराणां
भरतर्षभ चिंतामभ्यगमत्तीव्रां निशश्वास च पार्थिवः ४० अथ स्थितानां पांडूनां दीनानां भरतर्षभ तस्माद्देशादपक्रम्य त्वरिता
लुब्धका विभो आजग्मुः शिबिरं हृष्टा दृष्ट्वा दुर्योधनं नृप वार्यमाणाः प्रविष्टाश्च भीमसेनस्य पश्यतः ४२ ते तु पांडवमासा
द्य भीमसेनं महाबलं तस्मै तत्सर्वमाचख्युर्यद्वृत्तं यच्च वै श्रुतं ४३ ततो वृकोदरो राजन्दत्वा तेषां धनं बहु धर्मराजाय तत्सर्वमा
चचक्षे परंतपः ४४ असौ दुर्योधनो राजन्विज्ञातो मम लुब्धकैः संस्तभ्य सलिलं शेते यस्यार्थे परितप्यसे ४५ तद्वचो भी
मसेनस्य प्रियं श्रुत्वा विशांपते अजातशत्रुः कौंतेयो हृष्टोभूत्सह सोदरैः ४६ तं च श्रुत्वा महेष्वासं प्रविष्टं सलिलह्रदं क्षिप्रमे
व ततो गच्छन्पुरस्कृत्य जनार्दनं ४७ ततः किलकिलाशब्दः प्रादुरासीद्विशांपते पांडवानां प्रहृष्टानां पांचालानां च सर्वश
ः ४८ सिंहनादांस्ततश्चक्रुः क्ष्वेडांश्च भरतर्षभ त्वरिताः क्षत्रिया राजन्जग्मुर्द्वैपायनं ह्रदं ४९ ज्ञातः पापो धार्तराष्ट्रो दृष्टश्चेत्य
सकृद्रणे प्राक्रोशन्सोमकास्तत्र हृष्टरूपाः समंततः ५० तेषामाशु प्रयातानां रथानां तत्र वेगिनां बभूव तुमुलः शब्दो दिवस्पृक्

राम॰
२

© Dharmartha Trust J&K. Digitized By eGangotri

थिवीपते ५१ दुर्योधनंपरीप्संतस्तत्रतत्रयुधिष्ठिरं अन्वयुस्त्वरितास्तेवैराजानंश्रान्तवाहनाः ५२ अर्जुनोभीमसेनश्च
माद्रीपुत्रौचपांडवौ धृष्टद्युम्नश्चपांचाल्यःशिखंडीचापराजितः ५३ उत्तमौजायुधामन्युःसात्यकिश्चमहारथः पांचा
लानांचयेशिष्टाद्रौपदेयाश्चभारत ५४ हयाश्चसर्वेनागाश्चशतशश्चपदातयः ततःप्राप्तोमहाराजधर्मराजःप्रतापवान् ५५
द्वैपायनह्रदंघोरंयत्रदुर्योधनोभवत् शीतामलजलंहृद्यंद्वितीयमिवसागरं ५६ माययासलिलंस्तम्भ्ययत्रान्तस्थितःसुतः
अद्भुतेनविधिनादैवयोगेनभारत ५७ सलिलान्तर्गतःशेतेदुर्दर्शःकस्यचित्प्रभो मानुषस्यमनुष्येंद्रगदाहस्तोजनाधिपः
५८ ततोदुर्योधनोराजासलिलान्तर्गतोवसन् शुश्रुवेतुमुलंशब्दंजलदोपमनिस्वनं ५९ युधिष्ठिरस्तुराजेंद्रतंह्रदंसहसो
दरैः आजगाममहाराजतवपुत्रवधायवै ६० महताशंखनादेनरथनेमिस्वनेनच ऊर्ध्वंधुन्वन्महारेणुंकंपयंश्चापिमे
दिनीं ६१ यौधिष्ठिरस्यसैन्यस्यश्रुत्वाशब्दंमहारथाः कृतवर्माकृपोद्रौणीराजानमिदमब्रुवन् ६२ इमेह्यायांतिसंहृष्टा
: पांडवाजितकाशिनः अपयास्यामहेतावदनुजानातुनोभवान् ६३ दुर्योधनस्तुतच्छ्रुत्वातेषांतत्रतरस्विनां तथेत्युक्त्वा
ह्रदंतंवैमाययास्तंभयत्प्रभो ६४ तेत्वनुज्ञाप्यराजानंभृशंशोकपरायणाः जग्मुर्दूरंमहाराजकृपप्रभृतयोरथाः ६५
तेगत्वादूरमध्वानंन्यग्रोधंप्रेक्ष्यमारिष न्यविशन्तभृशं श्रान्ताश्चिन्तयन्तोनृपंप्रति ६६ विष्टभ्यसलिलंसुप्तोधार्तराष्ट्रोम
हाबलः पांडवाश्चापिसंप्राप्तास्तंदेशंयुद्धमीप्सवः ६७ कथंनुयुद्धंभविताकथंराजाभविष्यति कथंनुपांडवाराजन्प्रति

© Dharmartha Trust J&K. Digitized by eGangotri

गा०
३

पत्स्यतिकौरवं ६८ इत्येवं चिंतयानास्तु रथेभ्योऽस्मान्विमुच्यते तत्रासावक्रिरोराजन्कपश्यन्तयोरथाः ६९ इतिगदापर्वणि
संजयउवाच ततस्तेषु प्रयातेषु रथेषु त्रिषु पांडवाः तेऽक्रंदृश्यन्तपयंतपत्रदुर्योधनोऽभवत् ७० आसाद्यच कुरुश्रेष्ठस्तरोदृष्ट्या
यतेऽक्रं स्तंभितं धात्रीं राष्ट्रेणादृष्ट्वा तु तं शलिलाशयं ७१ वासुदेवमिदंवाक्यमब्रवीत्कुरुनंदनः पश्येमां धात्रीराष्ट्रेणमायाम
प्सुप्रयोजितां विष्टभ्यसलिलंशेतेनास्यमानुषतोभयं दैवींमायामिमांकृत्वासलिलांतरगतोह्ययं ७३ निकृत्यानिकृतिप्राज्ञो
नमेजीवन्विमोक्ष्यते यद्यस्यसमरेसख्यंकुरुतेवज्रभृत्स्वयं ७४ तथाप्येनंहतंयुद्धेलोकाद्रक्ष्यंतिमाधव वासुदेवउवा
च मायाविनइमांमायांमाययाजहिभारत ७५ मायावीमाययावध्यःसत्यमेतद्युधिष्ठिर क्रियाभ्युपायैर्बहुभिर्मायाम
प्सुप्रयोज्यच ७६ जहित्वंभरतश्रेष्ठमायात्मानंसुयोधनं क्रियाभ्युपायैरिंद्रेणनिहतादैत्यदानवाः ७७ क्रियाभ्युपायैर्ब
हुभिर्बलिर्बद्धोमहात्मना क्रियाभ्युपायैर्बहुभिर्हिरण्याक्षोमहासुरः ७८ हिरण्यकशिपुश्चैवक्रिययैवनिषूदितौ वृत्रश्चनि
हतोराजन्क्रिययैवनसंशयः ७९ तथापौलस्त्यतनयोरावणोनामराक्षसः रामेणनिहतोराजन्सानुबंधःसहानुगः ८०
क्रिययायोगमास्थायतथात्वमपिविक्रम क्रियाभ्युपायैर्निहतौमयाराजन्पुरातनौ ८१ तारकश्चमहादैत्योविप्रचित्ति
श्चवीर्यवान् वातापिरिल्वलश्चैवत्रिशिराश्चतथाविभो ८२ सुंदोपसुंदावसुरौक्रिययैवनिषूदितौ क्रियाभ्युपायैरिंद्रेण
त्रिदिवंभुज्यतेविभो ८३ क्रियाबलवतीराजन्नान्यत्किंचिद्युधिष्ठिर दैत्याश्चदानवाश्चैवराक्षसाःपार्थिवास्तथा ८४

राम०
३

© Dharmartha Trust J&K. Digitized By eGangotri

क्रियाभ्युपायैर्निहताः क्रियामस्मात्समाचर संजय उवाच इत्युक्तो वासुदेवेन पाण्डवः संशितव्रतः ८५ जलस्थं तं महाराज तव पुत्रं
महाबलं अभ्यभाषत कौन्तेयः प्रहसन्निव भारत ८६ युधिष्ठिर उवाच सुयोधन किमर्थोऽयमारंभोऽप्सु कृतस्त्वया सर्वक्षत्रं घातयि
त्वा स्वकुलं च विशेषयत्त ८७ जलाशयं प्रविष्टोऽद्य वांछन् जीवितमात्मनः उत्तिष्ठ राजन्युध्यस्व सहास्माभिः सुयोधन ८८ स ते दर्पो न
रश्रेष्ठ स च मानः क्व ते गतः यस्त्वं संस्तभ्य सलिलं भीतो राजन्व्यवस्थितः ८९ सर्वे त्वां शूर इत्येवं जना जल्पंति संसदि व्यर्थं तद्भ
वतो मन्ये शौर्यं सलिलशायिनः ९० उत्तिष्ठ राजन्युध्यस्व क्षत्रियोऽसि कुलोद्भवः कौरवेयो विशेषेण कुलं जन्म च संस्मर ९१ स क
थं कौरवे वंशे प्रशंसन् जन्म चात्मनः युद्धाद्भीतस्ततस्तोयं प्रविश्य प्रतितिष्ठसि ९२ अयुद्धमव्यवस्थानं नैष धर्मः सनातनः
अनार्यजुष्टमस्वर्ग्यं रणे राजन्पलायनं ९३ कथं पारमगत्वा हि युद्धे त्वं वै जिजीविषुः इमान्निपतितान्दृष्ट्वा पुत्रान्भ्रातॄन्पितॄंस्त स
या ९४ संबंधिनो वयस्यांश्च मातुलान्बांधवांस्तथा घातयित्वा कथं तात ह्रदे तिष्ठसि सांप्रतं ९५ शूरमानी न शूरस्त्वं मृषा वदसि भा
रत शूरोऽहमिति दुर्बुद्धे सर्वलोकस्य शृण्वतः ९६ न हि शूराः पलायंते शत्रून्दृष्ट्वा कथंचन ब्रूहि वा त्वं यया धृत्या शूर त्यजसि सं
गरं ९७ स त्वमुत्तिष्ठ युध्यस्व विनीय भयमात्मनः घातयित्वा सर्वसैन्यं भ्रातॄंश्चैव सुयोधन ९८ नेदानीं जीविते बुद्धिः कार्या
धर्मचिकीर्षया क्षत्रधर्ममपाश्रित्य त्वद्विधेन सुयोधन ९९ यत्तु कर्णमुपाश्रित्य शकुनिं चापि सौबलं अमर्त्य इव संमोहात्त्वमा
त्मानं न बुद्धवान् १०० तत्पापं सुमहत्कृत्वा प्रतियुध्यस्व भारत कथं हि त्वद्विधो मोहाद्रोचयेत पलायनं १ क्व ते तत्पौरुषं यातं क्व च

© Dharmartha Trust J&K. Digitized by eGangotri

ग०
४

मानः सुयोधनः क्वचविक्रांततायाताक्वचविस्फूर्जितंमहत् २ कोनेकृतान्त्वनायाताकिंचशेषेजलाशये सत्वमुत्तिष्ठयुध्यस्वक्षात्र
धर्मेणभारत ३ अस्मांस्तुवापराजित्यप्रशाधिपृथिवीमिमां अथवानिहतोस्माभिर्भूमौस्वप्स्यसिभारत ४ एषतेपरमोधर्मः स
ष्टोधात्रामहात्मना तंकुरुष्वयथातथ्यंराजाभवमहारथ ५ संजयउवाच एवमुक्तोमहाराजधर्मपुत्रेणधीमता सलिलस्थ
स्तवसुतइदंवचनमब्रवीत् दुर्योधनउवाच नैतच्चित्रंमहाराजयत्भीः प्राणिनमाविशेत् नचप्राणभयाद्भीतोव्यपयातोस्मि
भारत ७ अरथश्चानिषंगीचनिहतः पार्ष्णिसारथिः एकश्चाप्यगणःसंख्येप्रत्याश्वासमरोचयं ८ नप्राणहेतोर्नभयान्न
विषादाद्विशांपते इदंमभःप्रविष्टोस्मिश्रमात्त्विदमनुष्ठितं ९ त्वंचाश्वसिहिकौंतेययेचाप्यनुगतास्तव अहमुत्थायवः सर्वान्प्रतियो
त्स्यामिसंयुगे १० युधिष्ठिरउवाच आश्वस्ताएवसर्वेस्मचिरंत्वांमृगयामहे तदिदानींसमुत्तिष्ठयुध्यस्वेहसुयोधन ११ हत्वावासम
रेपार्थान्स्फीतंराज्यमवाप्नुहि निहतोवारणेस्माभिर्वीरलोकमवाप्स्यसि १२ दुर्योधनउवाच यदर्थंराज्यमिच्छामिकुरूणांकुरुनंद
न तइमेनिहताःसर्वेभ्रातरोमेजनेश्वर १३ क्षीणरत्नांचपृथिवींहतक्षत्रियपुंगवां नह्युत्सहाम्यहंभोक्तुंविधवामिवयोषितं १४
अद्यापित्वहमाशंसेत्वांविजेतुंयुधिष्ठिर भंक्त्वापांचालपांडूनामुत्साहंभरतर्षभ १५ नत्विदानींमहंमन्येकार्यंयुद्धेनकर्हिचित्
द्रोणेकर्णेचसंशांतेनिहतेचपितामहे १६ अस्त्विदानीमियंराजन्केवलापृथिवीतव असहायोहिकोराजाराज्यमिच्छेत्प्रशासि
तुं १७ सुहृदस्तादृशान्हित्वापुत्रान्भ्रातॄन्पितॄनपि भवद्भिश्चहृतेराज्येकोनुजीवेत्तमादृशः १८ अहंवनंगमिष्याम्यजिनैः

गम०
४

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतिवासितः रतिर्हि नास्ति मे राज्ये हतपक्षस्य भारत १९ हतबांधवभूयिष्ठा हतनागाश्वा हतकुंजरा एषा ते पृथिवी राजन्भुंक्ष्वैनां विग
तज्वरः २० वनमेव गमिष्यामि वसानो मृगचर्मणी नहि मे निर्जनस्यास्ति जीवितेद्य स्पृहा विभो २१ गच्छ त्वं भुंक्ष्व राजेंद्र पृथिवीं नि
हतेश्वरां हतयोधां नष्टरत्नां क्षीणप्राकारां यथासुखं २२ संजय उवाच दुर्योधनं तव सुतं सलिलस्थं महायशाः श्रुत्वा तु करुणं
वाक्यमभाषत युधिष्ठिरः २३ आर्तप्रलापान्मा तात सलिलस्थः प्रभाषिथाः नैतन्मनसि मे राजन्वाशितं शकुनेरिव यदि वापि सम
र्थः स्यास्त्वं दानाय सुयोधन नाहमिच्छेयमवनिं त्वया दत्तां प्रशासितुं २५ अधर्मेण न गृह्णीयां त्वया दत्तां महीमिमां नहि धर्मः
स्मृतो राजन्क्षत्रियस्य प्रतिग्रहः २६ त्वया दत्तां नचेच्छेयं पृथिवीमखिलामहं त्वां तु युद्धे विनिर्जित्य भोक्तास्मि वसुधामिमां २७
अनीश्वरश्च पृथिवीं कथं त्वं दातुमिच्छसि त्वयेयं पृथिवी राजन्किं न दत्ता तदैव हि २८ धर्मतो याचमानानां प्रशमार्थं कुलस्य च
वार्ष्णेयं प्रथमं राजन्प्रत्याख्याय महाबलं किमिदानीं ददासि त्वं को हि ते चित्तविभ्रमः अभियुक्तस्तु को राजा दातुमिच्छेद्धि मेदिनीं
३० न त्वमद्य महीं दातुमीशः कौरवनंदन आच्छेत्तुं वा बलाद्राजन्स कथं दातुमिच्छसि ३१ मां तु निर्जित्य संग्रामे पालयेमां व
सुंधरां सूच्यग्रेणापि यद्भूमेरपि धीयेत भारत तन्मात्रमपि तन्मह्यं न ददाति पुरा भवान् स कथं पृथिवीमेतां प्रददासि विशांप
ते ३३ सूच्यग्रं नात्यजः पूर्वं स कथं त्यजसि क्षितिं एवमैश्वर्यमासाद्य प्रशास्य पृथिवीमिमां ३४ को हि मूढो व्यवस्येत शत्रोर्दातुं
वसुंधरां त्वं तु केवलमौर्ख्येन विमूढो नावबुध्यसे ३५ पृथिवीं दातुकामोपि जीवितेन विमोक्ष्यसे अस्मान्वा त्वं पराजित्य प्रशा

© Dharmartha Trust J&K. Digitized by eGangotri

ग० धिरपृथिवीमिमां ३७ अथवानिहतोऽस्माभिर्व्रजलोकाननुत्तमान् अथवाजीवतोराजन्नापिचत्वमपिचध्रुवं ३८ संशयःसर्वभूता
५ नांविजयेनोभविष्यति जीवितंतवदुष्प्राज्ञमपिसंप्रतिवर्त्तते जीवेयेयमहंकामंनत्वंजीवितुंक्षमः इहनेहिकृतोपलस्त्वयास्मा
सुविशेषतः ३९ आशीविषैर्विषैश्चापिजलेचापिप्रवेशनैः त्वयाविनिकृताराजन्नाज्यस्यहरणेनच ४० अप्रियाणांचव
चनैर्द्रौपद्याःकर्षणेनच एतस्मात्कारणात्पापजीवितंतेनविद्यते ४१ उत्तिष्ठोत्तिष्ठयुध्यस्वयुद्धेश्रेयोभविष्यति एवंतुविविधा
वाचोजययुक्ताःपुनःपुनः ४२ कीर्तयंतिस्मतेवीरास्तत्रतत्रजनाधिप ४३ इतिगदापर्वणि धृतराष्ट्रउवाच एवंसंतर्ज्यमा
नस्तुममपुत्रोमहीपतिः प्रकृत्यामन्युमान्वीरः [illegible] कथमासीत्परंतप १ नहिसंतर्जनांतेनश्रुतपूर्वा
कथंचन राजभावेनमान्यश्चसर्वलोकस्यसोभवत् २ यस्यातपत्रछायापित्वकाभानोस्तथाप्रभा खेदायैवाभिमानित्वात्सहसे
वकथंगिरः इयंचपृथिवीसर्वासम्लेच्छाटविकाभृशं प्रसादाद्ध्रियतेयस्यप्रत्यक्षंतवसंजय। ४ सतथातर्ज्यमानस्तुपांडुपुत्रै
र्विशेषतः विहीनश्चस्वकैर्भृत्यैर्निर्जनेचावृतोभृशं ५ सश्रुत्वाकटुकावाचोजययुक्ताःपुनःपुनः किमब्रवीत्पांडवेयांस्तन्ममाच वाँ गम०
क्ष्व संजय ६ संजय० तर्ज्यमानस्तदाराजन्नुदकस्थस्तवात्मजः युधिष्ठिरेणराजेंद्रभ्रातृभिःसहितेनच ७ श्रुत्वासकटु ५
कावाचोविषमस्थोजनाधिपः दीर्घमुष्णंचनिःश्वस्यसलिलस्थःपुनःपुनः ८ सलिलांतर्गतोराजन्धुन्वन्हस्तौपुनःपुनः म
नश्चकारयुद्धायराजानंचाभ्यभाषत ९ यूयंससुहृदःपार्थाःसर्वेसरथवाहनाः अहमेकःपरिद्यूनोविरथोहतवाहनः १०

© Dharmartha Trust J&K. Digitized By eGangotri

आत्तशस्त्रैरथोपेतैर्बहुभिः परिवारितः कथमेकः परिश्रान्तः सन्नशस्त्रोयोद्धुमुत्सहे ११ एकैकेनतुमांयूयंयोधयध्वंयुधिष्ठि
रः नह्येकोबहुभिर्वीरैर्न्याय्योयोधयितुंयुधि। १२ विशेषतोविकवचः श्रान्तश्चापःसमाश्रितः भृशंविक्षतगात्रश्च श्रान्त
वाहनसैनिकः १३ नमेत्वत्तोभयंराजन्नचपार्थाद्वृकोदरात् फाल्गुनाद्वासुदेवाद्वापांचालेभ्योथवापुनः यमाभ्यांयुयुधाना
द्वायेचान्येतवसैनिकाः एकः सर्वानहंक्रुद्धोवारयिष्येयुधिस्थितः १५ धर्ममूलासतांकीर्त्तिर्मनुष्याणांजनाधिप धर्मंचैवेहकी
र्त्तिंचपालयन्प्रब्रवीम्यहं १६ अहमुत्थायसर्वान्वैप्रतियोत्स्यामिसंयुगे अनुगम्यागतान्सर्वान्ऋतून्संवत्सरोयथा १७
अद्यवः सरथान्साश्वानशस्त्रोविरथोपिसन् नक्षत्राणीवसर्वाणिसवितारात्रिसंक्षये १८ तेजसानाशयिष्यामिस्थिरी
भवतपांडवाः अद्यानृण्यंगमिष्यामिक्षत्रियाणांयशस्विनां १९ बाल्हीकद्रोणभीष्माणांकर्णस्यचमहात्मनः जयद्र
थस्यशूरस्यभगदत्तस्यचोभयोः २० मद्रराजस्यशल्यस्यभूरिश्रवसएवच पुत्राणांभरतश्रेष्ठशकुनेः सौबलस्यच २१
मित्राणांसुहृदांचैवबांधवानांतथैवच आनृण्यमद्यगछामिहत्वात्वांभ्रातृभिः सह २२ एतावदुक्त्वावचनंविरराम
जनाधिपः युधिष्ठिरउवाच दिष्ट्यात्वमपिजानीषेक्षत्रधर्मंसुयोधन २३ दिष्ट्यासिवर्त्ततेबुद्धिर्युद्धायैवमहाभुज दिष्ट्याशू
रोसिकौरव्यदिष्ट्याजानासिसंगरं २४ यस्त्वमेकोहिनः सर्वान्संयुगेयोद्धुमिच्छसि एकएकेनसंगम्ययत्तेसंमतमायुधं २५

© Dharmartha Trust J&K. Digitized By eGangotri

ग० ६

तस्मादायुधयुध्यस्वमेकेकतोवयंस्थिताः अयमिष्टंचतेकामंवीरभूयोददाम्यहं २६ हत्वैकंभवतोराज्यंहतोवास्वर्गमाप्नु
हि दुर्योधनउवाच एकश्चेद्योद्धुमाक्रंदेशूरोद्यममदीयतां आयुधानामियंचापिवृतात्वन्मतेगदा २७ हंतैकंभवता
मेकः शक्यंमांयोभिमन्यते पदातिर्गदयासंख्येसयुध्यतुमयासह २८ वृत्तानिरथयुद्धानिविचित्राणिपदेपदे इदमेकंग
दायुद्धंभवत्वद्याद्भुतंमहत् अस्त्राणामपिपर्यायंकर्त्तुमिच्छंतिमानवाः युद्धानामपिपर्यायोभवत्वनुमतेतव ३० गदया
त्वांमहाबाहोविजेष्यामिसहानुजं पांचालान्सृंजयांश्चैवयेचान्येतवसैनिकाः ३१ नहिमेसंभ्रमोजातुशक्रादपियुधिष्ठि
र युधिष्ठिरउवाच उत्तिष्ठोत्तिष्ठगांधारेमांयोधयसुयोधन ३२ एकएकेनसंगम्यसंयुगेगदयाबली पुरुषोभवगांधारेयुध्य
स्वसुसमाहितः ३३ अद्यतेजीवितंनास्तियदींद्रोपितवाश्रयः संजयउवाच एतत्सनरशार्दूलोनामृष्यततवात्मजः सो४
३४ सलिलांतर्गतःश्वभ्रेमहानागइवश्वसन् तथासौवाक्प्रतोदेनतुद्यमानःपुनःपुनः ३५ वचोनममृषेराजन्नुत्त
माश्वःकशामिव संक्षोभ्यसलिलंवेगाद्गदामादायवीर्यवान् ३६ अद्रिसारमयींगुर्वींकांचनांगदभूषणां अंतर्जे एम०
लात्समुत्तस्थौनागेंद्रइवनिश्वसन् ३७ सभित्वास्तंभितंतोयंस्कंधेकृत्वायसींगदां उदतिष्ठत्पुत्रस्तेप्रतपन्रश्मिवानिव ६

© Dharmartha Trust J&K. Digitized by eGangotri

३८ ततःशैक्यायसींगुर्वींजातरूपपरिस्कृतां गदांपरामृशद्धीमान्धार्त्तराष्ट्रोमहाबलः ३९ गदाहस्तंतुतंदृष्ट्वासश्रृंगमि
वपर्वतं प्रजानामिवसंक्रुद्धंशूलपाणिमवस्थितं ४० सगदोभारतोभातिप्रतपन्भास्करोयथा तमुत्तीर्णंमहाबाहुंगदा
हस्तमरिंदमं मेनिरेसर्वभूतानिदंडपाणिमिवांतकं वज्रहस्तंयथाशक्रंशूलहस्तंयथाहरम् ददृशुः सर्वपांचालाःपुत्रंत
वजनाधिप ४१ तमुत्तीर्णंतुसंप्रेक्ष्यसमहृष्यंतसर्वशः पांचालाः पांडवाश्चैवतेन्योन्यस्यतलान्ददुः ४२ अवहासंतुतं
मत्वापुत्रोदुर्योधनस्तवः उद्वृत्यनयनेक्रुद्धोदिधक्षुरिवपांडवान् ४३ त्रिशिखांभ्रुकुटींकृत्वासंदष्टदशनच्छदः प्रत्युवाचत
तस्तान्वैपांडवान्सहकेशवान् ४४ दुर्योधनउवाचअवहासस्यवोस्यस्यप्रतिभोक्ष्यथपांडवाः गमिष्यथहताःसद्यःसपां
चालायमक्षयं ४५ संजयउवाच उत्थितश्चजलात्तस्मात्पुत्रोदुर्योधनस्तव अतिष्ठतगदापाणीरुधिरेणसमुक्षितः ४६
तस्यशोणितदिग्धस्यसलिलेनसमुक्षितं शरीरंस्मतदाभातिस्रवन्निवमहीधरः ४७ तमुद्यतगदंवीरंमेनिरेतत्रपांडवा
ःवैवस्वतमिवक्रुद्धंकिंकरोद्यतपाणिनं ४८ समेघनिनदोहर्षान्नर्दन्निवचगोवृषः आजुहावततःपार्थान्गदयायुधिवी
र्यवान् ४९ दुर्योधनउवाच एकैकेनचमां यूयमासीदतयुधिष्ठिर नह्येकोबहुभिर्न्याय्योवीरोयोधयितुंयुधि ५० न

© Dharmartha Trust J&K. Digitized by eGangotri

ग०
८

स्त्वंवर्मोविशेषेणाश्रांतश्चासुपरिप्लुतः भृशंचक्षतगात्रश्चहतवाहनसैनिकः ५१ सर्वोपकरणैर्हीनंवर्मशस्त्रास्त्रवर्जितं ए
काकिनंयुध्यमानंपश्यंतुत्रिदिवेदेवताः अवश्यमेवयोद्धुंमेसर्वैरेवमयासह युक्तंत्वयुक्तमित्येतद्वेत्सित्वंचैवसर्वदा ५२ युधि
ष्ठिरउवाच नाभूदेवंतवप्रज्ञाकथमेवंसुयोधन यदाभिमन्युंबहवोजघ्नुर्युधिमहारथाः ५३ क्षत्रधर्मंभृशंक्रूरंनिरपेक्षंसु
निर्घृणं अन्यथातु कथंहन्युरभिमन्युंतथागतं ५४ सर्वेभवंतोधर्मज्ञाः सर्वेशूरास्तनुत्यजः न्यायेनयुध्यतांप्रोक्ता
शक्रलोकगतिःपरा ५५ यद्येकस्तुनहंतव्योबहुभिर्धर्मएवतु तदाभिमन्युंबहवोनिजघ्नुस्त्वन्मतेकथं ५६ सर्वोविमृशतेजं
तुःकृच्छ्रस्थोधर्मदर्शनं पदस्थःपिहितंद्वारंपरलोकस्यपश्यति ५७ आमुंचकवचंवीरमूर्धजान्यमयस्वच यच्चान्यदपिते
नास्तितदप्यादत्स्वभारत ५८ इममेकंचतेकामंवीरभूयोददाम्यहं पंचानांपांडवेयानांयेनत्वंयोद्धुमिच्छसि ५९ तंहत्वावै
भवान्राजाहतोवास्वर्गमाप्नुहि ऋतेचजीविताद्वीरयुद्धेकिंकुर्मतेप्रियं ६० संजयउ० ततस्तवसुतोराजन्वर्मजग्राहकांचनं वि
चित्रंचशिरस्त्राणंजांबूनदपरिष्कृतं ६१ सोपवद्धशिरस्त्राणःशुभकांचनवर्मभृत् रराजराजन्पुत्रस्तेकांचनःशैलराडिव ६२
सन्नद्धःसगदोराजन्सज्जःसंग्राममूर्धनि अब्रवीत्पांडवान्सर्वान्पुत्रोदुर्योधनस्तव ६३ भ्रातॄणांभवतामेकोयुध्यतांगदयाम राम०
या सहदेवेनवायोत्स्येभीमेननकुलेनवा अथवाफाल्गुनेनाद्यत्वयावाभरतर्षभ योत्स्येहंसंगरंप्राप्यविजेष्येचरणाजिरे ६४ ८

© Dharmartha Trust J&K. Digitized by eGangotri

गदस्तंतांवैगदांशीघ्रंयुध्यतांहिमयासह अहमद्यगमिष्यामिवैरस्यांतंसुदुर्गमं गदयापुरुषव्याघ्रोहेमपट्टविनद्धया गदायुद्धेन
मकश्चिन्मत्सदृशोस्तीतिचिंतय गदयावोहनिष्यामिसर्वानेवसमागतान् नमेसमर्थाःसर्वेवैयोद्धुंन्यायेनकेचन ६६ नयुक्तमात्म
नावक्तुमेवंगर्वोद्धतंवचः अथवासफलंह्येतत्करिष्येभवतांपुरः ६७ अस्मिन्मुहूर्तेसत्यंवामिथ्यावैतद्भविष्यति गृह्णातुचग
दांयोवैयोत्स्यतेद्यमयासह ६८ इतिगदापर्वणि संजयउवाच एवंदुर्योधनेराजन्गर्जमानेमुहुर्मुहुः युधिष्ठिरस्यसंक्रुद्धोवासु
देवोब्रवीदिदं १ यदिनामह्ययंयुद्धेवरयेत्त्वांयुधिष्ठिर अर्जुनंनकुलंचैवसहदेवमथापिवा किमिदंसाहसंराजंस्त्वयाव्याहृतमी
दृशं एकमेवनिहत्याजौभवराजाकुरुष्विति २ एतेनहिकृतायोग्यावर्षाणीहत्रयोदश आयसेपुरुषेराजन्भीमसेनजिघांस
या ४ कथंनामभवेत्कार्यमस्माभिर्भरतर्षभ साहसंकृतवांस्त्वंतुह्यनुक्रोशान्नृपोत्तम ५ नान्यमस्यानुपश्यामिप्रतियोद्धारमा
हवे ऋतेवृकोदरात्पार्थसचनातिकृतश्रमः ६ तदिदंद्यूतमारब्धंपुनरेवयथापुरा विषमंशकुनेश्चैवतवचैवविशांपते ७ बली
भीमःसमर्थश्चकृतीराजासुयोधनः बलवान्वाकृतीवेतिकृतीराजन्विशिष्यते ८ सोयंराजंस्त्वयाशत्रुःसमेपथिनिवेशितः न्य
स्तश्चात्मासुविषमेकृच्छ्रमापादितावयं ९ कोनुसर्वान्विनिर्जित्यशत्रूनेकेनवैरिणा कृच्छ्रप्राप्तेनचतथाहारयेद्राज्यमागतं
१० नहिपश्यामितंलोकेयोद्यदुर्योधनंरणे गदाहस्तंविजेतुंवैशक्तःस्यादमरोपिहि ११ नत्वंभीमोननकुलःसहदेवोथफा

© Dharmartha Trust J&K. Digitized By eGangotri

ग०
८

फल्गुनः जेतुंन्यायेनशक्तोवैकृतीराजासुयोधनः सकथंवदसेराजंस्तुयुध्यस्वगदयेतिहि एकंचैनंनिहत्यत्वंजोभवराजेतिभारत १३
वृकोदरंसमासाद्यसंशयोवैजयेहिनः न्यायेनतोयुध्यमानानांकृतीह्येषमहाबलः १४ एकंवास्मान्निहत्यत्वंभवराजेतिवैपुनः नूनं
राज्यभोगपरापांडोः कुंत्याश्चसंततिः १५ अत्यंतंवनवासायसृष्टाभैक्ष्यायवापुनः भीमसेनउवाच मधुसूदनमाकार्षीर्विषादंयदु
नंदन १६ अद्यपारंगमिष्यामिवैरस्यभृशदुर्गमं अहंसुयोधनंसंख्येहनिष्यामिनसंशयः १७ विजयोवैध्रुवःकृष्णधर्म
राजस्यदृश्यते अधर्मेणगुरोनेयंगदागुरुतरीमम १८ नतथाधार्तराष्ट्रस्यमाकार्षीर्माधवव्यथा अहमेनंहिगदयासं
युगेयोद्धुमुत्सहे १९ भवंतःप्रेक्षकाःसर्वेममसंतुजनार्दन सामरानपिलोकांस्त्रीन्नानाशस्त्रधरान्युधि २० योधयेयंरणेकृष्ण
किमुताद्यसुयोधनं संजयउवाच तथासंभाषमाणंतुवासुदेवोवृकोदरं २१ हृष्टःसंपूजयामासवचनंचेदमब्रवीत् त्वामाश्रि
त्यमहाबाहोधर्मराजोयुधिष्ठिरः २२ निहतारिःस्वकांदीप्तांश्रियंप्राप्तोनसंशयः त्वयाविनिहताःसर्वेधार्तराष्ट्रसुतारणे २३
राजानोराजपुत्राश्चनागाश्चविनिपातिताः कलिंगामागधाःप्राच्यागांधाराःकुरवस्तथा २४ त्वामासाद्यमहायुद्धेनिहताःपां
डुनंदन हत्वादुर्योधनंचापिप्रयच्छोर्वींससागरां २५ धर्मराजायकौंतेययथाविष्णुःशचीपतेः त्वांचप्राप्यरणेपापोधार्तराष्ट्रो
विनंक्ष्यति २६ त्वमस्यसक्थिनीभंक्त्वाप्रतिज्ञांपालयिष्यसि यत्नेनतुसदापार्थयोद्धव्योधृतराष्ट्रजः २७ कृतीचबलवां

गम०
८

५२

© Dharmartha Trust J&K. Digitized By eGangotri

श्चैव युद्धे शौंडश्च नित्यदा ततस्तु मासकौ राजन् पूजयामास पांडवं २८ पांचालाः पांडवेयाश्च धर्मराजपुरोगमाः तद्दृष्ट्वा भीमसे
नस्य सर्वे एवाभ्यपूजयन् २९ ततो भीमबलो भीमो युधिष्ठिरमथाब्रवीत् स जैत्यैः सहतिष्ठंतं तपंतमिव भास्करं ३० अहमेतेन सं
गम्य संयुगे योद्धुमुत्सहे नहि शक्तो रणे जेतुं समेमपुरुषाधमः ३१ अद्य क्रोधं विमोक्ष्यामि निहितं हृदये भृशं सुयोधने धा
र्तराष्ट्रे खांडवेऽग्निमिवार्जुनः ३२ शल्यमद्योद्धरिष्यामि तव पांडव हृच्छयं निहत्य गदया पापमद्य राजन् सुखी भव ३३ अ
द्य कीर्तिमयीं मालां प्रतिमोक्ष्यन्त वानघ प्राणान् श्रियं च राज्यं च मोक्ष्यतेद्य सुयोधनः ३४ राजा चद्य तराष्ट्रोद्य श्रुत्वा पुत्रं मया
हतं स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजं ३५ इत्युक्त्वा भरतश्रेष्ठो गदामुद्यम्य वीर्यवान् उदतिष्ठत युद्धाय शक्रो वृत्रमिवाह्व
यन् ३६ तदाह्वानममृष्यन्वै तव पुत्रोऽतिवीर्यवान् प्रत्युपस्थित एवाशु मत्तो मत्तमिव द्विपं ३७ गदाहस्तं तव सुतं युद्धाय समुप
स्थितं ददृशुः पांडवाः सर्वे कैलासमिव शृंगिणं ३८ तमेकाकिनमासाद्य धार्तराष्ट्रं महाबलं वियूथमिव मातंगं समहृष्यन्त पां
डवाः ३९ न संभ्रमो न च भयं न च ग्लानिर्न च व्यथा आसीद्दुर्योधनस्यापि स्थितः सिंह इवाहवे ४० समुद्यतगदं दृष्ट्वा कैलास
मिव शृंगिणं भीमसेनस्तदा राजन् दुर्योधनमथाब्रवीत् ४१ राज्ञापि धृतराष्ट्रेण त्वया चास्मासु यत्कृतं स्मरतद्दुष्कृतं कर्म
यद्वृत्तं वारणावते ४२ द्रौपदी च परिक्लिष्टा सभामध्ये रजस्वला द्यूते यद्विजितो राजा शकुनेर्बुद्धिनिश्चयात् ४३ यानि चान्या

गा०
९

निदुष्टात्मन्मायानिकृतवानसि अनागः सु च पार्थपुत्रस्य पश्य मे हि फलं ४४ त्वत्कृते निहतः शेते शरतल्पे महायशाः गांगेयो
भरतश्रेष्ठः सर्वेषां नः पितामहः ४५ हतो द्रोणश्च कर्णश्च हतः शल्यः प्रतापवान् वैरस्य चादिकर्तासौ शकुनिर्निहतो रणे
४६ भ्रातरस्ते हताः शूराः पुत्राश्च सह सैनिकाः राजानश्च हताः शूराः समरेष्वनिवर्त्तिनः ४७ एते चान्ये च निहता बहवः क्ष
त्रियर्षभाः प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः ४८ अवशिष्टस्त्वमेवैकः कुलघ्नोऽधमपूरुषः त्वामप्यद्य हनिष्या
मि गदया नात्र संशयः ४९ अद्य तेऽहं रणे दर्पं सर्वं नाशयिता नृप राज्याशां विपुलां राजन्पांडवेषु च दुष्कृतं ५० दुर्योधन
उवाच किं कत्थितेन बहुधा युध्यस्वाद्य मया सह अद्य तेऽहं विनेष्यामि युद्धश्रद्धां वृकोदर ५१ किं न पश्यसि मां पाप गदायु
द्धे व्यवस्थितं हिमवच्छिखराकारां प्रगृह्य महतीं गदां ५२ गदिनं कोऽद्य मां पापं हंतुमुत्सहते रिपुः न्यायतो युध्यमानस्य
देवेष्वपि पुरंदरः ५३ मा वृथा गर्ज कौंतेय शारदाभ्रमिवाजलं दर्शयस्व बलं युद्धे यावत्तत्तेऽद्य विद्यते ५४ तस्य तद्वचनं श्रु
त्वा पांडवाः सह सृंजयाः सर्वे संपूजयामासुस्तद्वचो विजिगीषवः ५५ उन्मत्तमिव मातंगं तलशब्देन मानवाः भूयः संहर्ष
यामासू राजन्दुर्योधनं नृप ५६ बृंहंति कुंजरास्तत्र हया हेषंति चासकृत् शस्त्राणि संप्रदीप्यंते पांडवानां जयैषिणां
५७ इति महाभारते गदापर्वणि संजय उवाच तस्मिन्युद्धे महाराज संप्रवृत्ते सुदारुणे उपविष्टेषु सर्वेषु पांडवेषु महात्म

गा०
९

© Dharmartha Trust J&K. Digitized By eGangotri

सु १ ततस्तालध्वजो रामस्तयोर्युद्ध उपस्थिते श्रुत्वा तच्छिष्ययो राजन्नाजगाम हलायुधः २ तं दृष्ट्वा परमप्रीता पांडवाः
सहकेशवाः उपगम्योपसंगृह्य विधिवत्प्रत्यपूजयन् ३ पूजयित्वा ततः पश्चादिदं वचनमब्रुवन् शिष्ययोः कौशलं युद्धे पश्य
रामेति पार्थिव ४ अब्रवीच्च तदा रामो दृष्ट्वा कृष्णं सपांडवं दुर्योधनं च कौरव्यं गदापाणिमवस्थितं ५ चत्वारिंशदहान्यद्य
मे निःसृतस्य वै पुष्येण संप्रयातोस्मि श्रवणे पुनरागतः शिष्ययोर्वै गदायुद्धं द्रष्टुकामोस्मि माधव ततस्तदा गदाहस्तौ दुर्यो
धनवृकोदरौ ७ युद्धभूमिं गतौ वीरावुभावेव विरेजतुः ततो युधिष्ठिरो राजा परिष्वज्य हलायुधं ८ स्वागतं कुशलं चास्मै पर्यपृ
च्छद्यथातथं कृष्णौ चापि महेष्वासावभिवाद्य हलायुधं ९ सस्वजाते परिप्रीतौ प्रीयमाणौ यशस्विनौ माद्रीपुत्रौ तथा शूरौ द्रौ
पद्याः पंच चात्मजाः १० अभिवाद्य स्थिता राजन्रौहिणेयं महाबलं भीमसेनोथ बलवान्पुत्रस्तव जनाधिपः ११ तथैव चोद्यत
गदौ पूजयामासतुर्बलं स्वागतेन च ते तत्र प्रतिपूज्य समंततः १२ पश्य युद्धं महाबाहो इति ते राममब्रुवन् एवमूचुर्महात्मानं रौ
हिणेयं नराधिपाः १३ परिष्वज्य तदा रामः पांडवान्सृंजयानपि अपृच्छत्कुशलं सर्वान्पार्थिवांश्चामितौजसः १४ तथैव ते
समासाद्य पप्रच्छुस्तमनामयं प्रत्यभ्यर्च्य हली सर्वान्क्षत्रियांश्च महात्मनः १५ कृत्वा कुशलसंयुक्तां संविदं च यथावयः
जनार्दनं सात्यकिं च प्रेम्णा स परिषस्वजे १६ मूर्ध्नि चैतावुपाघ्राय कुशलं पर्यपृच्छत तौ चैनं विधिवद्राजन्पूजयामासतुर्गुरुं
१७ ब्रह्माणमिव देवेशमिंद्रोपेंद्रौ मुदान्वितौ ततोब्रवीद्धर्मसुतो रौहिणेयमरिंदम १८ इदं भ्रात्रोर्महायुद्धं पश्य रामेति भा

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

ग० रत्ने तेषां मध्ये महाबाहुः श्रीमान्केशव पूर्वजः १९ अभिविशस्तरसप्रीतः पूज्यमानो महारथैः सवभौ राजमध्यस्थो नीलवा
१० सा: सितप्रभः २० दिवीवनक्षत्रगणैः परिकीर्णो निशाकरः ततस्तयोः संनिपातस्तुमुलो लोमहर्षणः २१ आसीदन्तक
रो राजन्वैरस्य तव पुत्रयोः इति गदापर्वणि जनमेजय उवाच पूर्वमेव यदा रामस्तस्मिन्युद्ध उपस्थिते आमंत्र्य केशवं यातो वृ
ष्णिभिः सहितः प्रभुः १ साहाय्यं धार्तराष्ट्रस्य न च कर्तास्मि केशव नैव च पांडुपुत्राणां गमिष्यामि यथागतं २ एवमुक्त्वा त
दा रामो यातः शत्रुनिबर्हणः तस्य चागमनं भूयो ब्रह्मन्शंसितुमर्हसि ३ आख्याहि मे विस्तरशः कथं राम उपस्थितः क
थं च दृष्टवान्युद्धं कुशलो ह्यसि सत्तम ४ वैशं० उपप्लव्ये निविष्टेषु पांडवेषु महात्मसु प्रेषितो धृतराष्ट्रस्य समीपं मधुसूदनः
५ शमं प्रति महाबाहो हितार्थं सर्वदेहिनां स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च उक्तवान्वचनं तथ्यं हितं चैव विशेषतः न च त
त्कृतवान्राजा यथाख्यातं हि तत्पुरा ७ अनवाप्य शमं तत्र कृष्णः पुरुषसत्तमः आगच्छत महाबाहुरुपप्लव्यं जनाधिपः ८
ततः प्रत्यागतः कृष्णो धार्तराष्ट्रविसर्जितः अक्रियायां नरव्याघ्र पांडवानिदमब्रवीत् ९ न कुर्वंति वचो मह्यं कुरवः कालनो
दिताः निर्गच्छध्वं पांडवेयाः पुष्येण सहिता मया १० ततो विभज्यमानेषु बलेषु बलिनां वरः प्रोवाच भ्रातरं कृष्णं रौहिणेयो
महामनाः ११ तेषामपि महाबाहो साहाय्यं मधुसूदन क्रियतामिति तत्कृष्णो नास्य चक्रे वचस्तदा १२ ततो मन्युपरीतात्मा गम०
जगाम यदुनंदनः तीर्थयात्रां हलधरः सरस्वत्यां महायशाः १३ मैत्रनक्षत्रयोगेण सहितः सर्वयादवैः आश्रयामास भोजस्तु १०

© Dharmartha Trust J&K Digitized By eGangotri

दुर्योधनमरिंदमः १४ युयुधानेनसहितोवासुदेवस्तुपांडवान् रौहिणेये गते शूरे पुष्येणामधुसूदनः १५ पांडवेयान्पुरस्कृत्यय
यावभिमुखः कुरून् गच्छन्नेवपथिस्थस्तुरामः प्रेष्यानुवाचह १६ संभारांस्तीर्थयात्रायांसर्वोपकरणानिच आनयध्वंद्वारका
यामग्नीन्वैयाजकांस्तथा १७ सुवर्णंरजतंचैवधेनूर्वासांसिवाजिनः कुंजरांश्चरथांश्चैवखरोष्ट्रंवाहनानिच १८ क्षिप्रमानीय
तांसर्वंतीर्थहेतोः परिच्छदं प्रतिस्रोतः सरस्वत्यागच्छध्वंशीघ्रगामिनः १९ ऋत्विजश्चानयध्वंवैशतशश्चद्विजर्षभान् एवंसंदि
श्यतुप्रेष्यान्बलदेवोमहाबलः २० तीर्थयात्रांययौराजन्कुरूणांवैशसेतदा सरस्वतींप्रतिस्रोतः समंतादभिजग्मिवान् २१
ऋत्विग्भिश्चसुहृद्भिश्चतथान्यैर्द्विजसत्तमैः रथैर्गजैस्तथाश्वैश्चप्रेष्यैश्चभरतर्षभ २२ गोखरोष्ट्रप्रयुक्तैश्चयानैश्चबहुभिर्वृतः
श्रांतानांक्लांतवपुषांशिशूनांविपुलायुषां २३ देशेदेशेतुदेयानिदानानिविविधानिच अर्चायैचार्थिनांराजन्क्लृप्तानिबहु
शस्तथा २४ तानियानानिदेशेषुप्रतीक्षंतेस्मभारत बुभुक्षितानामर्थायक्लृप्तमन्नंसमंततः योयोयत्रद्विजोभोज्यंभोक्तुं
कामयतेतदा तस्यतस्यतुतत्रैवमुपजह्रुस्तदानृप तत्रतत्रस्थिताराजन्रौहिणेयस्यशासनात् भक्ष्यपेयस्यकुर्वंतिराशीं
स्तत्रसमंततः २६ वासांसिचमहार्हाणिपर्यंकास्तरणानिच पूजार्थंतत्रक्लृप्तानिविप्राणांसुखमिच्छतां २७ यत्रयः स्वप
तिविप्रः क्षत्रियोपिचभारत तत्रतत्रतुतस्यैवसर्वंक्लृप्तमदृश्यत २८ यथासुखंजनः सर्वोयातितिष्ठतिवैतदा यातुकामस्ययानानि
पानानितृषितस्यच २९ बुभुक्षितस्यचान्नानिस्वादूनिभरतर्षभ उपजह्रुर्नरास्तत्रवस्त्राण्याभरणानिच ३० सपंथाः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रभवो राजन्सर्वस्यैव सुखावहः स्वर्गोपमस्तदा वीर नराणां तत्र गच्छतां ३१ नित्यप्रमुदितोपेतः स्वादुभक्ष्यः शुभान्वितः विप
णापणपण्यानां नानाजनशतैर्वृतः ३२ नानाद्रुमलतोपेतो नानारत्नविभूषितः ततो महात्मा नियमे स्थितात्मा पुण्येषु
तीर्थेषु वसूनि राजन् ददौ द्विजेभ्यः क्रतुदक्षिणाश्च यदुप्रवीरो हलभृत्प्रतीतः ३३ दोग्ध्रीश्च धेनूश्च सहस्रशो वै सुवाससः
कांचनबद्धशृंगीः हयांश्च नानाविधदेशजातान्यानानि दासीश्च शुभान्द्विजेभ्यः ३४ रत्नानि मुक्तामणिविद्रुमं चाप्यग्र्यं सुव
र्णं रजतं सुशुद्धं अयस्मयं ताम्रमयं च भांडं ददौ द्विजातिप्रवरेषु रामः ३५ एवं स वित्तं प्रददौ महात्मा सरस्वतीतीर्थवरेषु भू
रि ययौ क्रमेणाप्रतिमप्रभावस्ततः कुरुक्षेत्रमुदारवृत्तिः ३६ जनमेजय उवाच सारस्वतानां तीर्थानां गुणोत्पत्तिं वदस्व मे
फलं च द्विपदां श्रेष्ठ कर्मनिर्वृत्तिमेव च ३७ यथाक्रमेण भगवंस्तीर्थानामनुपूर्वशः ब्रह्मन्ब्रह्मविदां श्रेष्ठ परं कौतूहलं हि मे
३८ वैशंपायन उवाच तीर्थानां विस्तरं राजन्गुणोत्पत्तिं च सर्वशः मयोच्यमानां वै पुण्यां शृणु राजेंद्र कृत्स्नशः ३९ पूर्वं महारा
ज यदुप्रवीर ऋत्विक्सुहृद्विप्रगणैश्च सार्द्धं पुण्यं प्रभासं समुपाजगाम यत्रोडुराड्यक्ष्मणा क्लिश्यमानः ४० विमुक्तशा
पः पुनराप्य तेजः सर्वं जगद्भासयते नरेंद्र एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात्तस्य ततः प्रभासः ४१ जनमेजय उवाच
कथं च भगवान्सोमो यक्ष्मणा समगृह्यत कथं च तीर्थप्रवरे तस्मिंश्चंद्रो न्यमज्जत कथमाप्लुतस्तस्मिंस्तु पुनराप्यायितः
शशी एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने ४२ वैशंपायन उवाच दक्षस्य तनया यास्ताः प्रादुरासन्विशांपते सप्तविं

© (Dharmartha Trust J&K). Digitized By eGangotri

शंतिः कन्याः दक्षः सोमायैवेददौ ४४ नक्षत्रयोगनिरताः संख्यानार्थं च ताभवन् पत्न्यो वै तस्य राजेंद्र सोमस्य शुभकर्मणः
ः तास्तु सर्वा विशालाक्ष्यो रूपेणाप्रतिमा भुवि अत्यरिच्यत तासां तु रोहिणी रूपसंपदा ४६ ततस्तस्यां स भगवान्प्रीतिं चक्रे
निशाकरः सास्य हृद्या बभूवाथ तस्मात्तां बुभुजे सदा ४७ पुरा हि सोमो राजेंद्र रोहिण्यामवसत्परं ततस्ताः कुपिताः स
र्वा नक्षत्राख्या महात्मनः ४८ ता गत्वा पितरं प्राहुः प्रजापतिमतंद्रिताः सोमो वसति नास्मासु रोहिणीं भजते सदा ४९
ता वयं सहिताः सर्वास्त्वत्सकाशे प्रजेश्वर वत्स्यामो नियताहारास्तपश्चरणतत्पराः ५० श्रुत्वा तासां तु वचनं दक्षः सोमम
थाब्रवीत् समं वर्तस्व भार्यासु मा त्वाधर्मो महान्स्पृशेत् ५१ तास्तु सर्वाब्रवीद्दक्षो गच्छध्वं शशिनोंतिकं समं वर्त्स्यति स
र्वासु चंद्रमा मम शासनात् ५२ विसृष्टास्तास्तथा जग्मुः शीतांशुभवनं तदा तथापि सोमो भगवान्पुनरेव महीपते ५३ रोहि
णीं निवसत्येव प्रीयमाणो मुहुर्मुहुः ततस्ताः सहिताः सर्वा भूयः पितरमब्रुवन् ५४ तव शुश्रूषणे युक्ता वत्स्यामो हि तवा
न्तिके सोमो वसति नास्मासु नाकरोद्वचनं तव ५५ तासां तद्वचनं श्रुत्वा दक्षः सोममथाब्रवीत् समं वर्तस्व भार्यासु मा त्वां
शप्स्ये विरोचन ५६ अनादृत्य तु तद्वाक्यं दक्षस्य भगवान् शशी रोहिण्या सार्धमवसत्ततस्ताः कुपिताः पुनः ५७ गत्वा
च पितरं प्राहुः प्रणम्य शिरसा तदा सोमो वसति नास्मासु तस्मान्नः शरणं भव ५८ रोहिण्यामेव भगवान् सदा वसति चं
द्रमाः न त्वद्वचो गणयति नास्मासु स्नेहमिच्छति ५९ तस्मान्नस्त्राहि सर्वा वै यथा नः सोम आविशेत् तच्छ्रुत्वा भगवान् क्रु

© Dharmartha Trust J&K. Digitized By eGangotri

ग०

१२ ह्योयक्ष्माणंपृथिवीयते ६० ससर्जरोषात्सोमायसचोडुपतिमाविशत्तस्ययक्ष्मणाभिभूतात्माक्षीयेताहरहः शशी ६१
यत्नंचाप्यकरोद्राजन्मोक्षार्थंतस्ययक्ष्मणः इष्टिभिर्महाराजविविधाभिर्निशाकरः ६२ नचामुच्यतशापाद्वैक्षयंचैव
वाभ्यगच्छत क्षीयमाणेततः सोमेऽस्त्वौषध्योनप्रजज्ञिरे ६३ निरास्वादरसाः सर्वाहतवीर्याश्चसर्वतः औषधीनांक्षये
जातेप्राणिनामपिसंक्षयः ६४ कृशाश्चासन्प्रजाः सर्वाः क्षीयमाणेनिशाकरे ततोदेवाः समागम्यसोममूचुर्महीपते
६५ किमिदंभवतोरूपमीदृशंनप्रकाशते कारणंब्रूहिनः सर्वंयेनेदंतेमहद्भयं ६६ श्रुत्वातुवचनंतेषांविधास्यामस्ततोव
यं एवमुक्तः प्रत्युवाचसर्वांस्ताञ्छशलक्षणः ६७ शापस्यकारणंचैवयक्ष्माणंचतथात्मनः देवास्तथावचः श्रुत्वागत्वा
दक्षमथाब्रुवन् ६८ प्रसीदभगवन्सोमेशापोऽयंविनिवर्त्यतां असौहिचंद्रमाः क्षीणः किंचिच्छेषोहिलक्ष्यते ६९ क्षयाच्चैवा
स्यदेवेशप्रजाश्चैवगताः क्षयंवीरुधौषधयश्चैवबीजानिविविधानिच ७० तेषांक्षयेक्षयोऽस्माकंविनास्माभिर्जगच्चकिं
इतिज्ञात्वालोकगुरोप्रसादंकर्तुमर्हसि ७१ एवमुक्तस्ततोदेवान्प्राहवाक्यंप्रजापतिः नैतच्छक्यंममवचोव्यावर्त्तयितु
मन्यथा ७२ हेतुनातुमहाभागानिवर्त्तिष्यतिकेनचित् समंवर्त्ततुसर्वासुशशीभार्यासुनित्यशः ७३ सरस्वत्या रा०म०
वरेतीर्थेउन्मज्जञ्छशलक्षणः पुनर्वर्धिष्यतेदेवास्तद्वैसत्यंवचोमम ७४ मासार्द्धंचक्षयंसोमोनित्यमेवगमिष्यति मा १२
सार्द्धंतुसदावृद्धिंसत्यमेतद्वचोमम ७५ समुद्रंपश्चिमंगत्वासरस्वत्यब्धिसंगमं आराधयतुदेवेशंततः कान्तिमवाप्स्यति

© Dharmartha Trust J&K. Digitized By eGangotri

७६ सरस्वतींततः सोमः सजगामर्षिशासनात् प्रभासंप्रथमंतीर्थंसरस्वत्याजगामह ७७ अमावास्यांमहातेजाः तत्रो
न्मज्जन्महाद्युतिः लोकान्प्रभासयामासशीतांशुत्वमवापच ७८ देवास्तुसर्वेराजेंद्रप्रभासंप्राप्यपुष्कलं सोमेनसहितान्भू
त्वादक्षस्यप्रमुखेभवन् ततः प्रजापतिः सर्वाविससर्जाथदेवताः सोमंचभगवान्प्रीतोभूयोवचनमब्रवीत् मावमंस्थाः स्त्रियः
पुत्रमाचविप्रान्कदाचन गच्छयुक्तः सदाभूत्वाकुरुवैशासनंमम सविसृष्टोमहाराजजगामाथस्वमालयं प्रजाश्चमुदितान्भू
त्वापुनस्तस्थुर्यथापुरा ७९ एवंतेसर्वमाख्यातंयथाशप्तोनिशाकरः प्रभासंचयथातीर्थंतीर्थानांप्रवरंमहत् ८० अमा
वास्यांमहाराजनित्यशः शशलक्षणः स्नात्वाह्याप्यायतेश्रीमान्प्रभासेतीर्थउत्तमे ८१ अतश्चैतत्प्रजानंतिप्रभासमितिभूमि
प प्रभांहिपरमांलेभेतस्मिन्नुन्मज्यचंद्रमाः ८२ ततस्तुचमसोद्भेदमच्युतस्त्वगमद्बली चमसोद्भेदइत्येवंयंजनाः कथयंत्युत
८३ तत्रदत्वाचदानानिविशिष्टानिहलायुधः उषित्वारजनीमेकांस्नात्वाचविधिवत्तदा ८४ उदपानमथागच्छत्त्वरावान्के
शवाग्रजः आद्यंस्वस्त्ययनंचैवतत्रावाप्यमहत्फलं ८५ स्निग्धत्वादोषधीनांचभूमेश्चजनमेजय यंजानंतिसिद्धाराजेंद्रन
ष्टामपिसरस्वतीं ८६ इतिगदापर्वणिबलदेवतीर्थयात्रायां वैशंपायनउवाच तस्मान्नदीगतंचापिह्युदपानंयश
स्विनः त्रितस्यचमहाराजजगामाथहलायुधः १ तत्रदत्वाबहुद्रव्यंपूजयित्वातथाद्विजान् उपस्पृश्यच तत्रैवप्र
हृष्टोमुशलायुधः २ तत्रधर्मपरोह्यासीत्त्रितः ससुमहातपाः कूपेचवसतातेनसोमः पीतोमहात्मना ३ तत्रचै

© Dharmartha Trust J&K Digitized By eGangotri

ग॰
१३ तंसमुक्त्वाऽपश्यभ्रातरौजग्मतुर्गृहान् ततस्तौवैशशापाथत्रितोब्राह्मणसत्तमः ४ जनमेजयउवाच उदपानंकथंब्रह्मन्क
थंचसुमहातपाः पतितःकिंचसंत्यक्तोभ्रातृभ्यांद्विजसत्तम ५ कूपेकथंचहित्वैनंभ्रातरौजग्मतुर्गृहान् कथंचयाजयामा
सपशोःसोमंचवैकथं ६ एतदाचक्ष्वमेब्रह्मन्श्रोतव्यंयदिमन्यसे वैशंपायनउवाच आसन्पूर्वयुगेराजन्मुनयोभ्रातरस्त्र
यः ७ एकतश्चद्वितश्चैवत्रितश्चादित्यसंनिभाः सर्वेप्रजापतिसमाःप्रजावंतस्तथैवच ८ ब्रह्मलोकजितःसर्वेतप
साब्रह्मवादिनः तेषांतुतपसाप्रीतोनियमेनदमेनच ९ अभवद्गौतमोनित्यंपिताधर्मरतःसदा सतुदीर्घेणकालेनते
षांप्रीतिमवाप्यच १० जगामभगवान्स्थानमनुरूपमथात्मनः राजानस्तस्ययेत्वासन्याज्याराजन्महात्मनः ११ तेसर्वेस्वर्ग
तेतस्मिंस्तस्यपुत्रानपूजयन् तेषांतुकर्मणाराजंस्तथाचाध्ययनेनच १२ त्रितःसश्रेष्ठतांप्रापयथैवास्यपितातथा तथा
सर्वेमहाभागामुनयःपुण्यलक्षणाः १३ अपूजयन्महाभागंयथास्यपितरंपुरा कदाचिद्धिततोराजन्भ्रातरावेकत
द्वितौ १४ यज्ञार्थंचक्रतुश्चिंतांतथावित्तार्थमेवच तयोर्बुद्धिःसमभवत्त्रितंगृह्यपरंतप १५ याज्यान्सर्वानुपादाय
प्रतिगृह्यपशून्ततः सोमंपास्यामहेहृष्टाःप्राप्ययज्ञंमहाफलं १६ चक्रुश्चैवंतथाराजन्भ्रातरस्त्रयएवच तथा
तुतेपरिक्रम्ययाज्यान्सर्वान्पशून्प्रति १७ याजयित्वाततोयाज्यान्लब्ध्वाचसुबहून्पशून् याज्येनकर्मणातेनप्रति राम॰
गृह्यविधानतः १८ प्राचींदिशंमहात्मानआजग्मुस्तेमहर्षयः त्रितस्तेषांमहाराजपुरस्ताद्यातिहृष्टवत् १९ एकत १३

© Dharmartha Trust J&K. Digitized By eGangotri

श्विहितैश्चैवपृष्ठतः कालयन्पशून् तयोश्चिंतासमभवद्दृष्ट्वापशुगणंमहत् २० कथंचस्युरिमागावश्चावाभ्यांहिविनात्रितं
तावेतौसंमाभाष्यएकतश्चद्वितश्चह २१ यदूचतुर्मिथःपापौतन्निबोधजनेश्वर त्रितोयज्ञेषुकुशलः त्रितोवेदेषुनि
ष्ठितः २२ अन्यास्तुबहुलागावस्त्रितःसमुपलप्स्यते तदावांसहितौभूत्वागाःप्रकाल्यव्रजावहे २३ त्रितोपिगच्छतांकाम
मावाभ्यांवैविनाकृतः तेषामागच्छतांरात्रौपथिस्थानेवृकोभवत् २४ तत्रकूपोविदूरेभूत्सरस्वत्यास्तटेमहान् अथत्रि
तोवृकंदृष्ट्वापथितिष्ठंतमग्रतः २५ तद्भयादपसर्पन्वैतस्मिन्कूपेपपातह अगाधेसुमहाघोरेसर्वभूतभयंकरे २६ त्रि
तस्ततोमहाराजकूपस्थोमुनिसत्तमः आर्त्तनादंततश्चक्रेतौशुश्रुवतुर्मुनी २७ तंज्ञात्वापतितंकूपेभ्रातरावेकतद्वितौ
वृकत्रासाच्चलोभाच्चसमुत्सृज्यप्रजग्मतुः २८ भ्रातृभ्यांपशुलुब्धाभ्यामुत्सृष्टःसमहातपाः उदपानेतदाराजन्निर्जलेपांसु
संवृते २९ त्रितआत्मानमालक्ष्यकूपेवीरुत्तृणावृते निमग्नंभरतश्रेष्ठनरकेदुष्कृतीयथा ३० सबुध्यागणयत्प्राज्ञोमृ
त्योर्भीतोह्यसोमपः सोमःकथंनुपातव्यइहस्थेनमयाभवेत् ३१ सएवमभिनिश्चित्यतस्मिन्कूपेमहातपाः ददर्शवीरु
धंतत्रलंबमानांयदृच्छया ३२ पांसुग्रस्तेततःकूपेविचिंत्यसलिलंमुनिः अग्नीन्संकल्पयामासहोत्रेचात्मानमेवच
३३ ततस्तांवीरुधंसोमंसंकल्प्यासुमहातपाः ऋचोयजूंषिसामानिमनसाचिंतयन्मुनिः ३४ ग्रावाणःशर्कराःकृ
त्वाप्रचक्रेभिषवंनृप आज्यंचसलिलंचक्रेभागांश्चत्रिदिवौकसां ३५ सोमस्याभिषवंकृत्वाचकारतुमुलंध्वनिं सचा

© Dharmartha Trust J&K. Digitized By eGangotri

रा० विशाद्दिवं राजसुतः शाद्वलितस्यैव ३६ समवाप्य वचं तथ तं यथोक्तं वल्लवादिभिः वर्त्तमानेन तथा पश्चात् त्रितस्य सुमहात्मनः
१४ ३७ आविग्नं त्रिदिवं सर्वं कारणं च न बुध्यते ततः सुतनुमुत्तं शब्दं शुश्रावाथ बृहस्पतिः ३८ श्रुत्वा चैवाब्रवीत्सर्वा
न्देवान्देवपुरोहितः त्रितस्य वर्त्तते यज्ञस्तत्र गच्छामहे सुराः ३९ स हि क्रुद्धः सृजेदन्यान्देवानपि महातपाः तच्छ्रुत्वा वचनं
तस्य सहिताः सर्वदेवताः ४० प्रययुस्तत्र यत्रासौ त्रितयज्ञः प्रवर्त्तते तेत्र तत्र गत्वा विबुधास्तं कूपं यत्र सेकितः ४१ द
दृशुस्तं महात्मानं दीक्षितं यज्ञकर्मसु दृष्ट्वा चैनं महात्मानं श्रिया परमया युतं ४२ ऊचुश्चाथ महाभागं प्राप्ता भागार्थिनो
वयं अथाब्रवीदृषिर्देवान्पश्यध्वं मां दिवौकसः ४३ अस्मिन्प्रतिभये कूपे निमग्नं नष्टचेतसं ततस्तितो महाराज भागां
स्तेषां यथाविधि ४४ मंत्रयुक्तान्समददत्ते च प्रीतास्तदाभवन् ततो यथाविधिप्राप्तान्भागान्प्राप्य दिवौकसः ४५ प्री
तात्मानो ददुस्तस्मै वरान्यान्मनसेच्छति स तु वव्रे वरं देवांस्त्रातुमर्हथ मामितः ४६ यश्चेहोपस्पृशेत्कूपे स सोमपगतिं ल
भेत् तत्र चोर्म्मिमती राजन्नुत्पपात सरस्वती ४७ तयोत्क्षिप्तः समुत्तस्थौ पूजयंस्त्रिदिवौकसः तथेति चोक्त्वा विबुधा जग्मू
राजन्यथागताः ४८ त्रितश्चाप्यागमत्प्रीतः स्वमेव निलयं तदा क्रुद्धस्तु स समासाद्य तावृषी भ्रातरौ तदा ४९ उवा
च परुषं वाक्यं शशाप च महातपाः पशुलुब्धौ युवां यस्मान्मामुत्सृज्य प्रधावितौ ५० तस्माद्वृकाकृती रौद्रौ दंष्ट्रिणा राम०
वभितश्चरौ भवितारौ मया शप्तौ पापेनानेन कर्मणा ५१ प्रसवश्चैव युवयोर्गोलांगूलर्क्षवानराः इत्युक्ते तु तदा तेन सत्य १४

© Dharmartha Trust J&K. Digitized by eGangotri

रागैश्चविविधाभ्यस्ते ५२ तथाप्रभूतावहूंश्चैवतांवचनात्सत्यवादिनः तत्राप्यमितविक्रांतः सहस्रोतोऽयंहलायुधः ५३ दत्वाचविविधान्दा
यान्नूजयित्वाचैवद्विजान् उदपानंचतंवीक्ष्यप्रशस्यचपुनः पुनः ५४ नदीगतमदीनात्माप्राप्तोविनशनंततः इतिगदापर्वणि वैशंपा
यनउवाच ततोविनशनाद्राजन्नाजगामाथहलायुधः शूद्राभीरान्प्रतिद्वेषाद्यत्रनष्टासरस्वती १ तस्मात्तुऋषयोनित्यंप्राहुर्विनशनेतिह
तच्चाप्युपस्पृश्यबलः सरस्वत्यांमहाबलः २ सुभूमिकंततोगच्छत्सरस्वत्यास्तटेवरे तत्रचाप्सरसः शुभ्रानित्यकालमतंद्रिता ४
ः ३ क्रीडाभिर्विमलाभिश्चक्रीडंतिविमलाननाः तत्रदेवाः सगंधर्वामासिमासिजनेश्वर ४ अभिगच्छंतितत्तीर्थंपुण्यं
ब्राह्मणसेवितं तत्रादृश्यंतगंधर्वास्तथैवाप्सरसांगणाः ५ समेत्यसहिताराजन्यथाप्राप्तंयथासुखं तत्रमोदंतिदेवाश्चपितरश्चसवी
रुधः ६ पुण्यैः पुष्पैः सदादिव्यैःकीर्यमाणाः पुनः पुनः आक्रीडभूमिःसाराजंस्तासामप्सरसांशुभा सुभूमिकेतिविख्यातासर
स्वत्यास्तटेवरे तत्रस्नात्वाचदत्वाचवसुविप्रायमाधवः ८ श्रुत्वागीतंचदिव्यंवादित्राणांचनिःस्वनं छायाश्चविपुलादृष्ट्वादेवगंध
र्वरक्षसां ९ गंधर्वाणांततस्तीर्थमागच्छद्रोहिणीसुतः विश्वावसुमुखास्तत्रगंधर्वास्तपसान्विताः १० नृत्यवादित्रगीतंचकु
र्वंतिसुमनोरमं तत्रदत्वाहलधरोविप्रेभ्योविविधंवसु अजाविकंगोखरोष्ट्रंसुवर्णंरजतंतथा भोजयित्वाद्विजान्कामैःसंतर्प्य
चमहाधनैः ११ प्रययौसहितोविप्रैःस्तूयमानश्चमाधवः तस्माद्गंधर्वतीर्थाच्चमहाबाहुररिंदमः १२ गंगाह्रदोनाममहातीर्थ
माजगामएककुंडली तत्रगर्गेणवृद्धेनतपसाभावितात्मना कालज्ञानगतिश्चैवज्योतिषांचव्यतिक्रमः उत्पातादारुणाश्च

© Dharmartha Trust J&K. Digitized By eGangotri

श्चैवभूमावासीनैर्जनमेजय १५ सरस्वत्याः शुभेतीर्थेविहितोवैमहात्मना तस्यनाम्नाचतत्तीर्थंगर्गस्रोतइतिस्मृतं १६ तत्रगर्गेमहा
भागेऋषयःसुव्रतान्नृप उपासांचक्रिरेनित्यंकालज्ञानंप्रतिप्रभो १७ तत्रगत्वामहाराजबलःश्वेतानुलेपनः विधिवद्धिधनं
दत्त्वामुनीनांभावितात्मनां १८ उच्चावचांस्तथाभक्ष्यान्विप्रेभ्योविप्रदायसः नीलवासास्ततोगच्छच्छंखतीर्थंमहायशाः १९ त
त्रापश्यन्महाशंखंमहामेरुमिवोच्छ्रितं श्वेतपर्वतसंकाशंऋषिसंघैर्निषेवितं २० सरस्वत्यास्तटेजातंनगंतालध्वजोबली य
क्षाविद्याधराश्चैवराक्षसाश्चामितौजसः २१ पिशाचाश्चामितबलायत्रसिद्धाःसहस्रशः तेसर्वेह्यशनंत्यक्त्वाफलंतस्यवन
स्पतेः २२ व्रतैश्चनियमैश्चैवकालेकालेस्मभुंजते प्राप्तैश्चनियमैस्तैस्तैर्विचरंतःपृथक्पृथक् २३ अदृश्यमानामनु
जैर्व्यचरन्पुरुषर्षभ एवंख्यातोनरव्याघ्रलोकेस्मिन्सवनस्पतिः २४ ततस्तीर्थंसरस्वत्याःपावनंलोकविश्रुतं तस्मिंश्च
यदुशार्दूलोदत्त्वातीर्थेपयस्विनीः २५ ताम्रायसानिभाण्डानिवस्त्राणिविविधानिच पूजयित्वाद्विजांश्चैवपूजितश्चत
पोधनैः २६ पुण्यंद्वैतवनंराजन्नाजगामहलायुधः तत्रगत्वामुनीन्दृष्ट्वानानावेशधरान्बलः २७ आप्लुत्यसलिलेचा गम०
पिपूजयामासवैद्विजान् तथैवदत्त्वाविप्रेभ्यःपरिभोगान्सुपुष्कलान् २८ ततःप्रायाद्बलोराजन्दक्षिणेनसरस्वतीं ग १५
त्वाचैवमहाबाहुर्नातिदूरेमहायशाः २९ धर्मात्मानागधन्वानंतीर्थमागमदच्युतः यत्रपन्नगराजस्यवासुकेःसंनिवेशनं

© Dharmartha Trust J&K. Digitized By eGangotri

३० महाद्युतेमहाराजबहुभिःपन्नगैर्वृतंऋषीणांहिसहस्राणितत्रत्रिंसंचतुर्दश ३१ यत्रदेवाःसमागम्यवासुकिंपन्नगोत्तमं
सर्वपन्नगराजानमभ्यषिंचन्यथाविधि ३२ पन्नगेभ्योभयंतत्रविद्यतेनस्मपौरव तत्रापिविधिवद्दत्वाविप्रेभ्योरत्नसंचयान् ३३
प्रायात्प्राचींदिशंतत्रतत्रयात्तीर्थान्यनेकशः सहस्रशतसंख्यानिप्रथितानिपदेपदे ३४ आप्लुत्यतेषुतीर्थेषुयथोक्तंतत्रवर्षिभिः
कृत्वोपवासनियमंदत्वादानानिसर्वशः ३५ अभिवाद्यमुनींस्तान्वैतत्रतीर्थनिवासिनः उद्दिष्टमार्गःप्रययौयत्रभूयःसरस्व
ती ३६ प्राङ्मुखंवैनिवर्तेतवृष्टिर्वातहतायथा ऋषीणांनैमिषेयाणामवेक्षार्थंमहात्मनां निवृत्तांतांसरिच्छ्रेष्ठांतत्रदृष्ट्वातु
लांगली बभूवविस्मितोराजन्बलःश्वेतानुलेपनः ३८ जनमेजयउवाच कस्मात्सरस्वतीब्रह्मन्निवृत्ताप्राङ्मुखीततः व्याख्या
तुमेतदिच्छामिसर्वमध्वर्युसत्तम ३९ कस्मिंश्चित्कारणेतत्रविस्मितोयदुनंदनः निवृत्ताहेतुनाकेनकथमेवसरिद्वरा ४० वैशं
पायनउवाच पूर्वंकृतयुगेराजन्नैमिषेयास्तपस्विनः वर्तमानेसुविपुलेसत्रेद्वादशवार्षिके ४१ ऋषयोबहवोराजंस्त
त्सत्रमभिपेदिरे उषित्वाचमहाभागास्तस्मिन्सत्रेयथाविधि ४२ निवृत्तेनैमिषेयेवैसत्रेद्वादशवार्षिके आजग्मुर्ऋषयस्तत्र
बहवस्तीर्थकारणात् ४३ ऋषीणांबहुलत्वात्तुसरस्वत्याविशांपते तीर्थानिनगरायंतेकूलेवैदक्षिणेतदा ४४ समंतपंच
कंयावत्तावत्तेद्विजसत्तमाः तीर्थलोभान्नरव्याघ्रनद्यास्तीरंसमाश्रिताः ४५ जुह्वतांतत्रतेषांतुमुनीनांभावितात्मनां स्वा
ध्यायेनातिमहताबभूवुःपूरितादिशः ४६ अग्निहोत्रैस्ततस्तेषांक्रियमाणैर्महात्मनां अशोभतसरिच्छ्रेष्ठादीप्यमानैः

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

ग० समंततः ४७ वालखिल्या महाराज अश्मकुट्टास्तथापरे दंतोलूखलिनश्चान्ये प्रसंख्यानास्तथापरे ४८ वायु
१६ भक्षा जलाहाराः पर्णभक्षाश्च तापसाः नानानियमयुक्ताश्च तथा स्थंडिलशायिनः ४९ आसन्वै मुनयस्तत्र सरस्व
त्याः समीपतः शोभयंतः सरिच्छ्रेष्ठां गंगामिव दिवौकसः ५० शतशश्च समापेतुर्ऋषयः सत्रयाजिनः तेऽवकाशं न ददृ
शुः सरस्वत्यां महाव्रताः ५१ ततो यज्ञोपवीतैस्ते तत्तीर्थं निर्ममाय वै जुहुवुश्चाग्निहोत्रांश्च चक्रुश्च विविधाः क्रियाः ५२
ततस्तमृषिसंघातं निराशं चिंतयान्वितं दर्शयामास राजेंद्र तेषामर्थे सरस्वती ५३ ततः कुंजान्बहून्कृत्वा संनिवृत्ता सरि
द्वरा ऋषीणां पुण्यतपसां कारुण्याज्जनमेजय ५४ ततो निवृत्य राजेंद्र तेषामर्थे सरस्वती भूयः प्रतीच्यभिमुखी प्रसु
स्राव सरिद्वरा ५५ अमोघा गमनं कृत्वा तेषां भूयो व्रजाम्यहं इत्यद्भुतं महच्चक्रे ततो राजन्महानदी ५६ एवं स कुंजो
राजेंद्र नैमिषीय इति स्मृतः कुरुश्रेष्ठ कुरुक्षेत्रे कुरुष्व महतीः क्रियाः ५७ तत्र कुंजान्बहून्दृष्ट्वा निवृत्तां च सरस्वतीं बभू
व विस्मयस्तत्र रामस्याथ महात्मनः ५८ उपस्पृश्य तु तत्रापि विधिवद्यदुनंदनः दत्वा दायान्द्विजातिभ्यो भांडानि विविधा
नि च ५९ भक्ष्यं भोज्यं च विविधं ब्राह्मणेभ्यः प्रदाय च ततः प्रायाद्बलो राजन्पूज्यमानो द्विजातिभिः ६० सरस्वतीतीर्थ राम०
वरं नानाद्विजगणायुतं वदरैरिंगुदैः काश्मर्यैः प्लक्षाश्वत्थविभीतकैः ६१ कंकोलैश्च पलाशैश्च करीरैः पीलुभिस्तथा स १६
रस्वतीतीररुहैर्वंधनैः स्यंदनैस्तथा ६२ करूषकवरैश्चैव बिल्वैराम्रातकैस्तथा अतिमुक्तकखंडैश्च पारिजातैश्च

© Dharmartha Trust J&K. Digitized by eGangotri

घोभितं ६३ कदलीवनभूयिष्ठंदृष्टिकान्तंमनोहरं वाय्वंबुफलपर्णादैर्दन्तोलूखलिकैरपि ६४ तथाश्मकुट्टैर्वानेयैर्मुनि
भिर्बहुभिर्वृतं स्वाध्यायघोषसंघुष्टंमृगयूथशताकुलं ६५ अहिंस्रैर्धर्मपरमैर्नृभिरत्यर्थसेवितं सप्तसारस्वतंतीर्थमाज
गामहलायुधः ६६ यत्रमंकणकः सिद्धस्तपस्तेपेमहामुनिः इतिगदापर्वणि जनमेजयउवाच सप्तसारस्वतंकस्मात्कश्च
मंकणकोमुनिः कथंसिद्धः सभगवान्कश्चास्यनियमोभवत् १ कस्यवंशेसमुत्पन्नः किंचाधीतंद्विजोत्तम एतदिच्छाम्य
हंश्रोतुंविधिवद्द्विजसत्तम २ वैशंपायनउवाच राजन्सप्तसरस्वत्यायाभिर्व्याप्तमिदंजगत् आहूताबलवद्भिर्हितत्रतत्रस
रस्वती ३ सुप्रभाकांचनाक्षीचविशालाचमनोरमा सरस्वतीचौघवतीसुरेणुर्विमलोदका ४ पितामहस्यमहतोवर्त्तमाने
महामखे वितेतेयज्ञवाटेचसंसिद्धेषुद्विजातिषु ५ पुण्याहघोषैर्विमलैर्वेदानांनिनदैस्तथा देवेषुचैवव्यग्रेषुतस्मिन्म
हविधौतदा ६ तत्रैवचमहाराजदीक्षितेप्रपितामहे यजतस्तस्यसत्रेणसर्वकामसमृद्धिना ७ मनसाचिंतिताह्यर्थाधर्मा
र्थकुशलैस्तदा उपतिष्ठंतिराजेंद्रद्विजातीस्तत्रतत्रह ८ जगुश्चतत्रगंधर्वाननृतुश्चाप्सरोगणाः वादित्राणिचदिव्यानिवा
दयामासुरंजसा ९ तस्ययज्ञस्यसंपत्त्यातुतुषुर्देवताअपि विस्मयंपरमंजग्मुः किमुमानुषयोनयः वर्त्तमानेतथायज्ञेपु
ष्करस्थेपितामहे अब्रुवन्नृषयोराजन्नायंयज्ञोमहागुणः ११ नदृश्यतेसरिच्छ्रेष्ठायस्मादिहसरस्वती तच्छ्रुत्वाभगवान्प्रीतः
ससाराथसरस्वती १२ पितामहेनयजताआहूतापुष्करेषुवै सुप्रभानामराजेंद्रनाम्ना तत्रसरस्वती तांदृष्ट्वामुनयस्तुष्टास्त्व

ग० १७

एयुक्तासरस्वती पितामहंमानयंतीक्रतुंतेवद्ध्वमेनिरे १४ एवमेषासरिच्छ्रेष्ठापुष्करेषुसरस्वती पितामहार्थंसंभूतातुष्ट्यर्थंच
मनीषिणां १५ नैमिषेमुनयोराजन्समागम्यसमासते तत्रचित्राःकथाह्यासन्वेदंप्रतिजनेश्वर १६ यत्रतेमुनयोह्यासन्ना
नास्वाध्यायवेदिनः तेसमागम्यमुनयःसस्मरुर्वैसरस्वती १७ साचध्याताम्महाराजऋषिभिःसत्रयाजिभिः समागतानांराजें
द्रमहापार्थमहात्मनां १८ आजगाममहाभागातत्रपुण्यासरस्वती नैमिषेकांचनाक्षीतुमुनीनांसत्रयाजिनां १९ आग
तासरितांश्रेष्ठातत्रभारतपूजिता गयस्ययजमानस्यगयेष्वेवमहाक्रतुं २० आहूतासरितांश्रेष्ठागययज्ञेसरस्वती विशाला
तुगयस्याहुऋषयःसंशितव्रताः सरित्साहिमवत्पार्श्वात्प्रस्तुताशीघ्रगामिनी औद्दालकेस्तथायज्ञेयजतस्तस्यभा
रत २२ समेतेसर्वतःस्फीतेमुनीनांमंडलेतदा उत्तरेकोशलाभागेपुण्येराजन्महात्मनः २३ उद्दालकेनयजतापूर्वं
ध्यातासरस्वती आजगामसरिच्छ्रेष्ठातंदेशमृषिकारणात् पूज्यमानामुनिगणैर्वल्कलाजिनसंवृतैः मनोरमेतिविख्या
तासाहितैर्मनसाकृता २५ सुरेणुऋषभेद्वीपेपुण्येराजर्षिसेविते कुरोश्चयजमानस्यकुरुक्षेत्रेमहात्मनः २४ आजगा
ममहाभागासरिच्छ्रेष्ठासरस्वती ओघवत्यपिराजेंद्रवसिष्ठेनमहात्मना २७ समाहूताकुरुक्षेत्रेदिव्यतोयासरस्वती दक्षे
णयजताचापिगंगाद्वारेसरस्वती २८ सुरेणुरितिविख्याताप्रस्तुताशीघ्रगामिनी विमलोदाभगवतीब्रह्मणायजतापु
नः २९ समाहूताययौतत्रपुण्येहैमवतेगिरौ एकीभूतास्ततस्तास्तुतस्मिंस्तीर्थेसमागताः ३० सप्तसारस्वतंतीर्थंतत

गम० १७

© (c) Dhaantar Trust. J&K. Digitized By eGangotri

सुप्रथितं भुवि इति चैव सरस्वत्यो नामतः परिकीर्तिताः ३१ सप्तसारस्वतं चैव तीर्थं पुण्यं तथा स्मृतं श्रृणु मंकणकस्यापि कौमार
ब्रह्मचारिणः ३२ आपगामवगाहस्य राजन्प्रक्रीडितं महत् दृष्ट्वा यदृच्छया तत्र स्त्रियमंभसि भारत ३३ स्नायंतीं रुचिरापांगीं दिग्वा
ससमनिंदितां सरस्वत्यां महाराज चस्कंद वीर्यमंभसि ३४ तद्रेतः स तु जग्राह कलशे वै महातपाः सप्तधा प्रविभागं तु कलशस्थं
जगाम ह ३५ तत्रर्षयः सप्त जाता जज्ञिरे मरुतां गणाः वायुवेगो वायुबलो वायुहा वायुमंडलः ३६ वायुज्वालो वायुरेता वा
युचक्रश्च वीर्यवान् एवमेते समुत्पन्ना मरुतां जनयिष्णवः ३७ इदमत्यद्भुतं राजन्शृण्वाश्चर्यतरं भुवि महर्षेश्चरितं यादृक्त्रिषु
लोकेषु विश्रुतं ३८ पुरा मंकणकः सिद्धः कुशाग्रेणेति नः श्रुतं क्षतः किल करे राजंस्तस्य शाकरसोऽस्रवत् ३९ स वै शाकरसं
दृष्ट्वा हर्षाविष्टः प्रनृत्तवान् ततस्तस्मिन्प्रवृत्ते तु स्थावरं जंगमं च यत् ४० प्रनृत्तमुभयं वीर तेजसा तस्य मोहितं ब्रह्मादिभिः सुरै
राजनृषिभिश्च तपोधनैः ४१ विज्ञप्तो वै महादेव ऋषेरर्थे नराधिप नायं नृत्येद्यथा देव तथा त्वं कर्तुमर्हसि ४२ ततो देवो मुनिं
दृष्ट्वा हर्षाविष्टमतीव ह सुराणां हितकामार्थं महादेवोऽभ्यभाषत ४३ भो भो ब्राह्मण धर्मज्ञ किमर्थं नृत्यते भवान् हर्षस्थानं कि
मर्थं च तवेदमधिकं मुने ४४ तपस्विनो धर्मपथे स्थितस्य द्विजसत्तम ऋषिरुवाच किं न पश्यसि मे ब्रह्मन्कराच्छाकरसं स्रुतं ४५
४५ यं दृष्ट्वाहं प्रनृत्तो वै हर्षेण महता विभो तं प्रहस्याब्रवीद्देवो मुनिं रागेण मोहितं ४६ अहं न विस्मयं विप्र गच्छामीति प्रपश्य मां
एवमुक्त्वा मुनिश्रेष्ठं महादेवेन धीमता ४७ अंगुल्यग्रेण राजेंद्र स्वांगुष्ठस्ताडितोऽभवत् ततो भस्म क्षताद्राजन्निर्गतं हिमसं

© Dharmartha Trust J&K. Digitized By eGangotri

ग० १८

निमे ४८ तद्दृष्ट्वाश्रीदितोराजन्समुनिः पार्श्वमागतः मेनेदेवंमहादेवंरुद्रस्चोवाचविस्मितः मामद्यदेवासहंमन्येमुद्वाम्यरतंरमरु
त् सुरासुरस्यजगतोगतिस्त्वमसिमूलकृत् ५० त्वयासृष्टमिदंविश्वंवदंतीहमनीषिणः त्वामेवसर्वंविशतिपुनरेवयुगक्षये
५१ देवैरपिनशक्यस्त्वंपरिज्ञातुंकुतोमया त्वयिसर्वंस्मदृश्यंतेभावायेजगतिस्थिताः ५२ त्वामुपासंतवरदंदेवाब्रह्मादयोन
घ सर्वस्त्वमसिदेवानांकर्त्ताकारयिताचह ५३ त्वत्प्रसादात्सुराः सर्वेमोदंतीहाकुतोभयाः एवंस्तुत्वामहादेवंसब्रह्मर्षिःप्रणतो
भवत् ५४ यदिदंच्यापलंदेवकृतमेतत्स्मयादिकं ततः प्रसादयामित्वांनपोमेनक्षरेदिति ५५ ततोदेवः प्रीतमनास्तमृषिं
पुनरब्रवीत् तपस्तेवर्धतांविप्रमत्प्रसादात्सहस्रधा ५६ आश्रमेचेहवत्स्यामित्वयासार्धमहंसदा सप्तसारस्वतेचास्मिन्यो
मामर्चिष्यतेनरः ५७ नतस्यदुर्लभंकिंचिदिह्वितिहपरत्रवा सारस्वतंचतेलोकंगमिष्यतिनसंशयः ५८ एतन्मंकणकस्या
पिचरितंमरितेजसः सहिपुत्रः सुकन्यायामुत्पन्नोमातरिश्वना ५९ इतिगदापर्वणितीर्थयात्रायां वै०शं० उषित्वातत्ररामस्तु
संपूज्याश्रमवासिनः तथामंकणकेप्रीतिंशुभांचक्रेहलायुधः १ दत्वादानंद्विजातिभ्योरजनींतामुपोष्यच पूजितोमुनिसं
घैश्चप्रातरुत्थायलांगली २ अनुज्ञाप्यमुनीन्सर्वान्स्पृष्ट्वातोयंचभारत प्रययौत्वरितोरामस्तीर्थहेतोर्महाबलः ततस्त्वौश
नसंतीर्थमाजगामहलायुधः कपालमोचनंनामयत्रमुक्तोमहामुनिः ४ महत्याशिरसाराजन्ग्रस्तजंघोमहोदरः राक्षसस्य
महाराजरामक्षिप्तस्यवैपुरा ५ तत्रपूर्वंतपस्तप्तंकाव्येनसुमहात्मना यत्रास्यनीतिरखिलाप्रादुर्भूतामहात्मनः ६ यत्रस्थश्चिं

गप० १८

© (Oh)Dharmartha Trust J&K. Digitized By eGangotri

तर्पयामास देवस्य दानवविग्रहं तत्राप्यच्चवलो राजन्तीर्थप्रवरमुत्तमं ७ विधिवद्देदं दौ वित्तं ब्राह्मणानां महात्मनां जनमे
जय उवाच कपालमोचनं ब्रह्मन्कथं पत्र महामुनिः ८ मुक्तः कथं चास्य शिरो लग्नं केन च हेतुना वैशंपायन उवाच पु
रा वै दंडकारण्ये राघवेन महात्मना ९ वसता राजशार्दूल राक्षसान् शममपि पश्यता जनस्थाने शिरश्छिन्नं राक्षसस्य दुरात्म
नः १० क्षुरेणाभिनिधारेण उत्पपात महावने महोदरस्य तल्लग्नं जंघायां वै यदृच्छया ११ वने विचरतो राजन्नास्थि भि
त्त्वास्फुरत्तदा संतेन लग्नेन तदा हि द्विजातिर्न शशाक ह १२ अभिगंतुं महाप्राज्ञस्तीर्थान्यायतनानि च सपूतिना विस्रवता
वेदनार्तो महामुनिः १३ जगाम सर्वतीर्थानि पृथिव्यां चेति नः श्रुतं स गत्वा सरितः सर्वाः समुद्रांश्च महातपाः १४
कथयामास तत्सर्वं ऋषीणां भावितात्मनां आप्लुतः सर्वतीर्थेषु न च मोक्षमवाप्नुयात् १५ स तु शुश्राव विप्रेंद्रो मु
नीनां वचनं महत् सरस्वत्यास्तीर्थवरं ख्यातं मौशनसं तदा १६ सर्वपापप्रशमनं सिद्धिक्षेत्रमनुत्तमं स तु गत्वा तत
स्तत्र तीर्थमौशनसं द्विजः १७ ततश्चौशनसे तीर्थे तस्योपस्पृशतस्तदा तच्छिरश्चरणं मुक्त्वापपातांतर्जले तदा
१८ विमुक्तस्तेन शिरसा परं सुखमवाप ह स चाप्यंतर्जले मग्नो जगामादर्शनं विभो १९ ततः स विशिरा राजन्पूता
त्मा वीतकल्मषः आजगामाश्रमं प्रीतः कृतकृत्यो महोदरः २० सोऽथ गत्वाश्रमं पुण्यं विप्रमुक्तो महातपाः कथ
यामास तत्सर्वं ऋषीणां भावितात्मनां २१ ते श्रुत्वा वचनं तस्य ततस्तीर्थस्य मानद कपालमोचनमिति नाम चक्रुः स

© (D)hanvantari Trust, J&K; Digitized By eGangotri

ग० समागताः २२ सचापितीर्थप्रवरंपुनर्गत्वामहानृषिः पीत्वापयःसुविपुलंसिद्धिमायात्तदामुनिः २३ तत्रदत्वावसून्दाया
१९ न्विप्रान्कंसघ्नमाधवः जगामवृष्णिप्रवरोरुषङ्गोराश्रमंतदा २४ यत्रतेपेतपोघोरमार्ष्टिषेणोनभारत ब्राह्मण्यंलब्धवांस्त
त्रविश्वामित्रोमहामुनिः २५ सर्वकामसमृद्धंचतदाश्रमपदंमहत् मुनिभिर्ब्राह्मणैश्चैवसेवितंसर्वदाविभो २६ ततोह
लधरःश्रीमान्ब्राह्मणैःपरिवारितः जगामतत्रराजेंद्ररुषङ्गुस्तनुमत्यजत् २७ रुषङ्गुर्ब्राह्मणोवृद्धस्तपोनित्यश्चभा
रत देहन्यासकृतमनाविचिंत्यबहुधातदा २८ ततःसर्वानुपादायतनयान्वैमहातपाः रुषंगुरब्रवीत्तत्रनयध्वंमांपृथूद
क २९ विज्ञायातीतवयसंरुषंगुंतेतपोधनाः तंचतीर्थमुपानिन्युःसरस्वत्यास्तपोधनं ३० सतैःपुत्रैस्तदाधीमा
नानीतोवैसरस्वतीं पुण्यांतीर्थशतोपेतांविप्रसंघैर्निषेवितां ३१ राजन्नाप्लुत्यसुमहातपाः ज्ञात्वातीर्थवरांश्चै
वप्राहेदमृषिसत्तमः ३२ सुप्रीतःपुरुषव्याघ्रःसर्वान्पुत्रानुपासितः सरस्वत्युत्तरेतीरेयस्त्यजेदात्मनस्तनुं ३३ पृथू
दकेजप्यपरोनैनंश्वोमरणंतपेत् तत्रास्नुत्यसधर्मात्माउपस्पृश्यहलायुधः दत्वाचैववसून्दायान्विप्राणांविप्रवत्स
लः ससर्जयत्रभगवान्लोकांल्लोकपितामहः ३५ यत्रार्ष्टिषेणःकौरव्यब्राह्मण्यंसंशितव्रतः तपसामहताराजन्प्राप्त ग०
वानृषिसत्तमः ३६ सिंधुद्वीपश्चराजर्षिर्देवापिश्चमहातपाः ब्राह्मण्यंलब्धवान्यत्रविश्वामित्रस्तथामुनिः ३७ महातप १९
स्वीभगवानुग्रतेजामहातपाः तत्राजगामबलवान्बलभद्रःप्रतापवान् ३८ इतिगदापर्वणि जनमेजयउवाच कथमा

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टिषेणोभगवान्विपुलंतप्तवांस्तपः सिंधुद्वीपः कथंचापिब्राह्मण्यंलब्धवांस्तथा १ देवापिश्चकथंब्रह्मन्विश्वामित्रश्चसत्तम त
न्ममाचक्ष्वभगवन्परंकौतूहलंहिमे २ वैशंपायनउवाच पुराकृतयुगेराजन्नार्ष्टिषेणोद्विजोत्तमः वसन्गुरुकुलेनित्यंनित्यम
ध्ययनेरतः ३ तस्यराजन्गुरुकुलेवसतोनित्यमेवच समाप्तिंनागमद्विद्यानापिवेदाविशांपते ४ सनिर्विण्णस्ततोराजंस्तपस्तेपे
महातपाः ततोवैतपसातेनप्राप्यवेदाननुत्तमान् ५ सविद्वान्वेदयुक्तश्चसिद्धश्चाप्यृषिसत्तमः तत्रतीर्थेवरान्प्रादात्त्रीनेव
सुमहातपाः ६ अस्मिंस्तीर्थेमहानद्याअद्यप्रभृतिमानवः आप्लुतोवाजिमेधस्यफलंप्राप्स्यतिपुष्कलं ७ अद्यप्रभृति
नैवात्रभयंव्यालाद्भविष्यति अपिचाल्पेनकालेनफलंप्राप्स्यतिपुष्कलं ८ एवमुक्त्वामहातेजाजगामत्रिदिवंमुनिः
एवंसिद्धःसभगवानार्ष्टिषेणःप्रतापवान् ९ तस्मिन्नेवतदातीर्थेसिंधुद्वीपःप्रतापवान् देवापिश्चमहाराजब्राह्मण्यं
प्रापतुर्महत् १० तथाचकौशिकस्ताततपोनित्योजितेंद्रियः तपसावैसुतप्तेनब्राह्मणत्वमवाप्तवान् ११ गाधिर्नाममहा
नासीत्क्षत्रियःप्रथितोभुवि तस्यपुत्रोभवद्राजन्विश्वामित्रःप्रतापवान् १२ सराजाकौशिकस्तातमहायोग्यभवत्किल सपु
त्रमभिषिच्याथविश्वामित्रंमहातपाः १३ देहन्यासेमनश्चक्रेतमूचुःप्रणताःप्रजाः नगंतव्यंमहाप्राज्ञत्राहिचास्मान्महाभया
त् १४ एवमुक्तःप्रत्युवाचततोगाधिःप्रजास्ततः विश्वस्यजगतोगोप्ताभविष्यतिसुतोमम १५ इत्युक्त्वातुततोगाधिर्विश्वामि
त्रंनिवेश्यच जगामत्रिदिवंराजन्विश्वामित्रोभवन्नृपः १६ नसशक्नोतिपृथिवींयत्नवानपिरक्षितुं ततःशुश्रावराजासरा

Dharmartha Trust J&K. Digitized by eGangotri

ग० क्षेमेभ्यो महाभयं २७ निर्ययौ नगराच्चापि चतुरंगबलान्वितः स गत्वा दूरमध्वानं वसिष्ठाश्रममभ्ययात् २८ तस्य ते सैनि
२० काराजंश्चक्रुस्तत्रानयान्बहून् ततस्तु भगवान्विप्रो वसिष्ठाश्रममभ्ययात् २९ ददृशेऽथ ततः सर्वं भज्यमानं महावलं तस्य
क्रुद्धो महाराज वसिष्ठो मुनिसत्तमः ३० सृजस्व शबरान्घोरानिति स्वां गामुवाच ह तथोक्ता सासृजद्धेनुः पुरुषान्घोरदर्श
नान् ३१ ते च तद्बलमासाद्य बभंजुः सर्वतो दिशं तद्दृष्ट्वा विद्रुतं सैन्यं विश्वामित्रस्तु गाधिजः ३२ तपः परं मन्यमानस्तपसे
व मनो दधे सोऽस्मिंस्तीर्थवरे राजन्कृशस्त्वन्नाः समाहितः ३३ नियमैश्चोपवासैश्च कर्षयन्देहमात्मनः जलाहारो वायुभक्ष
: पर्णाहारश्च सोऽभवत् ३४ तथा स्थंडिलशायी च ये चान्ये नियमाः पृथक् असकृत्तस्य देवास्तु व्रतविघ्नं प्रचक्रिरे ३५
न चास्य नियमाद्बुद्धिरपयाति महात्मनः ततः परेण यत्नेन तप्त्वा बहुविधं तपः ३६ तेजसा भास्कराकारो गाधिजः सम
पद्यत तपसा तु तथा युक्तं विश्वामित्रं पितामहः ३७ अमन्यत महातेजा वरदो वरमस्य तत् स तु वव्रे वरं राजन्स्यामहं ब्राह्म
णस्त्विति ३८ तथेति चाब्रवीद्ब्रह्मा सर्वलोकपितामहः स लब्ध्वा तपसोग्रेण ब्राह्मणत्वं महायशाः ३९ विचचार महीं कृ राम०
त्स्नां कृतकामः सुरोपमः तस्मिंस्तीर्थवरे रामः प्रदाय विविधं वसु ४० पयस्विनीस्तथा धेनूर्यानानि शयनानि च अथ वस्त्राण्य २०
लंकारं भक्ष्यं पेयं च शोभनं ४१ अददन्मुदितो राजन्पूजयित्वा द्विजोत्तमान् ययौ राजंस्ततो रामो बकस्याश्रममंतिकात् ४२
यत्र तेपे तपस्तीव्रं दाल्भ्यो बक इति श्रुतिः इति गदापर्वणि वैशंपायन उवाच ब्रह्मयोनेरवाकीर्णाज्जगाम यदुनंदनः यत्र दा॥

© (c) Dharmartha Trust J&K Digitized By eGangotri

ल्भ्योवकोराजन्नाश्रमस्थोमहातपाः १ जुहावधृतराष्ट्रस्यराष्ट्रंवैचित्रवीर्यिणः तपसाघोररूपेणकर्षयन्देहमात्मनः २ क्रो
धेनमहताविष्टोधर्मात्मावैप्रतापवान् पुराहिनैमिषीयाणांसत्रेद्वादशवार्षिके ३ वृत्तेविश्वजितोन्तेवैपंचालानृषयोगमन्
तत्रेश्वरमयाचंतदक्षिणार्थंमनीषिणः ४ बलान्वितान्वत्सतरान्निर्व्याधीनेकविंशतिं तानब्रवीद्वकोदाल्भ्योविभजध्वंपशू
निति ५ पशूनेतानहंत्यक्त्वाभिक्षिष्येराजसत्तमं एवमुक्त्वाततोराजन्नृषीन्सर्वान्प्रतापवान् ६ जगामधृतराष्ट्रस्यभवनं
ब्राह्मणोत्तमः ससमीपगतोभूत्वाधृतराष्ट्रंजनेश्वरं ७ अयाचतपशून्दाल्भ्यः सचैनंरुषितोब्रवीत् यदृच्छयामृतादृष्ट्वा
गास्तदानृपसत्तमः ८ एतान्पशून्नयक्षिप्रंब्रह्मबंधोयदीच्छसि ऋषिस्त्वथवचः श्रुत्वाचिंतयामासधर्मवित् ९ अ
होवतनृशंसंवैवाक्यमुक्तोस्मिसंसदि चिंतयित्वामुहूर्तंचरोषाविष्टोद्विजोत्तमः १० मतिंचक्रेविनाशायधृतराष्ट्रस्यभूपते
: सउत्कृत्यमृतानांवैमांसानिमुनिसत्तमः ११ जुहावधृतराष्ट्रस्यराष्ट्रंनरपतेःपुरा अवकीर्णेसरस्वत्यास्तीर्थेप्रज्वाल्यपा
वकं १२ वकोदाल्भ्योमहाराजनियमंपरमास्थितः सतैरेवजुहावास्यराष्ट्रंमांसैर्महातपाः १३ तस्मिंस्तुविधिवत्सत्रेसंप्र
वृत्तेसुदारुणे अक्षीयतततोराष्ट्रंधृतराष्ट्रस्यपार्थिव १४ ततः प्रक्षीयमाणंतद्राष्ट्रंतस्यमहीपतेः छिद्यमानंयथानं
तंवनंपरशुनाविभो १५ वभूवापहृतंतच्चाप्यवकीर्णमचेतनं दृष्ट्वातथावकीर्णंतुराष्ट्रंसमनुजाधिपः १६ वभूवदुर्मना
राजंश्चिंतयामासचप्रभुः मोक्षार्थमकरोद्यत्नंब्राह्मणैःसहितःपुरा १७ नचश्रेयोध्यगच्छत्तुक्षीयतेराष्ट्रमेवच यदासपा

© (0) Dharmartha Trust J&K. Digitized By eGangotri

ग० थिवः खिन्नः तत विप्रास्तदानघ १८ यदा वापि न शक्नोति राष्ट्रं मोक्षयितुं नृपः अर्थ्यैर्वैप्राश्निकांस्तत्र पप्रछ जनमेजय
२१ ततो वैप्राश्निकाः प्राहुः पशुर्विप्रः कृतस्त्वया १९ मांसैरभिजुहोतीति तव राष्ट्रं मुनिर्बकः तेन ते हूयमानस्य राष्ट्रस्यास्य क्ष
यो महान् २० तस्यैतत्तपसः कर्म येन ते ह्यनयो महान् अपां कुंजे सरस्वत्यास्तं प्रसादय पार्थिव २१ सरस्वतीं ततो गत्वा
स राजा बकमब्रवीत् निपत्य शिरसा भूमौ प्रांजलिर्भरतर्षभ २२ प्रसादये त्वां भगवन्नपराधं क्षमस्व मे मम दीनस्य लुब्ध
स्य मौर्ख्येन हतचेतसः २३ त्वं गतिस्त्वं च मे नाथः प्रसादं कर्तुमर्हसि तं तथा विलपंतं तु शोकोपहतचेतसं २४ दृष्ट्वा
तस्य कृपा जज्ञे राष्ट्रं तच्च व्यमोचयत् ऋषिः प्रसन्नस्तस्याभूत्संरंभं च विहाय सः २५ मोक्षार्थं तस्य राज्यस्य जुहाव पुनरा
हुतिं मोक्षयित्वा ततो राष्ट्रं प्रतिगृह्य पशून् बहून् २६ हृष्टात्मा नैमिषारण्यं जगाम पुनरेव च धृतराष्ट्रोपि धर्मात्मा
स्वस्थचेता महामनाः २७ स्वमेव नगरं राजा प्रतिपेदे महर्धिमत् तत्र तीर्थे महाराज बृहस्पतिरुदारधीः २८ असुरा
णामभावाय भवाय च दिवौकसां मांसैरभिजुहावेष्टिमक्षीयंत ततोसुराः २९ दैवतैरपि संभग्ना जितकाशिभिराहवे
तत्रापि विधिवद्दत्वा ब्राह्मणेभ्यो महायशाः वाजिनः कुंजरांश्चैव रथांश्चाश्वतरीयुतान् रत्नानि च महार्हाणि धने ग०
धान्यं च पुष्कलं ३० ययौ तीर्थं महाबाहुर्यायातं पृथिवीपते तत्र यज्ञे ययातेश्च महाराज सरस्वती ३१ सर्पिः पयश्च २१
सुस्राव नाहुषस्य महात्मनः तत्रेष्ट्वा पुरुषव्याघ्रो ययातिः पृथिवीपतिः ३२ आक्रामदूर्ध्वं मुदितो लेभे लोकांश्च

२११

© Dharmartha Trust J&K. Digitized by eGangotri

पुष्करान् पुनस्तत्रचराजंस्तुपपातेर्यजतः प्रभो ३३ औदार्यंपरमंकृत्वाभक्तिंचात्मनिशाश्वतीं ददौकामान्ब्राह्मणेभ्यो
यान्यान्योमनसेच्छति ३४ याचतश्चिन्तितान्स्वरत्राहूतोयत्तेसरोरे तस्यतस्यसरिच्छ्रेष्ठागृहादिशयनादिकं ३५ यत्रसेनो
जनेचैवदानानिविविधानिबहून् तेमन्यमानाराजंस्तुसंप्रदानमनुत्तमं ३६ राजानंतुष्टुवुःप्रीतादत्वाचैवाशिषःशुभाः तत्र
देवाःसगंधर्वाःप्रीतायज्ञस्यसंपदा ३७ विस्मितामानुषाश्चासन्दृष्ट्वातांयज्ञसंपदं ततस्तालकेतुर्महाधर्मकेतुर्म
हात्माकृतात्मामहादाननित्यः वसिष्ठापवाहंमहाभीमवेगंमहात्माकृतात्मासमभ्याजगाम ३८ इतिगदापर्वणि
जनमेजयउवाचवसिष्ठस्यापवाहोवैभीमवेगःकथंनुसः किमर्थंचसरिच्छ्रेष्ठातमृषिंप्रत्यवाहयत् १ कथमस्या
भवद्वैरंकारणंकिंचतत्प्रभो शंसपृष्टोमहाप्राज्ञनहितृप्यामिकथ्यतां २ वैशंपायनउवाच विश्वामित्रस्यविप्रर्षेर्वसि
ष्ठस्यचभारत भृशंवैरमभूद्राजंस्तपस्स्पर्द्धाकृतंमहत् ३ आश्रमोवैवसिष्ठस्यस्थाणुतीर्थेभवन्महान् पूर्वतःपार्श्व
तश्चासीद्विश्वामित्रस्यधीमतः ४ यत्रस्थाणुर्महाराजतप्तवान्परमंतपः यत्रास्यकर्मतद्घोरंप्रवदंतिमनीषिणः ५
यत्रेष्ट्वाभगवान्स्थाणुःपूजयित्वासरस्वतीं स्थापयामासतत्तीर्थंस्थाणुतीर्थमितिप्रभो ६ तत्रतीर्थेसुराःस्कंदमभ्यषिं
चन्नराधिप सैनापत्येनमहतासुरारिविनिवर्हणं ७ तस्मिन्सारस्वतेतीर्थेविश्वामित्रोमहामुनिः वसिष्ठंचालयामास
तपसोग्रेणतच्छृणु ८ विश्वामित्रवसिष्ठौतावहन्यहनिभारत स्पर्धांतपःकृतांतीव्रंचक्रतुस्तौतपोधनौ ९ तत्राप्यधि

© (c) Dhaanantari Trust. & Digitized By eGangotri

रा० कसंतापोविश्वामित्रोमहामुनिः दृष्ट्वातेजोवसिष्ठस्यचिंतामतिजगामह १० तस्यबुद्धिरियंह्यासीद्धर्मेनित्यस्यभारत इ
९२ यंसरस्वतीतरंगैर्मत्समीपंतपोधनं ११ आनयिष्यतिवेगेनवसिष्ठंजपतांवरं इहागतंद्विजश्रेष्ठंहनिष्यामिनसंशयः
१२ एवंनिश्चित्यभगवान्विश्वामित्रोमहामुनिः सस्मारसरितांश्रेष्ठांक्रोधसंरक्तलोचनः १३ साध्यातामुनिनातेनव्या
कुलत्वंजगामह जज्ञेचैनंमहावीर्यंमहाकोपंचभाविनी १४ ततएनंवेपमानाविवर्णाप्रांजलिस्तदा उपतस्थेमु
निवरंविश्वामित्रंसरस्वती १५ हतवीरायथानारीसाभवद्दुःखिताभृशं ब्रूहिकिंकरवाणीतिप्रोवाचमुनिसत्तमं
१६ तामुवाचमुनिःक्रुद्धोवसिष्ठंशीघ्रमानय यावदेनंनिहन्म्यद्यतच्छ्रुत्वाव्यथितानदी १७ प्रांजलिंतुततःकृत्वापु
ण्डरीकनिभेक्षणा प्राकंपतभृशंभीतावायुनेवाहतालता १८ तथारूपांतुतांदृष्ट्वामुनिराहमहानदीं अविचारंवसि
ष्ठंत्वमानयस्वांतिकंमम १९ सातस्यवचनंश्रुत्वाज्ञात्वापापंचिकीर्षितं वसिष्ठस्यप्रभावंचजानंत्यप्रतिमंभुवि २० सा
भिगम्यवसिष्ठंचइममर्थमचोदयत् यदुक्तासरितांश्रेष्ठाविश्वामित्रेणधीमता २१ उभयोःशापयोर्भीतावेपमाना
पुनःपुनः चिंतयित्वामहाशापंऋषिवित्रासिताभृशं २२ तांकृशांचविवर्णांचदृष्ट्वाचिंतासमन्वितां उवाचराजन्धर्म राम०
त्मावसिष्ठोद्विपदांवरः २३ वसिष्ठउवाच पाह्यात्मानंसरिच्छ्रेष्ठेवहमांशीघ्रगामिनि विश्वामित्रःशपेद्धित्वां ९२
माकृथास्त्वंविचारणां २४ तस्यतद्वचनंश्रुत्वाकृपाशीलस्यसासरित् चिंतयामासकौरव्यकिंकृत्वासुकृतंभवे

© Dharmartha Trust J&K Digitized By eGangotri

त् २८ तेनकृत्वापहारेणमैत्रावरुणिरीश्वर उह्यमानः सतुष्टावतदाराजन्सरस्वतीं २९ पितामहस्यसरसःप्रवृत्तासिस
सरस्वती व्याप्तंवैद्दजगत्सर्वंत्वैवांभोभिरुत्तमैः ३० त्वमेवाकाशगादेविमेघेषुसृजसेपयः सर्वाश्चापस्त्वमेवेतित्वत्तोवयमधी
महि ३१ पुष्टिर्धृतिस्तथाकीर्तिःसिद्धिर्बुद्धिरुमातथा त्वमेववाणीस्वाहात्वंतवायत्तमिदंजगत् ३२ त्वमेवसर्वभूतेषुवससी
हचतुर्विधा एवंसरस्वतीराजंस्तूयमानामहर्षिणा वेगेनोवाहतंविप्रंविश्वामित्राश्रमंप्रतिन्यवेदयतचाभीक्ष्णंविश्वामित्राय
यतंमुनिं ३४ तमानीतंसरस्वत्यादृष्ट्वाकोपसमन्वितः अथान्वेषत्प्रहरणंवसिष्ठांतकरंतदा ३५ तंतुक्रुद्धमभिप्रेक्ष्यब्रह्मवध्या
भयान्नदी अपोवाहवसिष्ठंतुप्राचींदिशमतंद्रिता ३६ उभयोः कुर्वतीवाक्यंवंचयित्वाचगाधिजं ततोपवाहितंदृष्ट्वावसिष्ठमृषि
सत्तमं ३७ अब्रवीद्दुःखसंक्रुद्धोविश्वामित्रोह्यमर्षणः यस्मान्मात्वंसरिच्छ्रेष्ठेवंचयित्वापुनर्गता ३८ शोणितंवहकल्याणिरक्षो
ग्रामणिसंमतं ततःसरस्वतीदृष्ट्वावभूवभृशदुःखिता ३९ एवंवसिष्ठापवाहोलोकेख्यातोजनाधिप आगच्छच्चपुनर्मार्गंस्व
मेवसरितांवरा ४० इतिगदापर्वणिहलवस्तीर्थयात्रायां वैशंपायनउवाच सातुशप्तातनक्रुद्धेनविश्वामित्रेणधीमता तस्मिं
स्तीर्थवरेशुभ्रेशोणितंसमुपावहत् १ अथाजग्मुस्ततोराजन्राक्षसास्तत्रभारत तत्रतेशोणितंसर्वेपिबंतःसुखमासते तृप्ता
श्चसुभृशंतेनसुखिताविगतज्वराः नृत्यंतश्चहसंतश्चयथास्वर्गजितस्तथा कस्यचित्त्वथकालस्यऋषयःसुतपोधनाः २
तीर्थयात्रांसमाजग्मुःसरस्वत्यांमहीपते तेषुसर्वेषुतीर्थेष्वाप्लुत्यमुनिपुंगवाः ३ प्राप्यप्रीतिंपरांचापितपोलुब्धाविशारदाः

© (c) Dharmartha Trust J&K. Digitized By eGangotri

ग०
प्रययुर्हितंतोराजन्येनतीर्थमसरस्वतेः ४ अथागम्यमहाभागास्तत्तीर्थंदारुणंतदा दृष्ट्वातोयंसरस्वत्याः शोणितेनपरिप्लुतं
२३ ५ पीयमानंचरक्षोभिर्बहुभिर्नृपसत्तम तान्दृष्ट्वाराक्षसान्राजन्मुनयःसंशितव्रताः ६ परित्राणेसरस्वत्याःपरंयत्नंप्रचक्रि
रे तेतुसर्वेमहाभागाः समागम्यमहाव्रताः ७ आहूयसरितांश्रेष्ठामिदंवचनमब्रुवन् कारणंब्रूहिकल्याणिकिमर्थंतेह्रदो
ह्ययं ८ एवमाकुलतांयातःश्रुत्वाज्ञास्यामहेवयं ततःसासर्वमाचष्टयथावृत्तंप्रवेपती ९ दुःखितामथतांदृष्ट्वाऊ
चुस्तेवैतपोधनाः कारणंश्रुतमस्माभिःशापश्चैवश्रुतोनघे १० करिष्यंतितुयत्प्राप्तंसर्वएवतपोधनाः एवमुक्त्वासरिच्छ्रे
ष्ठामूचुस्तेथपरस्परं ११ विमोचयामहेसर्वेशापादेतांसरस्वतीं तेसर्वेब्राह्मणराजंस्तपोभिर्नियमैस्तथा १२ उपवासैश्च
विविधैर्यमैःकष्टव्रतैस्तथा आराध्यपशुभर्तारंमहादेवंजगत्पतिं १३ मोक्षयामासुस्तांदेवींसरिच्छ्रेष्ठांसरस्वतीं तेषांतु
साप्रभावेनप्रकृतिस्थासरस्वती १४ प्रसन्नसलिलाजज्ञेयथापूर्वंतथैवहि विमुक्ताचसरिच्छ्रेष्ठाविबभौसायथापुरा १५
दृष्ट्वातोयंसरस्वत्यामुनिभिस्तैस्तथाकृतं तानेवशरणंजग्मूराक्षसाःक्षुधितास्तथा १६ कृत्वांजलिंततोराजन्राक्षसाःक्षुध
यार्दिताः ऊचुस्तान्वैमुनीन्सर्वान्कृपायुक्तान्पुनःपुनः वयंहिक्षुधितास्त्वेवधर्माद्धीनाश्चशाश्वतात् नचनःकामकारोयं गम०
यद्वयंपापकारिणः १७ युष्माकंचप्रसादेनदुःकृतेनचकर्मणा यत्पापंवर्द्धतेस्माकंयतःस्मोब्रह्मराक्षसाः १८ यो २३
षितांचैवपापेनयोनिदोषकृतेनच एवंहिवैश्यशूद्राणांक्षत्रियाणांतथैवच १९ येब्राह्मणान्प्रद्विषंतितेभवंतीहराक्षसाः

आचार्यमलिंगं चैव गुरुं वृद्धजनं तथा २० प्राणिनो ये वमन्यंते ते भवंतीह राक्षसाः तत्कुरुध्वमिहास्माकं तारणं द्विजसत्तमाः २१
शक्ता भवंतः सर्वेषां लोकानामपि तारणे तेषां तु मुनयः श्रुत्वा तुष्टुवुस्तां महानदीं २२ मोक्षार्थं रक्षसां ते षा मूचुः प्रयतमानसा
: स्नाने कीटावपन्नं च यच्चोच्छिष्टान्वितं भवेत् २३ सकेशमवधूतं च मुद्रिकोपहतं च यत् श्वभिः संस्पृष्टमन्नं च भागोसौ रक्षसामि
ह २४ तस्माज्ज्ञात्वा सदा विद्वानेतान्यन्नानि वर्जयेत् राक्षसानां भवेद्भुक्तं यो भुंक्ते ह्यन्नमीदृशं २५ शोधयित्वा ततस्तीर्थं त्राणपयस्तेन त
पोधनाः मोक्षार्थं राक्षसानां च नदीं तां प्रत्यचोदयन् २६ महर्षीणां मतं ज्ञात्वा ततः सा सरितां वरा अरुणामानयामास स्वां
तनुं पुरुषर्षभ २७ तस्यां ते राक्षसाः स्नात्वा तनूस्त्यक्त्वा दिवंगताः अरुणायां महाराज ब्रह्मवध्यापहा हि सा २८ एतमर्थमभि
ज्ञाय देवराजः शतक्रतुः तस्मिंस्तीर्थवरे स्नात्वा विमुक्तः पाप्मना किल २९ जनमेज० किमर्थं भगवाञ्छक्रो ब्रह्मवध्याम
वाप्तवान् कथमस्मिंश्च तीर्थे वै आप्लुत्याकल्मषोभवत् वैशं० श्रृणुष्वैतदुपाख्यानं यथावृत्तं जनेश्वर ३० यथा बिभेद समयं
नमुचेर्वासवः पुरा नमुचिर्वासवाद्भीतः सूर्यरश्मिं समाविशत् ३१ तेनेंद्रः सख्यमकरोत्समयं चेदमब्रवीत् न चार्द्रेण च शु
ष्केण न रात्रौ नापि चाहनि ३२ वधिष्याम्यसुरश्रेष्ठ सखे सत्येन ते शपे एवं स कृत्वा समयं दृष्ट्वा नीहारमीश्वरः ३३ चिच्छे
दास्य शिरो राजन्नपां फेनेन वासवः तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वियात् ३४ भो मित्रहन् तिष्ठेति ब्रुवाणं शक्रमं
तिकात् एवं स शिरसा तेन चोद्यमानः पुनः पुनः ३५ पितामहाय संतप्त एतमर्थं न्यवेदयत् तमब्रवील्लोकगुरुररुणायां

© (P) Dharmartha Trust J&K. Digitized By eGangotri

ग०
२४

यथाविधि ३६ इहोपस्पृश्यमेदेवंद्रतीर्थेपापभयापहे सभापुराफज्ञाधाकःकृतामुनिभिरेवतु ३७ निग्रहमस्यागमनमिहा
मोन्न्पूर्वमेवतु ततोभ्यसारुणंदेवीह्लावयामासवारिणा ३८ सरस्वत्यारुणायाश्चपुण्यायेसंगमोमहान् इहत्वेयजैर्देवेंद्र
दृष्ट्वानार्चनकशः ३९ अवाप्तुमहुघोराणंत्रयात्तकाद्दिमोक्षसे इत्युक्तःससरस्वत्याःकुंजेवेजनमेजयः ४० इह्लायथाव
हूलमिदरुणायामुपास्पृशत् समुक्तःपाप्मनोतेनब्रह्मवध्याकृतेनच ४१ जगामसंहृष्टमनास्त्रिदिवंत्रिदशेश्वरः शिरस्तच्चा
पिनमुचेस्तत्रैवाप्नुतमारत ४२ लोकान्कामदुहान्प्राप्ममक्षयान्राजसत्तम वैशं० तत्राप्युपस्पृश्यबलोमहात्मादत्वाचदानानि
पृथग्विधानि अवाप्यधर्मंपरमार्यकर्माजगामसोमस्यमहत्सुतीर्थं ४३ यत्रायजद्राजसूयेनसोमःसाक्षात्पुराविधिवत्पार्थिवें
द्र अत्रिर्धीमान्विप्रमुख्योबभूवहोतायस्मिन्क्रतुमुख्येमहात्मा ४४ यस्यांतेभूत्सुमहद्दानवानांदैतेयानांराक्षसानांचदेवैः यस्मि
न्युद्धंतारकाख्यंसुतीव्रंयत्रस्कंदस्तारकाख्यंजघान ४५ सेनापत्यंलब्धवान्देवतानांमहासेनोयत्रदैत्यान्तकर्ता साक्षाच्चैवंन्यवस
त्कार्त्तिकेयःसदाकुमारोयत्रसंप्लक्षराजः ४६ इतिमहाभारतेगदापर्वणि जनमेज० सरस्वत्याःप्रभावोयमुक्तस्तेद्विजसत्तम कु
मारस्याभिषेकंतुब्रह्मन्व्याख्यातुमर्हसि १ यस्मिन्देशेचकालेचयथाचवदतांवर येश्चाभिषिक्तोभगवान्विधिनायेनचप्रभुः गम०
२ स्कंदोयथाचदैत्यानामकरोत्कदनंमहत् तथामेसर्वमाचक्ष्वपरंकौतूहलंहिमे ३ वैशं० कुरुवंशस्यसदृशंकौतूहलमि २५
दंतव हर्षमुत्पादयत्येषवचोमेजनमेजय ४ हंततेकथयिष्यामिशृण्वानस्यनराधिप अभिषेकंकुमारस्यप्रभावंचमहात्मनः

५ तेजोमाहेश्वरंस्कन्नमग्नौप्रपतितंपुरा तत्सर्वभक्षोभगवान्नाशकद्दग्धुमक्षयं ६ तेनासीदतितेजस्वीदीप्तिमान्हव्यवाहनः नचैवधार
यामासगर्भंतेजोमयंतदा ७ सगंगामभिसंगम्यनियोगाद्ब्रह्मणःप्रभुः गर्भमाहितवान्दिव्यंभास्करोपमतेजसं ८ अथगंगापि तंगर्भ
मसहंतीविधारणे उत्ससर्जगिरौरम्येहिमवत्यमरार्चिते ९ सतत्रववृधेलोकानावृत्यज्वलनात्मजः ददृशुर्ज्वलनाकारंतंगर्भमथकृ
त्तिकाः १० शरस्तंबेमहात्मानमनलात्मजमीश्वरं ममायमितिताःसर्वाःपुत्रार्थिन्योभिचुक्रुशुः ११ तासांविदित्वाभावंतंमातॄणांभगवा
न्प्रभुः प्रस्नुतानांपयःषड्भिर्वदनैरपिबत्तदा १२ तंप्रभावंसमालक्ष्यतस्यबालस्यकृत्तिकाः परंविस्मयमापन्नादेव्योदिव्यवपुर्धराः १३
यत्रोत्सृष्टःसभगवान्गंगयागिरिमूर्द्धनि सशैलःकांचनःसर्वःसंबभौकुरुसत्तम १४ वर्द्धताचैवगर्भेणपृथिवीतेनरंजिता अत
श्चसर्वेसंवृत्तागिरयःकांचनाकराः १५ कुमारश्चमहावीर्यःकार्त्तिकेयइतिस्मृतः गांगेयःपूर्वमभवन्महायोगबलान्वितः शमेन
तपसाचैववीर्येणचसमन्वितः ववृधेतीवराजेंद्रचंद्रवत्प्रियदर्शनः सतस्मिन्कांचनेदिव्येशरस्तंबेश्रियावृतः १६ स्तूयमानःसदाशेते
गंधर्वैर्मुनिभिस्तथा तथैनमन्वनृत्यंतदेवकन्याःसहस्रशः १७ दिव्यवादित्रनृत्तज्ञास्तुवंत्यश्चारुदर्शनाः अन्वासतेचतंदेवं
गंगावैसरितांवरा १८ दधारपृथिवीचैनंबिभ्रतीरूपमुत्तमं जातकर्मादिकास्तस्यक्रियाश्चक्रेबृहस्पतिः १९ वेदश्चैनंचतुर्मूर्त्तिरुप
तस्थेकृतांजलिः धनुर्वेदश्चतुष्पादःशस्त्रग्रामःससंग्रहः २० तत्रैनंसमुपातिष्ठत्साक्षाद्वाणीचकेवला सददर्शमहावीर्यं
देवदेवमुमापतिं २१ शैलपुत्र्यासहासीनंभूतसंघशतैर्वृतं निकायाभूतसंघानांपरमाद्भुतदर्शनाः २२ विकृताविकृताकाराः वि

© Dharmartha Trust & IK Digitized By eGangotri

ग० कृताभरणाश्चित्राः व्याघ्रसिंहर्क्षवदना विडालमकराननाः २३ वृषदंशमुखाश्चान्ये गजोष्ट्रवदनास्तथा उलूकवदनाः केचि
२५ द्गृध्रगोमायुदर्शनाः २४ क्रौंचपारावतनिभैर्वदनैरांकवैरपि श्वाविच्छल्यकगोधानामजैडकगवां तथा २५ सदृशानि वपूंष्यन्ये
तत्रतत्र व्यधारयन् केचिच्छैलांबुदप्रख्याश्चक्रोद्यतगदायुधाः २६ केचिदंजनपुंजाभाः केचिच्छ्वेताचलप्रभाः सप्तमातृगणा
श्चैव समाजग्मुर्विशांपते २७ साध्या विश्वेथ मरुतो वसवः पितरस्तथा रुद्रादित्यास्तथा सिद्धा भुजंगा दानवाः खगाः २८ ब्रह्मा
स्वयंभूर्भगवान्सपुत्रः सह विष्णुना शक्रस्तथाभ्ययाद्द्रष्टुं कुमारवरमच्युतं २९ नारदप्रमुखाश्चापि देवगंधर्वसत्तमाः देवर्षय
श्च सिद्धाश्च बृहस्पतिपुरोगमाः ३० पितरो जगतः श्रेष्ठा देवानामपि देवताः तेपि तत्र समाजग्मुर्यातुधानाश्च सर्वशः ३१ स तु बा
लोपि बलवान्महायोगबलान्वितः अभ्याजगाम देवेशं शूलहस्तं पिनाकिनं ३२ तमाव्रजंतमालक्ष्य शिवस्यासीन्मनोग
तं युगपच्छैलपुत्र्याश्च गंगायाः पावकस्य च ३३ किन्नु पूर्वमयं बालो गौरवादभ्युपैष्यति अपि मामिति सर्वेषां तेषामा
सीन्मनोगतं ३४ तेषामेवमभिप्रायं चतुर्णामुपलक्ष्य सः युगपद्योगमास्थाय ससर्ज विविधास्तनूः ३५ ततोभवच्चतु
र्मूर्तिः क्षणेन भगवान्प्रभुः तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठतः ३६ एवं स कृत्वा ह्यात्मानं चतुर्धा भगवान्प्रभुः य गम०
८२ तो रुद्रस्ततः स्कंदो जगामाद्भुतदर्शनः ३७ विशाखस्तु ययौ येन देवी गिरिवरात्मजा शाखो ययौ च भगवान्वायुमूर्तिर्विभा २५
वसुं ३८ नैगमेयोगमद्गंगां कुमारः पावकप्रभुः सर्वे भासुरदेहास्ते चत्वारः समरूपिणः ३९ तान्समेत्य सुरा व्यग्रास्तद

© Dharmartha Trust J&K. Digitized By eGangotri

भ्रांतमिवाभवत् हाहाकारोमहानासीद्देवदानवरक्षसां ४० तद्दृष्ट्वामहदाश्चर्यमद्भुतंलोमहर्षणं ततोरुद्रश्चदेवीचपावकश्च
पितामहः ४१ गंगयासहिताःसर्वेप्रणिपेतुर्जगत्पतिं प्रणिपत्यततस्तेतुविधिवद्राजपुंगव ४२ इदमूचुर्वचोराजन्कार्त्तिके
यप्रियेप्सया अस्यबालस्यभगवन्नाधिपत्यंयथेप्सितः ४३ अस्मत्प्रियार्थंदेवेशसदृशंदातुमर्हसि ततःसभगवान्धीमा
न्सर्वलोकपितामहः ४४ मनसाचिंतयामासकिमयंलभतामिति ऐश्वर्याणिचसर्वाणिदेवगंधर्वरक्षसां ४५ भूतयक्ष
विहंगानांपन्नगानांचसर्वशः पूर्वमेवादिदेशासौनिकायेषुमहात्मना ४६ समर्थंचतमैश्वर्येमहामतिरमन्यत ततोमुहूर्तंस
ध्यात्वादेवानांश्रेयसिस्थितः ४७ सेनापत्यंददौतस्मैसर्वभूतेषुभारत सर्वदेवनिकायानांयेराजानःपरिश्रुताः ४८ तान्सर्वा
न्व्यादिदेशास्मैसर्वभूतपितामहः ततःकुमारमादायदेवाब्रह्मपुरोगमाः ४९ अभिषेकार्थमाजग्मुःशैलेंद्रसहितास्ततः
पुण्यांहैमवतींदेवींसरिच्छ्रेष्ठांसरस्वतीं ५० समंतपंचकेयावैत्रिषुलोकेषुविश्रुता तत्रतीरेसरस्वत्याःपुण्येसर्वगुणान्वि
ते ५१ निषेदुर्देवगंधर्वाःसर्वेसंपूर्णमानसाः इतिगदापर्वणिकुमाराभिषेकः वैशं० ततोभिषेकसंभारान्सर्वान्संभृत्य
शास्त्रतः बृहस्पतिःसमिद्धेऽग्नौजुहावाग्निंयथाविधि १ ततोहिमवतादत्तेमणिप्रवरशोभिते दिव्यरत्नाचितेपुण्येनिषण्णं
परमासने २ सर्वमंगलसंभारैर्विधिमंत्रपुरस्कृतं आभिषेचनिकंद्रव्यंगृहीत्वादेवतागणाः ३ इंद्राविष्णूमहावीर्यौसूर्या
चंद्रमसौतथा धाताचैवविधाताचतथाचैवानिलानलौ ४ पूष्णाभगेनार्यम्णाचअंशेनचविवस्वता रुद्रश्चसहितोधीमान्मित्रे

णन १

(c) Dhamtari Trust. Digitized By eGangotri

ग०
२६

वरुणेनच ५ रुद्रैर्वसुभिरादित्यैरश्विभ्यांचवृतः प्रभुः विश्वैर्देवैर्मरुद्भिश्चसाध्यैश्चपितृभिः सह ६ गंधर्वैरप्सरोभिश्च
यक्षराक्षसपंनगैः देवर्षिभिरसंख्येयैस्तथाब्रह्मर्षिभिर्वरैः ७ वैखानसैर्वालखिल्यैर्वाय्वाहारैर्मरीचिपैः भृगुभि
श्चांगिरोभिश्चयतिभिश्चमहात्मभिः ८ सर्पैर्विद्याधरैः पुण्यैर्योगसिद्धैस्तथावृतः पितामहः पुलस्त्यश्चपुलहश्च
महातपाः ९ अंगिराः कश्यपोत्रिश्चमरीचिर्भृगुरेवच क्रतुर्हरिः प्रचेताश्चमनुर्दक्षस्तथैवच १० ऋतवश्चग्रहाश्चै
वज्योतींषिचविशांपते मूर्तिमंत्यश्चसरितोवेदाश्चैवसनातनाः ११ समुद्राश्चह्रदाश्चैवतीर्थानिविविधानिच पृथिवी
द्यौर्दिशश्चैवपादपाश्चजनाधिप १२ अदितिर्देवमाताचह्रीःश्रीः स्वाहासरस्वती उमाशचीसिनीवालीतथाचानुम
तीकुहूः १३ राकाचधिषणाचैवपत्न्यश्चान्यादिवौकसां हिमवांश्चैवविंध्यश्चमेरुश्चानेकशृंगवान् १४ ऐरावतः
सानुचरः कलाः काष्ठास्तथैवच मासार्द्धमासाऋतवः तथारात्र्यहनीनृप १५ उच्चैःश्रवाहयश्रेष्ठोनागराजश्चवा
सुकिः अरुणोगरुडश्चैववृक्षाश्चौषधिभिः सह १६ धर्मश्चभगवान्देवः समाजग्मुर्हिसंगताः कालोयमश्चमृत्युश्च
यमस्यानुचराश्चये १७ बहुलत्वाच्चनोक्तायेविविधादेवतागणाः तेकुमाराभिषेकार्थंसमाजग्मुस्ततस्ततः १८
जगृहुस्तेतदाराजन्सर्वएवदिवौकसः आभिषेचनिकंभांडंमंगलानिचसर्वशः १९ दिव्यसंभारसंयुक्तैः कलशै
: कांचनैर्नृप सरस्वतीभिः पुण्याभिर्दिव्यतोयाभिरेवतु २० अभ्यषिंचन्कुमारंवैसंप्रहृष्टादिवौकसः सेनापतिम

ग०
२६

© (c) Dharmartha Trust J&K. Digitized By eGangotri

हात्मानमसुराणां भयंकरं २१ पुरा यथा महाराज व[?]रुणं वै जलेश्वरं तथाभ्यषिंचद्भगवान्सर्वलोकपितामहः २२ कश्य
पश्च महातेजा ये चान्ये लोकविश्रुताः तस्मै ब्रह्मा ददौ प्रीतो बलि[?]नो वातरंहसः २३ कामवीर्यधरान्सिद्धान्महापारिषदा
न्प्रभुः नंदिसेनं लोहिताक्षं घंटाकर्णं च संमतं २४ चतुर्थमस्यानुचरं ख्यातं कुमुदमालिनं ततः स्थाणुर्महातेजा महापारिष
दं प्रभुः २५ मायाशतधरं कामं कामवीर्यबलान्वितं ददौ स्कंदाय राजेंद्र सुरारिविनिबर्हणं २६ स हि देवासुरे युद्धे दैत्यानां भीम
कर्मणां जघान दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश २७ तथा देवा ददुस्तस्मै सेनां नैरृतसंकुलां देवशत्रुक्षयकरीमजय्यां वि
ष्णुरूपिणीं २८ जयशब्दं तथा चक्रुर्देवाः सर्वे सवासवाः गंधर्वा यक्षरक्षांसि मुनयः पितरस्तथा २९ ततः प्रादादनुचरौ
यमः कालोपमावुभौ उन्माथं च प्रमाथं च महावीर्यौ महाद्युती ३० सुभ्राजो भास्करश्चैव यौ तौ सूर्यानुयायिनौ तौ सूर्यः का
र्त्तिकेयाय ददौ प्रीतः प्रतापवान् ३१ कैलासशृंगसंकाशौ श्वेतमाल्यानुलेपनौ सोमोप्यनुचरौ प्रादात् मणिं सुम[?]णिमे
व च ३२ ज्वालाजिह्वं तथा ज्योतिरात्मजाय हुताशनः ददावनुचरौ शूरौ परसैन्यप्रमाथिनौ ३३ परिघं च वटं चैव भीमं
च सुमहाबलं दहतिं दहनं चैव प्रचंडौ वीर्यसंमतौ ३४ अंशोप्यनुचरान्पंच ददौ स्कंदाय धीमते उत्क्रोशं पंकजं चैव
वज्रदंडधरावुभौ ३५ ददावनलपुत्राय वासवः परवीरहा तौ हि शत्रून्महेंद्रस्य जघ्नतुः समरे बहून् ३६ चक्रं विक्रम
कं चैव संक्रमं च महाबलं स्कंदाय त्रीननुचरान्ददौ विष्णुर्महायशाः ३७ वर्धनं नंदनं चैव सर्वविद्याविशारदौ स्कंदाय शा ५

© (c) Dharmartha Trust J&K. Digitized By eGangotri

ग० २८

ददतुः प्रीतावश्विनौ भिषजांवरौ ३८ कुंदंचकुसुमंचैवकुमुदंचमहायशाः डंवराडंवरौचैवददौधातामहात्मने ३९ च
क्रानुचक्रौवलिनौमेघचक्रौवलोत्कटौ ददौत्वष्टामहामायोस्कंदायानुचरावुभौ ४० सुव्रतंसत्यसंधंचददौमित्रोमहात्म
ने कुमारायमहात्मानौतपोविद्याधरौप्रभुः ४१ सुदर्शनीयौवरदौत्रिषुलोकेषुविश्रुतौ सुव्रतंचमहात्मानंशुभकर्माणमे
वच ४२ कार्त्तिकेयायसंप्रादाद्विधाताlोकविश्रुतौ पाणीतकंकालिकंचमहामायाविनावुभौ ४३ पूषाचपार्षदौप्रादा
त्कार्त्तिकेयायभारत वलंचातिवलंचैवमहावक्त्रौमहावलौ ४४ प्रददौकार्त्तिकेयायवायुर्भरतसत्तम यमंचातियमंचैवमति
वक्त्रौमहावलौ ४५ प्रददौकार्त्तिकेयायवरुणः सत्यसंगरः सुवर्चसंमहात्मानंतथैवाप्यतिवर्चसं ४६ हिमवान्प्रददौराजन्
हुताशनसुतायवै कांचनंचमहात्मानंमेघमालिनमेवच ४७ ददावनुचरौमेरुरग्निपुत्रायभारत स्थिरंचातिस्थिरंचैव
मेरुरेवापरौददौ ४८ महात्मात्वग्निपुत्रायमहावलपराक्रमौ उच्छ्रृंगंचातिशृंगंचमहापाषाणयोधिनौ ४९ प्रददावग्निपु
त्रायमहापारिषदावुभौ संग्रहंविग्रहंचैवसमुद्रोपिगदाधरौ प्रददावग्निपुत्रायमहापारिषदावुभौ उन्मादंपुष्पदंतंचशंकु
कर्णंतथैवच ५० प्रददावग्निपुत्रायपार्वतीशुभदर्शनात् जयंमहाजयंचैवनागोज्वलनसूनवे ५१ प्रददौपुरुषव्याघ्र राम० २८
वासुकिःपन्नगेश्वरः एवंसाध्याश्चरुद्राश्चवसवःपितरस्तथा ५२ सागराःसरितश्चैवगिरयश्चमहावलाः ददुःसेनागणा
ध्यक्षान्शूलपट्टिशधारिणः ५३ दिव्यप्रहरणोपेतान्नानावेषविभूषितान् शृणुनामानिचाप्येषांयेन्यस्कंदस्यसैनिका

© (C) Dharmartha Trust J&K. Digitized By eGangotri

विविधायुधसंपंनाश्चित्राभरणवर्मिणः शंकुकर्णोनिकुंभश्चपद्मः कुमुदएवच ५५ अनंतोद्वादशभुजस्तथाकृष्णोपकृष्ण
कौ घ्राणश्रवाः कपिस्कंधः कांचनाक्षोजलंधमः ५६ अक्षः संतर्जनोराजन्कुनदीकस्तमोभ्रकृत् एकाक्षोद्वादशाक्षश्चतथैवै
कजटः प्रभुः ५७ सहस्रबाहुर्विकटोव्याघ्राक्षः क्षितिकंपनः पुण्यनामासुनामाचसुवक्त्रः प्रियदर्शनः ५८ परिश्रुतः कोक
नदः प्रियमाल्यानुलेपनः अजोदरोगजशिराः स्कंधाक्षः शतलोचनः ५९ लोलाजिह्वः करालाक्षः शितिकेशोजटीहरिः
परिश्रुतः कोकनदः कृष्णकेशोजटाधरः ६० चतुर्दंष्ट्रोष्टजिह्वश्चमेघनादः पृथुश्रवाः विद्युताक्षोधनुर्वक्त्रोजाठरोमारुताश
नः ६१ उदाराक्षोरथाक्षश्चवज्रनाभोवसुप्रभः समुद्रवेगोराजेंद्रशैलकंपीतथैवच ६२ वृषोमेषः प्रवाहश्चतथानंदोप
नंदकौ धूम्रः श्वेतः कलिंगश्चसिद्धार्थोवरदस्तथा ६३ प्रियकश्चैवनंदश्चप्रतापवान् आनंदश्चप्रमोदश्चस्वस्तिकोध्रुवक
स्तथा ६४ क्षेमवाहः सुवाहश्चसिद्धपात्रश्चभारत गोव्रजः कनकापीडोमहापारिषदेश्वरः ६५ गायनोहसनश्चैवबाणः ख
ड्गश्चवीर्यवान् वैतालीगतितालीचतथाकथकवातिकौ ६६ हंसजः पंकदिग्धांगः समुद्रोन्मादनश्चह रणोत्कटः प्रहासश्च
श्वेतसिद्धश्चनंदकः ६७ कालकंठः प्रभासश्चतथाकुंभांडकोदरः कालकाक्षः सितश्चैवभूतानांमथनस्तथा ६८ यज्ञवा
हः प्रवाहश्चदेवयाजीचसोमपः मज्जानश्चमहातेजाः क्रथक्राथौचभारत ६९ तुहरश्चतुहारश्चचित्रदेवश्चवीर्यवान् मधु
रः सुप्रसादश्चकिरीटीचमहाबलः ७० वसनोमधुवर्णश्चकलशोदरएवच धमंतोमन्मथकरः सूचीवक्त्रश्चवीर्यवान् ७१

गोनंदश्च

CC-0. Dharmarth Trust J&K. Digitized by eGangotri

ग० श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पांडुरः दंडबाहुः सुबाहुश्च रजः कोकिलकस्तथा ७२ अचलः कनकाक्षश्च बालानामधिपः प्र
२८ भुः संचारकः कोकनदो गृध्रपत्रश्च जंबुकः ७३ लोहाजवक्त्रो जवनः कुंभवक्त्रश्च कुंभकः स्वर्णग्रीवश्च कृष्णौजा हंसवक्त्रश्च चं
द्रभः ७४ पाणिकूर्चाश्च शंबूकः पंचवक्त्रश्च शिक्षकः चाषवक्त्रश्च जंबूकः शाकवक्त्रश्च कुंडलः ७५ योगयुक्ता महात्मानः स
ततं ब्राह्मणप्रियाः पैतामहा महात्मानो महापारिषदाश्च ये ७६ यौवनस्थाश्च बालाश्च वृद्धाश्च जनमेजय सहस्रशः पारिषदाः
कुमारमुपतस्थिरे ७७ वक्त्रैर्नानाविधैर्ये तु शृणु तान् जनमेजय कूर्मकुक्कुटवक्त्राश्च शशोलूकमुखास्तथा ७८ खरोष्ट्र
व दनाश्चैव वराहवदनास्तथा मार्जारशशवक्त्राश्च दीर्घवक्त्राश्च भारत ७९ नकुलोलूकवक्त्राश्च काकवक्त्रास्तथाप
रे आखुबभ्रुकवक्त्राश्च मयूरवदनास्तथा ८० मत्स्यमेषाननाश्चान्ये अजाविमहिषाननाः ऋक्षशार्दूलवक्त्राश्च द्वीपिसिंहान
नास्तथा ८१ भीमा गजाननाश्चैव तथा नक्रमुखाश्च ये गरुडाननाः कंकमुखा वृककाकमुखास्तथा ८२ गोखरोष्ट्रमुखाश्चा
न्ये वृषदंशमुखास्तथा महाजठरपादांगास्तारकाक्षाश्च भारत ८३ पारावतमुखाश्चान्ये तथा वृषमुखाः परे कोकिलाभान
नाश्चान्ये श्येनतित्तिरिकाननाः ८४ कृकलासमुखाश्चैव विरजोम्बरधारिणः व्यालवक्त्राः शूलमुखाश्चंडवक्त्राः शुभान
नाः ८५ आशीविषाश्चीरधरा गोनासावदनास्तथा स्थूलोदराः कृशांगाश्च स्थूलांगाश्च कृशोदराः ८६ ह्रस्वग्रीवा महाक गम०
र्णा नानाव्यालविभूषणाः गजेन्द्रचर्मवसनास्तथा कृष्णाजिनाम्बराः ८७ स्कंधेमुखा महाराज तथाप्युदरतोमुखाः पृष्ठेमुखा हनु २८

मुखास्तथाजंघामुखाश्चापि ८८ पार्श्वाननाश्च बहवो नानोदरमुखास्तथा तथाकीरपतंगानां सदृशास्यागणेश्वराः ८९ नानाव्या
लमुखाश्चान्ये बहुबाहुबाहुशिरोदराः नानावृक्षभुजाः केचित्कटिशीर्षास्तथापरे ९० भुजंगभोगवदना नानागुल्मनिवासिनः चीरसंवृ
तगात्राश्च नानाकनकवाससः ९१ नानावेषधराश्चैव नानामाल्यानुलेपनाः नानावस्त्रधराश्चैव चर्मवाससएव च ९२ उष्णीषिणो
मुकुटिनः सुग्रीवाश्च सहस्रशः किरीटिनः पंचशिखास्तथा कुंचितमूर्द्धजाः ९३ त्रिशिखाद्विशिखाश्चैव तथा सप्तशिखाः परे शिखंडि
नो मुकुटिनो मुंडाश्च जटिलास्तथा ९४ चित्रमाल्यधराः केचित्केचिद्रोमाननास्तथा विग्रहैकरसानित्यमजेयाः सुरसत्तमैः ९५
कृशा निर्मांसवक्त्राश्च स्थूलोष्ठानिम्नोदराः स्थूलपृष्ठा ह्रस्वपृष्ठाः प्रलंबोदरमेहनाः ९६ महाभुजा ह्रस्वभुजा ह्रस्वमात्राश्च वामनाः
कुब्जाश्च ह्रस्वजंघाश्च हस्तिकर्णाशिरोदराः ९७ हस्तिनासाः कूर्मनासा वृकनासास्तथापरे दीर्घोच्छ्वासा दीर्घजंघा विकराला
ह्यधोमुखाः ९८ महादंष्ट्रा ह्रस्वदंष्ट्राश्चतुर्दंष्ट्रास्तथापरे वारणेंद्रनिभाश्चान्ये भीमा राजन्सहस्रशः ९९ सुविभक्तशरीराश्च दी
प्तिमंतः स्वलंकृताः पिंगाक्षाः शंकुकर्णाश्च रक्तनासाश्च भारत १०० पृथुदंष्ट्रा महादंष्ट्राः स्थूलोष्ठा हरिमूर्द्धजाः नानापादौष्ठ
दंष्ट्राश्च नानाहस्तशिरोधराः १ नानाचर्मभिराछन्ना नानाभाषाश्च भारत कुशला देशभाषासु जल्पंतोन्योन्यमीश्वराः २ हृष्टाः
परिपतंति स्म महापारिषदास्तथा दीर्घग्रीवा दीर्घनखा दीर्घपादशिरोभुजाः ३ पिंगाक्षा नीलकंठाश्च लंबकर्णाश्च भारत वृको
दरनिभाश्चैव केचिदंजनसंनिभाः ४ श्वेताक्षा लोहितग्रीवाः पिंगाक्षाश्च तथापरे कल्माषा बहवो राजंश्चित्रवर्णाश्च भारत ५
चामरापीडकनिभाः श्वेतलोहितराजयः नानावर्णाः सवर्णाश्च मयूरसदृशप्रभाः ६ पुनः प्रहरणान्येषां कीर्त्यमानानि मे शृणु

© (Dharmartha Trust J&K Digitized By eGangotri

ग० २९ शैलैः कृतः पारिषदैरायुधानां परिग्रहः ७ पाशोद्यतकराः केचिद्व्यादितास्याः खराननाः पृथ्वेक्षणा नीलकंठास्तथा परिघबा
हवः ८ शतघ्नीचक्रहस्ताश्च तथा मुशलपाणयः असिमुद्गरहस्ताश्च दंडहस्ताश्च भारत ९ गदाभुशुंडिहस्ताश्च तथा तोमरपाणयः
आयुधैर्विविधैर्घोरैर्महात्मानो महाजवाः १० महाबला महावेगा महापारिषदास्तथा अभिषेकं कुमारस्य दृष्ट्वा हृष्टा रणप्रियाः ११
घंटाजालपिनद्धांगा ननृतुस्ते महौजसः एते चान्ये च बहवो महापारिषदा नृप १२ उपतस्थुर्महात्मानं कार्त्तिकेयं यशस्विनं दिव्या
श्चांतरिक्षाश्च पार्थिवाश्चानिलोपमाः १३ आदिष्टा दैवतैः शूराः स्कंदस्यापि च भारत तादृशानां सहस्राणि प्रयुतान्यर्बुदानि
च १४ अभिषिक्तं महात्मानं परिवार्योपतस्थिरे इति गदापर्वणि बलदेवतीर्थयात्रायां वैशंपायन उवाच शृणु मातृगणान् रा
जन्कुमारानुचरानिमान् कीर्त्यमानान्मया वीर सपत्नगणसूदनान् १ यशस्विनीनां मातॄणां शृणु नामानि भारत याभिर्व्याप्तास्त्र
यो लोकाः कल्याणीभिश्च भागशः २ प्रभावती विशालाक्षी पालिता गोस्तनी तथा श्रीमती बहुला चैव तथैव बहुपुत्रिका ३ अप्सु
जाता च गोपाली बृहदंबालिका तथा जयावती मालतिका ध्रुवरत्ना भयंकरी ४ वसुदामा च दामा च विशोका नंदिनी तथा एकचू
डा महाचूडा चक्रनेमिश्च भारत ५ उत्तेजनी जयत्सेना कमलाक्ष्यथ शोभना शत्रुंजया तथा चैव क्रोधना शलभी खरी ६ माधवी
शुभवक्त्रा च तीर्थसेनिश्च भारत गीतप्रिया च कल्याणी रुद्ररोमामिताशना ७ मेघस्वना भोगवती सुभ्रूश्च कनकावती अल ग० २९
ताक्षी वीर्यवती विद्युज्जिह्वा च भारत ८ पद्मावती सुनक्षत्रा कंदरा बहुयोजना संतानिका च कौरव्य कमला च महाबला ९ सुदामा

© Dharmartha Trust J&K. Digitized By eGangotri

वहुदामाचसुप्रभाचयशस्विनी नृत्यप्रियाचराजेंद्रशतोलूखलमेखला १० शतघंटाशतानंदाभगनंदाचभाविनी वपुष्मतीचं
द्रशिलाभद्रकालीचभारत ११ अक्षांविकानिष्कुटिकावामाचत्वरवासिनी सुमंगलास्वस्तिमतीवुद्धिकामाजयप्रिया १२ धनदासुप
सादाचभवदाचजलेश्वरी एडीभेडीसमेडी चवेतालजननीतथा १३ कंडूतिःकोकिलाचैवदेवमित्राचभारत वसुश्रीःकोटराचैवचित्र
सेनातथाचला १४ कुक्कुटिकाशंखलिकातथाशकुनिकानृप कुंडारिकाकौकुलिकाकुंभिकाथशतोदरी १५ उत्क्राथिनीजलेला
चमहावेगाचकंकणा मनोजवाकंटकिनीप्रघसापूतनातथा १६ खशयाचुर्व्युटिर्वामाक्रोशनाथातडित्प्रभा मंदोदरीचमुंडीचकोटरा
मेघवाहिनी १७ सुभगालंबिनीलंवाताम्रचूडाविकाशिनी ऊर्ध्ववेणीधराचैवपिंगाक्षीलोहमेखला १८ पृथुवस्त्रामधुलिकामधुकुंभा
तथैवच पक्षालिकामत्कुलिकाजरायुर्जर्जरानना १९ ख्यातादहदहाचैवतथाधमानृप खंडखंडाचराजेंद्रपूषणामणिकुट्टिला २०
अमोघाचैवकौरव्यतथालम्बपयोधरा वेणुवीणाधराचैवपिंगाक्षीलोहमेखला २१ शशोलूकमुखीकृष्णाखरजंघामहाजवा शिशुमा
रमुखीश्वेतालोहिताक्षीविभीषणा २२ जटालिकाकामचरीदीर्घजिह्वाबलोत्कटा कालेहिकावामनिकामुकुटाचैवभारत २३ लो
हिताक्षीमहाकायाहरिपिंडाचभूमिप एकत्वचासुकुसुमाकृष्णकर्णीचभारत २४ क्षुरकर्णीचतुष्कर्णीकर्णप्रावरणातथा चतुष्प
थनिकेताचगोकर्णीमहिषानना २५ खरकर्णीमहाकर्णीभेरीस्वनमहास्वना शंखकुंभश्रवाचैवभगदाचमहाबला २६ गणा
चसुगणाचैवतथाभीत्यथकामदा चतुष्पथरताचैवभूतितीर्थान्यगोचरी २७ पुत्रदावित्तदाचैवसुखदाचमहायशाः पयोदागोमहि

© Dharmartha Trust J&K. Digitized By eGangotri

गा०
पद्मासुविशालाचभारत २८ प्रतिश्रुतासुप्रतिष्ठाचरोचमानासुरोचना नौकर्णीमुखकर्णीचशिशिरामंथिनीतथा २९ एकचंद्रामेघकर्णा
३० मेघमालाविलोचना एताश्चान्याश्चवह्वोमातरोभरतर्षभ ३० कार्त्तिकेयानुयायिन्योनानारूपाःसहस्रशः दीर्घनख्योदीर्घदंत्योदीर्घ
तुंड्यश्चभारत ३१ सवलामधुराश्चैवयौवनस्थाःस्वलंकृताः माहात्म्येनचसंयुक्ताःकामरूपधरास्तथा ३२ निर्मांसगात्राःश्वेताश्चतथा
कांचनसंनिभाः कृष्णमेघनिभाश्चान्याधूम्राश्चभरतर्षभ ३३ अरुणाभामहाभोगादीर्घकेश्यःसितांवराः ऊर्ध्ववेणीधराश्चैवपिंगाक्ष्यो
लंवमेखलाः ३४ लंवोदर्योलंवकर्णास्तथालंवपयोधराः ताम्राक्ष्यस्ताम्रवर्णाश्चहर्यक्ष्यश्चतथापराः ३५ वरदाःकामचारिण्यो
नित्यंप्रमुदितास्तथा याम्योरौद्रास्तथासौम्याःकौवेर्योथमहावला ३६ वारुण्योथचमाहेंद्र्यस्तथाग्नेय्यःपरंतप वायव्यश्चाथ
कौमार्योब्राह्म्यश्चभरतर्षभ ३७ वैष्णव्यश्चतथासौर्योवाराह्यश्चमहावलाः रूपेणाप्सरसांतुल्यामनोहार्योमनोरमाः ३८ परपुष्टो
पमावाक्येतथर्ध्याधनदोपमाः शक्र वीर्योपमायुद्धेदीप्त्यावह्निसमास्तथा ३९ शत्रूणांविग्रहेनित्यंभयदास्ताभवंत्युत का
मरूपधराश्चैवजवेवायुसमास्तथा ४० अचिंत्यवलवीर्याश्चतथाचिंत्यपराक्रमाः वृक्षचत्वरवासिन्यश्चतुष्पथनिकेतनाः ४१
गुहाश्मशानवासिन्यःशैलप्रस्रवणालयाः नानाभरणधारिण्योनानामाल्यांवरास्तथा ४२ नानाविचित्रवेषाश्चनानाभा
षास्तथैवच एतेचान्येचवहवोगणाःशत्रुभयंकराः अनुजग्मुर्महात्मानंत्रिदशेंद्रस्यसंमते ४४ ततःशक्त्यस्त्रमददद्भगवा राम०
न्पाकशासनः गुहायराजशार्दूलविनाशायसुरद्विषां ४५ महास्वनांमहाघंटांद्योतमानांसितप्रभां अरुणादित्यवर्णांश्चयता ३०

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

कौमरत्नर्षभ ४६ ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूं उग्रां नानाप्रहरणां तपोवीर्यबलान्वितां ४७ अजेयां स्वगणैर्युक्तां नाम्ना सेनां
धनंजयां रुद्रतुल्यबलैर्युक्तां योधानामयुतैस्त्रिभिः ४८ न सा विजानाति रणात्कदाचिद्विनिवर्तितुं विष्णुर्ददौ वैजयंतीं मालां बलविव
र्धिनीं ४९ उमा ददौ विरजसी वाससी रविसप्रभे गंगा कमंडलुं दिव्यममृतोद्भवमुत्तमं ५० ददौ प्रीत्या कुमाराय दंडं चैव बृहस्पतिः गरुडो
दयितं पुत्रं मयूरं चित्रबर्हिणं ५१ वरुणः पाशमचूड्यं च प्रददौ वरुणायुधं नागं तु वरुणो राजा बलवीर्यसमन्वितं ५२ कृष्णाजिनं ततो
ब्रह्मा ब्रह्मण्याय ददौ प्रभुः समरेषु जयं चैव प्रददौ लोकभावनः ५३ सेनापत्यमनुप्राप्य स्कंदो देवगणस्य ह शुशुभे ज्वलितोर्चिष्मा
न्द्वितीय इव पावकः ५४ ततः पारिषदैश्चैव मातृभिश्च समन्वितः ययौ दैत्यविनाशाय ह्लादयन्सुरपुंगवान् ५५ सा सेना नैर्ऋती
भीमा सघंटोच्छ्रितकेतना सभेरीशंखमुरजा सायुधा सपता विनाद्यौ दैत्यविनाशाय ह्लादयन्सुरपुंगवान् ५ किनी ५६ शारदी
घो ५ द्यौरिवाभाति ज्योतिर्भिरिव शोभिता ततो देवनिकायास्ते नानाभूतगणास्तथा ५७ वादयामासुरव्यग्रा भेरीः शंखांश्च पुष्कलान्
पटहान्झर्झरांश्चैव क्रकचान्गोविषाणिकान् ५८ आडंबरान्गोमुखांश्च डिंडिमांश्च महास्वनान् तुष्टुवुस्ते कुमारं तु सर्वे देवाः सवास
वाः ५९ जगुश्च देवगंधर्वा ननृतुश्चाप्सरोगणाः ततः प्रीतो महासेनस्त्रिदशेभ्यो वरं ददौ ६० रिपून्हंतास्मि समरे ये वो वधचि
कीर्षवः प्रतिगृह्य वरं देवास्तस्माद्विबुधसत्तमात् ६१ प्रीतात्मानो महात्मानो मेनिरे निहतान्रिपून् सर्वेषां भूतसंघानां हर्षान्ना
दः समुत्थितः ६२ अपूरयत लोकांस्त्रीन्वरे दत्ते महात्मना स निर्ययौ महासेनो महत्या सेनया वृतः ६३ वधाय युधि दैत्यानां रक्षा

रा०
३१

र्थंचरिष्यैवौकसौ व्यवसायेजयोधर्मः सिद्धिर्लक्ष्मीर्धृतिः स्मृतिः ६४ महासेनस्यसैन्यानामग्रेजग्मुर्नराधिपः सत्तयाभीमयादेवः शूल
मुद्गरहस्तया ६५ ज्वलितालातधारिण्याचित्राभरणवर्मया गदामुशलनाराचशक्तितोमरहस्तया ६६ दृप्तसिंहनिनादिन्याविनद्य
प्रययौगुहः तंदृष्ट्वासर्वदैतेयाराक्षसादानवास्तथा ६७ अद्रवंतदिशःसर्वाभयोद्विग्नाःसमंततः अभ्यद्रवंतदेवांस्तान्विविधायु
धपाणयः ६८ दृष्ट्वाचसततःक्रुद्धःस्कंदस्तेजोबलान्वितः शक्त्यस्त्रंभगवान्भीमंपुनःपुनःरवाकिरत् ६९ आदधच्चात्मनस्तेजो
हविषेद्धइवानलः अभ्यस्यमानेशक्त्यस्त्रेस्कंदेनामिततेजसा ७० उल्काज्वालामहाराजपपातवसुधातले संह्रादयंतश्चतथा
निर्घाताश्चापतन्क्षितौ ७१ यथांतकालसमयेसुघोराःस्युस्तथानृप क्षिप्तास्त्वेकायदाशक्तिःसुघोरानलसूनुना ७२ ततःको
ट्योविनिष्पेतुःशक्तीनांभरतर्षभ ततःप्रीतोमहासेनोजघानभगवान्प्रभुः ७३ दैत्येंद्रंतारकंनाममहाबलपराक्रमं वृतंदैत्या
युतैर्वीरैर्बलिभिर्दशभिर्नृप ७४ महिषंचाष्टभिःपद्मैर्वृतंसंख्येनिजघ्निवान् त्रिपादंचायुतशतैर्जघानदशभिर्वृतं ७५
ह्रदोदरंनिखर्वैश्चवृतंदशभिरीश्वरः जघानानुचरैःसार्द्धंविविधायुधपाणिभिः ७६ तथाकुर्वंतिविपुलंनादंवध्यत्सुशत्रुषु
कुमारानुचराराजन्पूरयंतोदिशोदश ७७ ननृतुश्चववल्गुश्चजहसुश्चमुदान्विताः शक्त्यस्त्रस्यतुराजेंद्रततोर्चिभिःसमंतत राम०
ः ७८ त्रैलोक्यंत्रासितंसर्वंजृंभमाणाभिरेवच दग्धाःसहस्रशोदैत्यानादैःस्कंदस्यचापरे ७९ पताकयावधूताश्चहताः ३१
केचित्सुरद्विषः केचिद्घंटारवत्रस्तानिपेतुर्वसुधातले ८० केचित्प्रहरणैश्छिन्नाविनिपेतुर्गतायुषः एवंसुरद्विषोनेकान्बलवा
नाततायिनः ८१ जघानसमरेवीरःकार्त्तिकेयोमहाबलः बाणोनामाथदैतेयोबलेःपुत्रोमहाबलः ८२ क्रौंचंपर्वतमाश्रित्य

© Dharmartha Trust J&K. Digitized By eGangotri

देवसंघानबाधंत तमभ्यधावन्महासेनः सुरशत्रुमुदारधीः ८३ स कार्त्तिकेयस्य भयात्क्रौंचं शरणमीयिवान् ततः क्रौंचं महामन्युः क्रौंचना
दनिनादिनी ८४ शक्त्या बिभेद भगवान्कार्त्तिकेयोग्निदत्तया सशालस्कंधशबलं त्रस्तवानरवारणं ८५ पोडीनोद्भ्रांतविहगं विनिष्पतित
प[?]न्नगं गोलांगूलर्क्षसंघैश्च द्रवद्भिरनुनादितं ८६ कुरंगमविनिर्घोषविनादितवनाभ्यंयं विनिष्पतद्भिः शरभैः सिंहैश्च सहसा द्रुते
: ८७ शोच्यामपि दशां प्राप्तो रराजैव स पर्वतः विद्याधराः समुत्पेतुस्तस्य शृंगनिवासिनः ८८ किन्नराश्च समुद्विग्नाः शक्तिपातरवो
द्रुताः ततो दैत्या विनिष्पेतुः शतशोथ सहस्रशः ८९ प्रदीप्तात्पर्वतश्रेष्ठाद्विचित्राभरणस्रजः तान्निज[?]घ्नुरतिक्रम्य कुमारानुचरा मृधे
९० स चैव भगवान्क्रुद्धो दैत्येंद्रस्य सुतं तदा सहानुजं जघानाशु वृत्रं देवपतिर्यथा ९१ बिभेद शक्त्या क्रौंचं च पावकिः परवीरहा बहुधा धु ५
चैकधा चैव कृत्वात्मानं महाबलः ९२ शक्तिः क्षिप्ता रणे तस्य पाणिमेति पुनः पुनः एवंप्रभावो भगवांस्ततो भूयश्च पावकिः ९३ शौर्या
द्द्विगुणयोगेन तेजसा यशसा श्रिया क्रौंचस्तेन विनिर्भिन्नो दैत्याश्च शतशो हताः ९४ ततः स भगवान्देवो निहत्य विबुधद्विषः सभाज्यमानो
विबुधैः परं हर्षमवाप ह ९५ ततो दुंदुभयो राजन्नेदुः शंखाश्च भारत मुमुचुर्देवयोषाश्च पुष्पवर्षमनुत्तमं ९६ योगिनामीश्वरं देवं शत
शोथ सहस्रशः दिव्यगंधमुपादाय ववौ पुण्यश्च मारुतः ९७ गंधर्वास्तुष्टुवुश्चैनं यज्वानश्च महर्षयः केचिदेनं व्यवस्यंति पितामहसु
तं प्रभुं ९८ सनत्कुमारं सर्वेषां ब्रह्मयोनिं तमग्रजं केचिन्महेश्वरसुतं केचित्पुत्रं विभावसोः ९९ उमायाः कृत्तिकानां च गंगायाश्च वदंत्यु
त एकधा च द्विधा चैव चतुर्धा च महाबलं १० योगिनामीश्वरं देवं शतशोथ सहस्रशः एतत्ते कथितं राजन्कार्त्तिकेयाभिषेचनं १ शृणु चे

© Dharmartha Trust J&K. Digitized By eGangotri

ग० सरस्वत्यास्तीर्थवर्यम्सपुण्यपेतो ब्रह्मवन्तीर्थप्रवरं हेनेषु सुरशत्रु सु २ कुमारेणमहाराजत्रिविष्टपमिवापरं ऐश्वर्याणिचतत्रस्थो द्दावी
३२ ष्णः एथक्एथक् ३ ददौ नैर्ऋतमुख्येभ्यस्त्रैलोक्येपावकात्मजः एवंसभगवांस्तस्मिंस्तीर्थे दैत्यकुलान्तकः ४ [illegible]
[illegible] ५ अभिषिक्तोमहाराजदेवसेनापतिः सुरैः तैजसंनामतत्तीर्थंयत्रतीर्थंअपांपतिः ५ अभिषिक्तः सुरगणैर्व
रुणोभरतर्षभ अस्मिंस्तीर्थवरेस्नात्वास्कंदंचाभ्यर्च्यलांगली ६ ब्राह्मणेभ्योददौरुक्मंवासांस्याभरणानिच उषित्वारजनींतत्रमाध
वः परवीरहा ७ पूज्यतीर्थवरंतच्चस्पृष्ट्वातोयंचलांगली हृष्टः प्रीतमनाश्चैवह्यभवन्माधवोत्तमः ८ एतत्तेसर्वमाख्यातंयन्मात्वंप
रिपृच्छसि यथाभिषिक्तोभगवान्स्कंदोदेवैः समागतः ९ इतिगदापर्वणिबलदेवतीर्थयात्रायां जनमेजयउवाच अत्यद्भुतमिदंब्रह्म
न्श्रुतवानस्मितत्त्वतः अभिषेकंकुमारस्यविस्तरेणयथाविधि १ यच्छ्रुत्वापूतमात्मानंविजानामितपोधन प्रहृष्टानिचरोमाणिप्रसन्नं
चमनोमम २ अभिषेकंकुमारस्यदैत्यानांचवधंतथा श्रुत्वामेपरमाप्रीतिर्भूयः कौतूहलंहिमे ३ अपांपतिः कथंह्यस्मिन्नभिषिक्तः पुरा
सुरैः तन्मेब्रूहिमहाप्राज्ञ त्वं कुशलोह्यसिसत्तमः ४ वैशंपायनउवाच शृणुराजन्निदंचित्रंपूर्वकल्पेयथातथं आदौकृतयुगेराजन्वर्तमा
नेयथाविधि ५ वरुणंदेवताः सर्वाः समेत्येदमथाब्रुवन् यथास्मान्सुरराट्शक्रोभयेभ्यः पातिसर्वदा ६ तथात्वमपिसर्वासांसरि
तांवैपतिर्भव वासश्चतेसदादेवसागरेमकरालये १० समुद्रोयंतववशेभविष्यतिनदीपतिः सोमेनसार्धंचतवहानिवृद्धीभविष्यतः ११
एवमस्त्वितितान्देवान्वरुणोवाक्यमब्रवीत् समागम्यततः सर्वेवरुणंसागरालयं १२ अपांपतिंप्रचक्रुर्हिविधिदृष्टेनकर्मणा अभिषिच्य गम० ३२

© Dharmartha Trust J&K Digitized By eGangotri

ततोदेवावरुणंपाशसंपातिं १३ जग्मुःस्वान्येवस्थानानिपूजयित्वाजलेश्वरं अभिषिक्तस्ततोदेवैर्वरुणोपिमहायशाः १४ सरितः
सागराश्चैवनदीश्चापिसरांसिच पालयामासविधिनायथादेवान्शतक्रतुः १५ ततस्तत्राप्युपस्पृश्यदत्त्वाचविविधंवसु अग्नितीर्थे
महाप्राज्ञोजगामाथप्रलंबहा १६ नष्टोनदृश्यतेयत्रशमीगर्भेहुताशनः लोकालोकविनाशेचप्रादुर्भूतेतेनहानघ १७ उपतस्थुःसु
रायत्रसर्वलोकपितामहं अग्निःप्रनष्टोभगवान्कारणंचात्रविद्म हे १८ सर्वभूतक्षयोमाभूत्संपादयततोनलं जनमे० किमर्थं
भगवानग्निःप्रनष्टोलोकभावनः विज्ञानश्चकथंदेवैस्तन्ममाचक्ष्वतत्त्वतः १९ वैशं० भृगोःशापात्सुसंभीतोजातवेदाःप्रतापवान्
शमीगर्भमथासाद्यननाशभगवांस्ततः प्रनष्टेतुतदावह्नौदेवाःसर्वेसवासवाः अन्वेषंततदानष्टंज्वलनंभृशदुःखिताः ततोग्नितीं
र्थमासाद्यशमीगर्भस्थमेवहि ददृशुर्ज्वलनंतत्रवसमानंयथाविधि २० देवाःसर्वेनरव्याघ्रबृहस्पतिपुरोगमाः ज्वलनंतंसमासा
द्यप्रीताभूवन्सवासवाः २१ पुनरेवयथास्थानंजग्मुःसर्वभक्षस्तथाभवत् भृगोःशापान्महीपालयदुक्तंब्रह्मवादिना २२ तत्राप्याप्लुत्य
मतिमान्ब्रह्मयोनिंजगामह ससर्जभगवान्यत्रसर्वलोकपितामहः २३ तत्राप्लुत्यततोब्रह्मासहदेवैःप्रभुःपुरा ससर्जतीर्थानितथा
देवतानांयथाविधि २४ तत्रस्नात्वाचदत्त्वाचवसूनिविविधानिच कौबेरंप्रययौतीर्थंतत्रतप्त्वामहत्तपः २५ धनाधिपत्यंसंप्राप्तो
राजन्नैलविलःप्रभुः तत्रस्थमेवतंराजन्धनानिनिधयस्तथा २६ उपतस्थुर्नरश्रेष्ठतत्तीर्थंलांगलीबलः गत्वास्नात्वाचविधिवद्ब्राह्मणे
भ्योधनंददौ २७ ददृशेतत्रतत्स्थानंकौबेरेकाननोत्तमे पुरायत्रतपस्तप्तंविपुलंसुमहात्मना २८ यक्षराज्ञाकुबेरेणवरालब्धाश्च

© Dharmartha Trust J&K Digitized by eGangotri

ग० पुष्कलाः धनाधिपत्यं समरत्वं च रुद्रेणामिततेजसा २९ सुरत्वं लोकपालत्वं पुत्रं च नलकूबरं यत्र लेभे महाबाहो धनाधिपतिरंजसा ३०
३३ अभिषिक्तश्च तत्रैव समागम्य मरुद्गणैः वाहनं चास्य तद्दत्तं हंसयुक्तं मनोजवं ३१ विमानं पुष्पकं दिव्यं नैर्ऋतैश्वर्यमेव च तत्राप्लु
त्य बलो राजन् दत्वा दायांश्च पुष्कलान् ३२ जगाम त्वरितो रामस्तीर्थं श्वेतानुलेपनः निषेवितं सर्वसत्वैर्नाम्ना बदरपाचनं ३३ ना
नर्तुकवनोपेतं सदा पुष्पफलं महत् इति गदापर्वणि वैशंपायन उवाच ततस्तीर्थवरं रामो ययौ बदरपाचनं तपस्विसिद्धचरितं य
त्र कन्या धृतव्रता १ भरद्वाजस्य दुहिता रूपेणाप्रतिमा भुवि श्रुतावती नाम विभो कुमारी ब्रह्मचारिणी २ तपश्चचार सात्युग्रं नियमै
र्बहुभिर्वृता भर्ता मे देवराजः स्यादिति निश्चित्य भामिनी ३ समास्तस्या व्यतिक्रान्ता बह्व्यः कुरुकुलोद्वह चरन्त्या नियमांस्तांस्तान् स्त्री
भिस्तीव्रान् सुदुश्चरान् तस्यास्तु तेन वृत्तेन तपसा च विशांपते भक्त्या च भगवान् प्रीतः परया पाकशासनः ४ आजगामाश्रमं तस्या
स्त्रिदशाधिपतिः प्रभुः आस्थाय रूपं विप्रर्षेर्वसिष्ठस्य महात्मनः ५ सा तं दृष्ट्वोग्रतपसं वसिष्ठं तपतां वरं आचारैर्मुनिभिर्दृष्टैः पूज
यामास भारत ६ उवाच नियमज्ञा च कल्याणी सा प्रियंवदा भगवन्मुनिशार्दूल किमाज्ञापयसि प्रभो ७ सर्वमद्य यथाशक्ति त
व दास्यामि सुव्रत शक्रभक्त्या च ते पाणिं न दास्यामि कथंचन ८ व्रतैश्च नियमैश्चैव तपसा च तपोधन शक्रस्तोषयितव्यो वै मया त्रि राम०
भुवनेश्वरः ९ इत्युक्तो भगवान्देवः स्मयन्निव निरीक्ष्य तां उवाच नियमज्ञात्वा सांत्वयन्निव भारत १० उग्रं तपश्चरसि वै विदिता ३३
मेऽसि सुव्रते यदर्थमयमारंभस्तव कल्याणि हृद्गतः ११ तच्च सर्वं यथाभूतं भविष्यति वरानने तपसा लभ्यते सर्वं यथाभूतं भविष्य

© Dharmartha Trust J&K. Digitized by eGangotri

ति १२ पंचास्थानानि दिव्यानि विबुधानां शुभानने तपसा तानि प्राप्यानि तपोमूलं महत्सुखं १३ इति कृत्वा तपो घोरं देहं सन्न्यस्य
मानवाः देवत्वं यांति कल्याणि शृणुष्वैवं वचो मम १४ पंच चैतानि सुभगे वर्षाणि शुभव्रते पंच सुक्तानु भगवानजगाम वलसूदनः १५
आश्रमं अथ तां तु कल्याणि तनोज्ज्वलत् तापसाः अविदूरेतनस्तस्मादाश्रमात्तीर्थमुत्तमं १६ इंद्रतीर्थमिति विख्यातं त्रिषु लोकेषु मानद तस्याजिज्ञा
सनार्थं स भगवान्पाकशासनः १७ वदराणामपचनं च कार विबुधाधिपः ततः प्रतमासा राजन्वाग्यता विगतक्लमा १८ तस्याः शुचि
संवीता पावके समधिश्रयत् अपचद्राजशार्दूल वदराणि महाव्रता १९ तस्याः पचंत्याः सुमहान्कालोगात्कुरुषर्षभ न च स्म तान्यपच्यंत
दिनं च क्षयमभ्यगात् २० हुताशनेन दग्धश्च यस्तस्याः काष्ठसंचयः अकाष्ठमग्निं सा दृष्ट्वा स्वशरीरमथादहत् २१ पादौ प्रक्षिप्य सा पूर्वं
पावके चारुदर्शना दग्धौ दग्धौ पुनः पादौ उपावर्त्तयतानघा २२ चरणौ दह्यमानौ च नाचिंतयदनिंदिता कुर्वाणा दुष्करं कर्म महर्षिप्रि
यकाम्यया २३ नैवं मनस्तं तस्याः सुमुखं भेदोप्यथवाभवत् शरीरमग्निनादीप्य जलमध्ये च हर्षिता २४ तस्यास्तद्वचनं नित्यमवर्त्तत हृदि स्मा
रत सर्वथा वदराण्येव श्रूयानीति कन्यया २५ सा तन्मनसि कृत्वैव महर्षेर्वचनं शुभा अपचद्वदराण्येवं न चापच्यंत भारत २६
तस्यास्तु चरणौ वह्निर्ददाह भगवान्स्वयं न च तस्या मनो दुःखं स्वल्पमप्यभवत्तदा २७ अथ तत्कर्म दृष्ट्वास्याः प्रीतस्त्रिभुवनेश्वरः ततः
संदर्शयामास कन्यायै रूपमात्मनः २८ उवाच च सुरश्रेष्ठस्तां कन्यां सुदृढव्रतां प्रीतोस्मि ते शुभे भक्त्या तपसा नियमेन च तस्माद्यो
भिमतः कामस्स ते संपत्स्यते शुभे देहं त्यक्त्वा महाभागे त्रिदिवमपि वत्स्यसि २० इदं च ते तीर्थवरं स्थिरं लोके भविष्यति सर्वपापाप

© (c) Dharmartha Trust J&K. Digitized By eGangotri

ग०
३४

हंसमुनीनामावस्यपावनं ३१ विख्यातंत्रिषुलोकेषुब्रह्मर्षिभिरभिष्टुतं अस्मिन्खलुमहाभागेशुभेतीर्थवरेऽनघ ३२ तस्मा
न्सर्वयोजग्मुर्हिमवन्तमरुंधती ततस्तैर्वैमहाभागागतास्तत्रसुसंसिताः ३३ हृत्यर्थंफलमूलानिसमाहर्तुंयुधिष्ठिर तेषांहृत्यर्थि
नांतत्रवसतांहिमवद्वने ३४ अनावृष्टिरनुप्राप्तातदाद्वादशवार्षिकी तेकृत्वाचाश्रमंतत्रन्यवसंततपस्विनः ३५ अरुंधत्यपिकल्या
णीतपोनित्याभवत्तदा अरुंधतींततोदृष्ट्वातीव्रंनियममास्थितां ३६ अथागमत्त्रिनयनःसुप्रीतोवरदस्तदा ब्राह्मंरूपंततःकृत्वा
महादेवोमहायशाः ३७ तामभ्येत्याब्रवीद्देवोभिक्षामिच्छाम्यहंशुभे प्रत्युवाचततःसातंब्राह्मणंचारुदर्शना ३८ क्षीणोन्नसंच
योविप्रबदराणीहभक्षय ततोब्रवीन्महादेवःपचस्वैतानिसुव्रते ३९ इत्युक्तासापचत्तानिब्राह्मणप्रियकाम्यया अधिश्रित्यसम
िद्धेग्नौबदराणियशस्विनी ४० दिव्यामनोरमाःपुण्याःकथाःशुश्रावसातदा अतीतासात्वनावृष्टिर्घोराद्वादशवार्षिकी
४१ अनश्नंत्याःपचंत्याश्चशृण्वंत्याश्चकथाःशुभाः दिनोपमःसतस्याथकालोतीतःसुदारुणः ४२ ततस्तुमुनयःप्राप्ताःफ
लान्यादायपर्वतात् ततःसभगवान्प्रीतःप्रोवाचारुंधतींततः ४३ उपसर्पस्वधर्मज्ञेयथापूर्वमिमानृषीन् प्रीतोस्मितवध
र्मज्ञेतपसानियमेनच ४४ ततःसंदर्शयामासस्वरूपंभगवान्हरः ततोब्रवीत्तदातेभ्यस्तस्याश्चचरितंमहत् ४५ भवद्भिर्हिम राम०
वत्पृष्ठेयत्तपःसमुपार्जितं अस्याश्चयत्तपोविप्रानसमंतन्मतंमम ४६ अनयाहितपस्विन्यातपस्तप्तंसुदुश्चरं अनश्नंत्या ३४
पचंत्याचसमाद्वादशपारिताः ४७ ततःप्रोवाचभगवांस्तामेवारुंधतींपुनः वरंवृणीष्वकल्याणियत्तेभिलषितंहृदि ४८ सा

© Dharmartha Trust J&K Digitized By eGangotri

ब्रवीत्सत्युतानाक्षीरेवं सप्तर्षिसंसदि भगवान्यदि मे प्रीतस्तीर्थे स्यादिदमद्भुतं सिद्धदेवर्षिदयितं नाम्ना बदरपाचनं तथास्मिन्देव
देवेश त्रिरात्रमुषितः शुचिः ५० आप्नुयादुपवासेन फलं द्वादशवार्षिकं एवमस्त्विति तां देवः प्रत्युवाच तपस्विनीं ५१ सप्तर्षिभिस्त
तो देवस्ततो लोकं ययौ तदा ऋषयो विस्मयं जग्मुस्तां दृष्ट्वा चाप्यरुंधतीं ५२ अश्रांतां चाविवर्णां च क्षुत्पिपासासमायुतां एवं सि
द्धिः परा प्राप्तारुंधत्या विशुद्धया ५३ यथा त्वया महाभागे मदर्थं संशितव्रते विशेषो हि त्वया भद्रे व्रते ह्यस्मिन्समर्पितः ५४ तथा
चैव ददाम्यद्य नियमेन सुतोषितः विशेषेण तु कल्याणि प्रयच्छामि वरं वरे ५५ अरुंधत्या वरस्तस्याः पापो दत्तो वै महात्मना तस्य चाहं प्रभा
वेन तव कल्याणि तेजसा ५६ प्रवक्ष्यामि परं भूयो वरमत्र यथाविधि यस्त्वेकां रजनीं तीर्थे वसेत्स सुसमाहितः ५७ स स्नात्वा
प्राप्स्यते लोकान्देहन्यासात्सुदुर्लभान् इत्युक्त्वा भगवान्देवः सहस्राक्षः प्रतापवान् ५८ श्रुतावतीं ततः पुण्यां जगाम त्रिदिवं
पुनः गते वज्रधरे राजंस्तत्र वर्षं पपात ह ५९ पुष्पाणां भरतश्रेष्ठ दिव्यानां पुण्यगंधिनां देवदुंदुभयश्चापि नेदुस्तत्र महास्वना
: ६० मारुतश्च ववौ पुण्यः पुण्यगंधो विशांपते उत्सृज्य तु शुभा देहं जगामास्य च भार्यतां ६१ तपसोग्रेण तं लब्ध्वा तेन रेमे
सहाच्युत जनमे० कातस्य भगवन्माता कसमुद्भा च शोभना ६२ श्रोतुमिच्छाम्यहं विप्र परं कौतूहलं हि मे वैशं० भारद्वाज
स्य विप्रर्षेः स्कन्नं रेतो महात्मनः ६३ दृष्ट्वाप्सरसमायांतीं घृताचीं पृथुलोचनां स तु जग्राह तद्रेतः करेणानयतां वरः ६४
तदापतत्पर्णपुटे तत्र सा संभवत्सुता तस्यास्तु जातकर्मादि कृत्वा सर्वं तपोधनः ६५ नाम चास्याः स कृतवान्भरद्वाजो महामुनिः

© Dharmartha Trust J&K. Digitized By eGangotri

ग० श्रुत्वा व्रतीति धर्मात्मा देवर्षिगणसंसदि ६६ सेवित्वा माश्रमं मुख्यं जगाम हिमवद्वनं तत्राप्युपस्पृश्य महानुभावो वसूनि दत्वा च महाद्वि
३५ जेभ्यः ज[illegible]गाम तीर्थं सुसमाहितात्मा शक्रस्य हृष्टः प्रवरो हलदानी ६७ इति गदापर्वणि वैशंपायन उवाच इंद्रतीर्थं ततो गत्वा यदूनां प्रव
रो बलः विप्रेभ्यो धनरत्नानि ददौ स्नात्वा यथाविधि १ तत्र ह्यमरराजोसावीजे क्रतुशतेन वै बृहस्पतेश्च देवेशः प्रददौ विपुलं धनं निरर्ग
लान् जातरूप्यान्सर्वान्विविधदक्षिणान् आजहार क्रतूंस्तत्र यथोक्तान्वेदपारगैः तान्क्रतून्भरतश्रेष्ठ शतकृत्वो महाद्युतिः २ पूरयामास
विधिवत्ततः ख्यातः शतक्रतुः तस्य नाम्ना च तत्तीर्थं शिवं पुण्यं सनातनं ३ इंद्रतीर्थमिति ख्यातं सर्वपापप्रमोचनं उपस्पृश्य च तत्रा
पि विधिवन्मुशलायुधः ४ ब्राह्मणान्पूजयित्वा च सदाछादनभोजनैः शुभं तीर्थवरं तस्माद्रामतीर्थं जगाम ह ५ यत्र रामो महाभागो भा
र्गवः सुमहातपाः असकृत्पृथिवीं जित्वा हतक्षत्रियपुंगवां ६ उपाध्यायं पुरस्कृत्य कश्यपं मुनिसत्तमं अयजद्वाजिमेधेनाश्वमेध
शतेन च ७ प्रददौ दक्षिणां चैव पृथिवीं वै ससागरां दत्वा च दानं विविधं नानारत्नसमन्वितं ८ सगोहस्तिकदासीकं साजाविगतवा
न्वनं पुण्ये तीर्थवरे तत्र देवब्रह्मर्षिसेविते ९ मुनींश्चैवाभिवाद्याथ यमुनातीर्थमागमत् यत्रानयामास तदा राजसूयं महीपते १०
पुत्रो दितेर्महाभागो वरुणो वै सितप्रभः तत्र निर्जित्य संग्रामे मानुषान्देवतांस्तथा ११ वरं क्रतुं समाजह्रे वरुणः परवीरहा तस्मिन्क्र राम०
तुवरे वृत्ते संग्रामः समजायत १२ देवानां दानवानां च त्रैलोक्यस्य भयावहः राजसूये क्रतुश्रेष्ठे निवृत्ते जनमेजय १३ जायते सु ३५
महाघोरः संग्रामः क्षत्रियान्प्रति तत्रापि लांगली देवऋषीनभ्यर्च्य पूजया १४ इतरेभ्योप्यदाद्दानमर्थिभ्यः कामदो विभुः वनमालीत

© (c) Dhaamantar Trust & Digitized By eGangotri

तोरुशः स्तूयमानो महर्षिभिः १५ तस्मादादित्यतीर्थं च जगाम कमलेक्षणः यत्रेष्ट्वा भगवान् ज्योतिर्भास्करो राजसत्तम १६ ज्योतिषा
माधिपत्यं च प्रभावं चाभ्यपद्यत तस्यां नद्यास्तु तीरे वै सर्वे देवाः सवासवाः १७ विश्वेदेवाः समरुतो गंधर्वाप्सरसश्च ह द्वैपायनः शुकश्चैव कृ
ष्णश्च मधुसूदनः १८ यक्षाश्च राक्षसाश्चैव पिशाचाश्च विशांपते एते चान्ये च बहवो योगसिद्धाः सहस्रशः १९ तस्मिंस्तीर्थे सरस्वत्याः शिवे पु
ण्ये परंतप तत्र हत्वा पुरा विष्णुरसुरौ मधुकैटभौ २० आप्लुत्य भरतश्रेष्ठ तीर्थप्रवर उत्तमे द्वैपायनश्च धर्मात्मा तत्रैवाप्लुत्य भारत २१ सं
प्राप्य परमं योगं सिद्धिं च परमां गतः असितो देवलश्चैव तस्मिन्नेव महातपाः २२ परमं योगमास्थाय ऋषिर्योगमवाप्तवान् गदापर्वणि
वैशं० तस्मिन्नेव तु धर्मात्मा वसति स्म तपोधनः गार्हस्थ्यं धर्ममास्थाय असितो देवलः पुरा १ धर्मनित्यः शुचिर्दांतो न्यस्तदंडो महातपाः
कर्मणा मनसा वाचा समः सर्वेषु जंतुषु २ अक्रोधनो महाराज तुल्यनिंदात्मसंस्तुतिः प्रियाप्रिये तुल्यवृत्तिर्यमवत्समदर्शनः ३ कांचने
लोष्टभावे च समदर्शी महातपाः देवान्पूजयन्नित्यमतिथींश्च द्विजैः सह ४ ब्रह्मचर्यरतो नित्यं सदा धर्मपरायणः ततोभ्येत्य महाभाग
योगमास्थाय भिक्षुकः ५ जैगीषव्यो मुनिर्धीमांस्तस्मिंस्तीर्थे समाहितः देवलस्याश्रमे राजन्न्यवसत्स महाद्युतिः ६ योगनित्यो महा
राज सिद्धिं प्राप्तो महातपाः तं तत्र वसमानं तु जैगीषव्यं महामुनिं ७ देवलो दर्शयन्नेव नैवायुंजत धर्मतः एवं तयोर्महाराज दीर्घकालो
व्यतिक्रमत् ८ जैगीषव्यं मुनिवरं न ददर्शाथ देवलः आहारकाले मतिमान्परिव्राड् जनमेजय ९ उपातिष्ठत धर्मज्ञो भैक्षकाले
स देवलं सदृष्ट्वा भिक्षुरूपेण प्राप्तं तत्र महामुनिं १० गौरवं परमं चक्रे प्रीतिं च विपुलां तथा देवलस्तु यथाशक्ति पूजयामास भारत ११

© (c) Dharmartha Trust J&K. Digitized by eGangotri

ऋषिदृष्टेनविधिना नामसमावहन्‌ः समाहितः कश्चित्त्वसन्नपतेदेवलस्यमहात्मनः १२ चिंतासुमहतीजातामुनिंदृष्ट्वामहाद्युतिं समा
समतिक्रांताव[illegible]स्थः पूजयंतोमम १३ नवैयमलसोभिक्षुरभ्यभाषतकिंचन एवंविगणयन्नेवसजगाममहोदधिं अंतरिक्षचरः श्रीमा
न्कलशंगृह्यदेवलः गच्छन्नेवसधर्मात्मासमुद्रंसरितांपतिं १५ जैगीषव्यंततोपश्यत्गतंप्रागेवभारत ततः सविस्मयश्चिंतांजगामाथा
सितप्रभः १६ कथंभिक्षुरयंप्राप्तः समुद्रेस्नातएवच इत्येवंचिंतयामासमहर्षिरसितस्तदा १७ स्नात्वासमुद्रेविधिवच्छुचिर्जप्यंजजा
पह कृतजप्याह्निकः श्रीमानाश्रमंचजगाम ह १८ कलशंजलपूर्णंवैगृहीत्वाजनमेजय ततः सप्रविशन्नेवस्वमाश्रमपदंमुनिः
१९ आसीनमाश्रमेतत्रजैगीषव्यमपश्यत नव्याहरतिचैवैनंजैगीषव्यः कथंचन २० काष्ठभूतोश्रमपदेवसतिस्ममहातपाः
तंदृष्ट्वाचाप्लुतंतोयेनसागरेसागरोपमं २१ प्रविष्टमाश्रमंचापिपूर्वमेवददर्शसः असितोदेवलोराजंश्चिंतयामासबुद्धिमान्‌ २२ दृष्ट्वा
प्रभावंतपसोजैगीषव्यस्ययोगजं चिंतयामासराजेंद्रतदासमुनिसत्तमः २३ मयादृष्टः समुद्रेचआश्रमेचकथंत्वयं एवंविगणयन्ने
वसमुनिर्मंत्रपारगः २४ उत्पपाताश्रमात्तस्मादंतरिक्षंविशांपते जिज्ञासार्थंतदाभिक्षोर्जैगीषव्यस्यदेवलः २५ सोंतरिक्षचरा
न्सिद्धान्समपश्यत्समाहितान्‌ जैगीषव्यंचतैः सिद्धैः पूज्यमानमपश्यत २६ ततोसितः सुसंरब्धोव्यवसायीदृढव्रतः अपश्यद्वैदेव
तोयांतंजैगीषव्यंसदेवलः २७ तस्माच्चपितृलोकंतंव्रजंतंसोन्वपश्यत पितृलोकाच्चतंयांतंयाम्यंलोकमपश्यत २८ तस्मादपि
समुत्पत्यसोमलोकमभिष्टुतं व्रजंतमन्वपश्यत्सजैगीषव्यंमहामुनिं २९ लोकान्समुत्पतंतंतुशुभानेकांतयाजिनां ततोग्निहोत्रि

© Dhaatri Trust & IGNCA. Digitized by eGangotri

रंगांलोकांवतस्याप्युत्पपातह ३० दर्शंचपौर्णमासंचयेयजंतितपोधनाः तेभ्यःसददृशेधीमान्लोकेभ्यःपशुयाजिनां ३१ व्रजंतंलो
कममलमपश्यद्देवपूजितं चातुर्मास्यैर्बहुविधैर्यजंतेयेतपोधनाः ३२ तेषांस्थानंततोयातंतथाग्निष्टोमयाजिनां अग्निष्टुतेनचतथाये
यजंतितपोधनाः ३३ तत्स्थानमनुसंप्राप्तमन्वपश्यतदेवलः वाजपेयंक्रतुवरंतथाबहुसुवर्णकं ३४ आहरंतिमहाप्रज्ञास्तेषांलोके
ष्वपश्यत यजंतेराजसूयेनपुंडरीकेणचैवये ३५ तेषांलोकेष्वपश्यच्चजैगीषव्यंसदेवलः अश्वमेधंक्रतुवरंनरमेधंतथैवच आहरं
तिनरश्रेष्ठास्तेषांलोकेष्वपश्यत सर्वमेधंचदुष्प्रापंतथासौत्रामणिंचये ३६ तेषांलोकेष्वपश्यच्चजैगीषव्यंसदेवलः द्वादशाहैश्चस
त्रैश्चयजंतेविविधैर्नृप तेषांलोकेष्वपश्यच्चजैगीषव्यंसदेवलः ३७ मैत्रावरुणयोर्लोकानादित्यानांतथैवच सलोकतामनुप्रा
प्तमपश्यत्ततोसितः रुद्राणांचवसूनांचस्थानंयच्चबृहस्पतेः ३९ तानिसर्वाण्यतीतानिसमपश्यत्ततोसितः आरुह्यचगवां
लोकंप्रयांतंब्रह्मसत्रिणां ४० लोकानपश्यद्गच्छंतंजैगीषव्यंसदेवलः ततोमुनिवरंभूयोजैगीषव्यमथासितः ४१ नान्वप
श्यतलोकस्थमंतर्हितमरिंदम सोचिंतयन्महाभागोजैगीषव्यंसदेवलः ४२ प्रभावंसुव्रतत्वंचसिद्धियोगस्यचातुलं असितो
दृष्टवांस्तत्रसिद्धान्लोकेषुसत्तमान् ४३ प्रयतःप्रांजलिर्भूत्वाधीरस्तान्ब्रह्मसत्रिणः जैगीषव्यंनपश्यामितंशंसध्वंमहौजसः ४४
एतदिच्छाम्यहंश्रोतुंपरंकौतूहलंहिमे सिद्धाऊचुः शृणुदेवलभूतार्थंशंसतांनोदृढव्रत जैगीषव्यःसवैलोकंशाश्वतंब्रह्मणोग
तः ४५ वैशं सश्रुत्वावचनंतेषांसिद्धानांब्रह्मसत्रिणां असितोदेवलस्तूर्णमुत्पपातपपातच ४६ ततःसिद्धास्तऊचुर्हिदेव

© (ɔ) Dharmartha Trust J&K. Digitized By eGangotri

ग० ३०

वलंपुनरेवह नदेवलगतिस्तत्रनवगंतुंतपोधनं ४७ ब्रह्मणःसदनेविप्रोजैगीषव्योयदाऽभवत् वैशं० तेषांतद्वचनंश्रुत्वासिद्धानांदे
वलःपुरः आनुपूर्व्येणलोकांस्तान्सर्वानवततारह ४८ स्वमाश्रमपदंपुण्यमाजगामपतत्रिवत् प्रविशन्नेवचापश्यज्जैगीषव्यंस
देवलः ४९ ततोबुध्याव्यगणयद्देवलोधर्मयुक्तया दृष्ट्वाप्रभावंतपसोजैगीषव्यस्ययोगजं ५० ततोऽब्रवीन्महात्मानंजैगीषव्यंस
देवलः विनयावनतोराजन्नुपसर्प्यमहामुनिं ५१ मोक्षधर्मंसमास्थातुमिच्छेयंभगवन्नहं तस्यतद्वचनंश्रुत्वाउपदेशंचकारसः ५२
विधिंचयोगस्यपरंकार्याकार्यस्यशास्त्रतः सन्यासकृतबुद्धिंतंततोदृष्ट्वामहातपाः ५३ सर्वाश्चास्यक्रियाश्चक्रेविधिदृष्टेनकर्मणा
सन्यासकृतबुद्धिंतंभूतानिपितृभिःसह ५४ ततोदृष्ट्वाप्ररुरुदुः कोऽस्मान्संविभजिष्यति देवलस्तुवचःश्रुत्वाभूतानांकरुणंतथा
५५ दिशोदशव्याहरतांमोक्षंत्यक्तुंमनोदधे ततस्तुफलमूलानिपवित्राणिचभारत ५६ पुष्पाण्योषधयश्चैवरोरूयन्तिसहस्रशः पु
नर्नोदेवलःक्षुद्रोऽस्मच्छेत्स्यतिदुर्मतिः ५७ अभयंसर्वभूतेभ्योयोदत्वानावबुध्यत ततोभूयोव्यगणयत्स्वबुद्ध्यामुनिसत्तमः ५८
मोक्षेगार्हस्थ्यधर्मेवाकिन्नुश्रेयस्करंभवेत् इतिनिश्चित्यमनसादेवलोराजसत्तमः ५९ त्यक्त्वागार्हस्थ्यधर्मंसमोक्षधर्ममरो
चयत् एवमादीनिसंचिन्त्यदेवलोनिश्चयात्ततः ६० प्राप्तवान्परमांसिद्धिंपरंयोगंचभारत ततोदेवाःसमागम्यबृहस्पतिपुरोगमाः गम० ३०
६१ जैगीषव्यंतपश्चास्यप्रशंसंतितपस्विनः अथाब्रवीदृषिवरोदेवान्वैनारदस्तथा ६२ जैगीषव्येतपोनास्तिविस्मापयतियोऽसि
तं तमेवंवादिनंधीरंप्रत्यूचुस्तेदिवौकसः ६३ नैवमित्येवशंसन्तोजैगीषव्यंमहामुनिं नातःपरतरंकिंचित्तुल्यमस्तिप्रभावतः ६४

© (c) Dharmartha Trust J&K. Digitized by eGangotri

तेजसस्तपसश्चास्य योगस्य च महात्मनः एवं प्रभावो धर्मात्मा जैगीषव्यस्तथासितः ६५ तयोरिदं स्थानवरं तीर्थं चैव महात्म
नोः तत्राप्युपस्पृश्य ततो महात्मा दत्त्वा च वित्तं हलभृद्द्विजेभ्यः अवाप्य धर्मं परमार्यकर्मा जगाम सोमस्य महत्सुतीर्थं ६६ इति
महाभारते गदापर्वणि वैशंपाय० यत्रेजिवानुडुपती राजसूयेन भारत तस्मिंस्तीर्थे महानासीत्संग्रामस्तारकामयः १ तत्राप्युपस्पृ
श्य बलो दत्त्वा दानानि चात्मवान् सारस्वतस्य धर्मात्मा मुनेस्तीर्थं जगाम ह २ ततो द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् वेदानध्यापया
मास पुरा सारस्वतो मुनिः ३ जनमे० कथं द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ऋषीनध्यापयामास पुरा सारस्वतो मुनिः ४ वैशं
० आसीत्पूर्वं महाराज मुनिर्धीमान्महातपाः दधीच इति विख्यातो ब्रह्मचारी जितेन्द्रियः ५ तस्यातितपसः शक्रो बिभेति सततं विभो
न स लोभयितुं शक्यः फलैर्बहुविधैरपि ६ प्रलोभनार्थं तस्याथ प्राहिणोत्पाकशासनः दिव्यामप्सरसं पुण्यां दर्शनीयामलंबुषां
७ तस्य तर्पयतो देवान्सरस्वत्यां महात्मनः समीपतो महाराज सोपातिष्ठत भाविनी ८ तां दिव्यवपुषं दृष्ट्वा तस्यर्षेर्भावितात्मनः रेतः स्कं
न्नं सरस्वत्यां तत्सा जग्राह निम्नगा ९ कुक्षौ चाप्यदधद्दृष्ट्वा तद्रेतः पुरुषर्षभ सा दधार च तं गर्भं पुत्रहेतोर्महानदी १० सुषुवे चापि समये
पुत्रं सा सरितां वरा जगाम पुत्रमादाय तमृषिं प्रति च प्रभो ११ ऋषिसंसदि तं दृष्ट्वा सा नदी मुनिसत्तमं ततः प्रोवाच राजेन्द्र ददती पुत्र
मस्य तं १२ ब्रह्मर्षे तव पुत्रोऽयं त्वद्भक्त्या धारितो मया दृष्ट्वा तेऽप्सरसं रेतो यत्स्कन्नं प्रागलंबुषां १३ तत्कुक्षिणा वै ब्रह्मर्षे त्वद्भक्त्या धृ
तवत्यहं न विनाशमिदं गच्छेत्त्वत्तेज इति निश्चयात् १४ प्रतिगृह्णीष्व पुत्रं स्वं मया दत्तमनिन्दितं इत्युक्तः प्रतिजग्राह प्रीतिं चावाप पुष्क

© Dharmartha Trust J&K. Digitized By eGangotri

ष्कलं। १५ ससुतंचाप्यजिघ्रत्तंमूर्ध्निप्रेम्णाद्विजोत्तमः परिष्वज्यचिरंकालंतदाभरतसत्तम १६ सरस्वतींचवरंप्रादात्प्रीयमाणोमहा
मुनिः विश्वेदेवाः सपितरोगंधर्वाप्सरसांगणाः १७ तृप्तिंयास्यंतिसुभगेतर्प्यमाणास्तवांभसा इत्युक्त्वासतुतुष्टाववचोभिर्वैमहा
नदीं १८ प्रीतः परमहृष्टात्मायथावच्छृणुपार्थिव प्रसृतासिमहाभागेसरसोब्रह्मणः पुरा १९ जानंतित्वांसरिच्छ्रेष्ठेमुनयः संशित
व्रताः ममप्रियकरीचापिसततंप्रियदर्शने २० तस्मात्सारस्वतः पुत्रोमहांस्तेवरवर्णिनी तवैवनाम्नाप्रथितः पुत्रस्तेलोकभावनः २१
सारस्वतइतिख्यातोभविष्यतिमहातपाः एषद्वादशवार्षिक्यामनावृष्ट्यांद्विजर्षभान् २२ सारस्वतोमहाभागेवेदानध्यापयिष्यति
प्र पुण्याभ्यश्चसरिद्भ्यस्त्वंसदापुण्यतमाशुभे २३ भविष्यसिमहाभागेमत्प्रसादात्सरस्वति एवंसासंस्तुतातेनवरंलब्ध्वामहानदी २४ पु
त्रमादायमुदिताजगामभरतर्षभ एतस्मिन्नेवकालेतुविरोधेदेवदानवैः २५ शक्रः प्रहरणान्वेषीलोकांस्त्रीन्विचचारह नचोप
लेभेभगवान्शक्रः प्रहरणंतदा २६ यद्वैतेषांभवेद्योग्यंवधायविबुधद्विषां ततोऽब्रवीत्सुरान्शक्रोनमेशक्यामहासुराः २७
ऋतेस्थिभिर्दधीचस्यनिहंतुंत्रिदशद्विषः तस्माद्गत्वाऋषिश्रेष्ठोयाच्यतांसुरसत्तमः २८ दधीचास्थीनिदेहीतितैर्वधिष्याम
हेरिपून् सचैतैर्याचितोऽस्थीनियत्नादृषिवरस्तदा २९ प्राणत्यागंकुरुश्रेष्ठचकारैवाविचारयन् सलोकानक्षयान्प्राप्तोदेव ग०म०
प्रियकरस्तदा ३० तस्यास्थिभिरथोशक्रः संप्रहृष्टमनास्तदा कारयामासदिव्यानिनानाप्रहरणानिच ३१ वज्राणिच ३८
क्राणिलगुर्गदांदंडांश्चपुष्कलान् सहितीव्रेणतपसासंभृतः परमर्षिणा ३२ प्रजापतिसुतेनाथभृगुणालोकभावनः

© Dharmarth Trust J&K Digitized By eGangotri

अतिकायः स तेजस्वी लोकसारेण विनिर्मितः ३३ जेते शैलगुरुः प्रांशुर्महिम्ना प्रथितः प्रभुः नित्यमुद्विजते चास्य तेजसः पाकशा
सनः ३४ तेन वज्रेण भगवान्मन्त्रयुक्तेन भारत विद्युत्क्रोशविसृष्टेन ब्रह्मतेजोभवेन च ३५ दैत्यदानववीराणां जघान नवती
नव अथ काले व्यतिक्रान्ते महत्यतिभयंकरे ३६ अनावृष्टिरनुप्राप्ता राजन्द्वादशवार्षिकी तस्यां द्वादशवार्षिक्यामनावृष्ट्यां महर्
षयः ३७ वृत्त्यर्थं प्राद्रवन्राजन्क्षुधार्ताः सर्वतो दिशः दिग्भ्यस्तान्प्रद्रुतान्दृष्ट्वा मुनिः सारस्वतस्तदा ३८ गमनाय मतिं चक्रे तं प्रो
वाच सरस्वती न गन्तव्यमितः पुत्र तवाहारमहं सदा ३९ दास्यामि मत्स्यप्रवरानुष्यतामिह भारत इत्युक्तस्तर्पयामास स पितॄन्देवतां स५
स्तथा ४० आहारमकरोन्नित्यं प्राणान्वेदांश्च धारयन् अथ तस्यामनावृष्ट्यामतीतायां महर्षयः ४१ अन्योन्यं परिपप्रच्छुः
पुनः स्वाध्यायकारणात् तेषां क्षुधापरीतानां नष्टा वेदाभिधावतां ४२ सर्वेषामेव राजेन्द्र न कश्चित्प्रतिभानवान् अथ कश्चिदृषि
स्तेषां सारस्वतमुपेयिवान् ४३ कुर्वाणं संशितात्मानं स्वाध्यायमृषिसत्तमं स गत्वाचष्ट तेभ्यश्च सारस्वतमतिप्रभं ४४ स्वाध्या
यममरप्रख्यं कुर्वाणं विजने वने ततः सर्वे समाजग्मुस्तत्र राजन्महर्षयः ४५ सारस्वतं मुनिश्रेष्ठमिदमूचुः समागताः अस्मा
नध्यापयस्वेति तानुवाच ततो मुनिः ४६ शिष्यत्वमुपगच्छध्वं विधिवद्वै ममेत्युत तत्राब्रुवन्मुनिगणा बालस्त्वमसि पुत्रक ४७
स तानाह न मे धर्मो नश्येदिति पुनर्मुनीन् यो ह्यधर्मेण विब्रूयाद्गृह्णीयाद्योऽप्यधर्मतः ४८ हीयेतां तावुभौ क्षिप्रं स्यातां वा वैरिणा
वुभौ न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ४९ ऋषयश्चक्रिरे धर्मं यो नूचानः स नो महान् एतच्छ्रुत्वा वचस्तस्य मुनयस्ते विधा

© Dharmartha Trust J&K. Digitized by eGangotri

ग०
३९

ततः ५० तस्माद्देशादनुप्राप्य पुनर्धर्मं प्रचक्रिरे ऋषिर्मुनिसहस्राणि शिष्यत्वं प्रतिपेदिरे ५१ सारस्वतस्य विप्रर्षेर्वेदस्वाध्या
यकारणात् मुष्टिं मुष्टिं ततः सर्वे दर्भाणां ते ह्युपाहरन् ५२ तस्यासनार्थं विप्रर्षेर्बालस्यापि वशे स्थिताः तत्रापि दत्त्वाथ वसूनि रौ
हिणेयो महाबलः ५३ केशवाग्रजोऽथ जगाम तीर्थं मुदितः क्रमेण ख्यातं महद्वृद्धकन्यकाख्यं स्म यत्र इति गदापर्वणि ब
लदेवतीर्थयात्रायां जनमेजय उवाच कथं कुमारी भगवंस्तपोयुक्ता ह्यभूत्पुरा किमर्थं च तपस्तेपे को वास्या नियमोऽभवत् १ सुदु
ष्करमिदं ब्रह्मंस्त्वत्तः श्रुतमनुत्तमं आख्याहि तत्त्वमखिलं यथा तपसि सा स्थिता २ वैशंपायन उवाच ऋषिरासीन्महा
वीर्यः कुणिर्गर्गो महायशाः स तप्त्वा विपुलं राजंस्तपो वै तपतां वरः ३ मनसाथ सुतां सुभ्रूं समुत्पादितवान्विभुः तां च दृ
ष्ट्वा मुनिः प्रीतः कुणिर्गर्गो महायशाः ४ जगाम त्रिदिवं राजन्संत्यज्येह कलेवरं सुभ्रूः सापि कल्याणी पुंडरीकनिभेक्षणा
५ महता तपसोग्रेण कृत्वाश्रममनिंदिता उपवासैः पूजयंती पितॄन्देवांश्च सा पुरा ६ तस्यास्तु तपसोग्रेण महान्कालोऽत्यगान्नृ
प सा पित्रा दीयमानापि भर्त्रे नैच्छदनिंदिता ७ आत्मनः सदृशं सा तु भर्तारं नान्वपश्यत ततः सा तपसोग्रेण पीडयित्वात्मन
स्तनुं ८ पितृदेवार्चनरता बभूव विजने वने सात्मानं मन्यमानापि कृतकृत्यं श्रमान्विता ९ वार्धकेन च राजेंद्र तपसा चैव क
र्शिता सा नाशकद्यदा गंतुं पदात्पदमपि स्वयं चकार गमने बुद्धिं परलोकाय वै तदा मोक्तुकामां तु तां देहं नारदोऽब्रवीत् ११
असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे एवं तु श्रुतमस्माभिर्देवलोके महाव्रते १२ तपः परमकं प्राप्तं न तु लोकास्त्वया

राम०
३९

जिताः ततो नारदवचः श्रुत्वा साब्रवीदृषिसंसदि १३ तपसोर्धं प्रयच्छामि पाणिग्राहस्य सत्तमः इत्युक्ते चास्य जग्राह पाणिं गालवसं
भवः १४ ऋषिः प्राक्शृङ्गवान्नाम समयं चेदमब्रवीत् समयेन तवाद्याहं पाणिं स्प्रक्ष्यामि शोभने १५ यद्येकरात्रं वस्तव्यं त्वया स
ह मयेति ह तथेति सा प्रतिश्रुत्य तस्मै पाणिं ददौ तदा १६ यथादृष्टेन विधिना हुत्वा चाग्निं विधानतः चक्रे च पाणिग्रहणं तस्योद्वा
हं च गालविः १७ सा रात्रावभवद्राजंस्तरुणी वरवर्णिनी दिव्याभरणवस्त्रा च दिव्यगंधानुलेपना १८ तां दृष्ट्वा गालविः प्रीतो
दीपयंतीमिव श्रिया उवास च क्षपामेकां प्रभाते साब्रवीच्च तं १९ यस्त्वया समयो विप्र कृतो मे तपतां वर तेनोषितास्मि भद्रं ते स्व
स्ति तेस्तु व्रजाम्यहं २० सा निर्गताब्रवीद्भूयो योस्मिंस्तीर्थे समाहितः वसेत्तु रजनीमेकां तर्पयित्वा दिवौकसः २१ चत्वारिंशतम
ष्टौ च द्वे चाष्टौ सम्यगाचरेत् यो ब्रह्मचर्यं वर्षाणि फलं तस्य लभेत सः २२ एवमुक्त्वा ततः साध्वी देहं त्यक्त्वा दिवं गता ऋषि
रप्यभवद्दीनस्तस्या रूपं विचिंतयन् २३ समयेन तपोर्धं च कृच्छ्रात्प्रतिगृहीतवान् साधयित्वा तदात्मानं तस्याः स गतिमन्वियात्
२४ दुःखितो भरतश्रेष्ठ तस्या रूपबलात्कृतः एतत्ते वृद्धकन्याया व्याख्यातं चरितं महत् २५ तथैव ब्रह्मचर्यं च स्वर्गस्य च गति
: शुभा तत्रस्थश्चापि शुश्राव हतं शल्यं हलायुधः २६ वार्त्तिकैः कथितं राजन्नानादेशसमागतैः तत्रापि दत्त्वा दानानि द्विजाति
भ्यः परंतपः शुश्राव शल्यं संग्रामे निहतं पाण्डवैस्तदा २७ समंतपंचकद्वारात्ततो निष्क्रम्य माधवः पप्रच्छर्षिगणान्रामः कुरुक्षे
त्रस्य यत्फलं २८ ते पृष्टा यदुसिंहेन कुरुक्षेत्रफलं विभो समाचख्युर्महात्मानस्तस्मै सर्वं यथातथं २९ गदापर्वणि गमनीये

© Dharmartha Trust J&K. Digitized by eGangotri

यात्रायां ऋषय ऊचुः प्रजापतेरुत्तरवेदिरुच्यते सनातनी राम समंतपंचकं समीजिरे यत्र पुरा दिवौकसो वरेण सत्रेण महावरप्रदाः १
पुरा च राजर्षिवरेण धीमता बहूनि वर्षाण्यमितेन तेजसा प्रकृष्टमेतत्कुरुणा महात्मना ततः कुरुक्षेत्रमितीह पप्रथे २ राम उवाच
किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः ३ ऋषय ऊचुः पुरा किल कुरुं राम कर्षंतं
सततोत्थितं अभ्येत्य शक्रस्त्रिदिवात्पर्यपृछत कारणं ४ इंद्र उवाच किमिदं वर्त्तते राजन्प्रयत्नेन परेण च राजर्षे किमभिप्रेतं ये
नेयं कृष्यते क्षितिः ५ कुरुरुवाच इह ये पुरुषाः क्षेत्रे मरिष्यंति शतक्रतो ते गमिष्यंति सुकृतान्लोकान्पापविवर्जितान् ६
अवहस्य ततः शक्रो जगाम त्रिदिवं पुनः राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुंधरां ७ आगम्यागम्य चैवैनं भूयो भूयो वहस्य च श
तक्रतुरनिर्विण्णं पृष्ट्वा पृष्ट्वा जगाम ह ८ यदा तु तपसोग्रेण चकर्ष वसुधां नृपः तः शक्रोऽब्रवीद्देवान्राजर्षेर्यच्चिकीर्षितं ९
द५ एतच्छ्रुत्वाब्रुवन्देवाः सहस्राक्षमिदं वचः वरेण छंद्यतां शक्र राजर्षिर्यदि शक्यते १० यदि ह्यत्र प्रमीता वै स्वर्गं गछंति मानवाः अ
स्माननिष्ट्वा क्रतुभिर्भागो नो न भविष्यति ११ आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत् अलं खेदेन भवतः क्रियतां वचनं मम १२
मानवा ये निराहारा देहं त्यक्ष्यंत्यतंद्रिताः युधि वा निहताः सम्यगपि तिर्यग्गता नृप १३ ते स्वर्गभाजो राजेंद्र भविष्यंति महामते त
थास्त्विति ततो राजा कुरुः शक्रमुवाच ह १४ ततस्तमभ्यनुज्ञाप्य प्रहृष्टेनांतरात्मना जगाम त्रिदिवं भूयः क्षिप्रं बलनिषू
दनः १५ एवमेतद्यदुश्रेष्ठ कृष्टं राजर्षिणा पुरा शक्रेण चाभ्यनुज्ञातं ब्रह्माद्यैश्च सुरैस्तथा १६ नातः परतरं पुण्यं भूमेः स्थानं भ

© (Dhanvantari Trust & IK Digitized By eGangotri

ष्यति इह तप्स्यंति ये केचित्तपः परमकं नराः १७ देहत्यागेन ते सर्वे यास्यंति ब्रह्मणः क्षयं ये पुनः पुण्यभाजो वै दानं दास्यंति मानवाः
१८ तेषां सहस्रगुणितं भविष्यत्यचिरेण वै ये चेह नित्यं मनुजा निवत्स्यंति शुभैषिणः १९ यमस्य विषयं ते तु न द्रक्ष्यंति कदाचन यक्ष्यं
ति ये च क्रतुभिर्महद्भिर्मनुजेश्वराः २० तेषां त्रिविष्टपे वासो यावद्भूमिर्धरिष्यति अपि चात्र स्वयं शक्रो जगौ गाथां सुराधिपः २१ कुरुक्षे
त्रे[illegible] त्र [illegible] निबद्धां वै तां शृणुष्व हलायुध पांसवोपि कुरुक्षेत्राद्वायुना समुदीरिताः २२ अपि दुष्कृतकर्माणं नयं
ति परमां गतिं सुरर्षभा ब्राह्मणसत्तमाश्च तथा नृगाद्या नरदेवमुख्याः इष्ट्वा महार्हैः क्रतुभिर्नृसिंह संत्यज्य देहान्सुगतिं प्रपन्नाः २३
तरंतुकारंतुकयोर्यदंतरं रामह्रदानां च मचक्रुकस्य एतत्कुरुक्षेत्रसमंतपंचकं प्रजापतेरुत्तरवेदिरुच्यते २४ शिवं महापुण्यमिदं दिवौक
सां सुसंमतं सर्वगुणैः समन्वितं अतश्च सर्वे निहता नृपा रणे यास्यंति पुण्यां गतिमक्षयां सदा २५ इत्युवाच स्वयं शक्रः सह ब्रह्मादिभिस्तथा
तच्चानुमोदितं सर्वं ब्रह्मविष्णुमहेश्वरैः २६ इति गदापर्वणि बलदेवतीर्थयात्रायां वैशं० कुरुक्षेत्रं ततो दृष्ट्वा दत्त्वा दायांश्च सात्वतः आ
श्रमं सुमहद्दिव्यमगमज्जनमेजय १ मधूकाम्रवणोपेतं प्लक्षन्यग्रोधसंकुलं चिरिबिल्वयुतं पुण्यं पनसार्जुनसंकुलं २ तं दृष्ट्वा
यादवश्रेष्ठः प्रवरं पुण्यलक्षणं पप्रच्छ तानृषीन्सर्वान्कस्याश्रमवरस्त्वयं ३ ते तु सर्वे महात्मानमूचू राजन्हलायुधं शृणु विस्तरशो
राम यस्यायं पूर्वमाश्रमः ४ अत्र विष्णुः पुरा देवस्तप्तवांस्तप उत्तमं अत्रास्य विधिवद्यज्ञाः सर्वे वृत्ताः सनातनाः ५ अत्रैव ब्राह्मणी
सिद्धा कौमारब्रह्मचारिणी योगयुक्ता दिवं याता तपःसिद्धा तपस्विनी ६ बभूव श्रीमती राजन्शांडिल्यस्य महात्मनः सुता धृतव्रता

© (Dharmartha Trust, J&K. Digitized By eGangotri

म॰
ग॰
४१

तासाध्वीनियताब्रह्मचारिणी ७ सातुतप्त्वातपोघोरंदुश्चरंस्त्रीजनेनह उक्ताश्रमेऽश्वमेधस्यफलंफलवतीशुभा गतास्वर्गंमहाभा
गादेवब्राह्मणपूजिता ८ श्रुत्वाऋषीणांवचनमाश्रमंतंजगामह ऋषींस्तानभिवाद्याथपार्श्वेहिमवतोऽच्युतः ९ संध्याकार्याणिस
र्वाणिनिवर्त्यारुरुहेऽचलं नातिदूरंततोगत्वानगंतालध्वजोबली १० पुण्यंतीर्थवरंदृष्ट्वाविस्मयंपरमंगतः प्रभावंचसरस्वत्या
ःप्लक्षप्रस्रवणंबलं ११ संप्राप्तःकारपचनंप्रवरंतीर्थमुत्तमं हलायुधस्तत्रचापिदत्वादानंमहाबलः १२ आप्लुत्य सलिलेपु
ण्येसुशीतेविमलेशुचौ संतर्पयामासपितॄन्देवांश्चरणदुर्मदः १३ तत्रोष्यैकांतुरजनींयतिभिर्ब्राह्मणैःसह मित्रावरुणयोःपुण्यं
जगामाश्रममच्युतः १४ इन्द्रोऽग्निरर्यमाचैवयत्रप्राक्प्रीतिमाप्नुवान् तंदेशंकारपचनाद्यमुनायांजगामह १५ स्नात्वातत्रचधर्मा ५८
त्मापरांप्रीतिमवाप्यच ऋषिभिश्चैवसिद्धैश्चसहितोवैमहाबलः उपविष्टःकथाःशुभ्राःशुश्रावयदुपुंगवः तथातुतिष्ठतां
तेषांनारदोभगवानृषिः १७ आजगामाथतंदेशंयत्ररामोव्यवस्थितः जटामंडलसंवीतः स्वर्णचीरोमहातपाः १८ हेमदं
डधरोराजन्कमंडलुधरस्तथा कच्छपींसुखशब्दांतांगृह्यवीणांमनोरमां १९ नृत्येगीतेचकुशलोदेवब्राह्मणपूजितः प्रक
र्ताकलहानांचनित्यंचकलहप्रियः २० तंदेशमगमद्यत्रश्रीमान्रामोव्यवस्थितः प्रत्युत्थायतुतंसम्यक्पूजयित्वायतव्रतं गम॰
२१ देवर्षिंपर्यपृच्छत्सयथावृत्तंकुरून्प्रति ततोऽस्याकथयद्राजन्नारदःसर्वधर्मवित् २२ सर्वमेवयथावृत्तमतीवकुरुसंक्ष ४१
यं ततोऽब्रवीद्रौहिणेयोनारदंदीनयागिरा २३ किमवस्थंतुतत्क्षत्रंयेचतत्राभवन्नृपाः श्रुतमेतन्मयापूर्वंसर्वमेवतपोधन

© Dharmartha Trust J&K. Digitized by eGangotri

२४ विस्तरश्रवणेजातंकौतूहलमतीवमे नारदउवाच पूर्वमेवहतोभीष्मोद्रोणःसिंधुपतिस्तथा २५ हतोवैकर्तनंकर्णःपुत्राश्चा
स्यमहारथाः भूरिश्रवारौहिणेयमद्रराजश्चवीर्यवान् २६ एतेचान्येचबहवस्तत्रतत्रमहाबलाः प्रियान्प्राणान्परित्यज्य जयार्थंकौ
रवस्यवै २७ राजानोराजपुत्राश्चसमरेष्वनिवर्तिनः अहतांस्तुमहाबाहोशृणुमेतत्रमाधव २८ धार्तराष्ट्रबलेशेषास्त्रयःसमि
तिमर्दनाः कृपश्चकृतवर्माचद्रोणपुत्रश्चवीर्यवान् २९ अपरेविद्रुताराममदिशोदशभयात्तदा दुर्योधनोहतेशल्येविद्रुतेषुकृपा
दिषु ३० ह्रदंद्वैपायनंनामविवेशभृशदुःखितः शयानंधार्तराष्ट्रंतुस्तंभितेसलिलेतदा ३१ पांडवाःसहकृष्णेनवाग्भिरुग्रा
भिरर्दयन् सतुद्यमानोबलवान्वाग्भीरामसमंततः ३२ उत्थितःसह्रदाद्वीरःप्रगृह्यमहतींगदां सचाप्युपगतोयोद्धुंभीमेनस
हसांप्रतं ३३ भविष्यतितयोरद्ययुद्धंरामसुदारुणं यदिकौतूहलंतेस्तिव्रजमाधवमाचिरं ३४ पश्ययुद्धंमहाघोरंशिष्ययोर्यदिम
न्यसे वैशं० नारदस्यवचःश्रुत्वातानभ्यर्च्यद्विजर्षभान् सर्वान्विसर्जयामासयेतेनाभ्यागताःसह ३५ गम्यतांद्वारकांचेतिसोन्वशा
त्तुयायिनः सोवतीर्याचलश्रेष्ठात्प्लक्षप्रस्रवणाच्छुभात् ३६ ततःप्रीतमनारामःश्रुत्वातीर्थफलंमहत् विप्राणांसंनिधौश्लो
कमगायदिममच्युतः ३७ सरस्वतीवाससमाकुतोरतिःसरस्वतीवाससमाःकुतोगुणाः सरस्वतींप्राप्यदिवंगताजनाःसदास्म
रिष्यंतिनदींसरस्वतीं ३८ सरस्वतीसर्वनदीषुपुण्यासरस्वतीलोकसुखावहासदा सरस्वतींप्राप्यजनाःसुदुःकृतंसदानशोचंतिप
रत्रचेहच ३९ ततोमुहुर्मुहुःप्रीत्याप्रेक्षमाणःसरस्वतीं हयैर्युक्तंरथंशुभ्रमातिष्ठतपरंतपः ४० सशीघ्रगामिनातेनरथेनयदुपुंगवः

© Dhamma Trust. Digitized By eGangotri

रिद्दसुरभिसंग्रामः शिष्ययुद्धमुपस्थितं ४१ इतिगदापर्वणिहलधरतीर्थयात्रासमाप्ता वैशं० एवंतदभवद्युद्धंतुमुलंजनमेजय य
त्रदुःखान्वितोराजाधृतराष्ट्रोब्रवीदिदं १ धृतराष्ट्रउवाच रामंसंनिहितंदृष्ट्वागदायुद्धउपस्थिते ममपुत्रः कथंभीमंप्रत्ययुध्यतसंज
य २ संजयउवाच रामसान्निध्यमासाद्यपुत्रोदुर्योधनस्तव युद्धकामोमहाबाहुः समहृष्यतवीर्यवान् ३ दृष्ट्वालांगलिनंराजाप्रत्यु
त्थायचभारत प्रीत्यापरमयायुक्तः समभ्यर्च्ययथाविधि ४ आसनंचददौतस्मैपर्यपृच्छदनामयं ततोयुधिष्ठिरंरामोवाक्यमेतदु
वाचह ५ मधुरंधर्मसंयुक्तंशूराणांहितमेवच मयाश्रुतंकथयतांऋषीणांराजसत्तम ६ कुरुक्षेत्रंपरंपुण्यंपावनंस्वर्ग्यमेवच दै
वतैर्ऋषिभिर्जुष्टंब्राह्मणैश्चमहात्मभिः ७ तत्रवैयोत्स्यमानायेदेहंत्यक्ष्यंतिमानवाः तेषांस्वर्गेध्रुवोवासः शक्रेणसहमारिष ८
तस्मात्समंतपंचकमितोयामद्रुतंनृप प्रथितोत्तरवेदीसादेवलोकेप्रजापतेः ९ तस्मिन्महापुण्यतमेत्रैलोक्यस्यसनातने संग्रामेनिध
प्प५ नंप्राप्यध्रुवंस्वर्गोभविष्यति १० तथेत्युक्त्वामहाराजकुंतीपुत्रोयुधिष्ठिरः समंतपंचकंवीरः प्रायादभिमुखःप्रभुः ११ ततोदुर्योधनोरा
जाप्रगृह्यमहतींगदां पद्भ्याममर्षाद्द्युतिमानगच्छत्पांडवैःसह १२ तथायांतंगदाहस्तंवर्मणाचापिदंशितं अंतरिक्षचरादेवासाधु गम० ५२
साध्वित्यपूजयन् १३ वातिकाश्चारणायेतुदृष्ट्वातेहर्षमागताः सपांडवैः परिवृतः कुरुराजस्तवात्मजः १४ मत्तस्येवगजेंद्रस्य
गतिमास्थायसोव्रजत् ततः शंखनिनादेनभेरीणांचम/ १५ सिंहनादैश्चशूराणांदिशः सर्वाः प्रपूरिताः ततस्तेतुकुरुक्षेत्रंप्राप्तान
रवरोत्तमाः १६ प्रतीच्यभिमुखंदेशंयथोद्दिष्टंसुतेनते गत्वावृतः परिक्षिप्तः समंतात्सर्वतोदिशम् दक्षिणेनसरस्वत्याःस्वयनंतीर्थमु

ल्स्वनैः २

© Dharmartha Trust J&K. Digitized By eGangotri

त्तमं तस्मिन्देशेत्वनिघृणेतेतुयुद्धमरोचयन् १७ ततोभीमोमहाकोटिंगदांगृह्याथवर्मभृत् विभ्रतरूपंमहाराजसदृशंहिगरुत्मतः १८
अवबद्धशिरस्त्राणः संख्येकाञ्चनवर्मभृत् रराजराजन्पुत्रस्तेकाञ्चनः शैलराडिव १९ वर्मभ्यांसंवृतौवीरौभीमदुर्योधनावुभौ सं
युगेचप्रकाशेतेसंरब्धाविवकुञ्जरौ २० रणमण्डलमध्यस्थौभ्रातरौतौनरर्षभौ अशोभेतांमहाराजचन्द्रसूर्याविवोदितौ २१ तावन्यो
न्यंनिरीक्षेतांक्रुद्धाविवमहाद्विपौ दहन्तौलोचनैराजन्परस्परवधैषिणौ २२ संप्रहृष्टमनाराजन्गदामादायकौरवः सृक्किणीसंलि
हन्राजन्क्रोधरक्तेक्षणः श्वसन् २३ ततोदुर्योधनोराजागदामादायवीर्यवान् भीमसेनमभिप्रेक्ष्यगजोगजमिवाह्वयत् २४
अद्रिसारमयींभीमस्तथैवादायवीर्यवान् आह्वयामासनृपतिंसिंहः सिंहंयथावने २५ तावुद्यतगदापाणीदुर्योधनवृकोदरौ संयु
गेचप्रकाशेतांगिरीसशिखराविव २६ तावुभौसमतिक्रुद्धावुभौभीमपराक्रमौ उभौशिष्यौगदायुद्धेरौहिणेयस्यधीमतः २७
उभौसदृशकर्माणौयमवासवयोरिव तथासदृशकर्माणौवरुणस्यमहाबलौ २८ वासुदेवस्यरामस्यतथावैश्रवणस्यच सदृशौ
तौमहाराजमधुकैटभयोर्युधि २९ उभौसदृशकर्माणौतथासुन्दोपसुन्दयोः रामरावणयोश्चैववालिसुग्रीवयोस्तथा ३० तथै
वकालस्यसमौमृत्योश्चैवपरंतपौ अन्योन्यमभिधावन्तौमत्ताविवमहाद्विपौ ३१ वासितासंगमेदृप्तौशरदीवमदोत्कटौ मत्तावि
वजिगीषन्तौरक्षसौभरतर्षभौ उभौक्रोधविषंदीप्तंवमन्तावुरगाविव ३२ अन्योन्यमभिसंरब्धौप्रेक्षमाणावरिंदमौ उभौभरतशार्दू
लौविक्रमेणसमन्वितौ सिंहाविवदुराधर्षौगदायुद्धेपरंतपौ नखदंष्ट्रायुधौवीरौव्याघ्राविवसुदुःसहौ प्रजासंहरणेक्षुब्धौसमुद्रा

© Dharmartha Trust J&K. Digitized by eGangotri

ग० विवृद्धसत्त्वौ ३३ लोहितांगाविव क्रुद्धौ प्रतपंतौ महारथौ ऋषभाविव गर्जंतौ प्रेक्षमाणावरिंदमौ ३४ गर्जमानौ सुविपुलं क्ष्वेडंतौ प्राहृषी
५३ वाहे रश्मिमंतौ महात्मानौ दीप्तिमंतौ महाबलौ ३५ ददृशाते कुरुश्रेष्ठौ कालसूर्याविवोदितौ व्याघ्राविव सुसंरब्धौ गर्जंताविव तोयदौ
३६ जहृषाते महाबाहू सिंहौ केसरिणाविव गजाविव सुसंरब्धौ ज्वलिताविव पावकौ ३७ ददृशाते महात्मानौ सशृंगाविव पर्वतौ
रोषात्प्रस्फुरमाणौष्ठौ निरीक्षंतौ परस्परं ३८ तौ समेतौ महात्मानौ गदाहस्तौ नरोत्तमौ उभौ परमसंहृष्टावुभौ परमसंमतौ ३९ स
दश्वाविव हेषंतौ बृंहंताविव कुंजरौ वृषभाविव गर्जंतौ दुर्योधनवृकोदरौ ४० दैत्याविव बलोन्मत्तौ रेजतुस्तौ नरोत्तमौ ततो दुर्योधनो रा
जन्निदमाह युधिष्ठिरं ४१ भ्रातृभिः सहितं चैव कृष्णेन च महात्मना रामेणामितवीर्येण वाक्यं शौंडीर्यसंमतं ४२ केकयैः सृंजयै
र्दृप्तं पंचालैश्च महात्मभिः इदं व्यवसितं युद्धं मम भीमस्य चोभयोः ४३ उपोपविष्टाः पश्यध्वं सहितैर्नृपपुंगवैः श्रुत्वा दुर्योधनवचः प्र
त्यपद्यंत तत्तथा ४४ ततः समुपविष्टं तत्सुमहद्राजमंडलं विराजमानं ददृशे दिवीवादित्यमंडलं ४५ तेषां मध्ये महाबाहुः श्रीमान्के
शवपूर्वजः उपविष्टो महाराज पूज्यमानः समंततः ४६ शुशुभे राजमध्यस्थो नीलवासाः सितप्रभः नक्षत्रैरिव संपूर्णो वृतो निशि नि ग०
शाकरः ४७ तौ तथा तु महाराज गदाहस्तौ सुदुःसहौ अन्योन्यं वाग्भिरुग्राभिस्तक्षमाणौ व्यवस्थितौ ४८ अप्रियाणि ततोन्योन्यमु ५३
क्त्वा तौ कुरुसत्तमौ उदीक्षंतौ स्थितौ तत्र वृत्रशक्रौ यथाहवे ४९ इति गदापर्वणि वैशं० ततो वाक्युद्धमभवत्तुमुलं जनमेजय य
त्र दुःखान्वितो राजा धृतराष्ट्रोब्रवीदिदं १ धिगस्तु खलु मानुष्यं यस्य निष्ठेयमीदृशी एकादशचमूभर्ता यत्र पुत्रो ममानघ २ आ

© (c) Dharmartha Trust J&K. Digitized by eGangotri

त्राथ सर्वान्नृपतीन्मुक्त्वा चेमां वसुंधरां गदामादाय वेगेन पदातिः प्रस्थितो रणे ३ भूत्वा हि जगतो नाथो ह्यनाथवदिमे सुतः गदामुद्यम्
यो याति किमन्यद्भागधेयतः ४ अहो दुःखं महत्प्राप्तं पुत्रेण मम संजय एवमुक्त्वा सुदुःखार्त्तो विरराम जनाधिपः ५ संजयउवाच
स मेघनिनदो हर्षान्निनदन्निव गोवृषः आजुहाव ततः पार्थं युद्धाय युधि वीर्यवान् ६ भीममाह्वयमाने च कुरुराजे महात्मनि प्रादुरा
सन्सुघोराणि रूपाणि विविधान्युत ७ ववुर्वाताः सनिर्घाताः पांशुवर्षं पपात च बभूवुश्च दिशः सर्वास्तिमिरेण समावृताः ८ महा
स्वनाः सुनिर्घातास्तुमुला लोमहर्षणाः पेतुस्तथोल्काः शतशः स्फोटयंत्यो नभस्तलात् ९ राहुश्चाग्रसदादित्यमपर्वणि विशांपते
चकंपे च महाकंपं पृथिवी सवनद्रुमा १० रूक्षाश्च वाताः प्रववुर्नीचैः शर्करकर्षिणः गिरीणां शिखराण्येव न्यपतंत महीतले ११
मृगा बहुविधाकाराः संपतंति दिशो दश दीप्ताः शिवाश्चाप्यनदन्घोररूपाः सुदारुणाः १२ निर्घाताश्च महा[illegible]घोरा बभूवुर्लोम
हर्षणाः दीप्तायामिव दिशि राजेन्द्र मृगाश्चाशुभवेदिनः १३ उदपानगताश्चापो व्यवर्धंत समंततः अशरीरा महानादाः श्रूयंते स्म तदा
नृप १४ एवमादीनि दृष्ट्वाथ निमित्तानि वृकोदरः उवाच भ्रातरं ज्येष्ठं धर्मराजं युधिष्ठिरं १५ नैष शक्तो रणे जेतुं मन्दात्मा मां सुयोध
नः अद्य क्रोधं विमोक्ष्यामि निगूढं हृदये चिरं १६ सुयोधने कौरवेन्द्रे खांडवे पावको यथा शल्यमद्योद्धरिष्यामि तव पांडव हृच्छयं १७
निहत्य गदया पापमिमं कुरुकुलाधमं अद्य कीर्तिमयीं मालां प्रतिमोक्ष्याम्यहं त्वयि १८ हत्वेमं पापकर्माणं गदया रणमूर्धनि अद्या
स्य शतधा देहं भिनद्मि गदयानया १९ नायं प्रवेष्टा नगरं पुनर्वारणसाह्वयं सर्पोत्सर्गस्य शयने विषदानस्य भोजने २० प्रमाणकोट्यां

© Dhamantari Trust & Digitized By eGangotri

ग० ५४

पानस्य दारहस्य जतुवेश्मनि सभायामवहासस्य सर्वस्वहरणस्य च २१ वर्षमज्ञातवासस्य वनवासस्य चानघ अधर्मतेमेपांडुःखा
नांज्ञातं हं भरतर्षभ २२ एकाकी विनिहत्सेमं भविष्याम्यात्मनोत्तराः अधर्मयुर्योधनो राष्ट्रस्य दुर्मतेरकृतात्मनः सभायां भरतश्रेष्ठ मातापि
त्रोस्य दर्शने अधर्मेसोधस्तु राजेन्द्र कुरुराजस्य दुर्मतेः २४ सभायां च महाराज नारीणां दर्शने पुनः अधर्मे कुरुराजस्य मंत्रिभिः कुलपां
सनः २५ मारणां निमंत्रं च राजं च तस्य कार्योभ्यतिभूतले राजा च धृतराष्ट्रो घप्सुतापुत्रं निपातितं २६ स्मरिष्यस्य अमं कर्म यत्त्वया कु
निवृद्धितं इत्युक्त्वा राजशार्दूल गदामादाय वीर्यवान् २७ अभ्युत्तिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् तमुद्यतगदं दृष्ट्वा कैलासमिव
शृंगिणं २८ भीमसेनः पुनः क्रुद्धो दुर्योधनमुवाच ह राज्ञश्च धृतराष्ट्रस्य तथा त्वमपि चात्मनः २९ स्मरत दुष्कृतं कर्म यद्वृत्तं वा
रणावते द्रौपदी च परिक्लिष्टा सभामध्ये रजस्वला ३० द्यूते च वंचितो राजा यत्त्वया सौबलेन च वने दुःखं च यत्प्राप्तमस्माभिस्त्वत्कृते
महत् ३१ विराटनगरे चैव योन्यंतरगतैरिव तत्सर्वं पातयाम्यद्य दिष्ट्या दृष्टोसि दुर्मते ३२ त्वत्कृते सौ हतः शेते शरत
ल्पे प्रतापवान् गांगेयो रथिनां श्रेष्ठो निहतो याज्ञसेनिना ३३ हतो द्रोणश्च कर्णश्च तथा शल्यः प्रतापवान् वैराग्नेरादिकर्ता
सौ शकुनिः सौबलो हतः ३४ प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः भ्रातरस्ते हताः सर्वे शूरा विक्रांतयोधिनः ३५ एते चा
न्ये च बहवो निहतास्त्वत्कृतेनयाः त्वामद्य निहनिष्यामि गदया नात्र संशयः ३६ इत्येवमुच्चै राजेन्द्र भाषमाणं वृकोदरं उवाच गतभी

गम० ५५

© Dharmartha Trust J&K. Digitized By eGangotri

राजपुत्रस्तु सत्यविक्रमः ३७ किं कत्थितेन बहुना युध्यस्व त्वं मया सह कौरव अद्य तेऽहं विनेष्यामि युद्धश्रद्धां कुलाधम ३८ नहि दुर्योधनः शूराः
केनचित् त्वद्विधेनैव शक्यास्त्रासयितुं वाचा यथान्यः प्राकृतो नरः ३९ चिरकालेप्सितं दिष्ट्या हृदयस्थमिदं मम त्वया सह गदायुद्धं त्रिदशैरुपपादि-
तं ४० किं वाचा बहुनोक्तेन कत्थितेन च दुर्मते वाणी संपद्यतामेषा कर्मणा मा चिरं कृथाः ४१ तस्य तद्वचनं श्रुत्वा सर्व एवाभ्यपूजयन्
राजानः सोमकाश्चैव ये तत्रासन् समागताः ४२ ततः संपूजितः सर्वैः संप्रहृष्टतनूरुहः भूयो धीरां मतिं चक्रे युद्धाय कुरुनंदनः ४३ उन्म-
त्तमिव मातंगं तलशब्देन रोषिताः भूयः संहर्षयांचक्रुः दुर्योधनममर्षणं ४४ तं महात्मा महात्मानं गदामुद्यम्य पांडवः अभिदुद्रा-
व वेगेन धार्तराष्ट्रं वृकोदरः ४५ बृंहंति कुंजरास्तत्र हया हेषंति चासकृत् शस्त्राणि चाप्यदीप्यंत पांडवानां जयैषिणां ४६ इति श्रीगदा-
पर्वणि गदायुद्धे संजय उवाच ततो दुर्योधनो दृष्ट्वा भीमसेनं तथागतं प्रत्युद्ययावदीनात्मा वेगेन महता नदन् १ समापेततुरन्योन्यं शृं-
गिणौ गोवृषाविव महानिर्घातघोरश्च प्रहाराणामजायत २ अभवच्च तयोर्युद्धं तुमुलं लोमहर्षणं जिगीषतोर्यथान्योन्यमिंद्रप्रह्रा-
दयोरिव ३ रुधिरेणोक्षितसर्वांगौ गदाहस्तौ मनस्विनौ ददृशाते महात्मानौ पुष्पिताविव किंशुकौ ४ तथा तस्मिन्महायुद्धे वर्त्तमाने सुदा-
रुणे खद्योतसंघैरिव खं दर्शनीयं व्यरोचत ५ तथा तस्मिन्वर्त्तमाने संकुले तुमुले भृशं उभावपि परिश्रांतौ युध्यमानावरिंदमौ ६ तौ मु-
हूर्त्तं समाश्वस्य पुनरेव परंतपौ अभ्यहारयतामन्योन्यं संप्रगृह्य गदे शुभे ७ तौ तु दृष्ट्वा महावीर्यौ समाश्वस्तौ नरर्षभौ बलिनौ वारणौ यद्व-
द्वाशितार्थे मदोत्कटौ ८ समानवीर्यौ संप्रेक्ष्य प्रगृहीतगदावुभौ विस्मयं परमं जग्मुर्देवगंधर्वमानवाः ९ प्रगृहीतगदौ दृष्ट्वा दुर्यो-

© (c) Dharmartha Trust J&K Digitized By eGangotri

ग० धनवृकोदरौ संशयः सर्वभूतानांविजयेसमपद्यत १० समागम्यततोभूयोभ्रातरौवलिनांवरौ अन्योन्यस्यांतरप्रेप्सूप्रचक्रातेतरं
७५ प्रति ११ यमदंडोपमांगुर्वीमिंद्राशनिमिवोद्यतां ददृशुःप्रेक्षकाराजनरौद्रींविशसनींगदां १२ आविध्यतोगदांतस्यभीमसेनस्य
संयुगे शब्दःसुतुमुलोघोरोमुहूर्त्तंसमपद्यत १३ आविध्यंतमरिंप्रेक्ष्यधार्त्तराष्ट्रोथपांडवं गदामतुलवेगांतांविस्मितःसंवभूव
ह १४ चरंश्चविविधान्मार्गान्मंडलानिचभारत अशोभततदावीरोभूयएववृकोदरः १५ तौपरस्परमासाद्ययत्तावन्योन्यरक्ष
णे मार्जारविवभक्षार्थेततक्षातेमुहुर्मुहुः १६ अचरद्भीमसेनस्तुमार्गान्वहुविधांस्तथा मंडलानिविचित्राणिगतप्रत्यागतानि
च १७ अस्त्रयंत्राणिचित्राणिस्थानानिविविधानिच परिमोक्षंप्रहाराणांवर्जनंपरिवारणं १८ अभिद्रवणमाक्षेपमवस्थानंस
सविग्रहं परावर्त्तनसंवर्त्तमुपप्लुतमवप्लुतं १९ उपन्यस्तमपन्यस्तंगदायुद्धविशारदौ एवंतौविचरंतौतुन्यघ्नतांवैपरस्परं २० वं
चयानौपुनश्चैवचेरतुःकुरुसत्तमौ विक्रीडंतौसुवलिनौमंडलानिविचेरतुः तौदर्शयंतौसमरेयुद्धक्रीडांसमंततः गदाभ्यांसहसान्यो
न्यमाजघ्नतुररिंदमौ तौपरस्परमासाद्यदंष्ट्राभ्यांद्विरदौयथा २१ अशोभेतांमहाराजशोणितेनपरिप्लुतौ एवंतदभवद्युद्धंघोररूपमसं
वृत्तं २२ परिवृत्तेहनिक्रूरंवृत्रवासवयोरिव गदाहस्तौततस्तौतुमंडलावस्थितौवलौ २३ दक्षिणंमंडलंराजन्धार्त्तराष्ट्रोभ्यवर्त्तत स्म०
सव्यंतुमंडलंतत्रभीमसेनोभ्यवर्त्तत २४ तथातुचरतस्तस्यभीमस्यरणमूर्धनि दुर्योधनोमहाराजपार्श्वदेशेभ्यताडयत् आहतस् ४५
तुततोभूयःपुत्रेणतवभारत २६ आविध्यतगदांगुर्वींप्रहारंतमचिंतयन् इंद्राशनिसमांघोरांयमदंडमिवोद्यतां २७ ददृशुस्ते

© (c) Dhaandu Trust & Digitized By eGangotri

महाराज भीमसेनस्य तां गदां आविध्यंतं गदां दृष्ट्वा भीमसेनं तवात्मजः २८ समुद्यम्य गदां घोरां प्रत्यविध्यत्परंतपः गदामारुतवेगेन तव पु-
त्रस्य भारत २९ शब्द आसीत्सुतुमुलस्तेजश्च समजायत सचरन्विविधान्मार्गान्मंडलानि च भागशः ३० समशोभत तेजस्वी भूयो भीमात्सु-
योधनः ॰ आविद्धा सर्ववेगेन भीमेन महती गदा ३१ सधूमं सार्चिषं साग्निं मुमोचोग्रा महास्वना आधूतां भीमसेनेन गदां दृष्ट्वा सुयोध-
नः ३२ अद्रिसारमयीं गुर्वीमाविध्यन्बह्वशोभत गदामारुतवेगं हि दृष्ट्वा तस्य महात्मनः ३३ भयं विवेश पांडूंस्तु सर्वानेव ससोमकान्
तौ दर्शयंतौ समरे युद्धक्रीडां समंततः ३४ गदाभ्यां सहसान्योन्यमाजघ्नतुररिंदमौ तौ परस्परमासाद्य दंष्ट्राभ्यां द्विरदौ यथा ३५ अशोभे-
तां महाराज शोणितेन परिप्लुतौ एवं तदभवद्युद्धं घोररूपमसंवृतं ३६ परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव दृष्ट्वा व्यवस्थितं भीमं तव पु-
त्रो महाबलः ३७ चरंश्चित्रतरान्मार्गान्कौंतेयमभिदुद्रुवे तस्य भीमो महावेगां जांबूनदपरिष्कृतां ३८ अभिक्रुद्धस्य क्रुद्धस्तु ताडया-
मास तां गदां सविस्फुलिंगो निर्ह्रादस्तयोस्तत्राभिघातजः ३९ प्रादुरासीन्महाराज सृष्टयोर्वज्रयोरिव वेगवत्या तया तत्र भीमसेनप्रमु-
क्तया ४० निपतंत्या महाराज पृथिवी समकम्पत तां नामृष्यत कौरव्यो गदां प्रतिहतां रणे ४१ मत्तो द्विप इव क्रुद्धः प्रतिकुंजरदर्शनात् स स-
व्यं मंडलं राजा उद्भ्राम्य कृतनिश्चयः ४२ आजघ्ने मूर्ध्नि कौंतेयं गदया भीमवेगया तयात्वभिहतो भीमः पुत्रेण तव पांडवः नाकम्पत महा-
राज तदद्भुतमिवाभवत् आश्चर्यं चापि तद्राजन्सर्वसैन्यान्यपूजयन् ४४ यद्गदाभिहतो भीमो नाकम्पत पदात्पदं ततो गुरुतरां दीप्तां गदां
हेमपरिष्कृतां ४५ दुर्योधनाय व्यसृजद्भीमो भीमपराक्रमः तं प्रहारमसंभ्रांतो लाघवेन महाबलः ४६ मोघं दुर्योधनश्चक्रे तत्राभूद्विस्मयो

© Dharmartha Trust J&K. Digitized by eGangotri

ग०
४६

महान् सतुमोघागदाराजन्पतंतीभीमचोदिता ४७ चालयामासपृथिवींमहानिर्घातनिस्वना आस्थायकौशिकान्मार्गानुत्पत
त्यपुनःपुनः ४८ गदानिपातंप्रज्ञायभीमसेनंचवंचितं वंचयित्वातथाभीमंगदयाकुरुसत्तमः ४९ ताडयामाससंक्रुद्धोवक्षोदे
शेमहाबलः गदयाभिहतोभीमोमुह्यमानोमहारणे ५० नाभ्यमन्यतकर्तव्यंपुत्रेणाभ्याहतस्तव तस्मिंस्तथावर्तमानेराजन्सोम
कपांडवाः ५१ भृशोपहतसंकल्पानहृष्टमनसोभवन् सतुतेनप्रहारेणमातंगइवरोषितः ५२ हस्तिवद्धस्तिसंकाशमभिदुद्रावते
सुतं ततस्तुतरसाभीमोगदयात्तनयंतव ५३ अभिदुद्राववेगेन सिंहोवनगजंतथा उपसृत्यतुराजानंगदामोक्षविशारदः ५४ आ
विध्यतगदांराजन्समुद्दिश्यसुतंतव अताडयद्भीमसेनःपार्श्वेदुर्योधनंतदा ५५ सविह्वलःप्रहारेणजानुभ्यामगमन्महीं तस्मिन्
कुरुकुलश्रेष्ठेजानुभ्यामवनींगते ५६ उदतिष्ठत्ततोनादःसृंजयानांजगत्पते तेषांतुनिनदंश्रुत्वासृंजयानांनरर्षभः ५७ अ
मर्षाद्भरतश्रेष्ठपुत्रस्तेसमकुप्यत उत्थायतुमहाबाहुर्महानागइवश्वसन् ५८ दिधक्षन्निवनेत्राभ्यांभीमसेनमवैक्षत ततःसभ
रतश्रेष्ठोगदापाणिरभिद्रवत् ५९ प्रमथिष्यन्निवशिरोभीमसेनस्यसंयुगे समहात्मामहात्मानंभीमंभीमपराक्रमः ६० अता
डयच्छंखदेशेनचचालाचलोपमः सभूयःशुशुभेपार्थस्ताडितोगदयारणे ६१ उद्भिन्नरुधिरोराजन्प्रभिन्नइवकुंजरः ततोगदांवी
रहणीमयोमयींप्रगृह्यवज्राशनितुल्यनिःस्वनां अताडयच्छत्रुममित्रकर्षणोबलेनविक्रम्यधनंजयाग्रजः ६२ सभीमसेना एम०
भिहतस्तवात्मजःपपातसंकम्पितदेहबंधनः सुपुष्पितोमारुतवेगताडितोवनेयथाशालइवावघूर्णितः ६३ ततःप्रणेदुर्जहृ ४६

शुश्रुवयांडवाः समीक्ष्यपुत्रंपतितंक्षितौ तव ततःसुतस्तेप्रतिलभ्यचेतनांसमुत्पपातद्विरदोयथाह्रदात् ६४ सपार्थिवोनित्यममर्षितस्त
दामहारथःशिक्षितवत्परिभ्रमन अताडयत्पांडवमग्रतःस्थितंसविह्वलांगोजगतीमुपास्पृशत सिंहनादंविननादकौरवोनिपात्यभू
मौयुधिभीममोजसा बिभेदचैवाशनितुल्यतेजसागदानिपातेनशरीररक्षणं ६६ ततोंतरिक्षेनिनदोमहानभूद्दिवौकसामप्सरसांचनेदुषां
पपातचोच्चैरमरप्रवेरितंविचित्रपुष्पोत्करवर्षमुत्तमं ६७ ततस्परानाविशदुत्तमंभयंसमीक्ष्यभूमौपतितंनरोत्तमं अहीयमानंचबलेन
कौरवंनिशाम्यभेदंसुदृढस्यवर्मणः ६८ ततोमुहूर्तादुपलभ्यचेतनांप्रमृज्यवक्त्रंरुधिराक्तमात्मनः धृतिंसमालंब्यविवृत्तलोचनोबलेनसं
स्तभ्यवृकोदरःस्थितः ६९ इतिश्रीमहाभारतेगदापर्वणिगदायुद्धे संजयउवाच समुदीर्णंततोदृष्ट्वासंग्रामंकुरुमुख्ययोः अथाब्रवीदर्जु
नस्तुवासुदेवंयशस्विनं १ अनयोर्वीरयोर्युद्धेकोज्यायान्भवतोमतः कस्यवाकोगुणोभूयानेतद्वदजनार्दनः २ वासुदेवउवा
च उपदेशोनयोस्तुल्योभीमस्तुबलवत्तरः कृतीयत्नपरस्त्वेषधार्तराष्ट्रोवृकोदरात् ३ भीमसेनस्तुधर्मेणयुध्यमानोनजेष्यति
अन्यायेनतुयुध्यन्वैहन्यादेवसुयोधनं ४ माययानिर्जितादेवैरसुराइतिनःश्रुतं विरोचनस्तुशक्रेणमाययानिर्जितःसखे ५ मा
ययाचाक्षिपत्तेजोवृत्रस्यबलसूदनः तस्मान्मायामयंभीमआतिष्ठतुपराक्रमं ६ प्रतिज्ञातंतुभीमेनद्यूतकालेधनंजय ऊरूभे
त्स्यामितेसंख्येगदयेतिसुयोधनं ७ सोयंप्रतिज्ञांतांचापि पालयत्वरिकर्षणः मायाविनंतुराजानंमाययैवनिकृंततु ८ यद्येष
बलमास्थायन्यायेनप्रहरिष्यति विषमस्थस्ततोराजाभविष्यतियुधिष्ठिरः ९ पुनरेवतुवक्ष्यामिपांडवप्रतिबोधने धर्मराजापराधेनभ

© Dharmartha Trust J&K. Digitized by eGangotri

यंनःपुनरागन्तंकृतास्तहिसुमहत्कर्महत्वाभीष्ममुखान्कुरून् जयःप्राप्तोयशःश्लाघ्यंवैरंचगतिपातितं ११ तदेवंविजयंप्राप्तःपुनःसं
शयितःकृतः अबुद्धिर्नामतेनीधर्मराजस्यपांडव १२ यदेकविजयेयुद्धंपणितंघोरमीदृशं सुयोधनःकृतीवीरःएकायनग
तस्तथा १३ अपिचोशनसागीतःश्रूयतेयंपुरातनः श्लोकस्तत्वार्थसहितस्तन्मेनिगदतःशृणु १४ पुनरावर्त्तमानानांभग्नानां
जीवितैषिणां भेत्तव्यमरिशेषाणांएकायनगताहिते १५ साहसोत्पतितानांचनिराशानांचजीविते नशक्यमग्रतःस्थातुंश
क्रेणापिधनंजय १६ सुयोधनमिमंभग्नंहतसैन्यंह्रदंगतं पराजितंवनप्रेप्सुंनिराशंराज्यलंभने १७ कोन्वेषसंयुगेप्राज्ञःपुनर्द्वंद्वेसं
माह्वयेत् अपितोनिर्जितंराज्यंनहरेतसुयोधनः १८ यस्त्रयोदशवर्षाणिगदयाकृतनिश्रमः चरत्यूर्द्ध्वंचतिर्यक्चभीमसेनजिघां
सया १९ एवंचेत्त्वंमहाबाहुरन्यायेनहनिष्यति एषवःकौरवोराजाधार्त्तराष्ट्रोभविष्यति २० धनंजयस्तुश्रुत्वेतत्केशवस्यमहात्म
नः प्रेक्षतोभीमसेनस्यसव्यमूरुमताडयत् २१ गृह्यसंज्ञांततोभीमोगदयाव्यचरद्रणे मंडलानिविचित्राणियमकानीतराणि
च २२ दक्षिणंमंडलंसव्यंगोमूत्रकमथापिच व्यचरत्पांडवोराजन्नरिंसंमोहयन्निव २३ तथैवतवपुत्रोपिगदामार्गविशार
दः व्यचरल्लघुचित्रंचभीमसेनजिघांसया २४ आधुन्वंतौगदेघोरेचंदनागरुरूषिते वैरस्यांतंपरीप्संतौरणेक्रुद्धाविवांतकौ
२५ अन्योन्यंतौजिघांसंतौप्रवीरौपुरुषर्षभौ युयुधातेगरुत्मंतौयथानागामिषैषिणौ मंडलानिविचित्राणिचरतोर्नृपभीमयो
ःगदासंपातजाजातत्रप्रजज्ञुःपावकार्चिषः २७ समंप्रहरतोस्तत्रशूरयोर्बलिनोर्मृधे क्षुब्धयोर्वायुनाराजन्द्वयोरिवसमुद्र

© Dharmartha Trust J&K. Digitized By eGangotri

योः २८ तयोः प्रहरतोस्तुल्यं मत्तकुंजरयोरिव। गदानिर्घातसंह्रादः प्रहाराणामजायत २९ तस्मिंस्तथा संप्रहारे दारुणे संकुले भृशं। उभाव
पि परिश्रांतौ युध्यमानावरिंदमौ ३० तौ मुहूर्तं समाश्वस्य पुनरेव परंतपौ। अभ्यहारयतां क्रुद्धौ प्रगृह्य महती गदे ३१ तयोः समभवद्युद्धं घोर
रूपमसंवृतं। गदानिपातै राजेंद्र तक्षतोर्वै परस्परं ३२ समरे प्रद्रुतौ तौ तु वृषभाक्षौ तरस्विनौ। अन्योन्यं जघ्नतुर्वीरौ पंकस्थौ महिषाविव ३३
जर्जरीकृतसर्वांगौ रुधिरेणाभिसंप्लुतौ। ददृशाते हिमवति पुष्पिताविव किंशुकौ ३४ दुर्योधनस्तु पार्थेन विवरे संप्रदर्शिते। ईषदुत्स्मि
षमानस्तु सहसा प्रससार ह ३५ तमभ्याशगतं प्राज्ञो रणे प्रेक्ष्य वृकोदरः। अवाक्षिपद्गदां तस्मिन्वेगेन महता बली ३६ आक्षिपंतं तु तं दृष्ट्वा पु
त्रस्तव विशांपते। अपासर्पत्ततः स्थानात्सा मोघा न्यपतद्भुवि ३७ मोक्षयित्वा प्रहारं तं सुतस्तव स संभ्रमात्। भीमसेनं च गदया प्राहरत्कुरुस
त्तम ३८ तस्य विस्यंदमानेन रुधिरेणामितौजसः। प्रहारगुरुपाताच्च मूर्छेव समजायत ३९ दुर्योधनो न तं वेद पीडितं पांडवं रणे। धारया
मास भीमोपि शरीरमतिपीडितं ४० अमन्यत स्थितं ह्येनं प्रहरिष्यंतमाहवे। अतो न प्राहरत्तस्मै पुनरेव तवात्मजः ४१ ततो मुहूर्तमाश्व
स्य दुर्योधनमुपस्थितं। वेगेनाभ्यपतद्राजन्भीमसेनः प्रतापवान् ४२ तमापतंतं संप्रेक्ष्य संरब्धममितौजसं। मोघमस्य प्रहारं तं चिकीर्षु
र्भरतर्षभ ४३ अवस्थाने मतिं कृत्वा पुत्रस्तव महामनाः। इयेषोत्पतितुं राजंश्छलयिष्यन्वृकोदरं ४४ अबुध्यद्भीमसेनस्तद्राज्ञस्तस्य चि
कीर्षितं। अथास्य समभिद्रुत्य समुत्क्रुश्य च सिंहवत् ४५ मृत्युं वंचयतो राजन्पुनरेवोत्पतिष्यतः। ऊरुभ्यां प्राहिणोद्राजन्गदां वेगेन पांड
वः ४६ सा वज्रनिष्पेषसमा प्रहिता भीमकर्मणा। ऊरू दुर्योधनस्याथ बभंज प्रियदर्शनौ ४७ स पपात नरव्याघ्रो वसुधामनुनादयन्। भ

© Dharmartha Trust J&K. Digitized By eGangotri

ग॰
५८

ग्नोऽभीमसेनेन पुत्रस्तव महीपते ४८ ववुर्वाताः सनिर्घाताः पांशुवर्षं पपात च चचाल पृथिवी चापि सवृक्षवनपर्वता ४९ तस्मिंनि
पतिते वीरे पत्यौ सर्वमहीक्षितां महास्वना पुनर्दीप्ता सनिर्घाता भयंकरी ५० पपात चोल्का महती पतिते पृथिवीपतौ तथा शोणितवर्षं च
पांशुवर्षं च भारत ५१ ववर्ष मघवांस्तत्र तव पुत्रे निपातिते यक्षाणां राक्षसानां च पिशाचानां तथैव च ५२ अंतरिक्षे महानादः श्रूयते भर
तर्षभ तेन शब्देन घोरेण मृगाणामथ पक्षिणां ५३ जज्ञे घोरतरः शब्दो बहूनां सर्वतो दिशं ये तत्र वाजिनः शेषा गजाश्च मनुजैः सह मुमु
चुस्ते महानादं तव पुत्रे निपातिते भेरीशंखमृदंगानामभवच्च स्वनो महान् ५५ अंतर्भूमिगतश्चैव तव पुत्रे निपातिते बहुपादैर्बहुभुजैः क
बंधैर्घोरदर्शनैः ५६ नृत्यद्भिर्भयदैर्व्याप्ता दिशस्तत्राभवन्नृप ध्वजवंतोऽस्त्रवंतश्च शस्त्रवंतस्तथैव च ५७ प्राकम्पंत ततो राजंस्तव पुत्रे निपा
तिते ह्रदाः कूपाश्च रुधिरमुद्वेमुर्नृपसत्तम ५८ नद्यश्च सुमहावेगाः प्रतिस्रोतोवहा भवन् पुंल्लिंगा इव नार्यस्तु स्त्रीलिंगाः पुरुषाभ
वन् ५९ दुर्योधने तदा राजन् पतिते तनये तव [illegible] दृष्ट्वा तानद्भुतोत्पातान् पांचालाः पांडवैः सह ६० आविग्नमनसः सर्वे बभूवुर्भरत
र्षभ ययुर्देवा यथाकामं गंधर्वाप्सरसस्तथा ६१ कथयंतोऽद्भुतं युद्धं सुतयोस्तव भारत तथैव सिद्धा राजेंद्र तथा वातिकचारणाः ६२ नर
सिंहौ प्रशंसंतो विप्रजग्मुर्यथागतं इति श्रीगदापर्वणि संजय उवाच तं पातितं ततो दृष्ट्वा महाशालमिवोद्गतं प्रहृष्टमनसः सर्वे बभू
स्तत्र पांडवाः १ उन्मत्तमिव मातंगं सिंहेनेव निपातितं ददृशुर्हृष्टरोमाणः सर्वे ते चापि सोमकाः २ ततो दुर्योधनं हत्वा भीमसेनः प्रताप ग॰म॰ ५८
वान् पातितं कौरवेंद्रं तमुपागम्येदमब्रवीत् वृकोदरो महाराज वाक्शल्यमतिदुःसहं ३ गौर्गौरिति पुरा मंद द्रौपदीमेकवाससं य

वि २

© Dharmartha Trust J&K. Digitized by eGangotri

त्समापं महत्संतस्मात्तरावदसि दुर्मते ४ तस्माद्वहासस्य फलं त्वमद्य लप्स्यसे नृप वाशु हि एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत् शिरश्च राज्ञ
सिंहस्य पादेन समलोडयत् तथैव क्रोधसंरक्तो भीमः परबलार्दनः ६ पुनरेवाब्रवीद्वाक्यं यत्तच्छृणु नराधिप येऽस्मान्पुराप्रनृत्यन्मूढा गौ
रिति गौरिति ७ तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति नास्माकं निकृतिर्वह्निर्नाक्षद्यूतं न वंचना ८ स्ववाहुबलमाश्रित्य प्रबाधामो व
यं रिपून् सोवाप्य वैरस्य परस्य पारं वृकोदरः प्राह शनैः प्रहस्य युधिष्ठिरं केशव संजयांश्च धनंजयं माद्रवतीसुतौ च ९ रजस्वलां द्रौप
दीमानयन्ये ये चाप्यकुर्वन्त सदस्यवस्त्रां तान्पश्यध्वं पांडवैर्धार्तराष्ट्रान् रणे हतांस्तपसा याज्ञसेन्याः १० येनः पुरा षंढतिला नवोचन् जा ५
क्रूरा राज्ञो धृतराष्ट्रस्य पुत्राः तेनो हताः सगणाः सानुबंधाः कामं स्वर्गं नरकं वा पतामः ११ पुनश्च राज्ञः पतितस्य भूमौ स तां गदां स्कंधग
तां प्रमृद्य वामेन पादेन शिरः प्रपद्य दुर्योधनं नैकृतिकं न्यवोचत् १२ हृष्टेन राजन्कुरुसत्तमस्य क्षुद्रात्मना भीमसेनेन पादं दृष्ट्वा कृतं मूर्ध
नि नाभ्यनंदन्धर्मात्मानः सोमकानां प्रवर्हाः १३ तव पुत्रं तथा हत्वा कत्थमानं वृकोदरं नृत्यमानं च बहुशो धर्मराजोऽब्रवीदिदं १४ गतोसि
वैरस्यानृण्यं प्रतिज्ञा शुभेन वा शुभेनाथ कर्मणा विरमाधुना १५ मा शिरोस्य पदा मर्दीर्मा धर्मस्ते तिगो भवेत् राजा ज्ञातिर्हतश्चायं जा ६
मैनेन न्याय्यं तवानघः १६ एकादशचमूनाथं कुरूणामधिपं तथा मा स्प्राक्षीर्भीम पादेन राजानं ज्ञातिमेव च १७ हतबंधुर्हतामात्यो
नष्टसैन्यो हतो मृधे सर्वाकारेण शोच्योयं नावहास्योयमीश्वरः १८ विध्वस्तोयं हतामात्यो हतभ्राता हतप्रजः उत्सन्नपिंडो भ्राता च
नैतन्न्याय्यं कृतं त्वया १९ धार्मिको भीमसेनोसावित्याहुस्त्वां पुरा जनाः स कस्माद्भीमसेन त्वं राजानमधितिष्ठसि २० इत्युक्त्वा भीमसेनं

© Dharmartha Trust J&K. Digitized by eGangotri

ग० ४९

नेतुस्तास्मकं केशो युधिष्ठिरः उपप्लुत्याब्रवीद्दीनो दुर्योधनमरिंदमं २१ नात्मनस्तु नैते कार्यो नात्मा शोच्यस्त्वया तथा नूनं पूर्वकृतं कर्म सुघो
रमनुभूयते २२ धात्रोपदिष्टं विषमं नूनं फलमसंस्कृतं यद्वयं त्वां जिघांसामस्त्वं चास्मान्कुरुसत्तम २३ आत्मनो ह्यपराधेन महद्व्यसनमी
दृशं प्राप्तवानसि यल्लोभान्मदाद्बाल्याच्च भारत २४ घातयित्वा वयस्यांश्च भ्रातॄनथ पितॄंस्तथा पुत्रान्पौत्रांस्तथाचार्यांस्ततो ऽसि निधनं २१
गतः २५ तवापराधादस्माभिर्भ्रातरस्ते निपातिताः निहता ज्ञातयश्चापि दिष्टं मन्ये दुरत्ययं २६ नात्मानुशोचनीयस्ते श्लाघ्यो मृत्युस्
तवानघ वयमेवाधुना शोच्याः सर्वावस्थासु कौरव २७ कृपणं वर्तयिष्यामस्तैर्हीना बंधुभिः प्रियैः भ्रातॄणां चैव पुत्राणां तथा वै
शोकविह्वलाः २८ कथं द्रक्ष्यामि विधवा वधूः शोकपरिप्लुताः त्वमेकः सुस्थितो राजन्स्वर्गे ते निलयो ध्रुवः २९ वयं नरकसंज्ञं वै
दुःखं प्राप्स्याम दारुणं स्नुषाश्च प्रस्नुषाश्चैव धृतराष्ट्रस्य विह्वलाः ३० गर्हयिष्यन्ति नो नूनं विधवाः शोककर्शिताः संजय उवाच एव
मुक्त्वा सुदुःखार्तो निशश्वास स पार्थिवः विललाप चिरं चापि धर्मपुत्रो युधिष्ठिरः ३१ इति श्रीमहाभारते गदापर्वणि धृतराष्ट्र उवाच अधर्मे
ण हतं दृष्ट्वा राजानं माधवोत्तमः किमब्रवीत्तदा सूत बलदेवो महाबलः १ गदायुद्धविशेषज्ञो गदायुद्धविशारदः कृतवान्रौहिणेयो यत्त
न्ममाचक्ष्व संजय २ संजय० शिरस्यभिहतं दृष्ट्वा भीमसेनेन ते सुतं रामः प्रहरतां श्रेष्ठश्चुक्रोध बलवद्बली ३ ततो मध्ये नरेंद्राणा
मूर्ध्वबाहुर्हलायुधः कुर्वन्नार्तस्वरं घोरं धिग्धिग्भीमेत्युवाच ह ४ अहो धिग्यदधो नाभेः प्रहृतं धर्मविग्रहे नैतद्दृष्टं गदायुद्धे कृतवान्यद्वृ गद० ४९
कोदरः ५ अधो नाभ्या न हंतव्यमिति शास्त्रस्य निश्चयः अयं त्वशास्त्रविन्मूढः स्वच्छंदात्संप्रवर्तते ६ तस्य तत्तद्ब्रुवाणस्य रोषः समभव

© Dharmartha Trust J&K. Digitized by eGangotri

महान् ततो लांगलमुद्यम्य भीममभ्यद्रवद्बली ८ तस्योर्ध्वबाहोः सदृशं रूपमासीन्महात्मनः बहुधातुविचित्रस्य श्वेतस्येव महागिरेः
९ तमुत्पतंतं जग्राह केशवो विनयान्वितः बाहुभ्यां पीनवृत्ताभ्यां प्रयत्नाद्बलवद्बली ९ सितासितौ यदुवरौ शुशुभाते धिकं ततः नभो
गतौ यथा राजन् चंद्रसूर्यौ दिनक्षये १० उवाच चैनं संरब्धं शमयन्निव केशवः आत्मवृद्धिर्मित्रवृद्धिर्मित्रमित्रोदयस्तथा ११ विपरीतं
द्विषत्स्वेतत् षड्विधा वृद्धिरात्मनः आत्मन्यपि च मित्रेषु विपरीतं यदा भवेत् १२ तदा विद्यान्मनोग्लानिमाशुशांतिकरो भवेत् अस्माकं स
हजं मित्रं पांडवाः शुद्धपौरुषाः १३ स्वकाः पितृस्वसुः पुत्रास्ते परैर्निकृता भृशं प्रतिज्ञापालनं धर्मः क्षत्रियस्येह वेत्थ ह १४ सुयोध
नस्य गदया भंक्तास्म्यूरू महाहवे इति पूर्वं प्रतिज्ञातं भीमेन हि सभातले १५ मैत्रेयेणाभिशप्तश्च पूर्वमेव महर्षिणा ऊरू भेत्स्यति ते भीमो
गदयेति परंतप १६ अतो दोषं न पश्यामि मा क्रुधस्त्वं प्रलंबहन् यौनैस्सेस्स्त्वथ हार्दैश्च संबंधस्तथ पांडवैः १७ तेषां वृद्ध्याहि वृद्धि
र्मे मा क्रुधः पुरुषर्षभ वासुदेववचः श्रुत्वा सीरभृत्प्राह धर्मवित् १८ बल उ० धर्मः सुचरितः सद्भिः सहद्वाभ्यां नियच्छति अर्थश्चा
त्यर्थलुब्धस्य कामश्चातिप्रसंगिनः १९ धर्मार्थौ धर्मकामौ च कामार्थौ चाप्यपीडयन् धर्मार्थकामान्योऽभ्येति सोऽत्यंतं सुखमश्नुते
२० तदिदं व्याकुलं सर्वं कृतं धर्मस्य पीडनात् भीमसेनेन गोविंद कामं त्वं तु यथात्थ मां २१ श्रीकृष्ण उवाच अरोषणो हि धर्मात्मा स
ततं धर्मवत्सलः भवान् प्रख्यायते लोके तस्मात्संशाम्य मा क्रुधः २२ प्राप्तं कलियुगं विद्धि प्रतिज्ञां पांडवस्य च आनृण्यं यातु वैरस्य
प्रतिज्ञायाश्च पांडवः २३ संजय उवाच धर्मच्छलमपि श्रुत्वा केशवात्स विशांपते नैव प्रीतमना रामो वचनं प्राह संसदि २४ हत्वा धर्मे

© (c) Dharmartha Trust J&K Digitized By eGangotri

ग०

५० राराज्ञानेधर्मात्मानंसुयोधनंजिह्मयोधीतिलोकेस्मिंख्यातिंयास्यतिपाण्डवः २५ दुर्योधनोपिधर्मात्मागतिंयास्यतिशाश्वतीं
ऋजुयोधीहतोराजाधार्तराष्ट्रोनराधिपः २६ युद्धदीक्षांप्रविश्याजौरणयज्ञंवितत्यच हुत्वात्मानममित्राग्नौप्रापचावभृथंयशः
२७ इत्युक्त्वारथमास्थायरौहिणेयःप्रतापवान् श्वेताभ्रशिखराकारःप्रययौद्वारकांप्रति २८ पांचालास्तुसवार्ष्णेयाःपाण्डवाश्च
विशांपते रामेद्वारवतींयातेनातिप्रमनसोभवन् २९ ततोयुधिष्ठिरंदीनंचिन्तापरमधीमुखं शोकोपहतसंकल्पंवासुदेवोब्रवीदिदं
३० वासुदेवउवाच धर्मराजकिमर्थंत्वमधर्ममनुमन्यसे हतबंधोर्यदेतस्यपतितस्यविचेतसः ३१ दुर्योधनस्यभीमेनमृद्यमानंशि
रःपदा उपप्रेक्षसिकस्मात्वंधर्मज्ञःसन्नराधिप ३२ युधिष्ठिरउवाच नममैतत्प्रियंकृष्णयद्राजानंवृकोदरः पदामूर्ध्न्यस्पृशत्क्रोधान्न
चहृष्येकुलक्षये ३३ निकृत्यानिकृतानित्यंधृतराष्ट्रसुतैर्वयं बहूनिपरुषाण्युक्त्वावनंप्रस्थापितास्मह ३४ भीमसेनस्यतद्दुःखम
तीवहृदिवर्तते इतिसंचिन्त्यवार्ष्णेयमयैतत्समुपेक्षितं ३५ तस्माद्धत्वाकृतप्रज्ञंलुब्धंकामवशानुगं लभतांपाण्डवःकामंधर्मेधर्मेचवा
कृते ३६ संजयउवाच इत्युक्तेधर्मराजेनवासुदेवोब्रवीदिदं काममस्त्वेतदितिवैकृच्छ्राद्यदुकुलोद्वहः ३७ इत्युक्तोवासुदेवेनभी
मप्रियहितैषिणा अन्वमोदततत्सर्वंयद्भीमेनकृतंयुधि ३८ भीमसेनोपिहत्वाजौतवपुत्रममर्षणः अभिवाद्याग्रतःस्थित्वा राम०
संप्रहृष्टःकृताञ्जलिः ३९ प्रोवाचसुमहातेजाधर्मराजंयुधिष्ठिरं हर्षादुत्फुल्लनयनोजितकाशीविशांपते ४० तवाद्यपृथिवी ५०
राजन्क्षेमानिहतकंटका तांप्रशाधिमहाराजस्वधर्ममनुपालय ४१ यस्तुकर्तास्यवैरस्यनिकृत्यानिकृतिप्रियः सोयंविनिहतःशे

© Dharmartha Trust J&K Digitized By eGangotri

धृ॰उवाच संजयमाध्वैवकिमकुर्वत संजय प॰ संजय प॰ ३० हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे

तेऽहत्थिव्यां पृथिवीपते ४२ दुःशासनप्रभृतयः सर्वे ते चोग्रवादिनः राधेयः शकुनिश्चापि निहतास्तव शत्रवः ४३ सेयं रत्नसमाकी
र्णा मही सवनपर्वता उपावृत्ता महाराज त्वामद्य निहतद्विषं ४४ युधिष्ठिर उवाच गतं वैरस्य निधनं हतो राजा सुयोधनः कृष्णस्य
मतमास्थाय विजितेयं वसुंधरा दिष्ट्या गतस्त्वमानृण्यं मातुः कोपस्य चोभयोः दिष्ट्या जयसि दुर्धर्ष दिष्ट्या शत्रुर्निपातितः ४६ इति श्री
महाभारते गदापर्वणि धृतराष्ट्र उवाच हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे सिंहेनेव महाराज मत्तं वनगजं यथा १ प्रहृष्ट
मनसस्तत्र कृष्णेन सह पांडवाः पांचालाः संजयाश्चैव निहते कुरुनंदने ३ आविध्यन्नुत्तरीयाणि सिंहनादांश्च नेदिरे नैतान्हर्ष
समाविष्टानियं सेहे वसुंधरा ४ धनूंष्यन्ये व्याक्षिपंत ज्याश्चाप्यन्ये तथाक्षिपन् दध्मुरन्ये महाशंखानन्ये जघ्नुश्च दुंदुभीः ५ चिक्रीडुश्च त
थैवान्ये जहसुश्च तवाहिताः अब्रुवंश्चासकृद्वीरा भीमसेनमिदं वचः ६ दुष्करं भवता कर्म रणेऽद्य सुमहत्कृतं कौरवेंद्रं रणे हत्वा गद
यातिकृतश्रमं ७ इंद्रेणेव हि वृत्रस्य वधं परमसंयुगे त्वया कृतममन्यंत शत्रोर्वधमिमं जनाः ८ चरंतं विविधान्मार्गान्मंडलानि च
सर्वशः दुर्योधनमिमं शूरं कोऽन्यो हन्याद्वृकोदरात ९ वैरस्य च गतः पारं त्वमिहान्यैः सुदुर्गमं अशक्यमेतदन्येन संपादयितुमीद
शं १० कुंजरेणेव मत्तेन वीरसंग्राममूर्द्धनि दुर्योधनशिरो दिष्ट्या पादेन मृदितं त्वया ११ सिंहेन महिषस्येव कृत्वा संगरमद्भुतं
दुःशासनस्य रुधिरं दिष्ट्या पीतं त्वयानघ १२ ये विप्रचक्रू राजानं धर्मात्मानं युधिष्ठिरं मूर्ध्नि तेषां कृतः पादो दिष्ट्या ते स्वेन कर्मणा १३
अमित्राणामधिष्ठानं वधो दुर्योधनस्य च भीम दिष्ट्या पृथिव्यां ते प्रथितं सुमहद्यशः १४ एवं नूनं हते वृत्रे शक्रं नंदंति बंदिनः तथा त्वां

© Dharmartha Trust J&K. Digitized By eGangotri

ग॰
५१

निहतामित्रंवयंनेदामभारत १५ दुर्योधनवधेयानिरोमाणिहृषितानिनः अद्यापिनविहृष्यंतेतानितद्विद्धिभारत १६ इतिब्रुवन्भीम
सेनंवाजिकास्तत्रसंगताः तांस्तथापुरुषव्याघ्रान्पांचालान्सांउचैःस्वर १७ ब्रुवतोसदृशंचैवमभ्यावाचमधुसूदनः नन्याय्यंनिहतंशत्रुंभूयो
हंतुंनराधिपाः १८ असकृद्वाग्भिरुग्राभिर्निहतोह्येषमंदधीः तदैवैषहतःपापोयदैवनिरपत्रपः १९ लुब्धःपापसहायश्चसुहृदांशा
सनातिगः वहुशोविदुरद्रोणकृपगांगेयसंजयैः पांडुभ्यःप्रार्थ्यमानोपिपित्र्यमंशंनदत्तवान् नैषयोग्योद्यमित्रंवाशत्रुर्वापुरु
षाधमः २१ किमनेनातिभग्नेनवाग्भिःकाष्ठसधर्मणा रथेष्वारोहतक्षिप्रंगच्छामोवसुधाधिपाः २२ दिष्ट्याहतोयंपापात्मा
सा मात्यज्ञातिवांधवः इतिश्रुत्वात्वधिक्षेपंकृष्णाद्दुर्योधनोनृपः २३ अमर्षवशमापन्नउदतिष्ठद्विशांपते स्फिग्देशेनोपविष्टःस
दोर्भ्यांविष्टभ्यमेदिनीं २४ दृष्टिं भ्रूसंकटांकृत्वावासुदेवेन्यपातयत् अर्द्धोन्नतशरीरस्यरूपमासीन्नृपस्यतु २५ क्रुद्धस्या
शीविषस्येवछिन्नपुच्छस्यभारत प्राणांतकरणींघोरांवेदनामप्यचिंतयन् २६ दुर्योधनोवासुदेवंवाग्भिरुग्राभिरार्दयत् कं
सदासस्यदायादनतेलज्जास्त्यनेनवै २७ अधर्मेणगदायुद्धेयदहंविनिपातितः ऊरूभिंधीतिभीमस्यस्मृतिंमिथ्याप्रयच्छता २८
किंनविज्ञातमेतन्मेयदर्जुनमवोचिथाः घातयित्वामहीपालानृजुयुद्धान्सहस्रशः २९ जिह्मैरुपायैर्विविधैर्नतेलज्जानते ग॰म॰
घृणा अहन्यहनिशूराणांकुर्वाणःकदनंमहत् ३० शिखंडिनंपुरस्कृत्यघातितस्तेपितामहः अश्वत्थाम्नःसनामानंहत्वाना ५१
गंसुदुर्मते ३१ आचार्योन्यासितःशस्त्रंकिंतन्नविदितंमया सत्वानेननृशंसेनधृष्टद्युम्नेनवीर्यवान् ३२ पात्यमानस्त्वयादृष्टो

© Dharmartha Trust J&K. Digitized By eGangotri

नैवेनंत्वमवारयः वधार्थंपांडुपुत्रस्ययाचितोशक्तिमेवच ३३ घटोत्कचेव्यंसितः कस्त्वत्तः पापकृत्तमः छिन्नहस्तःप्रायगतस्तथाभू
रिश्रवाबली ३४ त्वयानिसृष्टेनहतः शैनेयेनमहात्मना कुर्वाणश्चोग्रंमकर्मकर्णः पार्थजिगीषया ३५ व्यंसितेनाश्वसेनस्यपन्नगेंद्रसु
तस्यवै पुनश्चपतितेचक्रेव्यसनार्त्तः पराजितः ३६ पातितःसमरेकर्णश्चक्रव्यग्रोग्रणीर्नृणां यदिमांचापिकर्णंच भीष्मद्रोणौचसंयुगे
३७ ऋजुनाप्रतियुध्येथानतेस्याद्विजयोध्रुवं त्वयापुनरनार्येणजिह्ममार्गेणपार्थिवाः ३८ स्वधर्ममनुतिष्ठंतोवयंचान्येचघातिताः वा
वासुदेवउवाच हतस्त्वमसिगांधारेसभ्रातृसुतबांधवः सगणःससुहृच्चैवपापमार्गमनुष्ठितः ३९ तवैवदुष्कृतैर्वीरौभीष्मद्रोणौनिपा
तितौ कर्णश्चनिहतःसख्येतवशीलानुवर्त्तकः ४० याच्यमानंमयामूढपित्र्यमंशंनदित्ससि पांडवेभ्यःस्वराज्यंचलोभाच्छकुनिनिश्च
यात् ४१ विषंतेभीमसेनायदत्तंसर्वेचपांडवाः प्रदीपितास्ततुगेहेमात्रासहसुदुर्मते ४२ सभायांयाज्ञसेनीचकृष्टाद्यूतेरजस्वला
तदैवतावद्दुष्टात्मन्वध्यस्त्वंनिरपत्रपः ४३ अनक्षज्ञंचधर्मज्ञंसौबलेनाक्षवेदिना निकृत्यायत्पराजैषीत्तस्मादसिहतोरणे ४४
जयद्रथेनपापेनयत्कृष्णाक्लेशितावने यातेषुमृगयांचैवतृणबिंदोरथाश्रमं ४५ अभिमन्युश्चयद्बालएकोबहुभिराहवे त्व
द्दोषैर्निहतःपापतस्मादसिहतोरणे ४६ यान्यकार्याणिचास्माकंकृतानीतिप्रभाषसे वैगुण्येनतवात्यर्थंसर्वंहितदनुष्ठितं ४७
बृहस्पतेरुशनसोनोपदेशःश्रुतस्त्वया वृद्धानोपासिताश्चैवहितंवाक्यंनतेश्रुतं लोभेनातिबलेनत्वंतृष्णयाचवशीकृतः कृतवा
नस्यकार्याणिविपाकस्तस्यभुज्यतां ४८ दुर्योधनउवाच अधीतंविधिवद्दत्तंभूःप्रशास्तासंसागरा मूर्ध्निस्थितममित्राणांकोनुस्व

ग०
५२

ततरो मया ५० यदिष्टं क्षत्रबंधूनां स्वधर्ममनुपश्यतां तदिदं निधनं प्राप्तं को नु स्वंततरो मया ५१ देवार्हा मानुषा भोगाः प्राप्ता अ
सुलभा नृपैः ऐश्वर्यं चोत्तमं प्राप्तं को नु स्वंततरो मया ५२ ससुहृत्सानुजश्चैव स्वर्गं गंताहमच्युत यूयं निहतसंकल्पाः शोचंतो वर्त्तयि
ष्यथ ५३ संजय उवाच अस्य वाक्यस्य निधने कुरुराजस्य धीमतः अपतत्सुमहद्वर्षं पुष्पाणां पुण्यगंधिनां ५४ अवादयंत गंध
र्वा वादित्रं सुमनोहरं जगुश्चाप्सरसो राज्ञो यशः संबद्धमेव च ५५ सिद्धाश्च मुमुचुर्वाचः साधु साध्विति भारत ववौ च सुरभिर्वायुः
पुण्यगंधो मृदुः सुखः व्यराजंश्च दिशः सर्वा नभो वैदूर्यसंनिभं ५६ अत्यद्भुतानि ते दृष्ट्वा वासुदेवपुरोगमाः दुर्योधनस्य पूजां तु
दृष्ट्वा व्रीडामुपागमन् ५७ हतांश्चाधर्मतः श्रुत्वा शोकार्त्ताः शुशुचुर्हि ते भीष्मं द्रोणं तथा कर्णं भूरिश्रवसमेव च ५८ तांस्तु
चिंतापरान्दृष्ट्वा पांडवान्दीनचेतसः प्रोवाचेदं वचः कृष्णो मेघदुंदुभिनिस्वनः ५९ नैष शक्योतिशीघ्रास्त्रस्ते च सर्वे महारथाः
ऋजुयुद्धेन विक्रांता हंतुं युष्माभिराहवे ६० नैष शक्यः कदाचित्तु हंतुं धर्मेण पार्थिवः ते वा भीष्ममुखाः सर्वे महेष्वासा महारथाः
६१ मयानेकैरुपायैस्तु मायायोगेन चासकृत् हतास्ते सर्व एवाजौ भवतां हितमिच्छता ६२ यदि नैवंविधं जातु कुर्यां जिह्ममहं र
णे कुतो वो विजयो भूयः कुतो राज्यं कुतो धनं ६३ ते हि सर्वे महात्मानश्चत्वारोतिरथा भुवि न शक्या धर्मतो हंतुं लोकपालैरपि
स्वयं ६४ तथैवायं गदापाणिर्धार्त्तराष्ट्रो गतक्लमः न शक्यो धर्मतो हंतुं कालेनापीह दंडिना ६५ न च वो हृदि कर्त्तव्यं य ग०
दयं घातितो रिपुः मिथ्यावध्यास्तथोपायैर्बहवः शत्रवोधिकाः ६६ पूर्वैरनुगतो मार्गो देवैरसुरघातिभिः सद्भिश्चानुगतः पंथाः ५२

© Dharmartha Trust J&K. Digitized By eGangotri

ःसमेतैरनुगम्यते कृतकृत्याः स्मसांप्रतं निवासोरोच्यतामिह साश्वनागरथाः सर्वे विश्रामामोनराधिपाः ६८ वासुदेववचः श्रुत्वातदा
नीं पांडवैः सह पांचालाश्च भृशं हृष्टा विनेदुः सिंहसंघवत् ६९ ततः प्रध्मापयन्शंखान्पांचजन्यं च माधवः हृष्टो दुर्योधनं दृष्ट्वा निह
तं पुरुषर्षभ ७० इति श्रीमहाभारते गदापर्वणि संजय उवाच ततस्ते प्रययुः सर्वे निवासाय महीक्षितः शंखान्प्रध्मापयंतो वै हृष्टाः
परिघबाहवः १ [redacted] ६२ [redacted]
[redacted] पांडवानां गच्छतश्चापि शिबिरं नो विशांपते महेष्वासोऽन्वगात्पश्चाद्युयुत्सुः सात्यकिस्तथा २ धृष्टद्युम्नः शिखंडी च द्रौपदे
याश्च सर्वशः सर्वे चान्ये महेष्वासा ययुः स्वशिबिराण्युत ३ ततस्ते प्राविशन्पार्था हतसैन्यं हतेश्वरं दुर्योधनस्य शिबिरं रंगवद्विसृते ज
ने ४ हतोत्सवं पुरमिव हृतनागमिव ह्रदं स्त्रीवर्षवरभूयिष्ठं वृद्धामात्यैरधिष्ठितं ५ तत्रैतान्पर्युपातिष्ठन्दुर्योधनपुरःसराः कृतांजलिपु
टा राजन्काषायमलिना नराः ६ शिबिरं समनुप्राप्य कुरुराजस्य पांडवाः अवतेरुर्महाराज रथेभ्यो रथसत्तमाः ७ ततो गांडीवधन्वानम
भ्यभाषत केशवः स्थितः प्रियहिते नित्यमतीव भरतर्षभ ८ अवरोपय गांडीवमक्षय्यौ च महेषुधी अथाहमवरोक्ष्यामि पश्चाद्भरतस
त्तम ९ स्वयं चैवावरोह त्वमेतच्छ्रेयस्तवानघ तच्चाकरोत्तथा वीरः पांडुपुत्रो धनंजयः १० अथ पश्चात्ततः कृष्णो रश्मीनुत्सृज्य वाजिनां
अवारोहत मेधावी रथाद्गांडीवधन्वनः ११ अथावतीर्णे भूतानामीश्वरे सुमहात्मनि कपिरंतर्दधे दिव्यो ध्वजो गांडीवधन्वनः १२ स दग्धो
द्रोणकर्णाभ्यां दिव्यैरस्त्रैर्महारथः अनादीप्तोऽग्निना ह्याशु प्रजज्वाल महीपते १३ सोपासंगः सरश्मिश्च साश्वः सयुगबंधुरः

© (c) Dharmartha Trust J&K. Digitized by eGangotri

ग०
५३

भस्मीभूतोपतद्भूमौ रथो गांडीवधन्वनः १४ तं तथा भस्मभूतं तु दृष्ट्वा पांडुसुताः प्रभो अभवन्विस्मिता राजन्नर्जुनश्चेदमब्रवीत् १५ कृ
तांजलिः सप्रणयं प्रणिपत्याभिवाद्य ह गोविंद कस्माद्भगवन्रथो दग्धोयमग्निना १६ किमेतन्महदाश्चर्यमभवद्यदुनंदन तन्मे ब्रूहि
महाबाहो श्रोतव्यं यदि मन्यसे १७ वासुदेव उवाच अस्त्रैर्बहुविधैर्दग्धः पूर्वमेवायमर्जुन मदधिष्ठितत्वात्समरे न विशीर्णः परंतप
१८ इदानीं तु विशीर्णोयं दग्धो ब्रह्मास्त्रतेजसा मया विमुक्तः कौंतेय त्वय्यद्य कृतकर्मणि १९ ईषदुत्स्मयमानस्तु भगवान्केश
वोरिहा परिष्वज्य च राजानं युधिष्ठिरमभाषत २० दिष्ट्या जयसि कौंतेय दिष्ट्या ते शत्रवो जिताः दिष्ट्या गांडीवधन्वा च भीमसेन
श्च पांडवः २१ त्वं चापि कुशली राजन्माद्रीपुत्रौ च पांडवौ मुक्ता वीरक्षयादस्मात्संग्रामान्निहतद्विषः २२ क्षिप्रमुत्तरकालानि कुरु
कार्याणि भारत उपयातमुपप्लव्यं सह गांडीवधन्वना २३ आनीय मधुपर्कं मां यत्पुरा त्वमवोचथाः एष भ्राता सखा चैव तव
कृष्ण धनंजयः २४ रक्षितव्यो महाबाहो सर्वास्वापत्स्विति प्रभो तव चैवं ब्रुवाणस्य तथेत्येवाहमब्रुवं २५ स सव्यसाची गुप्तस्ते विजयी
च जनेश्वर भ्रातृभिः सह राजेंद्र शूरः सत्यपराक्रमः २६ मुक्तो वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात् एवमुक्तस्तु कृष्णेन धर्मराजो युधि
ष्ठिरः २७ हृष्टरोमा महाराज प्रत्युवाच जनार्दनं युधिष्ठिर उवाच प्रमुक्तं द्रोणकर्णाभ्यां ब्रह्मास्त्रमरिमर्दन कस्त्वदन्यः सहेत्साक्षा
दपि वज्री पुरंदरः २८ भवतस्तु प्रसादेन संशप्तकगणा जिताः महारणगतः पार्थो यच्च नासीत्पराङ्मुखः २९ तथैव च महाबाहो
पर्यायैर्बहुभिर्मया कर्मणामनुसंधानं तेजसश्च गतिः शुभा ३० उपप्लव्ये महर्षिर्मे कृष्णद्वैपायनोब्रवीत् यतो धर्मस्ततः कृष्णो यतः

शम०
५३

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

कृष्णस्तोमरजयः ३२ इत्येवमुक्तास्तेवीराः शिबिरंतवभारत प्रविश्यप्रत्यपद्यंतकोशंरत्नर्द्धिसंचयान् ३३ रजतंजातरूपंचमणीनथचमौक्तिका
न् भूषणान्यथमुख्यानिकम्बलान्यजिनानिच३३ दासीदासमसंख्येयंराज्योपकरणानिच तेप्राप्यधनमक्षय्यंत्वदीयंभरतर्षभ ३४ उदक्रोश
न्महाभागानरेंद्रविजितारयः तेतुवीराःसमाश्वस्यवाहनान्यवमुच्यच ३५ अतिष्ठंतमुहुःसर्वेपांडवाःसात्यकिस्तथा अथाब्रवीन्महाराज
वासुदेवोमहायशाः ३६ अस्माभिर्मंगलार्थायवस्तव्यंशिबिराद्बहिः तथेत्युक्त्वाहितेसर्वेपांडवाःसात्यकिस्तथा ३७ वासुदेवेनसहितामं
गलार्थंवहिर्ययुः तेसमासाद्यसरितंपुण्यामोघवतींनृप ३८ न्यवसन्नथतांरात्रिंपांडवाहतशत्रवः ततःसंप्रेषयामासुर्यादवंनागसा
ह्वये ३९ ततःप्रायाज्जवेनाशुवासुदेवःप्रतापवान् दारुकंरथमारोप्ययेनराजांबिकासुतः ४० तमूचुःसंप्रयास्यंतंशैब्यसुग्रीववा
हने प्रत्याश्वासयगांधारींहतपुत्रांयशस्विनीं ४१ सप्रायात्पांडवैरुक्तस्तत्पुरंसात्वतांवरः आससादततः क्षिप्रंगांधारींनिहतात्मजां ४२
इतिश्रीमहाभारतेगदापर्वणि जनमेजयउवाच किमर्थंद्विजशार्दूलधर्मराजोयुधिष्ठिरः गांधार्याःप्रेषयामासवासुदेवंपरंतपः १ यदा
पूर्वंगतःकृष्णःशमार्थंकौरवान्प्रति नचतंलब्धवान्कामंततोयुद्धमभूदिदं २ निहतेषुतुयोधेषुहतेदुर्योधनेतदा पृथिव्यांपांडवेयस्यनि
:सपत्नेकृतेयुधि ३ विद्रुतेशिबिरेशून्येप्राप्तेयशसिचोत्तमे किंनुतत्कारणंब्रह्मन्येनकृष्णोगतःपुनः ४ नचैतत्कारणंब्रह्मन्नतुल्पंवि
प्रतिभातिमे यत्रागमदमेयात्मास्वयमेवजनार्दनः ५ तत्त्वतोवैसमाचक्ष्वसर्वमध्वर्युसत्तम यच्चात्रकारणंब्रह्मन्कार्यस्यास्यविनिश्चये ६
वैशंपायनउवाच त्वद्युक्तोयमनुप्रश्नोयन्मांपृच्छसिपार्थिव तत्तेहंसंप्रवक्ष्यामियथावद्भरतर्षभ ७ हतंदुर्योधनंदृष्ट्वाभीमसेनेनसंयुगे

© (C) Dharmartha Trust J&K. Digitized By eGangotri

गं० ५४

श्रुत्वाप्यसमयंराजन्धार्तराष्ट्रंमहाबलं ८ अन्यायेनहतंदृष्ट्वागदायुद्धेनभारत युधिष्ठिरंमहाराजमहद्भयमथाविशत् ९ चिंतयानोमहा
भागांगांधारींतपसान्वितां घोरेणतपसायुक्तांत्रैलोक्यमपिसाद्हेत् १० तस्यचिंतयमानस्यबुद्धिःसमभूत्तदा गांधार्याःक्रोधदीप्तायाः
पूर्वंप्रशमनंभवेत् ११ साहिपुत्रवधंश्रुत्वाकृतमस्माभिरीदृशं मानसेनाग्निनाक्रुद्धाभस्मसान्नःकरिष्यति १२ कथंदुःखमिदंतीव्रं
गांधारीसंप्रसहिष्यति श्रुत्वाविनिहतंपुत्रंछलेनाजिह्मयोधिनं १३ एवंविचिंत्यबहुधाभयशोकसमन्वितः वासुदेवमिदंवाक्यंधर्मराजोऽभ्यभा
षत १४ तवप्रसादाद्गोविंदराज्यंनिहतकंटकं अप्राप्यंमनसापीदंप्राप्तमस्माभिरच्युत १५ प्रत्यक्षंमेमहाबाहोसंग्रामेलोमहर्षणे
विमर्दःसुमहान्प्राप्तःत्वयायादवनंदन १६ त्वयादेवासुरेयुद्धेवधार्थममरद्विषां यथामंघपुरादत्तेहताश्चविबुधद्विषः १७ साह्यंत
तथामहाबाहोदत्तमस्माकमच्युत सारथ्येनचवार्ष्णेयभवताहिधृतावयं १८ यदिनत्वंभवेन्नाथःफाल्गुनस्यमहारणे कथंशक्योरणो
जेतुंभवेदेषबलार्णवः १९ गदाप्रहाराविपुलाःपरिघैश्चापिताडनं शक्तिभिर्भिंडिपालैश्चतोमरैःसपरश्वधैः २० अस्मत्कृतेत्वया
कृष्णवाचःसुपरुषाःश्रुताःशस्त्राणांचनिपाताविवज्रस्पर्शोपमारणे २१ तेचतेसफलाजाताहतेदुर्योधनेऽच्युत तत्सर्वंनयथानश्ये
त्पुनःकृष्णतथाकुरु २२ संदेहदोलांप्राप्तन्नःचेतःकृष्णजयेसति गांधार्याहिमहाबाहोप्रशमंकुरु[illegible]माधव २३ साहि गम० ५४
नित्यंमहाभागातपसोग्रेणकर्षिता पुत्रपौत्रवधंश्रुत्वाध्रुवन्नःसंप्रधक्ष्यति २४ तस्याःप्रसादनंवीरप्राप्तकालंमतंमम कस्तांक्रोध
ताम्राक्षींपुत्रव्यसनकर्षितां २५ वीक्षितुंपुरुषःशक्तस्त्वामृतेपुरुषोत्तम तत्रमेगमनंप्राप्तंरोचतेतवमाधव २६ गांधार्याःक्रोधदी

CC-0. Dharmarth Trust J&K. Digitized by eGangotri

तायाः प्रशमार्थमरिंदम त्वं हि कर्त्ता विकर्त्ता च लोकानां प्रभवाव्ययः २७ हेतुकारणसंयुक्तैर्वाक्यैः कालसमीरितैः क्षिप्रमेव महाबाहो गांधारीं शम
यिष्यसि २८ पितामहश्च भगवान् कृष्णस्तत्र भविष्यति सर्वथा त्वं महाबाहो गांधार्याः क्रोधनाशनं २९ कर्त्तव्यं सात्वतश्रेष्ठ पांडवानां हितार्थि
या धर्मराजस्य वचनं श्रुत्वा यदुकुलोद्वहः आमंत्र्य दारुकं प्राह रथः सज्जो विधीयतां केशवस्य वचः श्रुत्वा त्वरमाणोथ दारुकः ३१ न्यवेदयद्
रथं सज्जं केशवाय महात्मने तं रथं यादवश्रेष्ठः समारुह्य परंतपः ३२ जगाम हास्तिनपुरं त्वरितः केशवो विभुः ततः प्रायान्महाराज
माधवो भगवान् रथी ३३ नागसाह्वयमासाद्य प्रविवेश च वीर्यवान् प्रविश्य नगरं वीरो रथघोषेण नादयन् ३४ विदितो धृतराष्ट्रस्य
सोवतीर्य रथोत्तमात् अभ्यगच्छददीनात्मा धृतराष्ट्रनिवेशनं ३५ पूर्वं चाभिगतं तत्र सोपश्यदृषिसत्तमं पादौ प्रपीड्य कृष्णस्य राज्ञश्चा
पि जनार्दनः ३६ अभ्यवादयदव्यग्रो गांधारीं चापि केशवः ततस्तु यादवश्रेष्ठो धृतराष्ट्रमधोक्षजः ३७ पाणिमालंब्य राज्ञः सुस्वरं प्ररु
रोद ह सुमुहूर्तादिवोत्सृज्य वाष्पं शोकसमुद्भवं ३८ प्रक्षाल्य वारिणा नेत्रे आचम्य च यथाविधि उवाच प्रस्तुतं वाक्यं धृतराष्ट्रमरिंदमः ३९
न तेस्त्यविदितं किंचिद्भूतभव्यस्य भारत कालस्य च यथा वृत्तं तत्ते सुविदितं प्रभो ४० यदिदं पांडवैः सर्वैस्तव चित्तानुरोधिभिः कथं कुलक्षयो न स्या
त्त्वयाद्य तव भारत ४१ भ्रातृभिः समयं कृत्वा क्षांतवान्धर्मवत्सलः घूतच्छलजितैः शुद्धैर्वनवासोऽभ्युपागतः ४२ अज्ञातवासचर्या च नाना
वेशसमावृतैः अन्यैश्च बहुभिः क्लेशैस्त्वशक्तैरिव सर्वदा ४३ मया च स्वयमागम्य युद्धकाले उपस्थिते सर्वलोकस्य सांनिध्ये ग्रामांस्त्वं पंच याचि
तः ४४ त्वया कालोपसृष्टेन लोभतो नापवर्जिताः तवापराधान्नृपते सर्वं क्षत्रं क्षयं गतं ४५ भीष्मेण सोमदत्तेन बाल्हीकेन कृपेण च द्रो

दु३

गी०

५५ द्रोणेनचसपुत्रेणविदुरेणचधीमता ४६ यदितत्त्वंषमंनितंनचतत्कृतवानसि कालोपहतचित्ताहिसर्वेमुह्यन्तिभारत ४७ यथामृठोम
वाम्रूवमस्मिन्नणिनर्थेसमुपस्थिते किमन्यत्कालयोगाद्धिदिष्टमेवपरायणं ४८ माचदोषान्महाप्राज्ञपाण्डवेषुनिवेशय अल्पोऽप्यतिक्रमोना
स्तिपाण्डवानांमहात्मनां ४९ धर्मतोन्यायतश्चैवबलेनचनयश्चपरंतप एतत्सर्वंतुविज्ञायआत्मदोषकृतंमते ५० असूयांपाण्डुपुत्रेषुनभवान्कर्तुम
र्हति कुलंवंशश्चपिण्डश्चयच्चपुत्रकृतंफलं ५१ गान्धार्यास्तवचैवनाथपाण्डवेषुप्रतिष्ठितं त्वंचैवकुरुशार्दूलगान्धारीचयशस्विनी ५२ माशुचोन २४
रशार्दूलपाण्डवान्प्रतिकिल्विषं एतत्सर्वमनुध्यात्वाआत्मनश्चव्यतिक्रमं ५३ शिवेनपाण्डवान्पाहिनमस्तेभरतर्षभ जानासिचमहाबाहो
धर्मराजस्ययात्वयि ५४ भक्तिर्भरतशार्दूलस्नेहश्चापिस्वभावतः एतच्चकदनंकृत्वाशत्रूणामपकारिणां ५५ दह्यतेसदिवारात्रौनच
शर्माधिगच्छति त्वंचैवनरशार्दूलगान्धारीचयशस्विनी ५६ सशोचन्नरशार्दूलौशांतिंनैवाधिगच्छति ह्रियाचपरयाविष्टोभवन्तंनाधिगच्छ
ति ५७ पुत्रशोकाभिसंतप्तंबुद्धिव्याकुलितेन्द्रियं एवमुक्त्वामहाराजधृतराष्ट्रंयदूत्तमः ५८ उवाचपरमंवाक्यंगान्धारींशोककर्षितां सौब
लेयिनिबोधत्वंयत्त्वांवक्ष्यामितच्छृणु ५९ त्वत्समानास्तिलोकेस्मिन्नद्यसीमन्तिनीशुभे जानासिचयथाराज्ञिसभायांममसंनिधौ ६० ध
र्मार्थसहितंवाक्यंउभयोःपक्षयोर्हितं उक्तवत्यसिकल्याणिनचतेतनयैःकृतं ६१ दुर्योधनस्त्वयाचोक्तोजयार्थीपरुषंवचः शृणुमूढ गा०
वचोमह्यंयतोधर्मस्ततोजयः ६२ तदिदंसमनुप्राप्तंतववाक्यंनृपात्मजे एवंविदित्वाकल्याणिमास्मशोकेमनःकृथाः ६३ पाण्डवानांवि ५५
नाशायमातेबुद्धिःकदाचन शक्ताचासिमहाभागेपृथिवींसचराचरां ६४ चक्षुषाक्रोधदीप्तेननिर्दग्धुंतपसोबलात् वासुदेववचःश्रुत्वागा

© Dhanvantari Trust & IKS Digitized By eGangotri

गारीवाक्यमब्रवीत् ६५ एवमेतन्महाबाहो यथा वदसि केशव आधिभिर्दह्यमानायामतिः संचलिता मम ६६ [illegible]
सा मे व्यवस्थिता श्रुत्वा तव वाक्यं जनार्दन राज्ञस्त्वंधस्य वृद्धस्य हतपुत्रस्य केशव ६७ त्वं गतिः सहितैर्वीरैः पांडवैर्द्विपदां वर एतावदुक्त्वा वचनं मु
खं प्रच्छाद्य वाससा ६८ पुत्रशोकाभिसंतप्ता गांधारी प्ररुरोद ह ततएनां महाबाहुः केशवः शोककर्षितां ६९ हेतुकारणसंयुक्तैर्वाक्यैरा
श्वासयत्प्रभुः समाश्वास्य च गांधारीं धृतराष्ट्रं च माधवः ७० द्रौणिना संकल्पितं भावमवबुध्यत केशवः ततस्त्वरित उत्थाय पादौ मूर्ध्ना प्रण
म्य च ७१ द्वैपायनस्य राजेंद्र ततः कौरवमब्रवीत् आपृच्छे त्वां कुरुश्रेष्ठ मा च शोके मनः कृथाः ७२ द्रौणेः पापोस्त्यभिप्रायस्तेनास्मि
सहसोत्थितः पांडवानां वधे रात्रौ बुद्धिस्तेन प्रदर्शिता ७३ एतच्छ्रुत्वा तु वचनं गांधार्या सहितोब्रवीत् धृतराष्ट्रो महाबाहुः केशवं केशिसूद
न ७४ शीघ्रं गच्छ महाबाहो पांडवान्परिपालय भूयस्त्वया समेष्यामि क्षिप्रमेव जनार्दन ७५ प्रायात्त्वरितो दारुकेण सहाच्युतः
वासुदेवे गते राजन्धृतराष्ट्रं जनेश्वरं ७६ आश्वासयदमेयात्मा व्यासो लोकनमस्कृतः वासुदेवोपि धर्मात्मा कृतकृत्यो जगाम ह ७७ शिबि
रं हास्तिनपुराद्द्रष्टुं पांडवान्नृप आगम्य शिबिरं रात्रौ सोभ्यगच्छत पांडवान् ७८ तच्च तेभ्यः समाख्याय सहितस्तैः समाहितः ॥ ॥ गदा
पर्वणि धृतराष्ट्र उवाच अधिष्ठितः पदा मूर्ध्नि भग्नसक्थो महीं गतः शौंडीर्यमानी पुत्रो मे किमभाषत संजय १ अत्यर्थं कोपनो राजा जात
वैरश्च पांडुषु व्यसनं परमं प्राप्तः किमाह परमाहवे २ संजय उवाच शृणु राजन्प्रवक्ष्यामि यथावृत्तं नराधिप राज्ञा यदुक्तं भग्नेन तस्मि
न्व्यसन आगते ३ भग्नसक्थो नृपो राजन्पांसुना सोवगुंठितः यमयन्मूर्धजांस्तत्र वीक्ष्यैव दिशो दश ४ केशान्नियम्य यत्नेन निःश्व

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

ग० संतुरंगोयथा संरंभात्सुपरीताभ्यांनेत्राभ्यामतिवीक्ष्यमाणं ५ बाहू धरण्यांनिक्षिप्यमुक्तकेशइवद्विपः प्रकीर्णमूर्धजान्धुन्वन्दंतैर्दन्तानुपस्पृ
५६ शन् ६ गर्हयन्पांडवंज्येष्ठंनिश्वस्येदमथाब्रवीत् भीष्मेशांतनवेचाथकर्णेशस्त्रभृतांवरे ७ गौतमेशकुनौचापिद्रोणेचास्त्रभृतांव
रे अश्वत्थाम्नितथाशल्येशूरेचकृतवर्मणि ८ इमामवस्थांप्राप्तोस्मिकालोहिदुरतिक्रमः एकादशचमूभर्ताभूत्वाहमेतादृशंगतः ९
कालंप्राप्यमहाबाहोनकश्चिदतिवर्तते आख्यातव्यंमदीयानांयेस्मिन्जीवंतिसंयुगे १० यथाहंभीमसेनेनव्युत्क्रम्यसमयंह
तः बहूनिसुनृशंसानिकृतानिखलुपांडवैः ११ भूरिश्रवसिकर्णेचभीष्मेद्रोणेचश्रीमति इदंचाकीर्तिजंकर्मनृशंसैःपांडवैःकृ
तं १२ येननेसस्तुनिर्वेदंगमिष्यंतिहिसन्मतिः कापीतिःसत्वयुक्तस्यकृतोपाधिकृतंजयं १३ कोवासमयभेत्तारंबुधःशंसितुमर्ह
ति अधर्मेणजयंलब्ध्वाकोनुहृष्येत्पंडितः १४ यथासंहृष्यतेपापःपांडुपुत्रोवृकोदरः किंनुचित्रमतस्त्वद्यभग्नसक्थस्यमन्युमे
१५ क्रुद्धेनभीमसेनेनपादेनमृदितंशिरः प्रतपंतंश्रियाजुष्टंवर्तमानंचबंधुषु १६ एवंकुर्याच्चरोयोहिसवैसंजयपूजितः अभि
ज्ञौक्षत्रधर्मस्यममामातापिताचमे १७ तौहिसंजयदुःखार्तौविज्ञाप्यौवचनान्मम इष्टंभृत्याभृताःसम्यक्भूःप्रशास्तासमुद्रसागरा
: १८ मूर्ध्निस्थितममित्राणांजीवतामेवसंजय दत्तादायायथाशक्तिमित्राणांचप्रियंकृतं १९ अमित्राबाधिताःसर्वेकोनु गम०
स्वंततरोमयामानिताबांधवाःसर्वेवश्यःसंपूजितोजनः २० त्रितयंसेवितंसर्वंकोनुस्वंततरोमया आज्ञप्तंनृपमुख्येषुमानः ५६
प्राप्तःसुदुर्लभः २१ आजानेयैस्तथायातंकोनुस्वंततरोमया यातानिपरराष्ट्राणिनृपाभुक्ताश्चदासवत् प्रियेभ्यःप्रकृतंसाधु

© (c) Dharmartha Trust, J&K. Digitized by eGangotri

कोनुस्वंततरोमया अधीतंविधिवद्दत्तंप्राप्तमायुर्निरामयं २२ स्वधर्मविजितालोकाःकोनुस्वंततरोमया दिष्ट्यानाहंजितःसंख्येपरान्प्रव्यवरा
श्रितः दिष्ट्यामेविपुलालक्ष्मीर्मृतेत्वन्यंगताविभो यदिष्टंक्षत्रबंधूनांस्वधर्ममनुतिष्ठतां निधनंतन्मयाप्राप्तंकोनुस्वंततरोमया दिष्ट्यानाहंपरा
वृत्तोवैरात्प्राकृतवज्जितः २३ दिष्ट्यानविमतिंकांचिद्भजित्वानुपराजितः सुप्तंवाथप्रमत्तंवायथाहन्याद्विषेणवा २४ एवंयुक्तोतधर्मे
राज्युक्तम्ससमयंहतः अश्वत्थामामहाभागःकृतवर्माचसात्वतः २६ कृपःशारद्वतश्चैववक्तव्यावचनान्मम अधर्मेणप्रवृत्तानांपांडवा
नामनेकशः २६ विश्वासंसमयघ्नानांनगच्छंतुमहेय वातिकांश्चाब्रवीद्राजापुत्रस्तेसत्यविक्रमः २७ अधर्माद्भीमसेनेननिहतोहंय
थारणे सोहंद्रोणंस्वर्गगतंकर्णशल्यावुभौतथा २८ वृषसेनंमहावीर्यंशकुनिंचापिसौबलं जलसंधंमहावीर्यंभगदत्तंचपार्थिवं २९
सोमदत्तंमहेष्वासंसैंधवंचजयद्रथं दुःशासनपुरोगांश्चभ्रातॄनात्मसमांस्तथा ३० दौःशासनिंचविक्रांतंलक्ष्मणंचात्मजावुभौ ए
तांश्चान्यांश्चसुबहून्मदीयांश्चसहस्रशः ३१ पृष्ठतोनुगमिष्यामिसार्थहीनोयथाध्वगः कथंभ्रातॄन्हतान्श्रुत्वाभर्तारंस्वसामम
३२ रोरूयमाणादुःखार्तादुःशलासाभविष्यति स्नुषाभिःप्रस्नुषाभिश्चवृद्धोराजापितामम ३३ गांधारीसहितश्चैवकांगतिंप्रति प
त्स्यति नूनंलक्ष्मणमातापिहतपुत्राहतेश्वरा ३४ विनाशंयास्यतिक्षिप्रंकल्याणीपृथुलोचना यदिजानातिचार्वाकःपरिव्राड्वा
ग्विशारदः ३५ करिष्यतिमहाबाहोध्रुवंचापचितिंमम समंतपंचकेपुण्येत्रिषुलोकेषुविश्रुते ३६ अहंनिधनमासाद्यलोकान्प्रा
प्स्यामिशाश्वतान् ततोजनसहस्राणिबाष्पपूर्णानिमारिष ३७ प्रलापंनृपतेःश्रुत्वाविद्रवंतिदिशोदश ससागरवनाघोरापृथिवीसच

© Dhanantar Trust & Digitized By eGangotri

राचरा ३८ ववचालाथसनिर्ह्रादा दिशो धूमाविलाभवन् ततो द्रोणपुत्रमासाद्य यथावृत्तं न्यवेदयन् ३९ व्यवहारं गदायुद्धे पार्थिवस्य च
पातनं तदाख्याय ततः सर्वे द्रोणपुत्रस्य भारत ४० ध्यात्वा च सुचिरं कालं जग्मुरार्ता यथागतं इति श्रीमहाभारते गदापर्वणि संजय उवा
निकामं सकाशात्कुरुमुख्यात् दुर्योधने हते हतशिष्टास्ततो राजन्कौरवाणां महारथाः १ विनिर्भिन्नाः शितैर्बाणैर्गदातोमरशक्तिभिः अश्वत्था
मा कृपश्चैव कृतवर्मा च सात्वतः २ त्वरिता जवनैरश्वैरायोधनमुपागमन् तत्रापश्यन्महात्मानं धार्तराष्ट्रं निपातितं ३ प्रभग्नं वायुवेगेन
महाशालं यथा वने भूमौ विचेष्टमानं तं रुधिरेण समुक्षितं ४ महागजमिवारण्ये व्याधेन विनिपातितं विवर्तमानं बहुशो रुधिरौघपरि
प्लुतं ५ यदृच्छया निपतितं चक्रमादित्यगोचरं महावातसमुत्थेन संशुष्कमिव सागरं ६ पूर्णचन्द्रमिव व्योम्नि तुषारावृतमण्डलं रेणु
ध्वस्तं दीर्घभुजं मातंगसमविक्रमं ७ वृतं भूतगणैर्घोरैः क्रव्यादैश्च समंततः यथा धनं लिप्समानैर्भृत्यैर्नृपतिसत्तमं ८ भ्रुकुटीकृ
तवक्त्रान्तं क्रोधादुद्वृत्तचक्षुषं सामर्षं तं नरव्याघ्रं व्याघ्रं निपतितं यथा ९ ते तं दृष्ट्वा महेष्वासा भूतले पतितं नृपं मोहमभ्यागमन्सर्वे कृप
प्रभृतयो रथाः १० अवतीर्य रथेभ्यश्च प्राद्रवन्राजसंनिधौ दुर्योधनं च संप्रेक्ष्य सर्वे भूमावुपाविशन् ११ ततो द्रौणिर्महाराज बाष्पपूर्णे
क्षणः श्वसन् उवाच भरतश्रेष्ठ सर्वलोकेश्वरेश्वरं १२ न नूनं विद्यते सत्यं मानुषे किंचिदेव हि यत्र त्वं पुरुषव्याघ्र शेषे पांसुषु रूषितः
१३ भूत्वा हि नृपतिः पूर्वं समाज्ञाप्य च मेदिनीं कथमेको ऽद्य राजेन्द्र तिष्ठसे निर्जने वने १४ दुःशासनं न पश्यामि नापि कर्णं महारथं ना
पि तान्सुहृदः सर्वान्किमिदं भरतर्षभ १५ दुःखं नूनं कृतान्तस्य गतिं ज्ञातुं कथंचन लोकानां च भवान्यत्र शेषे पांसुषु रूषितः १६ एष मूर्धा

ग० ५७

निषिद्धानामेष्यगलायंततः सत्तरंगयसेनपांशुपद्मकालस्यपर्ययं १७ कोतेनदमलंक्षुं व्यजनंकचपार्थिव साचैनेमहतीसेनाक्कागता
पार्थिवोत्तम १८ दुर्विज्ञेयागति नूनंकार्याणांकारणांतरे यदेहेलोकगुरु र्भूत्वाभवानेतांदशांगतः १९ श्रुत्वासर्वमेतत्तेश्रीरूपालस्य
तेमस्तुं भवतोव्यसनंदृष्ट्वाशक्रविस्मिहितोमनः २० तस्यतद्वचनंश्रुत्वा दुःखितस्यविशेषतः उवाचराजासुत्रस्तंप्राप्तकालमिदंवचः
२१ विसृज्यनेत्रेपाणिभ्यांशोकजंवाष्पमुत्सृजन् कृपादीन्नातरावोगत्वावानेनवनराधिपः २२ ईदृशोयमनर्थोमेपंचभूतानि दृष्टु
च्येत विनाशः सर्वभूतानांकालपर्यायमागतः २३ सोपंमासमनुप्राप्तः पश्चक्षंभवतोह्ययः पृथिवीपालपिताहमेतांनिष्ठामु
पागतः २४ हिंसयानाहंपराहन्तोपुद्धेकस्यचिद्यदि हिंस्याहंनिहतः पापैश्छलेनैवविशेषतः २५ अस्माहस्यहतोनिसंमयापि
हृत्वापुरुमतोहिंस्यावास्मिन्हतोपुद्धेनिहतस्तातिवाधवः २६ हिंसाश्चवोहंपरस्यामिमुक्तानस्याज्जनक्षयात् स्वस्तिमुक्तांश्चक
स्तांश्चतन्मेप्रियमनुत्तमं २७ मामवेतानुतप्यंतांमीलद्दाश्चिवेनतेम यद्विदाः प्रमाणंवोजिताल्लोकामयाक्षयाः २८ ममसमानः
प्रभावंचकृत्स्नमामितंतेजसः तेननतप्यितव्याहंक्षत्रधर्मोत्वनुष्ठितात् २९ समयामनुप्राप्तोनास्मिशोच्यः कथंचन हतंभव
द्भिः सदृशमनुरूपमिवात्मनः ३० घातंविजयेनित्यंद्वैवंतुडरतिक्रमं एतावदुक्त्वावचनंबाष्पव्याकुललोचनः ३१ तूष्णींवभू
वराजेंद्र ह्रूजातोसौविह्वलोमहान् तथातुदृष्ट्वाराजानंबाष्पशोकसमन्वितः ३२ द्वेषाग्निःक्रोधेनजज्वालयथावह्निर्जगत्क्षये सतुक्रो
धसमाविष्टः पाणिनापाणिंनिपीड्यह ३३ वाष्पविह्वलयावाचाराजानमिदमब्रवीत् पितामेनिहतःक्षुद्रैः सुनृशंसेनकर्मणा

८३

© Dharmartha Trust J&K. Digitized by eGangotri

गा० ५८ ३४ ततथा तेन तत्प्राप्तमिय यथा राजंस्त्वया पुरे श्रुणोत्वेवं वचो मह्यं संमतेन वदतः प्रभो ३५ दृष्टा पूर्वेण रणे न धर्मेण सुकृतेन च अद्याहंस
र्वेषां पांचालानां वासुदेवस्य पश्यतः ३६ सर्वांस्तान्पापहं हित्वा मिप्रेतराजनिवेशनं अनुज्ञातुं महाराज भवान्मे क्षंतुमर्हति ३७ इति श्रुत्वा
तु वचनं द्रोणपुत्रस्य कौरवः मनसः प्रीतिजननं कृपं वचनमब्रवीत् ३८ आचार्य शीघ्रं कलशं जलपूर्णं समानय एतद्वचनमाज्ञाय
राज्ञो ब्राह्मणसत्तमः ३९ कलशं पूर्णमादाय राज्ञोंतिकमुपागमत् तमब्रवीन्महाराज पुत्रस्तव विशांपते ४० ममाज्ञया द्विजश्रेष्ठ
द्रोणपुत्रोभिषिच्यतां सेनापत्येन भद्रं ते मम चेदिच्छसि प्रियं ४१ राज्ञो नियोगाद्योद्धव्यं ब्राह्मणेन विशेषतः वर्तता क्षत्रधर्मेण ह्ये
वं धर्मविदो विदुः ४२ राज्ञस्तु वचनं श्रुत्वा कृपः शारद्वतस्ततः द्रौणिं राज्ञो नियोगेन सेनापत्येऽभ्यषेचयत् सोभिषिक्तो महाराज परि
ष्वज्य नृपोत्तमं प्रययौ सिंहनादेन दिशः सर्वा विनादयन् ४४ दुर्योधनोपि राजेंद्र शोणितेन परिप्लुतः तां निशां प्रतिपेदेथ सर्वभूतभ
यावहां ४५ अपक्रम्य तु ते तूर्णं तस्मादायोधनान्नृप शोकसंविग्नमनसश्चिंताध्यानपराभवन् ४६ इति श्रीमहाभारते शतसाहस्र्यां
संहितायां वैयासिक्यां गदापर्वणि युद्धं समाप्तं अस्यानुसौप्तिकं पर्व भविष्यति तस्यायमाद्यः श्लोकः संजय उवाच ततस्ते सहिता
वीराः प्रयाता दक्षिणामुखाः उपास्तमनवेलायां शिबिराभ्याशमागताः १ वृत्तांता अस्मिन्पर्वणि द्वैपायनह्रदे दुर्योधनप्रवे गग०
शः लुब्धकैर्दुर्योधनप्रवृत्तिः पांडवानां ह्रदगमनं युधिष्ठिरवाक्यं दुर्योधनस्य ह्रदादुत्थानं बलदेवतीर्थयात्रा बलदेवाग ५८

© Dhamaartha Trust J&K. Digitized by eGangotri

ग० ५९

मनं गजपुरं॰ ऊहमेरः॥बलदेवक्रोधः द्वारकागमनंबलदेवस्य॰ वासुदेवस्यहस्तिनापुरगमनं॰ शिबिरागमनं॰ कृपकृतवर्मोश्वत्था
मसमागमः विलापस्त्वाश्वत्थाम्नः प्रतिज्ञा० स्वभिषेकः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ग० ५९

© (c) Dharmartha Trust J&K. Digitized by eGangotri

ॐ

[illegible]

गदापर्व
५८

[illegible]

© Dharmartha Trust J&K. Digitized By eGangotri

विसोक

© Dharmartha Trust J&K. Digitized By eGangotri

वि० १

श्रीगणेशायनमः ॥ नमोविघ्नहर्त्रे नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् जनमेजयउवाच हतेदुर्योधनेचैवहतेसैन्ये
चसर्वशः धृतराष्ट्रोमहाराजः श्रुत्वाकिमकरोन्मुने तथैवकौरवोराजाधर्मपुत्रोमहामनाः कृपप्रभृतयश्चैवकिमकुर्वततेत्रयः २ अश्वत्थाम्नःश्रु
तंकर्मशापादन्योन्यकारितात् वृत्तांतमुत्तरंब्रूहियदभाषतसंजयः ३ वैशंपायनउवाच हतेपुत्रेशतेदीनंछिन्नशाखमिवद्रुमं पुत्रशोकाभिसं
तप्तंधृतराष्ट्रंमहीपतिं ४ ध्यानमूकत्वमापन्नंचिंतयासमभिप्लुतं अभिगम्यमहाराजसंजयोवाक्यमब्रवीत् ५ किंशोचसिमहाराजनास्तिशोकेसहा
यता अक्षौहिण्योहताश्चाष्टौदशचैवविशांपते ६ निर्जनेयंवसुमतीशून्यासंप्रतिकेवला नानादिग्भ्यःसमागम्यनानादेश्यानराधिपाः ७
सहैवतवपुत्रेणसर्वेवैनिधनंगताः पितृणांपुत्रपौत्राणांज्ञातीनांसुहृदांतथा ८ गुरूणांचानुपूर्व्येणप्रेतकार्याणिकारय वैशंपायनउवाच त
च्छ्रुत्वाकरुणंवाक्यंपुत्रपौत्रवधार्दितः पपातभुविदुर्धर्षोवाताहतइवद्रुमः ९ धृतराष्ट्रउवाच हतपुत्रोहतामात्योहतसर्वसुहृज्जनः दुःखंनू
नंभविष्यामिविचरन्पृथिवीमिमां १० किंनुबंधुविहीनस्यजीवितेनममाद्यवै लूनपक्षस्यइवमेजराजीर्णस्यपक्षिणः ११ हतराज्योहतबंधु
र्हतचक्षुश्चवैतथा नभ्राजिष्येमहाराजक्षीणरश्मिरिवांशुमान् १२ नकृतंसुहृदांवाक्यंजामदग्न्यस्यजल्पतः नारदस्यचदेवर्षेःकृष्णद्वैपायन
स्यच १३ सभामध्येतुकृष्णेनयच्छ्रेयोभिहितंमम अलंवैरेणतेराजन्पुत्रःसंगृह्यतामिति १४ तच्चवाक्यमकृत्वाहंभृशंतप्यामिदुर्मतिः न
हिश्रोतास्मिभीष्मस्यधर्मयुक्तंप्रभाषितं १५ दुर्योधनस्यचतथावृषभस्येवनर्दतः दुःशासनवधंश्रुत्वाकर्णस्यचविपर्ययं १६ द्रोणसूर्यो
परागंचहृदयंमेविदीर्यते नस्मराम्यात्मनःकिंचित्पुरासंजयदुष्कृतं १७ यस्येदंफलमद्येहमयामूढेनभुज्यते नूनंव्यपकृतंकिंचिन्मयापूर्वेषु

राम० १

© Dharmartha Trust J&K. Digitized By eGangotri

नन्मम १८ येनमांदुःखभागेषुधात्ताकर्मसुपूर्ववान् परिणामस्यवयमः सर्वंवंधुक्षयमिमे १९ सुहृन्मित्रविनाशश्चदैवयोगादुपागतः कोन्योस्तिदुःखि
ततरोमत्तोन्मोहिपुमानभुवि २० तन्ममाद्य वपश्यंतुपांडवाः संशितव्रताः विवृत्तंब्रह्मलोकस्यदीर्घमध्वानमास्थितं २१ वैशंपायनउवाच तस्य
लालप्यमानस्यवहुशोकंविचित्रवत्तः शोकापहंनरेंद्रस्यसंजयोवाक्यमब्रवीत् २२ शोकंराजन्व्यपनुदश्रुतास्तेवेदनिश्चयाः शास्त्रागमाश्चविविधा
वृद्धेभ्योनृपसत्तम २३ संजयेपुत्रशोकार्त्तेयदूचुर्मुनयःपुरा यथायौवनजंदर्पमास्थितेतेसुतेनृप नत्वयासुहृदांवाक्यंब्रुवतामवधारितं स्वार्थ
श्चनकृतःकश्चित्लुब्धेनफलगृद्धिना २५ असिनेवैकधारेणवुध्यातविचेष्टितं प्रायशोःवृत्तसंपन्नाः सततंपर्युपासिताः २६ यस्यदुःशासनो
मंत्रीराधेयश्चदुरात्मवान् शकुनिश्चैवदुष्टात्माचित्रसेनश्चदुर्मतिः २७ शल्यश्चयेनवैसर्वंशल्यभूतंकृतंजगत कुरुवृद्धस्यभीष्मस्यगांधार्याविदु
रस्यच २८ द्रोणस्यचमहाराजकृपस्यचशरद्वतः कृष्णस्यचमहावाहोनारदस्यचधीमतः २९ ऋषीणांचतथान्येषांव्यासस्यामिततेजसः न
कृतंतेनवचनंतवपुत्रेणभारत ३० अल्पवुद्धिरहंकारीनित्यंयुद्धमितिब्रुवन् क्रूरोदुर्मर्षणोनित्यमसंतुष्टश्चवीर्यवान् ३१ श्रुतवानसिमेधावी
व१ सत्यवांश्चैवनित्यदा नमुह्यंतीदृशाःसंतोवुद्धिमंतोभवादृशाः ३२ नधर्मःसत्कृतःकश्चिन्नित्यंयुद्धमितिब्रुवन् क्षपिताःक्षत्रियाःसर्वेशत्रूणांवर्द्धितं
यशः ३३ मध्यस्थोहितमसीनक्षमंकिंचिदुक्तवान् दुर्द्धरेणत्वयाभारःतुल्ययानसमंधृतः ३४ आदावेवमनुष्येणवर्त्तितव्यंयथाक्रमं यथानाती
तमर्थंवैपश्चात्तापेनयुज्यते ३५ पुत्रगृध्यात्त्वयाराजन्प्रियंतस्यचिकीर्षितं पश्चात्तापमिमंप्राप्तोनत्वंशोचितुमर्हसि ३६ मधुयःकेवलंदृष्ट्वा
प्रपातंनानुपश्यति सभ्रष्टोमधुलोभेनशोचत्येवंयथाभवान् ३७ अर्थान्नशोचन्प्राप्नोतिनशोचन्विंदतेफलं नशोचन्श्रियमाप्नोतिनशोचन्वि
दतेपरं ३८ स्वयमुत्पादयित्वाग्निंवस्त्रेणपरिवेष्टयेत दह्यमानोमनस्तापंभजतेनसपंडितः ३९ त्वयैवससुतेनायंवाक्यवायुनासमीरि

© Dharmartha Trust J&K. Digitized By eGangotri

वि०
२

तः लोभाग्नेनवृत्तंसंतिक्तोज्वलितः पार्थपावकः ४० तस्मिन्समिद्धेपतिताः शलभाइवतेसुता तान्वैशराग्निनिर्दग्धान्नत्वंशोचितुमर्हसि ४१
यच्चाश्रुपातात्कलिलंवदनंवहसेनृप अशास्त्रदृष्टमेतद्धिनप्रशंसंतिपंडिताः ४२ विस्फुलिंगाइवह्येतानदहंतिकिलमानवाः जहीहिमन्युंबुध्यावै
धारयात्मानमात्मना ४३ वैशंपायनउवाच एवमाश्वासितस्तेनसंजयेनमहात्मना विदुरोभूयएवाहबुद्धिपूर्वंपरंतपः ४४ इतिमहाभारतेवि
शोकपर्वणिप्रथमोध्यायः १ वैशंपायनउवाच ततोमृतसमैर्वाक्यैर्ह्लादयन्पुरुषर्षभं वैचित्रवीर्यंविदुरोयदुवाचनिबोधतत् १ विदुरउवाच
उत्तिष्ठराजनकिंशेषेधारयात्मानमात्मना एषावैसर्वसत्वानांलोकेश्वरपरागतिः २ सर्वेक्षयांताःनिचयाः पतनांताः समुच्छ्रयाः संयोगावि
प्रयोगांतामरणांतंचजीवितं ३ यदाशूरंचभीरुंचयमः कर्षतिभारत तत्किंनयोत्स्यंतिहितेक्षत्रियाःक्षत्रियर्षभः ४ अयुध्यमानोम्रियतेयु
ध्यमानश्चजीवति कालंप्राप्यमहाराजनकश्चिदतिवर्त्तते ५ अभावादीनिभूतानिभावमध्यानिभारत अभावनिधनान्येवतत्रकापरिदेवना ६
नशोचन्मृतमन्वेतिनशोचन्म्रियतेनरः एवंसांसिद्धिकेलोके किमर्थमनुशोचसि ७ कालः कर्षतिभूतानिसर्वाणिविविधान्युत नकालस्यप्रि
यः कश्चिन्नद्वेष्यः प्रियसत्तमः ८ यथावायुस्तृणाग्राणिसंवर्त्तयतिसर्वशः तथाकालवशंयांतिभूतानिभरतर्षभ ९ एकसार्थप्रयातानांस
र्वेषांतत्रगामिनां यस्यकालः प्रयात्यग्रेतत्रकापरिदेवना १० नचाप्येतान्हतान्युद्धेराजन्शोचितुमर्हसि प्रमाणंयदिशास्त्राणिगतास्तेपर
मांगतिं ११ सर्वेस्वाध्यायवंतोहिसर्वेचचरितव्रताः सर्वेचाभिमुखाः क्षीणास्तत्रकापरिदेवना १२ अदर्शनादापतिताः पुनश्चादर्शनंगताः
नैतेतवनतेषांत्वं तत्रकापरिदेवना हतोपिलभतेस्वर्गंहत्वाचलभतेयशः उभयंनोबहुगुणंनास्तिनिःफलतारणे १३ तेषांकामदुघांल्लोकानिं
द्रः संकल्पयिष्यति इंद्रस्यातिथयोह्येतेभवंतिपुरुषर्षभ १४ नयज्ञैर्दक्षिणावद्भिर्नतपोभिर्नविद्यया स्वर्गंयांतितथामर्त्यायथाशूरारणेह एम०
२

© Dharmartha Trust J&K. Digitized By eGangotri

ना: १५ शरीराग्निषु शूराणामनुकुर्वन्ति शरा हु[illegible]तिः हूयमानांछरीरैश्च वसे हृस्तत्र स्विनो मिथः १६ एवं राजंस्तवाचक्षे स्वर्ग्यं पंथानमुत्तमं न युद्धादधि
कं किंचित्क्षत्रियस्येह विद्यते १७ कृतिनस्ते महात्मानः शूराः समितिशोभनाः आशिषः परमां प्राप्ता न शोच्याः सर्व एव हि १८ आत्मानमात्म
नाश्वास्य मा शुचः पुरुषर्षभ नाद्य शोकाभिभूतस्त्वं कार्यमुत्स्रष्टुमर्हसि १९ मातापितृसहस्राणि पुत्रदारशतानि च संसारे[illegible]ष्वनुभूतानि कस्य ते कस्य वा व
यं २० शोकस्थानसहस्राणि भयस्थानशतानि च दिवसे दिवसे मूढमाविशंति न पंडितं २१ न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम न मध्य
स्थः क्वचित्कालः सर्वं कालः प्रकर्षति २२ कालः पचति भूतानि कालः संहरते प्रजाः कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः २३ अनि
त्यं यौवनं रूपं जीवितं द्रव्यसंचयः आरोग्यं प्रियसंवासो गृध्येदेषु न पंडितः २४ न जानपदिकं दुःखमेकः शोचितुमर्हसि अप्यभावेन युज्येत तच्चास्य न नि
वर्तते २५ अशोचन्प्रतिकुर्वीत यदि पश्येत्पराक्रमं भैषज्यमेतद्दुःखस्य यदेतन्नानुचिंतयेत् २६ चिंत्यमानं हि न व्येति भूयश्चापि प्रवर्तते अनि
ष्टसंप्रयोगाच्च विप्रयोगात्प्रियस्य च २७ मानुषा मानसैर्दुःखैर्दह्यंते चाल्पबुद्धयः नार्थो न धर्मो न सुखं यदेतदनुशोचसि २८ न च नापैति कार्यार्थान्त्रिव
गांधै ५ व हीयते अन्यामन्यां धनावस्थां प्राप्य वैशेषिकीं नराः २९ असंतुष्टाः प्रमुह्यंति संतोषं यांति पंडिताः प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ३० ति ६
एतज्ज्ञानस्य सामर्थ्यं न बालैः समतामियात् शयानं चानुशेते हि तिष्ठंतं चानुतिष्ठति ३१ अनुधावति धावंतं कर्म पूर्वकृतं नरं यस्यां यस्यामवस्था
यां यत्करोति शुभाशुभं ३२ तस्यां तस्यामवस्थायां तत्फलं समुपाश्नुते येन येन शरीरेण यद्यत्कर्म करोति यः ३३ तेन तेन शरीरेण तत्फलं विद्यते
क्वचित् नहि ज्ञानविरुद्धेषु बहुपापेषु कर्मसु ३६ मूलघातिषु सज्जंते बुद्धिमंतो भवद्विधाः इति महाभारते विशोकपर्वणि द्वितीयोध्यायः २ धृत
राष्ट्र उवाच सुभाषितैर्महाप्राज्ञ शोकोयं विगतो मम भूय एव तु वाक्यानि श्रोतुमिच्छामि तत्त्वतः अनिष्टानां च संसर्गादिष्टानां च विसर्जनात्

(c) Dharmartha Trust J&K. Digitized By eGangotri

कथंहिमानसैर्दुःखैः प्रमुच्यंतेत्रपंडिताः २ विदुरउवाच यतोयतोमनोदुःखात्सुखाद्वापिप्रमुच्यते ततस्ततोनियम्यैतच्छांतिविंदेतवैबुधः ३ अ
शाश्वतमिदंसर्वंचिंत्यमानंनरर्षभ कादलीसंनिभोलोकः सारोह्यस्यनविद्यते ४ यदाप्राज्ञाश्चमूढाश्चधनवंतोथनिर्धनाः सर्वेपितृवनंप्राप्यस्वपं
तिविगतज्वराः ५ निर्मांसैरस्थिभूयिष्टैर्गात्रैः स्नायुनिबंधिभिः किंविशेषंप्रपश्यंतितत्रतेषांपरेजनाः ६ येनप्रत्यवगच्छेयुः कुलरूपविशेषणं कस्माद
न्योन्यमिच्छंतिविप्रलब्धधियोनराः ७ गृहाणीवहिमर्त्यानामाहुर्देहानिपंडिताः कालेनविनियुज्यंतेसत्वमेकंतुशाश्वतं ८ यथाजीर्णमजीर्णंवावस्त्रं
त्यक्त्वातुपूरुषः अन्यद्रोचयतेवस्त्रमेवंदेहाः शरीरिणां ९ वैचित्रवीर्यसाध्यंहिदुःखंवायदिवासुखं प्राप्नुवंतीहभूतानिस्वकृतेनैवकर्म्मणा १०
कर्म्मणाप्राप्यतेस्वर्गः सुखंदुःखंचभारत ततोवहंतितंभारमवशः स्ववशोपिवा ११ यथाचमृन्मयंभांडंचक्रारूढंविपद्यते किंचित्प्रक्रियमाणंवा
कृतमात्रमथापिवा १२ छिन्नंवाप्यवरोप्यंतमवतीर्णमथापिवा आर्द्रंवाप्यथवाशुष्कंपच्यमानमथापिवा १३ अवतीर्यमाणमापाकादुद्धृतंवा
पिभारत अथवापरिभुज्यंतमेवंदेहाः शरीरिणां १४ गर्भस्थोवाप्रसूतोवाप्यथवादिवसांतरः अर्द्धमासगतोवापिमासमात्रगतोपिवा १५ संवत्स
रगतोवापिद्विसंवत्सरएववा यौवनस्थोथमध्यस्थोवृद्धोवापिविपद्यते १६ प्राक्कर्म्मभिस्तुभूतानिभवंतिनभवंतिच एवंसांसिद्धिकेलोकेकिमर्थमनुत
प्यसे १७ तथातुसलिलेराजन्क्रीडार्थमनुसंचरन् उन्मज्जेच्चनिमज्जेच्चकिंचित्सत्वंनराधिप १८ एवंसंसारगहनेउन्मज्जननिमज्जने कर्म्मभोगेन
बध्यंतेक्लिश्यंतेचाल्पबुद्धयः १९ येतुप्राज्ञाः स्थिताः सत्वेसंसारेस्मिन्हितैषिणः समागमज्ञाभूतानांतेयांतिपरमांगतिं २० इतिमहाभारतेवि
शोकपर्वणितृतीयोध्यायः ३ धृतराष्ट्रउवाच कथंसंसारगहनंविज्ञेयंवदतांवर एतदिच्छाम्यहंश्रोतुंतत्वमाख्याहिपृच्छतः १ विदुरउवाच जन्म

© Dharmartha Trust J&K. Digitized by eGangotri

प्रभृतिभूतानांक्रियासर्वोपलक्ष्यते पूर्वमेवेहकलिलेवसतेकिंचिदंतरं ततः सपंचमेतीतेमासेवासमकल्पयत ततःसर्वांगसंपूर्णोगर्भोवैसतुजायते
३ अमेध्यमध्येवसतिमांसशोणितलेपने ततस्तुवायुवेगेनऊर्द्ध्वपादोह्यधः शिराः ४ योनिद्वारमुपागम्यबहूनक्लेशानसमृच्छति योनिसंपीडनाच्चै
वपूर्वकर्मभिरन्वितः ५ तस्मान्मुक्तः ससंसारादन्यान्पश्यत्युपद्रवान् ग्रहास्तमुप~~गम्यबहूनक्लेशानसमृच्छति योनिसंपीडनाच्चै~~गच्छंतिसारमेयाइवा
मिषं ६ ततः प्राप्तोत्तरेकालेव्याधयश्चापितंतथा उपसर्प्पंतिजीवंतंवध्यमानंस्वकर्म्मभिः ७ तंवद्धमिंद्रियैः पाशैः संगस्वादुभिरावृतं व्यसना
न्यपिवर्त्तंतेविविधानिनराधिप ८ वाध्यमानश्चतैर्भूयोनैवतृप्तिमुपैतिसः तदानावैतिचैवायंप्रकुर्वन्साध्वसाधुवा ९ तथैवपरिरक्षंतियेध्या
नपरिनिष्ठिताः अयंनवुध्यतेतावद्यमलोकमथागतं १० यमदूतैर्विकृष्यंश्चमृत्युंकालेनगच्छति वाग्घीनस्यचयन्मात्रंइष्टानिष्टकृतंमुखे ११
भूयएवात्मनात्मानंवध्यमानमुपेक्षते अहोविनिकृतोलोभेनचवशीकृतः १२ लोभक्रोधभयोन्मत्तोनात्मानमवबुध्यते कुलीनत्वेरमतेदुःकुली
नान्विकुत्सयन् १३ धनदर्प्पेणहृष्टश्चदरिद्रानपरिकुत्सयन् मूर्खानितिपरानाहनात्मानंसमवेक्षते १४ दोषानक्षिपतिचान्येषांनात्मानंशास्तुमिच्छ
ति यदाप्राज्ञाश्चमूर्खाश्चधनवंतश्चनिर्द्धनाः १५ कुलीनाश्चाकुलीनाश्चमानिनोथाप्यमानिनः सर्वेपितृवनंप्राप्ताः स्वपंतिविगतज्वराः १६ निर्मांसै
रस्थिभूयिष्ठैर्गात्रैः स्नायुनिबंधनैः विशेषंनप्रपश्यंतितत्रतेषांपरेजनाः १७ येनप्रत्यवगच्छेयुः कालरूपविशेषणं यदासर्वेसमंन्यस्ताः स्वपंतिवसुधा
तले १८ कस्मादन्योन्यमिच्छंतिप्रलब्धुमिहदुर्बुधाः प्रत्यक्षंचपरोक्षंचयोनिशम्यश्रुतिंत्विमां १९ जन्मप्रभृतिवर्त्तेतप्राप्नुयात्परमांगतिं एवंसर्वंविदि
त्वावैयस्तत्वमनुवर्त्तते २० सप्रमोक्षपतेसर्वंनर्यथानंमनुजेश्वर इतिश्रीमहाभारतेविशोकपर्वणिचतुर्थोध्यायः ४ धृतराष्ट्रउवाच यदिदंधर्मगहनंवु
द्ध्यासमनुगम्यते तद्विविस्तरतः सर्वंवुद्धिमार्गंप्रशंसमे १ विदुरउवाच अत्रतेवर्त्तयिष्यामिनमस्कृत्वास्वयंभुवे यथासंसारगहनंवदंतिपरमर्षयः २

© Dhamaarta Trust & Digitized By eGangotri

वि०
५

कश्चिन्महतिसंसारेवर्त्तमानोद्विजः।किल महद्दुर्गमनुप्राप्तोवनंक्रव्यादसंकुलं ३ सिंहव्याघ्रगजाकारै।तिघोरैर्महाशनैः समंतात्संपरिक्षिप्तंयत्स्मदृष्ट्वात्र
सेद्यमः ४ तदस्यदृष्ट्वात्द्धृदयमुद्वेगमगमत्परं अभ्युच्छ्रयश्चरोमाणांवैविक्रियाश्चपरंतप ५ सतद्वनंव्यनुसरन्संप्रधावन्नितस्ततः वीक्षमाणोदिशःसर्वाः
:शरणंक्वभवेदिति ६ सतेषांछिद्रमन्वैच्छत्प्रद्रुतोभयपीडितः नचनिर्यातिवैदूरंनवातैर्विप्रमुच्यते ७ अथापश्यद्वनंघोरंसमंताद्वागुरावृतं वाहुभ्यांसं
परिक्षिप्तंस्त्रियापरमघोरया ८ पंचशीर्षधरैर्नागैःशैलैरिवसमुन्नतैः नभःस्पृशैर्महावृक्षैः परिक्षिप्तंमहावनं ९ वनमध्येचतत्राभूदुदपानः
समावृतः वल्लीभिस्तृणाच्छन्नाभिर्दृढाभिरभिसंवृतः १० पपातसद्विजस्तत्रनिगूढेसलिलाशये विलग्नश्चाभवत्तस्मिन्लतासंतानसंकुले ११ पनस
यस्ययथाजातंवृक्षवंतंमहाफलं सतथालम्बतेतत्रऊर्ध्वपादोह्यधः।शिरः १२ अथतत्रापितस्यान्योभूयोजातउपद्रवः कूपमध्येमहानागमपश्यतमहा
वलं १३ [illegible]वलं कूपवीनाहवेलायामपश्यतमहागजं षट्वक्त्रंकृष्णशवलंद्विषट्कपदचारिणं १४ क्रमेणपरि
सर्पंतंवल्लीवृक्षसमावृतं तस्यचापिप्रशाखासुवृक्षशाखावलंविनः १५ नानारूपामधुकराघोररूपाभयावहाः आसतेमधुसंवृत्यपूर्वमेवनिके
तजाः १६ भूयोभूयःसमीहंतेमधूनिभरतर्षभ स्वादनीयानिभूतानांयैर्वालोपिविकृष्यते तेषांमधूनांवहुधाधाराप्रस्रवतीतदा आलंवमानः
सपुमान्धारांपिवतिसर्वदा १८ नचास्यतृष्णाविरतापिवमानस्यसंकटे अभीप्सतितदानित्यमतृप्तःसपुनःपुनः १९ नचास्यजीवितेराजन्नि
र्वेदःसमजायत तत्रैवचमनुष्यस्यजीविताशाप्रतिष्ठिता २० कृष्णाःश्वेताश्चतेवृक्षंकुट्टयंतिचमूषिकाः व्यालैश्चवनदुर्गांतेस्त्रियाचपरमोग्रया
२१ कूपाधस्ताच्चनागेनवीनाहेकुंजरेणच वृक्षप्रपाताच्चभयंमूषिकेभ्यश्चपंचमं २२ मधुलोभान्मधुकरैःषष्ठमाहुर्महद्भयं एवंसवसतेतत्रक्षि
प्तःसंसारसागरे २३ नचैवजीविताशायांनिर्वेदमुपगच्छति इतिमहाभारतेविशोकपर्वणिपंचमोध्यायः ५ धृतराष्ट्रउवाच अहोखलुमहद्दुःखंकृच्छ्र एम०
५

© (c) Dharmartha Trust J&K. Digitized By eGangotri

वासस्तत्र सह कथं तस्य रतिस्तत्र तुष्टिर्वा वद तां वर १ स देशः क्व नु यत्रासौ वसते धर्मसंकटे कथं वा स विमुच्येत नरस्तस्मान्महाभयात् २ एतन्मे सर्वमाचक्ष्व
साधु चेष्टामहे तदा कृपा मे महती जाता तस्याभ्युद्धरणेन हि ३ विदुर उवाच उपमानमिदं राजन्मोक्षविद्भिरुदाहृतं सुकृतं विंदते येन परलोकेषु मानवः ४ उच्य
ते यत्तु कांतारं महत्संसार एव सः वनं दुर्गं हि यच्चैतत्संसारगहनं हि तत् ५ ये च ते कथिता व्याला व्याधयस्ते प्रकीर्तिताः या सा नारी बृहत्काया अध्यतिष्ठत तत्र वै ६
तामाहुस्तु जरां प्राज्ञा वर्णरूपविनाशिनीं यस्तत्र कूपो नृपते स तु देहः शरीरिणां ७ यस्तत्र वसतेऽधस्तान्महाहिः काल एव सः अंतकः सर्वभूतानां देहिनां
सर्वहार्यसौ ८ कूपमध्ये च या जाता वल्ली यत्र स मानवः प्रताने लंबते लग्ना जीविताशा शरीरिणां ९ स यस्तु कूपवीनाहे तं वृक्षं परिसर्पति षड्वक्त्रः
कुंजरो राजन्स तु संवत्सरः स्मृतः १० षट् शाखा वक्त्राणि तु वो मासाः पादा द्वादश कीर्तिताः ये तु वृक्षं निकृंतंति मूषिकाः पन्नगास्तथा ११ रात्र्यहानि तु तान्याहु
र्भूतानां परिचिंतकाः ये ते मधुकरास्तत्र कामास्ते परिकीर्तिताः १२ यास्तु ता बहुशो धाराः स्रवंति मधुनिस्रवं तांस्तु कामरसान्विद्याद्यत्र मज्जंति मा
नवाः १३ एवं संसारचक्रस्य परिवृत्तिं विदुर्बुधाः येन संसारचक्रस्य पाशांश्छिंदंति वै बुधाः १४ इति महाभारते विशोकपर्वणि षष्टोध्यायः ६ धृतराष्ट्र
उवाच अहोभिहितमाख्यानं भवता तत्त्वदर्शिना भूय एव तु मे हर्षः श्रुत्वा वागमृतं तव १ विदुर उवाच शृणु भूयः प्रवक्ष्यामि मार्गस्यैतस्य विस्तरं य
च्छ्रुत्वा विप्रमुच्यंते संसारेभ्यो विचक्षणाः २ यथा तु पुरुषो राजन्दीर्घमध्वानमास्थितः क्वचिच्छ्रमाच्छ्रांतः कुरुते वासमेव च ३ एवं संसारपर्याये गर्भवा
सेषु भारत कुर्वंति दुर्बुधा वासं मुच्यंते तत्र पंडिताः ४ तस्मादध्वानमेवैतमाहुः शास्त्रविदो जनाः यत्तु संसारगहनं वनमाहुर्मनीषिणः ५ सोयं लोक
समावर्तो मर्त्यानां भरतर्षभ चराणां स्थावराणां च न गृध्येत्तत्र पंडितः ६ शारीरमानसास्त्वेव मर्त्यानां ये तु व्याधयः प्रत्यक्षाश्च परोक्षाश्च ते व्यालाः क
थिता भुवि ७ क्लिश्यमानाश्च तैर्नित्यं वार्यमाणाश्च भारत स्वकर्मभिर्महाव्यालैर्नोद्विजंत्यल्पबुद्धयः ८ अथापि तैर्विमुच्येत व्याधिभिः पुरुषो नृप आ

कश्चित ४

वि० ह्रणोतेमवनंपश्चाज्जराह्रपविनाशिनी ९ शब्दरूपरसस्पर्शैर्गंधैश्चविविधैरपि मज्जमानंमहापंकेनिरालंवेसमंततः १० संवत्सराश्चमासाश्चपक्षाहोरात्रसंधयः
५ क्रमेणास्योपयुंजंतिरूपमायुस्तथैवच ११ एतेकालस्यनिधयोनैतान्जानंतिदुर्बुधाः धात्राभिलिखितान्याहुःसर्वभूतानिकर्मणा १२ रथःशरीरंभूतानांसत्व
माहुस्तुसारथिं इंद्रियाणिहयानाहुःकर्मबुद्धिस्तुरश्मयः १३ तेषांहयानांयोवेगंधावतामनुधावति सतुसंसारचक्रेस्मिंश्चक्रवत्परिवर्तते १४ यस्तान्संयम्य
तेवुध्यासंयतोननिवर्तते सतुसंसारचक्रेस्मिन्नचक्रवत्परिवर्तते १५ भ्रममाणानमुह्यंतिसंसारेनभ्रमंतिते संसारेभ्रमतांराजन्दुःखमेतद्धिजायते १६ तस्मा
दस्यनिवृत्त्यर्थंयत्नमेवाचरेद्बुधः उपेक्षानात्रकर्तव्याशतशाखःप्रवर्तते १७ यतेंद्रियोनरोराजन्क्रोधलोभनिराकृतः संतुष्टःसत्यवादीयःसशांतिमधि
गच्छति १८ याम्यानाहूरथंह्येनंमुह्यंतेयेनदुर्बुधाः सचैतत्प्राप्नुयाद्राजन्यत्त्वंप्राप्तोनराधिपः १९ राज्यनाशंसुहृन्नाशंसुतनाशंचभारत अनुतर्षु
लमेवैतद्दुःखंभवतिभारत २० साधुःपरमदुःखानांदुःखभैषज्यमाचरेत् ज्ञानौषधमवाप्येहदूरपारंमहौषधं २१ छिंद्याद्दुःखमहाव्याधिंनरःसंयतमानसः
नविक्रमोनचाप्यर्थोनमित्रंनसुहृज्जनः २२ तथोन्मोचयतेदुःखाद्यथात्मास्थिरसंयमः तस्मान्मैत्रंसमा स्थायशीलमापद्यभारत २४ दमस्त्यागोप्रमादश्चते
त्रयोब्रह्मणोहयाः शीलरश्मिसमायुक्तः स्थितोयोमानसेरथे २५ त्यक्त्वामृत्युभयंराजन्ब्रह्मलोकंसगच्छति अभयंसर्वभूतेभ्योयोददातिमहीपते २६
सगच्छतिपरंस्थानंविष्णोःपरमनामयं नतत्क्रतुसहस्रेणनोपवासैश्चनित्यशः अभयस्यचदानेनयत्फलंप्राप्नुयान्नरः नह्यात्मनः प्रियतरंकिंचिद्भूतेषुनि
श्चितं २८ अनिष्टंसर्वभूतानांमरणंनामभारत तस्मात्सर्वेषुभूतेषुदयाकार्याविपश्चिता २९ नानामोहसमायुक्ताबुद्धिजालेनसंवृताः असूक्ष्मदृष्टयो
मंदाभ्राम्यंतेतत्रतत्रह ३० सुसूक्ष्मदृष्टयोराजन्व्रजंतिब्रह्मशाश्वतं॥ ॥इतिश्रीमहाभारतेविशोकपर्वणिसप्तमोध्यायः ७ वैशंपायनउवाच विदुर
स्यतुतद्वाक्यंनिशम्यकुरुसत्तमः पुत्रशोकाभिसंतप्तः पपातभुविमूर्छितः १ तंतथापतितंभूमौनिःसंज्ञंप्रेक्ष्यबांधवाः कृष्णद्वैपायनश्चैवक्षत्ताचविदुरस्तथा ए८०

स१ न५

५

२ संजयः स्वदेहस्थामेद्वाः सर्पेवाससंमताः जनेनमवशोतेननताल हतैश्च भारत ३ यसमर्थ्युश्चकौरेर्गात्रैवीज्यमानाश्चयत्नतः आश्वासतचिरंकालंधृतराष्ट्रंत
थागंतं ४ अथदीर्घसकालसलब्धसंज्ञोमहीपतिः विललापचिरंकालंपुत्राधिभिरभिप्लुतः ५ धिगस्तुखलुमानुष्यंमानुषेषुपरिग्रहं यतोमूलानिदुःखा
निसंभवंतिमुहुर्मुहुः ६ पुत्रनाशेर्थनाशेचज्ञातिसंबंधिनामथ प्राप्यतेसुमहदुःखंविषाग्निप्रतिमंविभो ७ येनदह्यंतिगात्राणियेनप्रज्ञाविनश्यति येना
भिभूतःपुरुषोमरणंबहुमन्यते ८ तदिदंव्यसनंप्राप्तंमयाभाग्यविपर्ययात् तस्यांतंनाधिगच्छामिऋतेप्राणविमोक्षणात् ९ तथैवाहंकरिष्यामिअद्यैवद्विज
सत्तम इत्युक्त्वातुमहात्मानंपितरंब्रह्मवित्तमं धृतराष्ट्रोभवन्मूढः सशोकंपरमंगतः अभूत्तूष्णींराजासौध्यायमानोमहीपते ११ तस्यतद्वचनंश्रुत्वाकृष्णद्वै
पायनःप्रभुः पुत्रशोकाभिसंतप्तंपुत्रंवचनमब्रवीत् १२ व्यासउवाच धृतराष्ट्रमहाबाहोयत्त्वांवक्ष्यामितच्छृणु श्रुतवानसिमेधावीधर्मार्थकुशलःप्रभो
१३ नतेस्त्यविदितंकिंचिद्वेदितव्यंपरंतप अनित्यतांहिमर्त्यानांविजानासिनसंशयः १४ अध्रुवेजीवलोकेचस्थानेवाशाश्वतेसति जीवितेमरणांतेचक
स्माच्छोचसिभारत १५ प्रत्यक्षंतवराजेंद्रवैरस्यास्यसमुद्भवः पुत्रंतेकारणंकृत्वाकालयोगेनकारितः १६ अवश्यंभवितव्येचकुरूणांवैशसेनृप कस्माच्छो
चसितान्शूरान्गतान्परमिकांगतिम् १७ जानताचमहाबाहोविदुरेणमहात्मना यतितंसर्वयत्नेनशमंप्रतिजनेश्वर १८ नचदैवकृतोमार्गः शक्योभूतेन
केनचित् घटतापिचिरंकालंनियंतुमितिमेमतिः १९ देवतानांहियत्कार्यंमयाप्रत्यक्षतःश्रुतं तत्तेहंसंप्रवक्ष्यामिकथंस्थैर्यंभवेत्तव पुराहंत्वरितो
यातःसभामैंद्रींजितक्लमः अपश्यंतत्रचतदासमवेतान्दिवौकसः नारदप्रमुखाश्चापिसर्वेदेवर्षयोनघ २१ तत्रचापिमयादृष्टापृथिवीपते का
र्यार्थमुपसंप्राप्तादेवतानांसमीपतः २२ उपगम्यतदाधात्रीदेवानाहसमागतान् यत्कार्यंममयुष्माभिर्ब्रह्मणःसदनेतदा २३ प्रतिज्ञातंम
हाभागास्तच्छीघ्रंसंविधीयतां तस्यास्तद्वचनंश्रुत्वाविष्णुर्लोकनमस्कृतः २४ उवाचवाक्यंप्रहसन्पृथिवींदेवसंसदि धृतराष्ट्रस्यपुत्राणांयस्तुज्येष्ठःशत

व६

पृथिवी ३

वि०
६

सर्वे २५ दुर्योधन इति ख्यातः स ते कार्यं करिष्यति तं च प्राप्य महीपालं कृतकृत्या भविष्यसि २६ तस्यार्थे पृथिवीपालाः कुरुक्षेत्रे समागताः अन्यो
न्यं घातयिष्यन्ति दृढैः शस्त्रैः प्रहारिणः २७ ततस्ते विदितं देवि भारस्य युधि नाशनं गच्छ शीघ्रं स्वकं स्थानं लोकान्धारय शोभने २८ य एष ते सुतो रा
जन् लोकसंहारकारणात् कलेरंशः समुत्पन्नो गांधार्या जठरे नृप २९ अमर्षी चपलश्चापि क्रोधनो दुःप्रसाधनः दैवयोगात्समुत्पन्ना भ्रातर
श्चास्य तादृशाः ३० शकुनिर्मातुलश्चैव कर्णश्च परमः सखा समुत्पन्ना विनाशार्थं पृथिव्यां सहिता नृप ३१ यादृशो जायते राजा तादृशो
स्तु तनो भवेत् अधर्मो धर्मतां याति स्वामी चेद्धार्मिको भवेत् ३२ स्वामिनो गुणदोषाभ्यां भृत्याः स्युर्नात्र संशयः दुष्टराजानमासाद्य गतास्ते तनया
न्नृप ३३ एतमर्थं महाबाहो नारदो वेदतत्ववित् आत्मापराधात्ते विनष्टाः पृथिवीपते ३४ मा तात शोचस्व राजेंद्र न हि शोकेस्ति कारणं न
हि ते पांडवाः स्वल्पमपराध्यंति भारत ३५ पुत्रास्तव दुरात्मानो यैरियं घातिता मही नारदेन च भद्रं ते पूर्वमेव न संशयः ३६ युधिष्ठिरस्य समितौ रा
जसूये निवेदितं पांडवाः कौरवाः सर्वे समासाद्य परस्परं ३७ न भविष्यंति कौंतेय यत्ते कृत्यं तदाचर नारदस्य वचः श्रुत्वा तदाशोचंत पांडवाः ३८ ए
वं ते सर्वमाख्यातं देवगुह्यं सनातनं कथं ते शोकनाशः स्यात्प्राणेषु च दयाप्रभो ३९ स्नेहश्च पांडुपुत्रेषु ज्ञात्वा दैवकृतं विधिं एष चार्थो महाबाहो पू
र्वमेव मया श्रुतः ४० कथितो धर्मराजस्य राजसूये क्रतूत्तमे पतितं धर्मपुत्रेण मया गुह्यं निवेदिते ४१ अविग्रहे कौरवाणां दैवं तु बलवत्तरं अनति
क्रमणीयो हि विधी राजन्न कथंचन ४२ कृतांतस्य तु भक्तेन स्थावरेण चलेन च भवान्धर्मपरो यत्र बुद्धिश्रेष्ठश्च भारत ४३ मुह्यते प्राणिनां ज्ञात्वा ग
तिं चागतिमेव च त्वां तु शोकेन संतप्तं मुह्यमानं मुहुर्मुहुः ४४ ज्ञात्वा युधिष्ठिरो राजा प्राणानपि परित्यजेत् कृपालुर्नित्यशो वीरस्तिर्यग्योनिगतेष्वपि ४५
स कथं तव राजेंद्र कृपां वै न करिष्यति मम चैव नियोगेन विधेश्चाप्यनिवर्तनात् ४६ पांडवानां च कारुण्यात्प्राणान्धारय भारत एवं ते वर्तमानस्य लो

राम
६

© (Dharmartha Trust J&K) Digitized By eGangotri

वी॰ ७

केकीर्न्निर्भविष्यति ४७ धर्मार्थः समहांस्तात तसंयाच्चतपस्विराज पुत्रशोकंसमुत्पन्नंहन्ताशं ज्वलितंयथा ४८ पुत्रांभ्रमामहाभाग निर्वापय सदा सदा
वैशंपायनउवाच तच्छ्रुत्वातस्यवचनंव्यासस्यामिततेजसः मुहूर्त्तंसमनुध्यायधृतराष्ट्रोऽभ्यभाषत ४९ महताशोकजालेनप्रणुन्नोऽस्मिद्विजोत्तम
नात्मानमवबुध्यामिमुह्यमानोमुहुर्मुहुः ५० इदंतुवचनंश्रुत्वातवदैवनियोगजं धारयिष्याम्यहंप्राणान्घटिष्येनतुशोचितुं ५१ एतच्छ्रुत्वातुवचनं
व्यासःसत्यवतीसुतः धृत॰राष्ट्रस्यराजेंद्र तत्रैवांतरधीयत ५२ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांविशोकपर्वसमासेः अष्टमो
ध्यायः ८ अस्मात्संधौस्त्रीपर्वभविष्यतितस्यायमाद्यः श्लोकः जन्मेजयउवाच गतेभगवतिव्यासेधृतराष्ट्रोमहीपतिः किमचेष्टतविप्रर्षेतन्मेव्याख्या
तुमर्हसि १ श्रीरामायनम॥ ॥श्रीवीश्वेश्वरायनम॥ ॥ ॥ ॥ ७

एम ७

CC-0. Dhamma Trust J&K. Digitized by eGangotri

[illegible]

लोकनीतिकि श्रोन पर्व।

विशोकपर्व

धनखाध्य
नना १

© Dharmartha Trust J&K. Digitized by eGangotri

सौप्तिक

© Dharmartha Trust J&K. Digitized By eGangotri

© Dharmarth Trust J&K Digitized By eGangotri

© Dharmartha Trust J&K Digitized by eGangotri

सौ॰टी॰ १ श्रीगणेशायनमः पूर्वस्मिन्पर्वणि अर्थोर्थी कुटुंबनाशमनुस्वयमपिनश्यतीत्युक्तं इदानींपरमधर्मानुगोब्राह्मणः तद्धर्मस्त्यागी निंद्यतमं कर्म करोतीत्युच्यते ततस्तेसहिता
वीराः इत्यादिना सौप्तिकपर्वणि ततः दुर्योधनेनसेनापत्येऽश्वत्थाम्नोभिषेकानंतरंते अश्वत्थामकृपाचार्यकृतवर्माणः शिबिराभ्याशं शिबिरनिकटस्थं देशं आसाद्यवाहान्

श्रीगणेशायनम नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ संजयउवाच ततेतेसहितावीराः प्रया
ताद्दक्षिणामुखाः उपास्तमनवेलायांशिबिराभ्याशमागताः १ विमुच्यवाहांस्त्वरिताभीताः समभवंस्तदा गहनंदेशमासाद्यप्रच्छन्ना
मविशंतते २ सेनानिवेशमभितोनातिदूरमवस्थिताः निकृत्तानिशितैः शस्त्रैः समंतात्क्षतविक्षताः ३ दीर्घमुष्णंनिश्वसपांडवा ५३
नेवचिंतयन् श्रुत्वाचनिनदंघोरंपांडवानांजयैषिणां ४ अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन्पुनः तेमुहूर्तात्ततोगत्वाश्रांतवा
हाः पिपासिताः ५ नामृष्यंतमहेष्वासाः क्रोधामर्षवशंगताः राज्ञोवधेनसंतप्तामुहूर्तंसमवस्थिताः ६ ॥

विमुच्यन्यविशंतेतियोजना १ ४ प्राद्रवन्नितिपुनर्वाहाश्रमोऽपिस्त्वेतिगम्यते ५ नामृष्यंतपिपासामपिनयराम्रश्ववंतः राज्ञोदुर्योधनस्य ६ ६ ६ ६ ग॰म॰ १

७ ८ ९ १० ११

धृतराष्ट्रउवाच अश्रद्धेयमिदंकर्मकृतंभीमेनसंजय यन्नागायुतप्राणाः पुत्रोममनिपातितः ७ अवध्यः सर्वभूतानांवज्रसंहननोयुवा
पांडवैः समरेपुत्रोनिहतोममसंजय ८ नदिष्टमभ्यतिक्रांतुंशक्यंगावल्गणेनरैः यन्नमेत्यरणेपार्थैः पुत्रोममनिपातितः ९ अद्रिसारमयंनूनं
हृदयंममसंजय हतंपुत्रशतंश्रुत्वायन्नदीर्णंसहस्रधा १० कथंहिवृद्धमिथुनंहतपुत्रंभविष्यति नह्यहंपांडवेयस्यविषयेवस्तुमुत्सहे ११
कथंराज्ञः पिताभूत्वास्वयंराजाचसंजय प्रेष्यभूतः प्रवर्तेयंपांडवेयस्यशासनात् १२ आज्ञाप्यपृथिवींसर्वांस्थित्वामूर्ध्निसंजय येनपु
त्रशतंपूर्णमेकेननिहतंमम १३ कृतंसत्यंवचस्तस्यविदुरस्यमहात्मनः अकुर्वताचवचस्तेनममपुत्रेणसंजय १४ कथंसभविष्यामि
ष्यभूतोदुरंतकृत् कथंभीमस्यवाक्यानिश्रोतुंशक्ष्यामिसंजय १५ अधर्मेणहतेतातपुत्रेदुर्योधनेमम कृतवर्माकृपोद्रोणिः कि
मकुर्वतसंजय १६ संजयउवाच गत्वातुतावकाराजन्नातिदूरमवस्थिताः अपश्यंतवनंघोरंनानाद्रुमलताकृतं १७ तेमुहूर्तंतुविश्रम्य
लब्धतोयैर्हयोत्तमैः सूर्यास्तमनवेलायांसमासेदुर्महद्वनं १८ नानामृगगणैर्जुष्टंनानापक्षिगणावृतं नानाद्रुमलताच्छन्नंनानाव्यालनि
षेवितं १९ नानातोयैः समाकीर्णंनानापुष्पोपशोभितं पद्मिनीशतसंछन्नंनीलोत्पलसमायुतं २० प्रविश्यतद्वनंघोरंवीक्षमाणाः
समंततः शाखासहस्रसंछन्नंन्यग्रोधंददृशुस्ततः २१ २२ ॥ ॥ ॥ ॥ ॥

म

© Dharmartha Trust J&K. Digitized by eGangotri

सौ॰टी॰
२

अन्वासतप्यासितवंतः २३ अलंकृतंरजतविंदुचित्रितंश्चांशुकंवस्त्रं २५ ३१ शयनोयेतौप्राप्तितिशेषः ३२ ३५ ॥ ॥ ७

उपेतास्तत्रराजेन्द्रन्यग्रोधंतेमहारथाः ददृशुर्द्विपदांश्रेष्ठाः श्रेष्ठंतंवैवनस्पतिं २२ तेवतीर्यरथेभ्यस्तुविप्रमुच्यचवाजिनः उपस्पृश्ययथान्या
यंसंध्यामन्वासतप्रभो २३ ततोस्तंपर्वतश्रेष्ठमनुप्राप्तेदिवाकरे सर्वस्यजगतोधात्रीशर्वरीसमपद्यत २४ ग्रहनक्षत्रताराभिः संपूर्णाभि
रलंकृतं नभोंशुकमिवाभातिप्रेक्षणीयंसमंततः २५ इच्छयातेप्रवल्गंतियेसत्त्वारात्रिचारिणः दिवाचराश्चयेसत्त्वास्तेनिद्रावशमागताः
२६ रात्रिंचराणांसत्त्वानां निर्घोषोभूत्सुदारुणः क्रव्यादाश्चप्रमुदिताघोराप्रासाचशर्वरी २७ तस्मिन्रात्रिमुखेघोरेदुःखशोकसम
न्विताः कृतवर्माकृपोद्रोणिरुपोपविविशुःसमं २८ तत्रोपविष्टाःशोचंतोन्यग्रोधस्यसमीपतः तमेवार्थमतिक्रांतंकुरुपांडवयोःक्ष
यं २९ निद्रयाचपरीतांगानिषेदुर्धरणीतले श्रमेणसुदृढंयुक्ताविक्षताविविधैःशरैः ३० ततोनिद्रावशंप्राप्तौकृपभोजौमहारथौ सुखो
चितावदुःखार्हौनिषण्णौधरणीतले ३१ तौतुसुप्तौमहाराजश्रमशोकसमाचितौ महार्हशयनोपेतौभूमावेवह्यनाथवत् ३२ क्रोधामर्ष
वशंप्राप्तोद्रोणपुत्रस्तुभारत नैवस्मसजगामाथनिद्रांसर्पइवश्वसन् ३३ नलेभेसतुनिद्रांवैदह्यमानोहिमन्युना वीक्षांचक्रेमहाबा
हुस्तद्वनंघोरदर्शनं ३४ वीक्षमाणोवनोद्देशंनानासत्त्वैर्निषेवितं अपश्यतमहाबाहुर्न्यग्रोधंवायसैर्युतं ३५ ॥ ॥

राप॰
२

© Dharmartha Trust J&K Digitized By eGangotri

पर्यणामयन्परिणीतवंतश्चासन ३६ ३७ हर्यक्षंहरिन्मणिनिभलोचनं घोणानासा नखरः तीक्ष्णानखः ३८ ४३ सोपधंसकपटं ४४ तद्भावेकपटभावेन

तत्रकाकसहस्राणितांनिशांपर्यणामयन् सखंस्वपंतिकौरव्यपृथक्पृथग्गुहाश्रयाः ३६ सुप्तेषुतेषुकाकेषुविस्रब्धेषुसमंततः सोपश्यत्सहसायांतमुलूकंघोरदर्शनं ३७ महास्वनंमहाकायंहर्यक्षंबभ्रुपिंगलं सुदीर्घघोणानखरंसुपर्णमिववेगिनं ३८ सोथशब्दंमृदुंकृत्वालीयमानइवांडजः न्यग्रोधस्यततः शाखांप्रार्थयामासभारत ३९ सनिपत्यतुशाखायांन्यग्रोधस्यविहंगमः सुप्ताञ्जघानसुबहून्वायसान्वायसांतकः ४० केषांचिदच्छिनत्पक्षान्शिरांसिचचकर्तह चरणांश्चैवकेषांचिद्बभंजचरणायुधः ४१ क्षणेनाहन्सबलवान्येस्यदृष्टिपथेस्थिताः तेषांशरीरावयवैः शरीरैश्चविशांपते न्यग्रोधमंडलंसर्वंसंछन्नंसर्वतोभवत् तांस्तुहत्वाततः काकान्कौशिकोमुदितोभवत् ४३ प्रतिकृत्ययथाकामंशत्रूणांशत्रुसूदनः तद्दृष्ट्वासोपधंकर्मकौशिकेनकृतंनिशि ४४ तद्भावेकृतसंकल्पोद्रौणिरेकोन्वचिंतयत् उपदेशः कृतोनेनपक्षिणाममसंयुगे ४५ शत्रूणांक्षपणेयुक्तः प्राप्तकालश्चमेततःना द्यशक्यामयाहंतुंपांडवाजितकाशिनः ४६ बलवंतः कृतोत्साहाः प्राप्तलक्षाः प्रहारिणः राज्ञः सकाशात्तेषांतुप्रतिज्ञातोवधोमया ४७

परेशइति दुर्जनाचरितंमार्गंप्रमाणंकुर्वतेखलाः विश्वस्तानहिंसितुंद्रौणिरुलूकमरोहुरुं ४५ ४७ ॥ ॥ १ ॥ ६०

© Dharmartha Trust J&K. Digitized by eGangotri

सौ० टी०
३

४८ ५० ५२ ५५ ५८ ६०

पतंगाग्निसमांहन्निमास्थायात्मविनाशिनीं त्वापत्तौयुध्यमानस्यप्राणत्यागोनसंशयः ४८ छद्मनाचभवेत्सिद्धिः शत्रूणांचक्षयोम
हान् ततः संशपितादर्थाद्घोरोर्थोनिः संशयोभवेत् ४९ तंजनावहुमंनंतेयेचशास्त्रविशारदाः यच्चाप्यत्रभवेद्धाकांगर्हितंलोकनिं
दितं ५० कर्तव्यंतन्मनुष्येणक्षत्रधर्मेणवर्त्तता निंदितानिचसर्वाणिकुत्सितानिपदेपदे ५१ सोपधानिकृतान्येवपांडवैरकृतात्म
भिः अस्मिन्नर्थेपुरागीताः श्रूयंतेधर्मचिंतकैः ५२ श्लोकः न्यायमवेक्षद्भिस्तत्त्वार्थास्तत्त्वदर्शिभिः परिश्रांतेविदीर्णेवाभुंजानेवा
पिशत्रुभिः ५३ प्रस्थानेवाप्रवेशेवाप्रहर्त्तव्यंरिपोर्वलं निद्रार्त्तमर्धरात्रेचतथानष्टप्रणायकं ५४ भिन्नयोधंवलंयच्चद्विधायुक्तंच
यद्भवेत् इत्येवंनिश्चयंचक्रेसुप्तानांयुधिमारणे ५५ पांडूनांसहपांचालैर्द्रोणपुत्रः प्रतापवान् सक्रूरांमतिमास्थायविनिश्चित्य
मुहुर्मुहुः ५६ ससौप्तावबोधयत्तौतमातुलंभोजमेवच तौप्रवुद्धौमहात्मानौकृपभोजौमहावलौ ५७ नोत्तरंप्रतिपद्येतांतत्रयुक्तं
ह्रियावृतौ समुहूर्त्तमिवध्यात्वावाष्पविह्वलमव्रवीत् ५८ हतोदुर्योधनोराजाएकवीरोमहावलः यस्यार्थेवैरमस्माभिरासक्तं
पांडवैः सह ५९ एकाकीवहुभिः क्षुद्रैराहवेशुद्धविक्रमः पातितोभीमसेनेनएकादशचमूपतिः ६० ॥ ॥

एम०
३

© Dharmartha Trust J&K. Digitized By eGangotri

६१ ६९ प्रथमः श्रुतंते १ दैवेष्वाससमंतात्ववद्धः पुरुषकारेनिहीनतयावस्थाः तेनदैवंप्रधानंपुरुषाकारउपसर्जनमित्युक्तंभवति ३

वृकोदरेणाक्षुद्रेणास्त्रशंसमिदंकृतं मूर्धाभिषिक्तस्यशिरःपादेनपरिमृद्गता ६१ विनर्दंतिचपांचालाः क्ष्वेलंतिचहसंतिच धमंतिशं
खान्शतशोहृष्टाघ्नंतिचदुंदुभीन् ६२ वादित्रघोषस्तुमुलोवि॰ मिश्रः शंखनिःस्वनैः अनिलेनेरितोघोरोदिशःपूरयतीवह ६३
अश्वानांहेषमाणानांगजानांचैवबृंहतां सिंहनादश्चशूराणांश्रूयतेसुमहानयं ६४ दिशंप्राचींसमाश्रित्यहृष्टानांगच्छतांभृशं र
थनेमिस्वनाश्चैवश्रूयंतेलोमहर्षणाः ६५ पांडवैर्धार्तराष्ट्राणांयदिदंकदनंकृतं वयमेवत्रयःशिष्टास्तस्मिन्महतिवैशसे ६६ केचि
न्नागशतप्राणाः केचित्सर्वास्त्रकोविदाः निहताः पांडवेयैस्तेमन्येकालस्यपर्ययं ६७ एवमेतेनभाव्यंहिनूनंकार्येणतत्त्वतः यथा
ह्यस्येदृशीनिष्ठाकृताकार्येपिदुष्करे ६८ भवतोस्तुयदिप्रज्ञानमोहादपनीयते आपन्नेस्मिन्महत्यर्थेयन्नःश्रेयस्तदुच्यतां ६९
इतिसौप्तिकेपर्वणि कृपउवाच श्रुतंतेवचनंसर्वंयद्यदुक्तंत्वयाविभो ममापितुवचःकिंचिच्छृणुष्वाद्यमहाभुज १ आवद्धामानुषाः
सर्वेनिवद्धाःकर्मणोर्द्वयोः दैवेपुरुषकारेचपरंताभ्यांनविद्यते २ नहिदैवेनसिध्यंतिकार्याण्येकेनसत्तम नचापिकर्मणैकेनद्वाभ्यां
सिद्धिस्तुयोगतः ३ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सौ०टी०
४

४ वर्षन्न किंफलं न साधयते ऽपि तु साधयत्येव कृषिं विनापि वनेचराः केवलं पर्जन्येन जीवंति न तु कृषीवलाः केवलया कृष्या जीवंति एवं पुरुषकारो दैवमपेक्ष्य दैवं तु नातीव पुरुष कारापेक्षमिति भावः ५ एतदेवाह उत्थानमिति दैवस्य दैवप्रधानस्य उत्थानं पुरुषाकारो व्यर्थं भवंति तथा ऽनुत्थानं दैवमपि व्यर्थमिति पक्षद्वयं सर्वत्र वाचस्पतिं तत्र पूर्वे एव पक्षं नेपा

अस्पर्वि० ति २

ताभ्यामुभाभ्यां सर्वार्था निबद्धा अधमोत्तमाः प्रवृत्ताश्चैव दृश्यंते निवृत्ताश्चैव सर्वशः ४ पर्जन्यः पर्वते वर्षन् किं न साधयते फलं ५ कृष्टे क्षेत्रे तथा वर्षन् किं न साधयते फलं ५ उत्थानं चापि दैवस्य ह्यनुत्थानं च दैवतं व्यर्थं भवति सर्वत्र तत्र विग्रहः ६ सवृष्टे च यथा देवे सम्यक् क्षेत्रे च कर्षिते वीजं महागुणं भूयात्तथा सिद्धिर्हि मानुषी ७ तयोर्दैवं विनिश्चित्य स्ववशं चैव प्रवर्तते प्राज्ञाः पुरुषकारेषु वर्तंते दाक्ष्यमाश्रिताः ८ ताभ्यां सर्वे हि कार्यार्था मनुष्याणां नरर्षभ विचेष्टंतः स्म दृश्यंते निवृत्ताः स्म तथैव च ९ कृतः पुरुषकारस्तु सोपि दैवेन सिध्यति तथास्य कर्मणः कर्तुरभिनिर्वर्तते फलं १० उत्थानं च मनुष्याणां दक्षाणां दैववर्जितं अफलं दृश्यते लोके सम्यगप्युपपादितं ११ तत्रालसा मनुष्याणां ये भवंत्यमनस्विनः उत्थानं ते विगर्हंति प्राज्ञानां तन्न रोचते १२ ॥ ॥ ॥

निसर्थः ६ द्वयोरनुकूल्यं श्रेयानित्यर्थः ६ द्वयोरनुकूल्यं श्रेष्ठतरमित्याह सवृष्टइति ७ दैवं बलवदिति शेषः ततः स्वयमपि पुरुषकारं विनापि प्रवर्तते फलं स्वतमिति शेषः नहि किं पुरुषकारेणेत्याशंक्याह प्राज्ञा इति पुरुषापराध निर्वृत्तिमात्रं तत्फलमित्यर्थः ८ विचेष्टंतः प्रवृत्ताः दृश्यते लोक इष्येत्यर्थः १२ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मण्यकृत्वा दुःखं यश्पेदित्यपि पापशोऽस्ति १३ दुःखं दर्शो दुर्बलौ चेष्टावान्न लभते निश्चेष्टो न लभत इत्युक्तमर्थमात्रमित्यर्थः १४ १५ यदीति दक्षो निंघतां न यातीति भावः १६
अदक्षः कृपरश्च यत्नाज्जितेन जीवनं पिभाक्तुमेवायं समर्थो नान्यत्र पितमिति निंघत इत्याहाकृत्वेति १७ एततदैवदाक्ष्ययोः साहित्यं अन्यथा तयोरन्यतरालंबनेन १८ एतदेव स्पष्टयति

पापशो हि कृतं कर्म नाफलं दृश्यते भुवि अकृत्वा च पुनर्दुःखं कर्म पश्येन्महाफलं १३ चेष्टामकुर्वंल्लभते यदि किंचिद्यदृच्छया यो वा
नलभते कृत्वा दुर्दर्शौ तावुभावपि १४ शक्नोति जीवितुं दक्षो नालसः सुखमेधते दृश्यंते जीवलोकेऽस्मिन् दक्षाः प्रायो हितैषिणः
१५ यदि दक्षः समारंभात्कर्मणो नाश्नुते फलं नास्य वाच्यं भवेत्किंचित्तद्ध्यवसायं नाधिगच्छति १६ अकृत्वा कर्म यो लोके फलं विंदति
धिष्ठितः स तु वक्तव्यतां याति द्वेष्यो भवति भूपसां १७ एवमेतदनादृत्य वर्तते यस्त्वतोऽन्यथा स करोत्यात्मनोऽनर्थान्नैष बुद्धिमतां
नयः १८ हीनं पुरुषकारेण यद्यदैवेन वा पुनः कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत् १९ हीनं पुरुषकारेण कर्म त्वि
ह न सिध्यति दैवतेभ्यो नमस्कृत्य यस्त्वर्थान्सम्यगीहते २० दक्षो दाक्षिण्यसंपन्नो न स मोघैर्विहन्यते सम्यगीहा पुनरियं यो वृद्धानु
२२ पसेवते २१ २२ ॥ ॥ ॥ ॥ ॥ ॥

हीनमिति पुरुषकारेण हीनं दैवं स्यात् अनयोः अफलं तद्वदैवहीनं पुरुषस्य वा स्योत्थानमपि तस्मात्ताभ्यामप्युत्थानमित्यर्थः १९ कर्मदैवं फलतीत्याह दैवतेभ्य इति २० ईहां
विहन्यतीति सम्यगिति २१ श्रीरामचंद्राय नमः॥ ॥ ॥ ॥ ॥ ॥

© Dhamartha Trust J&K. Digitized by eGangotri

सौ०री०
५

२६ योगेस्मलब्धलाभे २३ अनीशः अजितचित्तः अवमानीपरमवज्ञानन २५ २६ २७ नयतिसंतापंप्राप्नोतिश्रीमेनभग्नोरुः सन् ३२ ३१ ३३

धा६२

आशङ्क्यनिश्चयप्लेपःकरोतिचहितंवचः उत्थायोत्थायहिसदापथ्याहृष्टसंमनाः २२ नेस्मयोगेपरंमूलंतन्मूलासिद्धिरुच्यते वृद्धानांच
वचनंश्रुत्वायोभ्युत्थानंप्रयोजयेत् २३ उत्थानस्यफलंसम्यक्तदासलभतेचिरात् रागात्क्रौर्याद्वामोहाद्योर्थान्निहन्तिमानवः २४ अनीश
श्चावमानीचसशीघ्रंभ्रश्यतेश्रियः सोयंदुर्योधनेनार्थोलुब्धेनादीर्घदर्शिना २५ असमर्थः समारब्धोमरुत्वाद्विचिंतितः हितवुद्धीना
हृत्यसंमंत्र्यासाधुभिः सह २६ वार्यमाणोकरोद्वैरंपांडवैर्गुणवत्तरैः पूर्वमप्यनिरुःशीलोनधैर्यंकर्तुमर्हति २७ नयत्यथैवियंनेहिमि
त्राणांनकरोतिवचः अनुवर्तामिहेयत्तुनर्यपापप्रवृत्तये २८ अस्मानप्यनयस्तस्मात्त्वासीयंदारुणोमहान् २९ अनेनतत्समाधापिचसने
नोपनापिताः २९ वुद्धिश्चिन्तयतः किंचित्स्वंश्रेयोनाववुध्यते मुत्यनात्तुमनुष्येणपथ्याः सन्दर्होजनाः ३० नत्रास्यवुद्धिर्विनयत्त
त्वश्रेयश्चप्रपश्यति ततोसमूलंकार्याणांवुध्यानिश्चित्यचैववुधाः ३१ तेत्रपृष्ठाययायूप्रस्तात्कर्तव्यंतथाभवेत् नैवपंथश्चराष्ट्रंचगांधारीचतत्
मेत्यह ३२ उपपृष्टामहेगत्वाविदुरंचमहामतिं तेपृष्टात्कचदेयुर्यच्छ्रेयोनः समनंतरं ३३ ॥ ॥ ॥ ॥

३२ २२ ३२ १

रा०
५

© Dharmartha Trust J&K. Digitized by eGangotri

३४ ३५ कृपस्य १ २ ३ सर्वोत्मानं ४ ५ योगेसमुद्यये ६ ७ ८ ९ १० ॥ ॥ ७

तदस्माभिः पुनः कार्यमितिमेनैष्ठिकीमतिः अनारंभात्तुकार्याणांनार्थः संपद्यतेक्वचित् ३४ कृतेपुरुषकारेतयेषांकार्यंनसिध्यति
दैवेनोपहतास्तेनात्रकार्याविचारणा ३५ सौप्तिकेपर्वणि संजयउवाच कृपस्यवचनंश्रुत्वाधर्मार्थसहितंशुभं अश्वत्थामामहा
राजदुःखशोकसमन्वितः १ दह्यमानस्तुशोकेनप्रदीप्तेनाग्निनायथा क्रूरंमनस्ततःकृत्वातावुभौप्रत्यभाषत २ पुरुषेपुरुषेबुद्धिर्या
याभवतिशोभना तुष्यंतिचपृथक्सर्वेप्रज्ञयातेस्वयास्वया ३ सर्वोहिमन्यतेलोकआत्मानंबुद्धिमत्तरं सर्वस्यात्मावहुमतःसर्वोत्मानं
प्रशंसति ४ सर्वस्यहिस्वकाप्रज्ञासाधुवादेप्रतिष्ठिता परबुद्धिंचनिंदंतिस्वांप्रशंसंतिचासकृत् ५ कारणांतरयोगेनयोगेयेषांसमा
गतिः अन्योन्येनचतुष्यंतिवहुमन्यंतिचासकृत् ६ तस्यैवतुमनुष्यस्यसासाबुद्धिस्तदातदा कालयोगेविपर्यासंप्राप्यान्योन्यंविपद्यते
७ विचित्रत्वात्तुचित्तानांमनुष्याणांविशेषतः चित्तवैकल्यमासाद्यसासाबुद्धिःप्रजायते ८ यथाहिवैद्यःकुशलोज्ञात्वाव्याधिंयथा
विधि भेषजंकुरुतेयोगात्प्रशमार्थमितिप्रभो ९ एवंकार्यस्ययोगार्थंबुद्धिंकुर्वंतिमानवाः प्रज्ञयाहिस्वयायुक्तास्तांचनिंदंतिमानवाः १०

ग१

© Dharmartha Trust J&K. Digitized by eGangotri

सी०टी०

६

११ हेभोजहे कृतवर्मन् एकमेवसंबोधयन्नपसवचसित्र्यनादरंसूचयति १२ अकृतधर्मत्वात् अव सरोधा दिदानीममशांतिबुद्धिर्रोचतेइत्यर्थः १३ १४ २१ वि

अमयायौवनेमत्त्याबुध्याभवतिमोहितः मध्येमयाजरायांतसोन्यांरोचयतेमतिं ११ वसंतवामहाघोरंसमृद्धिवापितामही अवाप्य
पुरुषोभोजकुरुतेबुद्धिवैकृतं १२ एकस्मिन्नेवपुरुषेसासाबुद्धिस्तदातदा भवत्यकृतधर्मत्वात्तस्मात्सैवनरोचते १३ निश्चित्यमत
यथाप्रज्ञयांमतिंसाधुपश्यति तथाप्रकुरुतेभावंसातस्योद्योगकारिका १४ सर्वोहिपुरुषोभोजसाध्वेतदितिनिश्चितः क
र्तुमारभतेप्रीतोमरणादिषुकर्मसु १५ सर्वेहिबुद्धिमाज्ञायप्रज्ञांवापित्वकांनराः चेष्टंतेविधांचेष्टांहितमित्येवजानते १६ ३१
ज्ञातावसनत्रायेयमघमतिर्मम प्रुवयोस्तांप्रवक्ष्यामिममशोकविनाशिनीं १७ प्रजापतिः प्रजाः सृष्ट्वाकर्मतासुविधापच
वर्णांवर्णेसमाधत्तस्थेकैकंगुणभाग्गुणं १८ ब्राह्मणोवेदमग्र्यंतुक्षत्रियेतेजउत्तमं दाक्ष्यंवैश्येपवशूद्रेत्वसर्ववर्णानुकूलता १९
अवेदंतोब्राह्मणोसाधुर्निस्तेजाः क्षत्रियोधमः अदक्षोनिंद्यतेवैश्यःशूद्रश्चप्रतिकूलवान् २० सोऽस्मिजातःकुलेश्रेष्ठेब्राह्मणा
नांसुपूजिते मंदभाग्यतयास्म्येतंक्षत्रधर्ममनुष्ठितः २१ क्षत्रधर्मंविदित्वाहंयदिब्राह्मणपमाश्रितः प्रकुर्यांसमहत्कर्मनमेतत्साधु
सम्मतं २२ ॥ ॥ ॥ ॥ ॥

दित्वाआश्रित्ययदिब्राह्मणपंसंश्रितः सन्शमादिरूपंस्वमहत्कर्मप्रकुर्यातन्नमेसाधुसंमतंनअवलंवितस्यचक्षत्रधर्मस्यानिर्वाहोवश्यंकर्त्तव्यइत्यर्थः २२ ॥ ॥ राम०

६

© Dharmartha Trust J&K. Digitized By eGangotri

२३ गंतास्मिगमिष्यामि यदवीराजनर्षभ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३५ ॥ ॥ ॥ ॥ ॥

धारयंश्चधनुर्दिव्यंदिव्यान्यस्त्राणिचाहवे पितरंनिहतंदृष्ट्वाकिंनवक्ष्यामिसंसदि २३ सोहमद्ययथाकामंक्षत्रधर्ममुपास्यतु गंतास्मि
पदवीराज्ञः पितुश्चापिमहात्मनः २४ अद्यस्वप्स्यंतिपांचालाविश्वस्ताजितकाशिनः विमुक्तयुग्मकवचाहर्षेणचसमन्विताः २५
जयंमत्वात्मनश्चैवश्रांताव्यायामकर्षिताः तेषांनिशिप्रसुप्तानांस्वस्थानांशिबिरेस्वके २६ अवस्कंदंकरिष्यामिशिबिरस्याद्यदुष्क
रं तानवस्कंद्यशिबिरेप्रेतभूतान्विचेतसः २७ सूदयिष्यामिविक्रम्यमघवानिवदानवान् अद्यतान्सहितान्सर्वान्धृष्टद्युम्नपुरोग
मान् २८ सूदयिष्यामिविक्रम्यकक्षंदीप्तइवानलः निहत्यचैवपांचालान्शांतिंलब्धास्मिसत्तम २९ पांचालेषुभविष्यामिसू
दयन्नद्यसंयुगे पिनाकपाणिःसंक्रुद्धःस्वयंरुद्रःपशुष्विव ३० अद्याहंसर्वपांचालान्निहत्यचनिकृत्यच अर्दयिष्यामिसंहृष्टोरणे
पांडुसुतांस्तथा ३१ अद्याहंसर्वपांचालैःकृत्वाभूमिंशरीरिणीं प्रहृत्यैकैकशस्तेषुभविष्याम्यनृणःपितुः ३२ दुर्योधनस्यकर्ण
स्यभीष्मसैंधवयोरपि गमयिष्यामिपांचालान्पदवीमद्यदुर्गमां ३३ अद्यपांचालराजस्यधृष्टद्युम्नस्यवैनिशि नचिरात्प्रमथिष्या
मियशोविशिरोबलात् ३४ अद्यपांचालपांडूनांशयितानात्मजान्निशि खड्गेननिशितेनाजौप्रमथिष्यामिगौतम ३५ ॥

© (Oh) Dharmarth Trust J&K Digitized By eGangotri

सौ०टी०
७

३६ तृतीयः दिष्ट्या १ २ निहंता निहनिष्यसि ४ ५ ६ ७ ८ ९ १० ११

अथ पांचालसेनां तां निहत्य निशि सौप्तिके कृतकृत्यः सुखी चैव भविष्यामि महामते ३६ इति महाभारते सौप्तिके पर्वणि कृप उवा
च दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत न त्वां वारयितुं शक्तो वज्रपाणिरपि स्वयं १ अनुयास्यावहे त्वां तु प्रभाते सहितावुभौ अ
द्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः २ अहं त्वामनुयास्यामि कृतवर्मा च सात्वतः परान् अभिमुखं यांतं रथावास्थाय दंशितौ ३ आ
वाभ्यां सहितः शत्रून् श्वो निहंता समागमे विक्रम्य रथिनां श्रेष्ठ पांचालान् सपदानुगान् ४ शक्तस्त्वमसि विक्रम्य विश्रमस्व निशामिमां
चिरं ते जाग्रतस्तात स्वप तावन्निशामिमां ५ विश्रांतश्च विनिद्रश्च स्वस्थचित्तश्च मानद समेत्य समरे शत्रून् वधिष्यसि न संशयः ६ न हि
त्वां रथिनां श्रेष्ठं प्रगृहीतवरायुधं जेतुमुत्सहते कश्चिदपि देवेषु वासवः ७ कृपेण सहितं यांतं गुप्तं च कृतवर्मणा को द्रौणिं युधि संरब्धं यो
धयेदपि देवराट् ८ ते वयं निशि विश्रांता विनिद्रा विगतज्वराः प्रभातायां रजन्यां वै निहनिष्याम शात्रवान् ९ तव ह्यस्त्राणि दिव्यानि मम चैव न
संशयः सात्वतोपि महेष्वासो नित्यं युद्धेषु कोविदः १० ते वयं सहितास्तात सर्वान् शत्रून् समागतान् प्रसह्य समरे हत्वा प्रीतिं प्राप्स्या
विश्रांता र मः पुष्कलां ११ ॥ ॥ ॥ ॥

एम०
७

© Dharmartha Trust J&K. Digitized By eGangotri

१५ २१ चतुर्थ्यामातरादीनां वर्त्तनीनां मध्ये एको भागः अमर्षः मे मम सर्वमन्यक्काय दिवसाय पत्तटिनिवा नाशयेत् तस्मात् त्वये अन्युक्तं तन्न युज्यते अनुस्मरन् अनुस्मरतः न

विश्रमस्व सुखं मध्ययः स्वपचेमां निशां सुखं अहं वक्ष्यन्तवर्मा वत्सा प्रयांतं नरोत्तमं १२ अनुयास्याव सहितौ धन्विनौ परतापनौ रथिनं
त्वरया पातं रथमास्थाय दंशितौ १३ स गत्वा शिविरं तेषां नाम विश्राव्य चाहवे ततः कर्त्तासि शत्रूणां युध्यतां कदनं महत् १४ कृत्वा
च कदनं तेषां प्रभाते विमले हनि विहरस्व यथा शक्रः सूदयित्वा महासुरान् १५ त्वं हि शक्तो रणे जेतुं पांचालानां वरूथिनीं दैत्यसे
नामिव क्रुद्धः सर्वदानवसूदनः १६ मया त्वां सहितं संख्ये गुप्तं च कृतवर्मणा न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयं १७ न चा
हं समरे तात कृतवर्मा न चैव हि अनिर्जित्य रणे पांडून् व्यपयास्यामि कर्हिचित् १८ हत्वा च समरे क्षुद्रान् पांचालान् पांडुभिः सह नि
वर्त्तिष्यामहे सर्वे हता वा स्वर्गगा वयं १९ सर्वोपायैः सहायास्ते प्रभाते वयमाहवे सत्यमेतन्महाबाहो प्रब्रवीमि तवानघ २० ए
वमुक्तस्ततो द्रौणिर्मातुलेन हितं वचः अब्रवीन्मातुलं राजन् क्रोधसंरक्तलोचनः २१ आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च
अर्थांश्चिंतयतश्चापि कामयानस्य वा पुनः २० तदिदं समनुप्राप्तं पश्य मे यच्चतुष्टयं यस्य भागश्चतुर्थो मे स्वप्नमह्नाय नाशयेत्
किं नाम दुःखं लोकेस्मिन् पितुर्वधमनुस्मरन् २३

शाम्प्रतिं अमर्षइत्यर्थः माधश्लोकः २३ ॥ ॥

सौ॰टी॰ ६

२४ २५ २६ २७ ३३ स्वप्नास्वप्स्यामि ३४ अध्यायः शुश्रूषुः दुर्मेधाः म॰३॰ अनियतेतिच्छेदः १

हृदयान्निर्दहन्मेघोरामहानिनशाम्यति यथाच नि हतः पापैः पिता मम विशेषतः २४ घत्पक्रमपितेसर्वं तन्मेमर्माणि कृंतति कथं हि
मादृशो लोके मुहूर्तमपि जीवति २५ द्रोणो हतेति यद्वाचः पांचालानां शृणोम्यहं धृष्टद्युम्नमहत्वाहं नाहं जीवितुमुत्सहे २६ समे पितु
र्वधो हंतव्यः पांचाला ये च संगताः विलापो भग्नसक्थस्य यस्तु राज्ञो मया श्रुतः २७ स पुनर्हृदयं कस्य क्रूरस्यापि न निर्दहेत् कस्य त्वक
रुणस्यापि नेत्राभ्यामश्रु नाव्रजेत् २८ नृपतेर्भग्नसक्थस्य श्रुत्वा ताहृग्वचः पुनः यश्चायं मित्रपक्षो मे मयि जीवति निर्जितः २९
शोकं मे वर्धयत्येष वारिवेग इवार्णवं एकाग्रमनसो मेद्य कुतो निद्रा कुतः सुखं ३० वासुदेवार्जुनाभ्यां च तानहं परिरक्षितान् अवि
षह्यतमान्मन्ये महेन्द्रेणापि सत्तम ३१ न चापि शक्यः संयंतुं कोपमेतं समुत्थितं तन्न पश्यामि लोकेस्मिन्यो मां कोपान्निवर्तयेत् ३२ त
थैव निश्चिता बुद्धिरेषा साधुमता मम वार्त्तिकैः कथ्यमानस्तु मित्राणां मे पराभवः ३३ पांडवानां च विजयो हृदयं दहतीव मे अहं तु क
दनं कृत्वा शत्रूणामद्य सौप्तिके ३४ ततो विश्रमिता चैव स्वप्साव विगतज्वरः ३५ इति महाभारते सौप्तिके पर्वणि कृपउवाच शुश्रू
षुरपि दुर्मेधाः पुरुषो नियतेंद्रियः नालं वेदयितुं कृत्स्नौ धर्मार्थौ विनिमे मतिः १ ॥ ॥ ॥ ॥ ॥

एम॰ ८

ऋनेयः सन्मार्गेनेत्मशक्याः दिष्टं उपदिष्टं ६ १३ अग्निवेरतिछेद १५ ॥ ॥ ७

नागस्तीवा ५

तथैवतावन्मेधावी विनयं यो न शिक्षते न च किंचन जानाति सोपि धर्मार्थनिश्चयं २ चिरं त्वपि जडः शूरः पंडितं पर्युपासह न स धर्मान्विजाना
ति जिह्वा सूपरसानिव ३ मुहूर्त्तमपि तं प्राज्ञः पंडितं पर्युपास्य ह न स धर्मान्विजानाति दर्वी सूपरसानिव ४ शुश्रुषस्तेव मेधावी पुरुषो नि
यतेंद्रियः जानीयादागमान्सर्वान्ग्राह्यं न च विरोधयेत ५ अद्वेयस्त्ववमानी यो दुरात्मा यापपुरुषः दिष्टमुत्सृज्य कल्याणं करोति बहु
पापकं ६ नाथवं तं समुत्कृष्टः प्रतिषेधंति पावकात निवर्त्तते तलक्ष्मीर्वाग्निवर्त्तते ७ यथाल्पं बलवचैर्वीकर्मः भिन्नचित्तो नियम्यते
तथैव सत्कृदाशक्यो न शक्यास्त्ववसीदति ८ तथैव सत्कृतं प्राज्ञं कुर्वाणं कर्म यापकं प्राज्ञाः संप्रतिषेधंति यथाशक्ति पुनः पुनः ९
सकल्याणे मनः कृत्वा नियम्यात्मानमात्मना कुरुमेव वचनं तात येन यत्स्वास्तत्प्यसे १० न वधः पूज्यते लोको स सतानामिह धर्मतः
तथैवायात्तशास्त्राणां विमुक्तरथवाजिनां ११ ये च वक्ष्य पुत्तवास्मीति ये च सस्त्रः शरणागताः विमुक्तमूर्धजो ये चापि हतवाहनाः १२
अघस्त्वस्मं तियांचाला विमुक्तकवचा विभो विश्वस्तारज्जनो सर्वे येनाद्य विचेतसः १३ यस्यैषां तदवस्थानां हुत्वेन तपतेयो न रज्जः व्यक्तं
स नरके मज्जेदगाधे विपुले ध्रुवे १४ ॥ ॥ ॥ ॥ ॥ ॥

पेपर

सौ०टी०
५

दे

१५ १७ विह्वलीकृतः दूषितः १८ प्रत्यक्षमिति तुष्टौ श्लेनैवेज्ञेनत्वमइत्य १७ २२ अधर्मेणानामेरधस्तान्महो ॥ ॥

सर्वास्त्रविदुषां लोके श्रेष्ठत्वमसिविश्रुतः नचतेजातुलोकेस्मिन्नसत्स्वप्नमपिकिल्बिषं १५ त्वंपुनः सूर्यसंकाशः स्वीभूत उदितेरवौ प्र
काशे सर्वभूतानां विजेता युधिशाश्ववान १६ असंभावितरूपं हित्वापिकर्मविगर्हितं शुक्लेरक्तमिवन्यस्तं भवेदितिमतिर्मम १७ अश्व
त्थामोवाच एवमेवयथात्थत्वं मातुलेह न संशयः नैस्त्रपूर्वमपंसेनः शतधाविह्वलीकृतः १८ प्रत्यक्षंभूमिपालानां भवतांचापिसंनि
धौ न्यस्तशस्त्रोममपिता धृष्टद्युम्नेनपातितः १९ कर्णाश्वपतितेचक्रे रथस्यरथिनांवरः उत्तमेव्यसनेमग्नो हतो गांडीवधन्वना २०
तथाशांतनवो भीष्मो न्यस्तशस्त्रो निरायुधः शिखंडिनंपुरस्कृत्यहतोगांडीवधन्वना २१ भूरिश्रवामहेष्वासस्तथाप्रायगतोरणे क्रो
शतांभूमिपालानांयुयुधानेनपातितः २२ दुर्योधनश्चभीमेनसमेत्यगदयारणे पश्यतांभूमिपालानामधर्मेणनिपातितः २३ ए
काकीबहुभिस्तत्रपरिवार्यमहारथैः अधर्मेणनरव्याघ्रो भीमसेनेनपातितः २४ विलापोभग्नसक्थस्ययो मेराज्ञः परिश्रुतः वार्त्ति
कानांकथयतांसमेमर्माणिकृंतति २५ एवंचाधर्मिकाः पापाः पांचालाभिन्नसेतवः तानेवंभिन्नमर्यादान्किंभवान्नविगर्हसे २६
पितृहंतृनहंहत्वापां चालान्निशिसौप्तिके कामंकीटःपतंगोवाजन्मप्राप्यभवामिवै २६ ॥ ॥ ॥

राम०
५

२८ २९ ३० ३२ ३४ ३६ ३७ ३८ ३९

स्त्रैयाहमनेनाद्ययदिदंमेचिकीर्षितं तस्यमेत्वरमाणस्यकुतोनिद्राकुतःसुखं २८ नसजातःपुमांल्लोकेकश्चिन्नसभविष्यतियोमे
मावर्त्तयेदेवतांवधेतेषांकृतांमतिं २९ संजयउवाच एवमुक्त्वामहाराजद्रोणपुत्रःप्रतापवान् एकांतेयोजयित्वाश्वान्प्रायादभिमुखः
परान् ३० तमब्रूतांमहात्मानौभोजशारद्वतावुभौ किमर्थंस्यंदनोयुक्तः किंचकार्यंचिकीर्षितं ३१ एकसार्थंप्रयातौस्वस्त्वयास
हनरर्षभ समदुःखसुखौचपिनावांशंकितुमर्हसि ३२ अश्वत्थामातुसंक्रुद्धःपितुर्वधमनुस्मरन् ताभ्यांतथ्यंतथाचख्यौयदस्या
त्मचिकीर्षितं ३३ हत्वाशतसहस्राणियोधानांनिशितैःशरैःन्यस्तशस्त्रोममपिताधृष्टद्युम्नेनपातितः ३४ तंतथैवहनिष्यामि
न्यस्तधर्माणमद्यवै पुत्रंपांचालराजस्यपापंपापेनकर्मणा ३५ कथंचनिहतःपापः पांचाल्यःपशुवन्मया शस्त्रेणविजितांल्लो
कानाप्नुयादितिमेमतिः ३६ क्षिप्रंसंनद्धकवचौसखड्गावात्तकार्मुकौ मामास्थायप्रतीक्षेतांरथवर्यौपरंतपौ ३७ इत्युक्त्वार
थमास्थायप्रायादभिमुखःपरान् तमन्वगात्कृपोराजन्कृतवर्माचसात्वतः ३८ तेप्रयातास्त्रयोरेजुःशत्रूनभिमुखास्त्रयः हूयमा
नायथायज्ञेसमिद्धाहव्यवाहनाः ३९ ॥

(c) Dharmartha Trust J&K. Digitized by eGangotri

सौ०द्रो० ५८ पंचमःद्वारः १ २ ३ ४ ५ ६ ७ ११ ॥ ॥

१० यथेष्ट शिविरंतेषांसंप्रसुप्तजनंविभो द्वारदेशंतुसंप्राप्यद्रौणिस्तस्थौमहारथः ५० इतिसौप्तिकेपर्वणि धृतराष्ट्रउवाच द्वारदेशे
ततोद्रौणिमवस्थितमवेक्ष्यतौ अकुर्वतांभोजकृपौकिंसंजयवदस्वमे १ संजयउ० कृतवर्माणमामंत्र्यकृपंचसमहारथः द्रौणि
र्मन्युपरीतात्माशिविरद्वारमागमत् २ तत्रभूतंमहाकायंचंद्रार्कसदृशद्युतिं सोपश्यद्द्वारमावृत्यतिष्ठंतंलोमहर्षणं ३ वसानंच
र्मवैयाघ्रंमहारुधिरविस्रवं कृष्णाजिनोत्तरासंगंनागयज्ञोपवीतिनं ४ बाहुभिःस्वायतैःपीनैर्नानाप्रहरणोद्यतैः बद्धांगदमहा
सर्पंज्वालामालाकुलाननं ५ दंष्ट्राकरालवदनंव्यादितास्यंभयानकं नयनानांसहस्रैश्चविचित्रैरभिभूषितं ६ नैवतस्यवपुः
शक्यंप्रवक्तुंवेषएवच सर्वथातुतदालक्ष्यस्फुटेयुरपिपर्वताः ७ तस्यास्यान्नासिकाभ्यांचश्रवणाभ्यांचसर्वशःतेभ्यश्चाक्षिसहस्रे
भ्यःप्रादुरासन्महार्चिषः ८ तथातेजोमरीचिभ्यःशंखचक्रगदाधराःप्रादुरासन्हृषीकेशाःशतशोथसहस्रशः ९ तदत्य
द्भुतमालोक्यभूतंलोकभयंकरं द्रौणिरव्यथितोदिव्यैरस्त्रवर्षैरवाकिरत् १० द्रौणिमुक्तांछरांस्तांस्तुतद्भूतंमहदग्रसत् उदधे
रिववार्योघान्पावकोवडवामुखः ११ ॥ ॥ ॥ ॥

दम०
१०

© Dharmartha Trust J&K. Digitized By eGangotri

१२ खड्गशक्तिं चक्रं १३ युग्मान्ते मिथुनराशौ रते अतिशीतसहश्री १४ १७ अनाकाशं निरवकाशं १८ अतिवर्त्य अतिक्रम्य ते तयोः कृपकृतवर्मणोर्वाक्यं १९ शास्त्र

रफे २

अग्रसत्त्रांस्तथा भक्तं द्रोणिनाप्यहितान् बहून् अश्वत्थामा तु संवेक्ष्य शरौघांस्तान्निरर्थकान् १२ खड्गशक्तिममोचासौ दीप्तामग्निशिखामिव
सा तमाहत्य दीप्ताग्रा खड्गशक्तिरदीर्यत १३ युगान्ते सूर्यमाहत्य महोल्केव दिवश्च्युता अथ हेमत्सरुं दिव्यं खड्गमाकाशवर्चसं १४ कोशा
त्समुद्ववर्हाशु बिलाद्दीप्तमिवोरगं ततः खड्गधरं धीमान् भक्ताय प्राहिणोच्छरान् १५ स तदा साधभक्तं वै विलेन कुलवधयो ततः सकु
पितो द्रौणिरिंद्रकेतनिभां गदां १६ ज्वलंतीं प्राहिणोत्तस्मै भक्तं तामपि चाग्रसत् ततः सर्वायुधाभावे वीक्ष्यमाणास्तत १७ अ
पश्यन् कृतमाकाशमनाकाशं जनार्दनः तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः १८ अब्रवीदिति संत्रस्तः कृपवाक्यमनुस्मरन् श्रुवत्ता
मप्रियं पथ्यं सत्त्वहं नं श्रृणोति यः स शोचत्यापदं प्राप्य यथाहमतिवर्त्य तौ शास्त्रदृष्टान्विधान्यः समतीत्य जिघांसति २० स प
थः प्रच्युतो धर्मात्कुपथे प्रतिहन्यते गोब्राह्मणनृपस्त्रीषु सख्युर्मातुर्गुरोस्तथा २१ हीनप्राणजडांधेषु सुप्तभीतोत्थितेषु च म
त्तोन्मत्तप्रमत्तेषु न शस्त्राणि च पातयेत् २२ इत्येवं गुरुभिः पूर्वमुपदिष्टं नृणां सदा सोऽहमुत्क्रम्य पंथानं शास्त्रदृष्टं सनातनं २३

ततः ४

दृष्टान्स्वविध्यस्तेन शास्त्रे ज्ञातान् समतीत्य शास्त्रमुल्लंघ्य २०

श्रीकृष्णो जयति ॥ ॥ ॥ ५

© Dharmartha Trust J&K. Digitized By eGangotri

सौ०टी० १५ १६ प्लवमुखाः मंडूकवक्त्राः १७ दीर्वीघाटः पक्षिविशेषः १८ १९ २० २१ २३ २६ २७ ॥ ॥ ॥
हृदकापत्ताङ्कूपद्रमनःपदेकेधं

११ २५ हीसास्यनयनाश्चान्नैकपादशिरोभुजाः रत्नचित्रांगदधराः समुद्यतकराः समुद्यतकरास्तथा १५ द्वीपशैलप्रतीकाशाः प्रा
दुरासन्महागणाः श्ववराहोष्ट्ररूपाश्च हयग्रीमायुगोमुखाः १६ ऋक्षमार्जारवदनाव्याघ्रद्वीपिमुखास्तथा काकवक्त्राः प्लवमु
खाः शुकवक्त्रास्तथैव च १७ महाजगरवक्त्राश्च हंसवक्त्राः शितिप्रभाः दार्वाघाटमुखाश्चापि चाषवक्त्राश्च भारत १८ कूर्मन
क्रमुखाश्चैव शिशुमारमुखास्तथा पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च १९ हरिवक्त्राः क्रौंचमुखाः कपोतेभमुखास्तथा
महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च २० पाणिकर्णाः सहस्राक्षास्तथैव च महोदराः निर्मांसाः काकव क्त्राश्च श्येनव
क्त्राश्च भारत २१ तथैवाशिरसो राजन्नृक्षवक्त्राश्च भारत प्रदीप्तनेत्रजिह्वाश्च ज्वालावर्णास्तथैव च २२ ज्वालाकेशाश्च रा
जेंद्र ज्वलद्रोमचतुर्भुजाः मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप २३ शंखाभाः शंखवक्त्राश्च शंखकर्णास्तथैव च शंखमा
लापरिकल्शाः शंखध्वनिसमस्वनाः २४ जटाधराः पंचशिखास्तथा मुंडाः कृशोदराः चतुर्दंष्ट्राश्चतुर्जिह्वाः शंकुकर्णाः किरीटि
नः २५ मौंजीधराश्च राजेंद्र तथा कुंचितमूर्धजाः उष्णीषिणो मुकुटिनश्चारुवक्त्राः स्वलंकृताः २६ पद्मोत्पलापीडधरास्त
था मुकुरधारिणाः महात्मानश्च संयुक्ताः शतशोऽथ सहस्रशः २७ ॥ ॥ ॥ ॥ राम०

११

© (c) Dharmartha Trust J&K. Digitized By eGangotri

२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४

द्रौणिरुवाच उग्रं स्थाणुं शिवं रुद्रं शर्वमीशानमीश्वरं गिरि[illegible]शं वरदं देवं भवभावनमीश्वरं २ शितिकण्ठमजं शुक्रं दक्षक्रतुहरं हरं वि
श्वरूपं विरूपाक्षं बहुरूपमुमापतिं ३ श्मशानवासिनं दृप्तं महागणपतिं विभुं खट्वाङ्गधारिणं रुद्रं जटिलं ब्रह्मचारिणं ४ मनसा त्वविशु
द्धेन दुष्करेणाल्पचेतसा सोहमात्मोपहारेण यक्ष्ये त्रिपुरघातिनं ५ स्तुतं स्तुत्यं स्तूयमानममोघं कृत्तिवाससं विलोहितं नीलकण्ठमस
ह्यं दुर्निवारणं ६ शुक्रं ब्रह्मसृजं ब्रह्म ब्रह्मचारिणमेव च व्रतवन्तं तपोनिष्ठमनन्तं तपतां गतिं ७ बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषद
प्रियं धनाध्यक्षं क्षितिमुखं गौरीहृदयवल्लभं ८ कुमारपितरं पिङ्गं गोवृषोत्तमवाहनं तनुवाससमत्युग्रमुमाभूषणतत्परं ९ प
रं परेभ्यः परमं परं यस्मान्न विद्यते इष्वस्त्रोत्तमभर्तारं दिगन्तं देशरक्षिणं १० हिरण्यकवचं देवं चन्द्रमौलिविभूषणं प्रपद्ये शरणं देवं
परमेण समाधिना ११ इमां चेदापदं घोरां तराम्यद्य सुदुष्करां सर्वभूतोपहारेण यक्ष्येहं शुचिना शुचिं १२ इति तस्य व्यवसि
तं ज्ञात्वा योगात्सुकर्मणः पुरस्तात्काञ्चनी वेदी प्रादुरासीन्महात्मनः १३ तस्यां वेद्यां तदा राजन् चित्रभानुरजायत स दिशो विदिशः
खं च ज्वालाभिरिव पूरयन् १४ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

सौ० टी० २४ ३३ देवान्स्त्वगात्देवेभ्योधिकः ३४ षष्टः एवं १ ॥ ॥ ॥

९२ अमार्गेणैवमारम्भघोरमापदमागतः तांचापदंघोरतरांप्रवदंतिमनिषिणः २४ यद्युद्यममहत्वात्संभयादपिनिवर्त्तते अशक्तश्चैवतत्का
र्तुंकर्मशक्तिबलादिह २५ नहिदैवाद्गरीयोवैमानुषंकर्मकथ्यते मानुष्यंकुर्वतः कर्मयदिदैवान्नसिध्यति २६ सपथः प्रच्युतोधर्म्मा
त्तविपदंप्रतिपद्यते प्रतिज्ञानंह्यविज्ञानंप्रवदंतिमनीषिणः २७ यदारम्भक्रियांकांचिद्भयादिहनिवर्त्तते तदिदंदुःप्रणीतेनभयंमांस
मुपस्थितं २८ नहिद्रोणसुतः संख्येनिवर्त्तेतकथंचन इदंचसुमहद्भूतंदैवदंडमिवोद्यतं २९ नचैतदभिजानामिचिंतयन्नपिसर्व
था ध्रुवंसेयमधर्म्मेप्रवृत्ताकलुषामतिः ३० तस्याः फलमिदंघोरंप्रतिघातायकल्पते तदिदंदैवविहितंममसंख्येनिवर्त्तनं ३१
नान्यत्रदैवादुद्यंतमिहशक्यंकथंचन सोहमद्यमहादेवंप्रपद्येशरणंविभुं ३२ दैवदंडमिमंघोरंसहिमेनाशयिष्यति कपर्दिनंदेवदेवंउ
मापतिमनामयं ३३ कपालमालिनंरुद्रंभगनेत्रहरंहरं सहिदेवोत्यगाद्देवांस्तपसाविक्रमेणच ३४ तस्माच्छरणमभ्येष्येगिरिशंशू
लपाणिनं इतिश्रीमहाभारतेसौप्तिकेपर्वणि संजय० एवंसंचिंत्यित्वातुद्रोणपुत्रोविशांपते अवतीर्यरथोपस्थात्देवेशंप्रणतःस्थितः

६२

राम०

९२

३९ ३८ कृहंतः शेषाः मेंकुनिर्मुंडाः वृषणांपिंडिकाः जानुनोरधः पश्चाद्भागश्चयेषांतेबृहच्छेफांडपंडिकाः ३९ ४०

शान्तग्रीवाश्चहस्ताश्चतथामुशलपाणयः भुशुंडीपाशहस्ताश्चदंडहस्ताश्चभारत २८ एष्टेष्ववद्धेषुभयस्थिवाणोत्कटास्तथा स
ध्वजाः सपताकाश्चसघंटाः सपरश्वधाः २९ महापाशोद्यतकरास्तथालगुडपाणयः स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकि
रीटिनः ३० महासर्पांगदधराश्चित्राभरणधारिणः रजोध्वस्ताः पंकदिग्धाः सर्वेशुक्लांबरस्रजः ३१ नीलांगाः पिंगलांगाश्चमुंडव
क्त्रास्तथैवच भेरीशंखमृदंगांश्चझर्झरानकगोमुखान् ३२ अवादयन्पारिषदाः प्रहृष्टाः कनकप्रभाः गायमानास्तथैवान्येनृ
त्यमानास्तथापरे ३३ लंघयंतः प्लवंतश्चवल्गंतश्चमहारथाः धावंतोजवनामुंडाः पवनोद्धूतमूर्धजाः मत्ताइवमहानागाविनदंतो
मुहुर्मुहुः सुभीमाघोररूपाश्चशूलपट्टिशपाणयः ३५ नानाविरागवसनाश्चित्रमाल्यानुलेपनाः रत्नचित्रांगदधराः समुद्यत
करास्तथा ३६ हंतारोद्विषतांशूराः प्रसह्यासह्यविक्रमाः पातारोसृग्वसौघानांमांसान्त्रकृतभोजनाः ३७ चूडालाः कर्णिका
राश्चप्रलंबाः पिठरोदराः अतिह्रस्वातिदीर्घाश्चप्रलंबाश्चातिभैरवाः ३८ विकटाः काललंबोष्ठाबृहच्छेफांडपिंडिकाः महार्हनाना
विकटामुकुटाश्चजटिलाः परे ९ सार्केंदुग्रहनक्षत्रांद्यांकुर्युर्येमहीतले उत्सहेरंश्चयेहंतुंमृत्युग्रामंचतुर्विधं ४० ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सौ०टी०
१३

४१ २४ चतुर्विधात्मकंसोमं श्रुत्त्वरूपंसूत्ररूपंचंद्रमंडलरूपंच क्रमाद्ध्यात्माधियज्ञाधिदैवाधिलोकस्थैर्दैवताद्यपाश्रयैः ५३

येचभूतमयात्पंतंहरस्यभ्रकुटीसद्भाः कामकारकदाशनि [ ] त्रैलोक्यस्येश्वरेश्वराः ४१ नित्यानंदप्रमुदितावागीशादीनमत्सराः प्राप्याहगुणमै
श्वर्यंयेनयांसंतिवैस्मयं ४२ येषांविस्मयतेनित्यंभगवानकर्मभिर्हरः मनोवाक्कर्मभि[र्]युक्तैर्नित्यमाराधितश्चयैः ४३ मनोवाक्कर्मभिर्युक्ता
स्मातिपुत्रानिवौरसान पिबंतोह्यवसाग्न्यानेकुक्षौब्रह्मद्विषांसदा ४४ चतुर्विधात्मकंसोमंयेपिबंतिचसर्वदा ऋतेनब्रह्मचर्येणतपसा
चदमेनव ४५ येसमाराध्यशलांकंभवसायुज्यमागताः येरात्मभूतैर्भगवान्पार्वत्याचमहेश्वरः ४६ महाभूतगणोर्भक्तैर्भूतमव्ययमवका
भुः नानावादित्र[ ]हसितक्ष्वेडितोत्कृष्टगर्जितैः ४७ संत्रासयंतस्तेविश्वमश्वत्थामानमभ्ययुः संस्तुवंतोमहादेवंभाः कुर्वाणाः
स्वर्चसः ४८ विवर्धयिषवोद्रौणेर्महिमानंमहात्मनः जिज्ञासमानास्तत्तेजः सौप्तिकंचदिदृक्षवः ४९ भीमोग्रपरिघालातशूल
पट्टिशपाणयः घोररूपाः समाज[ ]र्भूतसंघाः समंततः ५० जनयेयुर्भयंयेस्मत्रैलोक्यस्यापिदर्शनात तान्प्रेक्ष्यमाणोपिव्यथांनचका
रमहाबलः ५१ अथद्रौणिर्धनुष्पाणिर्बद्धगोधांगुलित्रवान स्वयमेवात्मनात्मानंउपहारमुपाहरत ५२ धनूंषिसमिधस्तत्रपवित्रा
णिशिताः शराः हविरात्मवतस्त्वात्मातस्मिन्भारतकर्मणि ५३ ॥ ॥ ।

रम ३

एम०
१३

© Dharmartha Trust J&K. Digitized By eGangotri

ततः सौम्येनसोमदेवत्येन मंत्रेणाप्यायस्वसमेतनेविश्रुतः सोमहत्सं भवावानसंगथइससनेनमंत्रेणात्मानंशरीरं उपहारं हविष्यं उपाहरत उपासादितवान् मंत्रार्थस्तु
हे सोम त्वं आप्यायस्व कथंतेआप्नुतिविश्रुतः सर्वात्मनाहसंहृत्य ईश्वरस्याविर्भावस्थानंशरीरं एतद्भाविशे ततस्तेनशरीरेणाप्यापितस्त्वसंगथेसंग्रामेवातस्यवीर्यस्पृहाता

ल१

ततः सौम्येनमंत्रेण द्रोणपुत्रः प्रतापवान् उपहारंमहामन्त्रस्थात्मानमुपाहरत ५४ तंरुद्रंरौद्रकर्माणंरौद्रैः कर्मभिरच्युतं अभिष्टुत्य
महात्मानमित्युवाचकृतांजलिः ५५ द्रोणिरुवाच इममात्मानमद्याहंजातमांगिरसेकुले स्वग्नौजुहोमिभगवन् प्रतिगृह्णीष्वमांबलिं
५६ भवद्भक्त्यामहादेवपरमेणसमाधिना अस्यामापदिविश्वात्मन्नुपाकुर्मितवाग्रतः ५७ त्वयिसर्वाणिभूतानिसर्वभूतेषुवासिवै
गुणानांहिप्रधानानांएकत्वंत्वयितिष्ठति ५८ सर्वभूताश्रयविभोहविर्भूतमवस्थितं प्रतिगृहाणमांदेवयद्यशक्याः परेमया ५९
इत्युक्त्वाद्रौणिरास्थायतांवेदींदीप्तपावकां संत्यज्यात्मानमारुत्यकृष्णवर्त्मन्युपाविशत ६० तमूर्ध्वबाहुंनिश्चेष्टंदृष्ट्वाहविरुपस्थि
तं अब्रवीद्भगवान्साक्षान्महादेवोहसन्निव ६१ सत्यशौचार्जवत्यागैस्तपसानियमेनच क्षांत्याभक्त्याचधृत्याचबुध्याचवचसातथा
यथावदहमाराद्धः कृष्णेनाक्लिष्टकर्मणा तस्मादिष्टतमः [illegible] :कृष्णादन्योममनविद्यते ६२

भव कर्मणिरौद्रंशंवाजंभवप्रायय भक्त्यासाविन्यस्वरूपं ५४ ५५ ५६ ५७ ५८ ५९ ६२ ॥ ॥ ॥ ॥ ७

© Dharmartha Trust J&K. Digitized By eGangotri

सौ०टी० १५

६४ ६२ सप्तमः जथा १ कच्चिन्नोपलक्षितोऽस्मत्रकच्चिन्मावर्त्तते २ ३ पांचालैः पूर्वं निहतौ संतौ कोयात् स्वयतां यां चालानीकमेव वाल्लतास्मां कच्चित्हतामि निर्ति
कुर्वेतातात संमानं स्रांचजिताम तामया पांचालाः सहमागुसामायाश्च वक्रुशः कृताः ६४ कृतस्तस्यैव संमानः पांचालावक्रतामया अ
भिभूतास्त कालेननैषामघातितं नीवितं ६५ एवमुक्त्वा महात्मानं भगवानात्मनस्तनुं आविवेश देवास्मै विमलं खड्गमुत्तमं ६६ अथा
विशे भगवता भूयो जज्वाल तेजसा वेगवांश्चाभवद्युद्धे देवमृष्टेन तेजसा ६७ तमदृश्यानि भूतानि रक्षांसि च समाद्रवन् अभितः श
त्रुशिविरं यांतं साक्षादिवेश्वरं ६८ इति सौप्तिके पर्वणि धृतरा तथा प्रयाते शिविरं द्रोणपुत्रे महारथे कच्चित्कृपश्च भोजश्च भयार्त्तौ
न व्यवर्त्ततां १ कच्चिन्न वारि तौ क्षुद्रैः रक्षिभिर्नोपलक्षितौ असं मितिमन्वानौ न निहतौ महारथौ २ कच्चिदुन्मथ्य शिरं हत्वा सो विथ
मकपांस्वान् दुर्योधनस्य पदवीं गतौ परमिकां रणे ३ पांचालैर्निहतौ वीरौ कच्चिन्नु स्वपतां क्षितौ कच्चि त्ताभ्यां कृतं कर्म त
न्ममाचक्ष्व संजय ४ संजय उ० तस्मिन्प्रयाते शिविरं द्रोणपुत्रे महात्मनि कृपश्च कृतवर्मा च शिविरद्वार्यपतिष्ठतां ५ अश्वत्थामा तु तौ
तौ दृष्ट्वा यत्नवंतौ महारथौ प्रहृष्टः शनैः राजन्निदं वचनमब्रवीत् ६ यत्तौ भवंतौ पर्याप्तौ सर्वक्षत्रस्य नाशने किं पुनर्योधशेषस्य
प्रसुप्तस्य विशेषतः ७

वंध: ४ ॥ ॥ ॥ ॥ ॥ ॥

दाम० १५

वांप्रवेशाप्येतिशेषः ९ उद्देशतःधृष्टद्युम्नस्थलस्थः १० ११ १२

अहंप्रवेक्ष्येशिबिरंचरिष्यामिचकालवत् यथानकश्चिदपिमांजीवन्मुच्येतमानवः ८ तथाभवद्भ्यांकार्यंस्यादितिमेनिश्चितामतिः इत्यु
त्वाप्राविशद्द्रौणिःपार्थानांशिबिरंमहत् ९ अद्वारेणाभ्यवस्कंद्यविहायभयमात्मनः सप्रविश्यमहाबाहुरुद्देशज्ञस्तस्यसह १० धृष्टद्यु
म्नस्यनिलयंशनकैरभ्युपागमत् तेत्वकृत्वामहत्कर्मश्रांताश्चबलवद्रणे ११ प्रसुप्ताश्चैवविश्वस्ताःसमेत्यपरिधाविताः अथप्रविश्य
तद्वेश्मधृष्टद्युम्नस्यभारत १२ पांचाल्यंशयनेद्रौणिरपश्यत्सुसमंतिकात् क्षौमावदातेमहतिस्पर्ध्यास्तरणसंवृते १३ माल्यप्रव
रसंयुक्तेधूपैश्चूर्णैश्चवासिते तंशयानंमहात्मानंविस्रब्धमकुतोभयं १४ प्राबोधयत्पादेनशयनस्थंमहीपते संबुध्यचरणस्पर्शादुत्था
यरणदुर्मदः १५ अभ्यजानदमेयात्माद्रोणपुत्रंमहारथं तमुत्पतंतंशयनादश्वत्थामामहाबलः १६ केशेष्वालंब्यपाणिभ्यांनिःपि
पेषमहीतले सबलंतेननिःपिष्टःसाध्वसेनचभारत १७ निद्रयाचैवपांचाल्योनाशकच्चेष्टितुंतदा तमाक्रम्यपदाराजनकंठेचोरसि
चोभयोः १८ नदंतंविस्फुरंतंचपशुमारममारयत् तुदन्नखैस्तुसद्रौणिंनातिव्यक्तमुदाहरत् १९ आचार्यपुत्रशस्त्रेणजहिमांमाचिरं
कृथाः त्वत्कृतेसुकृताँल्लोकान्गच्छेयंद्विपदांवर २०

न१

© Dharmartha Trust J&K. Digitized By eGangotri

मौ॰ टी॰
२५

२१ २२ पा॰ हाष्टीलेः पारसंधिर्मितिपार्थिवातिरिसर्थः २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ॥

एवमुक्त्वावचनंविररामपरंतपः एततः पांचालराजस्याक्रांतोवलिनाभृशं २१ स्याऽव्यक्तांततांवाचंसंप्रुत्पद्गोगिरब्रवीत आ
चार्यघातिनांलोकानसंतिकुलपांसन २२ तस्माच्छस्त्रेणनिधनंनत्वमर्हसिदुर्मते एवंब्रुवाणंतंवीरंसिंहोमत्तमिवद्विपं २३
मर्मस्वभ्यवधीत्क्रुद्धः पादाष्टीलैः सुदारुणैः तस्यवीरस्यशब्देनमार्यमाणस्यवेश्मनि २४ अबुध्यंतमहाराजस्त्रियोयेचास्यर
क्षिणः तंदृष्ट्वाधर्षयंतंतमतिमानुषविक्रमं २५ भूतमेवाध्यवस्यंतोनस्मव्याहरनभयात तंत्वेवंनाभ्युपायेनगमयित्वायम
क्षयं २६ अध्यतिष्ठत्तेजस्वीरथंप्राप्यसुदर्शनं सतस्मभवनाद्राजंनिष्क्रम्यनादयन्दिशः २७ रथेनशिबिरंप्रायाज्जितवान्सद्विष
तोबली अपक्रांतेततस्तस्मिन्द्रोणपुत्रेमहारथे २८ सहितैरक्षिभिः सर्वैः प्रणेदुर्योषितस्तदा राजानंनिहतंदृष्ट्वाभृशं
शोकपरायणाः २९ व्याक्रोशन्क्षत्रियाःसर्वेधृष्टद्युम्नस्यभारत तासांतुतेनशब्देनसमीपेक्षत्रियर्षभाः ३० क्षिप्रंचसमन
ह्यंतकिमेतदितिचाब्रुवन स्त्रियस्तुराजन्वित्रस्ताभारद्वाजंनिरीक्ष्यताः ३१ अब्रुवन्दीनकंठेनक्षिप्रमाद्रवतेतिवै राक्षसो
वामनुष्योवानैनंजानीमहेवयं ३२ हत्वापांचालराजानंरथमारुह्यतिष्ठति ततस्तेपोधमुख्यास्तुसहसापर्यवारयन ३३

पा॰ १ न॰ २

ए॰म॰
१५

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

३४ ४२ तैश्छिन्नगात्रैः विस्फुरद्भिः तेषां शरीरादुच्छलद्भिः रक्तबिंदुभिरित्यर्थः असेः शोणितार्द्रस्य घमनात्ः मुष्टीहृतो लोहितधाराव्रकुमलमायाति पञ्चामिं द्युत्पतेततो पिस्यानात्

सतानापततः सर्वान्स्तद्रावेणाव्यपोथयत् धृष्टद्युम्नं च हत्वा स तांश्चैवास्य पदानुगान् ३४ अपश्यच्छयनेतस्मिन्नुत्तमौजसमंतिके तम
प्याक्रम्य पादेन कंठे चोरसि तेजसा ३५ तथैव मारयामास विनर्दंतमरिंदमं युधामन्युश्च संप्राप्तो मत्वा तं रक्षसा हतं ३६ गदया प्रवेगेन
हृदि द्रौणिमताडयत् तमभिद्रुत्य जग्राह क्षितौ चैनमपातयत् ३७ विस्फुरंतं च पशुवत्तथैवैनममारयत् तथा स वीरो हत्वा तं ततोन्या
नसमुपाद्रवत् ३८ संसुप्तानेव राजेंद्र तत्र तत्र महारथान् स्फुरतो वेपमानांश्च शमितेव पशून्मखे ३९ ततो निस्त्रिंशमादाय जघाना
न्यान्पृथक्पृथक् भागशो विचरन्मार्गानसियुद्धविशारदः ४० तथैव गुल्मे संप्रेक्ष्य शयानान्मध्यगौल्मिकान् श्रांतान्न्यस्तायुधान्स
र्वान्क्षणेनैव व्यपोथयत् ४१ योधानश्वान्द्विपांश्चैव प्राच्छिनत्स वरासिना रुधिरोक्षितसर्वांगः कालसृष्ट इवांतकः ४२ विस्फुर
द्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योद्यमेन च आक्षेपणेन चैवासेस्त्रिधा रक्तोक्षितोऽभवत् ४३ तस्य लोहितरक्तस्य दीप्तखङ्गस्य युध्यतः अमा
नुष इवाकारो बभौ परमभीषणः ४४ ये त्वजाग्रंत कौरव्य तेपि शब्देन मोहिताः निरीक्षमाणा अन्योन्यं दृष्ट्वा [illegible] दृष्ट्वा प्रविव्यथुः ४५

रक्तबिंदवच्छलंतितैस्त्रिभिः प्रकारैरस्वरक्तोक्षितो न तु स्वदेहस्थानेन प्रहारादित्यर्थः ४३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सौ०टी० ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५८

१६

तद्रूपंतस्यतेदृष्ट्वाक्षत्रियाः शत्रुकर्षिणाः रक्षःसंमन्यमानास्तंनयनानिन्यमीलयन् सघोररूपोव्यचरत्कालवच्छिबिरेततः अपश्यद्द्रौ
पदीपुत्रानवशिष्टांश्चसोमकान् ४७ तेनशब्देनवित्रस्ताधनुर्हस्तामहारथाः धृष्टद्युम्नंहतंश्रुत्वाद्रौपदेयाविशांपते ४८ अवाकि
रंछरव्रातैर्भारद्वाजमभीतवत् ततस्तेननिनादेनसंप्रबुद्धाः प्रभद्रकाः ४९ शिलीमुखैःशिखंडीचद्रोणपुत्रंसमार्दयन् भारद्वाजः
सतान्दृष्ट्वाशरवर्षाणिवर्षतः ५० ननादवलवान्नादंजिघांसुस्तान्महारथान् ततः परमसंक्रुद्धः पितुर्वधमनुस्मरन् ५१ अवप्लु
त्यरथोपस्थात्त्वरमाणोभिदुद्रुवे सहस्रचंद्रविमलंगृहीत्वाचर्मसंयुगे ५२ खड्गंचविमलंदिव्यंजातरूपपरिष्कृतं द्रौपदेयानभिद्रुत्य
त्यखड्गेनव्यधमद्बली ५३ ततः सनरशार्दूलः प्रतिविंध्यंमहाहवे कुक्षिदेशेवधीद्राजन्सहतोन्यपतद्भुवि ५४ प्रासेनविध्वाद्रौ
णिंतुसुतसोमः प्रतापवान् पुनश्चासिंसमुद्यम्यद्रोणपुत्रमुपाद्रवत् ५५ सुतसोमस्यसासिंतंबाहुंछित्वानरर्षभ पुनरप्याहन
त्पार्श्वेसभिन्नहृदयोपतत् ५६ नाकुलिस्तुशतानीकोरथचक्रेणवीर्यवान् दोर्भ्यामुत्क्षिप्यवेगेनवक्षस्येनमताडयत् ५७ अ
ताडयच्छतानीकंमुक्तचक्रंद्विजस्तुसः सविह्वलोययौभूमिंततोस्यापाहरच्छिरः ५८ ॥ ॥

राम०
१६

CC-0. Dharmartha Trust J&K. Digitized By eGangotri

फलकेऽसाद्यद्विसप्तथः ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ॥ ०=५

सुल्लकर्मा तु परिवृत्यं गृहीत्वा समनाश्यत् अभिद्रुमयपोद्रोणिं सखेस फलके भृशं ५९ स तु तं क्रूतकर्माणमासेन्द्रद्वरासिना स
हतोऽपतद्भूमौ विमृष्टो विकृताननः ६० तेन शब्देन वीरस्य कृतकीर्तिर्महारथः अश्वत्थामानमासाद्य शरवर्षैरवाकिरत् ६१ तस्यापि
शरवर्षाणि वर्मणा प्रतिवार्य सः सकुण्डलं शिरः कायात् भ्राजमानमथाहरत् ततो भीष्मनिहन्तारं सह सर्वैः प्रभद्रकैः अहनत् सर्वतो
वीरं नानाप्रहरणैर्वली ६३ शिलीमुखेन चान्येन भ्रुवोर्मध्ये समार्पयत् स तु क्रोधसमाविष्टो द्रोणपुत्रो महावलः ६४ शिखण्डिनं समा
साद्य द्विधा चिच्छेद सोऽसिना शिखण्डिनं ततो हत्वा क्रोधाविष्टः परंतपः ६५ प्रभद्रकगणान् सर्वानभिदुद्राव वेगवान् यच्च शिष्टं विराट
स्य वलं तत् भृशमाद्रवत् ६६ द्रुपदस्य च पुत्राणां पौत्राणां सुहृदामपि चकार कदनं घोरं दृष्ट्वा दृष्ट्वा महावलः ६७ अन्यानन्यांश्च पुरुषा
नभिसृत्याभिसृत्य च न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः ६८ कालीं रक्तास्यनयनां रक्तमाल्यानुलेपनां रक्ताम्बरधरामेकां पाश
हस्तां कुटुम्बिनीं ६९ ददृशुः कालरात्रिं ते गायमानामवस्थितां नराश्वकुञ्जरान् पाशैर्वद्ध्वा घोरैः प्रतस्थुषीं ७० वहन्तीं विविधान् प्रेतान्
शवग्राहविमूर्धजान् तथैव च महाराज न्यस्तशस्त्रान् महारथान् ७१

© Dharmartha Trust J&K. Digitized By eGangotri

सौ०टी० ७७ ७८ पांडुसंजयानपांडवसंबंधिनः संजयान पांडेगौन्यायत्वानि संजयपाञ्चालान्वा ८० ८१ ८२ ८३ ८४ ॥ ६१ ॥ ६१
८२

१२ स्वप्नेहसांनयंतीतांरात्रिषुमापुमारिष ददृशुर्योधमुख्यास्तेघ्नंतंद्रौणिंचसर्वदा ७२ यतःप्रभृतिसंग्रामःकुरुपांडवसेनयोः ततः
प्रभृतितांकन्यामपश्यन्द्रौणिमेवच ७३ तांस्तुदैवहतान्पूर्वंपश्चाद्द्रौणिर्व्यपातयत् त्रासयन्सर्वभूतानिविनदन्भैरवान्रवान् ७४ तदनु
स्मृत्यतेवीरादर्शनंपूर्वकालिकं इदंतदित्यमन्यंतदैवेनोपनिपीडिताः ७५ ततस्तेननिनादेनप्रत्यबुध्यंतधन्विनः शिबिरेपांडवेयानां
शतशोथसहस्रशः ७६ सोच्छिनत्कस्यचित्पादौजघनंचैवकस्यचित् कांश्चिद्बिभेदपार्श्वेषुकालसृष्टइवांतकः ७७ अत्युग्रप्र
तिपिष्टैश्चनदद्भिश्चभृशोत्कटैः गजाश्वमथितैश्चान्यैर्महीकीर्णाभवत्प्रभो ७८ क्रोशतांकिमिदंकोयंकःशब्दःकिंनुकिंकृतं एवं
तेषांतथाद्रौणिरंतकः समपद्यत ७९ अपेतशस्त्रसंनाहान्संरब्धान्पांडुसंजयान प्राहिणोन्मृत्युलोकायद्रौणिःप्रहरतांवरः
८० ततस्तच्छस्त्रवित्रस्ताउत्पतंतोभयातुराः निद्रांधानष्टसंज्ञाश्चतत्रतत्रनिलिल्यिरे ८१ ऊरुस्तंभगृहीताश्चकश्मलाभिहतौ
जसः विनदंतोभृशंत्रस्ताः समासीदन्परस्परं ८२ ततोरथंपुनर्द्रौणिरास्थितोभीमनिःस्वनं धनुष्पाणिः शरैरन्यान्प्रेषयद्वैयमक्ष
यं ८३ पुनरुत्पततश्चापिदूरादपिनरोत्तमान शूरान्संपततश्चान्यान्कालरात्र्यैन्यवेदयत ८४ ॥ ॥ राम०

पा४

१२

६४ ६६ ६७ ६८ ७० ७५ ७७ ॥ ॥

तथैवस्यंदनायेरणाचमथन्तविधावति शरवैर्षैश्चविविधैरवर्षच्छादयांस्ततः ६५ पुनश्चस्तविचित्रेणाशतचंद्रेणवर्मणा तेनवाकाश
वर्णेनतथाचरतसोसिना ६६ तथासशिबिरंतेषांद्रोणिरहवनुमेदः व्यक्षोभयतराजेंद्रमहाह्रदमिवद्विपः ६७ उत्पेतुस्तेनशब्देनयोधाराजन्
विचेतसः निद्रार्त्ताश्चभयार्त्ताश्चव्यधावंतततस्ततः विस्वरंचुक्रुशुश्चान्येबद्धवधंतथावदन् नवस्मप्रत्यपद्यंतशस्त्राणिवसनानि
च ६९ विमुक्तकेशाश्चाप्यन्येनाभ्यजानन्परस्परं उत्पतंतोपतन्श्रांताः केचित्तत्राभ्रमंस्तदा ७० पुरीषमसृजन्केचित्केचिन्मू
त्रंप्रसुस्रुवुः बंधनानिचराजेंद्रसंछिद्यतुरगाद्विपाः ७१ समंपर्यपतंश्चान्येकुर्वंतोमहदाकुलं तत्रकेचिन्नराभीताव्यलीयंतम
हीतले तथैवतांनिपतितानपिषन्गजवाजिनः तस्मिंस्तथावर्त्तमानेरक्षांसिपुरुषर्षभ ३ दृष्ट्वानिव्यनदन्नुच्चैर्मुदाभरतसत्तम स
शब्दः पूरितोराजन्भूतसंघैर्मुदायुतैः ७४ व्यपूरयद्दिशः सर्वादिवंचातिमहास्वनः तेषामार्त्तस्वनंश्रुत्वावित्रस्तागजवाजिनः ७५
मुक्ताः पर्यपतन्राजन्मृद्नंतः शिबिरेजनं तैस्तत्रपरिधावद्भिश्चरणोदीरितंरजः ७६ अकरोच्छिबिरेतेषांरजन्यांद्विगुणंततः तस्मिंस्तम
सिसंजातेप्रमूढाः सर्वतोजनाः ७७ ॥ ॥ ॥ ॥

© Dhamantar Trust, J&K Digitized By eGangotri

सौ०८।० ९८ अभंजन् गात्राणि पनमथन् अमृद्नन् ९१ संरंभदिंतवंतः ९९ अपिबन् १०० १०१ कांदिशीकाः भयद्रुताः १ ३ ४ पु१४ ॥

नाजानन् पितरः पुत्रान् भ्रातॄन् भ्रातर एव च गजो गजानतिक्रम्य निर्मथ्यान् हया हयान् ९८ अताडयंस्तथाभंजंस्तथामृद्नंश्च भारत
ते भग्नाः प्रपतंति स्म निघ्नंतश्च परस्परं ९९ न्यपातयंस्तथा चान्यान् पातयित्वा तथापिषन् विचेतसः सनिद्राश्च तमसा चावृता नराः
१०० जघ्नुः स्वानेव तत्राथ कालेनैव प्रचोदिताः त्यक्त्वा द्वाराणि च द्वाःस्थास्तथा गुल्मानि गौल्मिकाः १०१ प्राद्रवंत यथा यथाशक्ति
कांदिशीका विचेतसः विप्रनष्टाश्च ते सोन्यं न जानंत तथा विभो २ क्रोशंतस्तात पुत्रेति दैवोपहतचेतसः पलायतां दिशस्तेषां
मि५ स्वानप्युत्सृज्य बांधवान् ३ गोत्रनामभिरन्योन्यमाक्रंदंत ततो जनाः हाहाकारं च कुर्वाणाः पृथिव्यां शेरते परे ४ तान्बुध्वा रणम
ध्ये सो द्रोणपुत्रो न्यवारयत् तत्रापरे वध्यमाना मुहुर्मुहुरचेतसः ५ शिबिरान्निःपतंति स्म क्षत्रिया भयपीडिताः तांस्तु निःपतितां
स्त्रस्तान् शिबिराज्जीवितैषिणः ६ कृतवर्मा कृपश्चैव द्वारदेशे निजघ्नतुः विस्रस्तयंत्रकवचान् मुक्तकेशान् कृतांजलीन् ७ वेपमा
नान् क्षितौ भीतान्नैव कांश्चिदमुंचतां नामुच्यत तयोः कश्चिन्निष्क्रांतः शिबिराद्बहिः ८ कृपश्चैव महाराज हार्दिक्यश्चैव दुर्म
मि१ तिः भूयश्चैव चिकीर्षंतौ द्रोणपुत्रस्य ते प्रियं ९ ॥ ॥ मा० १२

मि१ पु४

© Dharmartha Trust J&K. Digitized By eGangotri

त्रिषुदेशेषुदत्वतुः शिविरस्यहुताशनं ततः प्रकाशेशिविरेखड्गेनपितृनंदनः १० अश्वत्थामामहाराजव्यचरत्कृतहस्तवत् कां
श्चिदापततोवीरानपरांश्चैवधावतः ११ व्ययोजयतखड्गेनप्राणैर्द्विजवरोत्तमः कांश्चिद्योधान्सखड्गेनमध्येसंछिद्यवीर्यवान् १२ अपा
तयद्द्रोणपुत्रःसंरब्धस्तिलकांडवत् विनदद्भिर्भृशायस्तैर्नराश्वद्विरदोत्तमैः १३ पतितैरभवत्कीर्णामेदिनीभरतर्षभ मानुषाणांसह
स्रेषुहतेषुपतितेषुच १४ उदतिष्ठन्कबंधानिबहून्युत्थायचापतन् सायुधान्सांगदान्बाहून्विचकर्तशिरांसिच १५ हस्तिहस्तो
पमानूरून्हस्तान्पादांश्चभारत १६ छिन्नपार्श्वान्छिन्नशिरसश्छिन्नांस्तथापरान् १६ समहात्माकरोद्द्रौणिः कांश्चिच्चापिपरा
ङ्मुखान् मध्यदेशेनरान्मानविच्छेदानांश्चकरोत्ततः १७ अंसदेशेनिहत्यान्यान्कायेप्रावेशयच्छिरः एवंविचरतस्तस्यनिघ्नतः
सुबहून्नरान् १८ तमसारजनीघोराबभौदारुणदर्शना किंनराणांचपुरुषैर्हतैश्चान्यैः सहस्रशः १९ बहुनाचगजाश्वेनभूरभूद्भीम सौ३
दर्शना यक्षरक्षःसमाकीर्णारथाश्वद्विपदारुणा २० क्रुद्धेनद्रोणपुत्रेणसंछिन्नाः प्रापतन्भुवि भ्रातृनन्येपितृनन्येपुत्रान
न्येविचुक्रुशुः २१ केचिदूचुर्नतत्क्रुद्धैर्धार्तराष्ट्रैः कृतंरणे यत्कृतंनः प्रवसमानांरक्षोभिः क्रूरकर्मभिः २२

© (Ch) Dharmartha Trust J&K. Digitized By eGangotri

सो॰टी॰
१९

२३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

अस्मान्निध्याह्रियार्थानामिदं नः कदनं कृतं नचामरैर्न गंधर्वैर्न यक्षैर्न च राक्षसैः २३ शक्यो विजेतुं कौन्तेयो गोप्ता यस्यार्जुनो हि नः ब
ह्मण्यः सत्यवाग्दान्तः सर्वभूतानुकंपकः २४ नस्म त्रस्तं प्रमत्तं वा न्यस्तशस्त्रं कृतांजलिं धावंतं मुक्तकेशं वा हंति पार्थो धनंजयः २५
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्मभिः इति लालप्यमानाः स्म शेरते बहवो जनाः २६ स्तनतां च मनुष्याणामपरेषां च कूजतां
ततो मुहूर्त्तात्प्राशाम्यत्स शब्दस्तुमुलो महान २७ शोणितव्यतिरिक्तायां वसुधायां च भूमिप तद्रजस्तुमुलं घोरं क्षणेनांतरधीय
५ त २८ सचेष्टमानानुद्विग्नान्निरुत्साहान्सहस्रशः न्यपातयन्नरान्क्रुद्धः पशून्पशुपतिर्यथा २९ अन्योन्यं संपरिष्वज्य शयानान्
द्रवतोऽपरान संलीनान्युध्यमानांश्च सर्वान्द्रौणिरपोथयत ३० दह्यमाना हुताशेन वध्यमानाश्च तेन ते परस्परं तदा योधा
अनयन्यमसादनं ३१ तस्या रजन्यास्त्वर्धेन पांडवानां महद्बलं गमयामास राजेंद्र द्रौणिर्यमनिवेशनं ३२ निशाचराणां सत्वानां
रात्रिः सा हर्षवर्धिनी आसीन्नरगजाश्वानां रौद्री क्षयकरी भृशं ३३ तत्रादृश्यंत रक्षांसि पिशाचाश्च पृथग्विधाः खादंतो
नरमांसानि पिबंतः शोणितानि च ३४ करालाः पिंगलाश्चैव शैलदंता रजस्वलाः जटिला दीर्घशंखाश्च पंचपादा महोदराः ३५

राम॰
१९

© Dharmartha Trust J&K. Digitized By eGangotri

३६ ३८ भक्ष्याशिताः भृशं संतर्पिताः हंसपादेन्द्रगतिरीसादानेधिग्नसवाहुपंस शंउकृपिनाहत्यर्थः ३७ विकुक्षिकाः विपुलकुक्षयः ४० ४१ ४२ ४३ ४४

पञ्चारंगुलयोरूक्षा विरूपा भैरवस्वनाः घंटाजालावसक्ताश्च नीलकंठविभूषणाः ३६ सपुत्रदाराः सक्रूराः सदुर्दंशाः सनिर्घृणाः
विविधानि च रूपाणि तत्रादृश्यंत रक्षसां ३७ पीत्वा च शोणितं तत्र शः पानमन्नूगणाशीयरे ३ दंष्टरं भिदं मे ध्यं रहस्वा हि तिवाब्रुवन्
३८ मेदोमज्जास्थिरक्तानां वसानां च भृशाशिताः परमांसानि खादंतः क्रव्यादा मांसजीविनः ३९ वसां चैवापरे पीत्वा यय धावन्
विकुक्षिकाः नानावक्त्रास्तथा रौद्राः क्रव्यादा विशितानाः ४० अयुतानि च तत्रासन् प्रयुतान्यर्बुदानि च रक्षसां घोररूपाणां मह
तां क्रूरकर्मणां ४१ मुदितानां वितृप्तानां तस्मिन्महति वैशसे समेतानि च बहून्यासन् भूतानि च जनाधिप ४२ प्रत्यूषकाले शि
बिरात्प्रतिगंतुमियेष सः नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः ४३ पाणिना सह संश्लिष्ट एकीभूत इव प्रभो दुर्गमां प
दवीं गत्वा विरराज जनक्षये ४४ युगांते सर्वभूतानि भस्म कृत्वेव पावकः यथाप्रतिज्ञं तत्कर्म कृत्वा द्रौणायनिः प्रभो ४५
दुर्गमां पदवीं गच्छन् पितुरासीद्गतज्वरः यथैव संसुप्तजने शिबिरे प्राविशन्निशि ४६ तथैव हत्वा निःशब्दे निश्चक्राम नरर्षभः नि
ष्क्रम्य शिबिरात्तस्मात्ताभ्यां संगम्य वीर्यवान् ४७ आचख्यौ कर्म तत्सर्वं हृष्टः संहर्षयन्विभो तावथाचख्यतुस्तस्मै प्रियं प्रियक
रौ तदा ४८

© Dharmartha Trust J&K. Digitized By eGangotri

पांचालान्संजयांश्चैवविनिकृत्तान्सहस्रशः प्रीत्याचोच्चैस्तत्क्रोशन्नतथैवास्फोटयंस्तलान् ४९ एवंविधाहिसारात्रिःसोमका
नांजनक्षये प्रसुप्तानांप्रमत्तानामासीत्सुभृशदारुणा ५० असंशयंहिकालस्यपर्यायोदुरतिक्रमः तादृशानिहतायत्रकृत्वास्मा
केजनक्षयं ५१ धृतराष्ट्रउवाच प्रागेवसुमहत्कर्मद्रौणिनेतन्महारथः नाकरोदीदृशंकस्मान्मत्पुत्रविजयेधृतः ५२ अथकस्मा
द्धतेक्षुद्रेकर्मेदंकृतवानसौ द्रोणपुत्रोमहात्मासतन्मेशंसितुमर्हसि ५३ संजयउवाच तेषांनूनंभयात्रासौकृतवानकुरुनंदन अ
सान्निध्याद्धिपार्थानांकेशवस्यचधीमतः ५४ सात्यकेश्चापिकर्मेदंद्रोणपुत्रेणसाधितं कोहितेषांसमक्षंतान्हन्यादपिमरुत्पतिः
५५ एतदीदृशकंवृत्तंराजन्सुप्तजनेविभो ततोजनक्षयंकृत्वापांडवानांमहात्ययं ५६ दिष्ट्यादिष्ट्येतिचान्योन्यंसमेत्योचुर्महारथाः
पर्यष्वजन्तत्तोद्रौणिंताभ्यांसंप्रतिनंदितः ५७ इदंहर्षात्तुसुमहदाददेवाक्यमुत्तमं पांचालानिहताः सर्वेद्रौपदेयाश्चसर्वशः
५८ सोमकामत्स्यशेषाश्चसर्वेविनिहतामया इदानीकृतकृत्याःस्मयामतत्रैवमाचिरं ५९ यदिजीवतिनोराजातस्मैशंसामहेव
यं ५९ इतिमहाभारतेसौप्तिकेपर्वणि ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

तेहत्वा १ ४ चिवादिष्टतपक्रुपितमिछून ५ ६ ७ ८ ९ १० ११ १२ ॥ ॥ ५

संजयउवाच तेहत्वासर्वपांचालान्द्रौपदेयांश्चसर्वशः आगछन्सहितास्तत्रयत्रदुर्योधनोहतः १ गत्वाचैनमपश्यंस्तेकिंचि
त्प्राणंजनाधिपं ततोरथेभ्यःप्रस्कंद्यपरिवव्रुस्तवात्मजं २ तंभग्नसक्थंराजेंद्रंकृछ्रप्राणमचेतसं वमंतंरुधिरंवक्त्रादपश्यन्वसुधा
तले ३ वृतंसमंताद्बहुभिःश्वापदैर्घोरदर्शनैः शालावृकगणैश्चैवभक्षयिष्यद्भिरंतिकात् ४ निवारयंतंकृछ्रात्तान्श्वापदांश्च
चिखादिषून् विचेष्टमानंमह्यांचसुभृशंगाढवेदनं ५ तंशयानंतथादृष्ट्वाभूमौस्वरुधिरोक्षितं हतशिष्टास्त्रयोवीराःशोका
र्ताःपर्यवारयन् ६ अश्वत्थामाकृपश्चैवकृतवर्माचसात्वतः तैस्त्रिभिःशोणितादिग्धैर्निश्वसद्भिर्महारथैः ७ शुशुभेसंवृतो
राजावेदीत्रिभिरिवाग्निभिः तेतंशयानंसंप्रेक्ष्यराजानमतथोचितं ८ अविसह्येनदुःखेनततस्तेरुरुदुस्त्रयः ततस्तुरुधि
रंहस्तैर्मुखान्निर्मृज्यतस्यहि रणेराज्ञःशयानस्यकृपणंपर्यदेवयन् ९ कृपउ० नदैवस्यातिभारोस्तियदयंरुधिरोक्षितः एका
दशचमूभर्ताशेतेदुर्योधनोहतः १० पश्यचामीकराभस्यचामीकरविभूषितां गदांगदाप्रियस्येमांसमीपेपतितांभुवि ११ इ
यमेनंगदाशूरंनजहातिरणेरणे स्वर्गायापिव्रजंतंहिनजहातियशस्विनं १२ ॥ ॥ ॥ ५

© Dharmartha Trust J&K Digitized By eGangotri

सौ० टी० १२ १४ १५ १६ मांसहेतवः मांसार्थिनः १७ १८ १९ २० २१ २२ २३ २४ २५ ५

२१ पश्येमांसहवीरेणजांवूनदविभूषितां शयानांशयनेहर्म्येभार्यांप्रीतिमतीमिव १३ योयंमूर्धाभिषिक्तानामग्रेयातःपरंतपः स
हतोद्य सतेपांसून्पश्यकालस्यपर्ययं १४ येनाज्ञौनिहताभूमावशेरतहतद्विषः सभूमौनिहतःशेतेकुरुराजःपरैरयं १५ भया
न्नमंतिराजानोयस्यस्मक्षात्रसंघशः सवीरशयनेशेतेक्रव्याद्भिःपरिवारितः १६ उपासतद्विजाःपूर्वमर्थहेतोर्यमीश्वरं उपासते
चतंत्वद्यक्रव्यादामांसहेतवः १७ संजयउवाच तंशयानंकुरुश्रेष्ठंततोभरतसत्तम अश्वत्थामासमालोक्यकरुणंपर्यदेवयत १८
आहुस्त्वांराजशार्दूलमुख्यंसर्वधनुष्मतां धनाध्यक्षोपमंयुद्धेशिष्यंसंकर्षणस्यच १९ कथंविवरमद्राक्षीद्भीमसेनस्तवानघ
वलिनंकृतिनंनित्यंसचपापात्मवान्नृपः २० कालोनूनंमहाराजलोकेस्मिन्वलवत्तरः पश्यामोनिहतंत्वांचभीमसेनेनसंयुगे २१
कथंत्वांसर्वधर्मज्ञंक्षुद्रःपापोवृकोदरः निकृत्याहतवान्मंदोनूनंकालोदुरत्ययः २२ धर्मयुद्धेह्यधर्मेणसमाहूयौजसामृधे
गदयाभीमसेनेननिर्भिन्नेसक्थिनीतव २३ अधर्मेणहतस्याजौमृद्यमानंपदाशिरः यउपेक्षितवान्क्षुद्रंधिक्कृष्णंधिग्युधि
ष्ठिरं २४ युद्धेष्वपवदिष्यंतियोधानूनंवृकोदरं यावत्स्थास्यंतिभूतानिनिकृत्यास्यसिपातितः २५ ॥ ॥ राम०

२१

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८॥

पा।

ननुरामोऽब्रवीद्राजन्त्वांसदायदुनंदनः दुर्योधनसमोनास्तिगद इतिवीर्यवान २६ श्लाघतेत्वांहिवार्ष्णेयोराजन्संसत्सुभारतसशि
ष्योममकौरव्योगदायुद्ध इतिप्रभो यांगतिंक्षत्रियस्याहुः प्रशस्तांपरमर्षयः हतस्याभिमुखस्याजौप्राप्तस्त्वमसितांगतिं २८
दुर्योधननशोचामित्वामहंपुरुषर्षभ हतपुत्रौतुशोचामिगांधारींपितरंचते २९ भिक्षुकौविचरिष्येतेशोचंतौपृथिवीमिमां धि
गस्तुकृष्णंवार्ष्णेयमर्जुनंचापिदुर्मतिं ३० धर्मज्ञमानिनौयौत्वांवध्यमानमुपेक्षतां पांडवाश्चापितेसर्वेकिंवक्ष्यंतिनराधि
प ३१ कथंदुर्योधनोस्माभिर्हतइत्यनपत्रपाः धन्यस्त्वमसिगांधारेयस्त्वमायोधनेहतः ३१ प्रायशोऽभिमुखःशत्रून्धर्मेणपुरुष
र्षभ हतपुत्राहिगांधारीनिहतज्ञातिबांधवा ३२ प्रज्ञाचक्षुश्चदुर्धर्षःकांगतिंप्रतिपत्स्यते धिगस्तुकृतवर्माणांमांकृपंचमहार
थं ३४ येवयंनगताःस्वर्गंत्वांपुरस्कृत्यपार्थिवं दातारंसर्वकामानांरक्षितारंप्रजाहितं ३५ यद्वयंनानुगच्छामस्त्वांधिगस्मान्नरा
धमान कृपस्यतववीर्येणाममचैवपितुश्चमे ३६ सभृत्यानांनरव्याघ्ररत्नवंतिगृहाणिवै तवप्रसादादस्माभिःसमित्रैःसहबांधवैः
३७ अवाप्ताःक्रतवोमुख्याबहवोभूरिदक्षिणाः कुतश्चापीदृशंपापाःप्रवर्तिष्यामहेवयं ३८॥ ॥ ॥ ॥

प्रति ४

© Dharmartha Trust J&K. Digitized By eGangotri

३९ ध्रुस्थामहेमस्मीमवेम ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ॥ ६

यादृशेनपुरस्कृत्यत्वंगतःसर्वपार्थिवान् वयमेवत्रयोराजन्नगच्छंतंपरमांगतिं ३९ यद्यहंनोनानुगच्छामसत्तेनधक्ष्यामहेवयं तन्स्वर्गो
हीनाहीनार्थाःस्मरंतः सुकृतस्यते ४० किंनामतद्भवेत्कर्मयेनत्वांनव्रजामवै दुःखंनूनंकुरुश्रेष्ठचरिष्याममहीमिमां ४१ हीना
नांनस्त्वयाराजन्कुतःशांतिःकुतःसुखं गत्वैवत्तमहाराजसमेत्यसर्वमहारथान् ४१ यथाज्येष्ठंयथाश्रेष्ठंपूजयेववचनान्म
म आचार्यध्वजपित्वावकेतंसर्वधनुष्मतां ४३ हतंमयाधशंसेथाधृष्टद्युम्नंनराधिपं परिष्वजेथाराजानंबाल्हिकंसुमहारथं
४४ सैंधवंसोमदत्तंचभूरिश्रवसमेवच तथापूर्वगतानन्यान्स्वर्गेपार्थिवसत्तमान् ४५ अस्मद्वाक्यात्परिष्वज्यसंपृच्छेस्त्वमना
मयं संजयउवाच इत्येवमुक्त्वाराजानंभग्नसक्थमचेतनं अश्वत्थामासमुद्वीक्ष्यपुनर्वचनमब्रवीत् ४६ दुर्योधनजीवसि
त्वंवाक्यंश्रोत्रसुखंशृणु सप्तपांडवतःशेषाधार्तराष्ट्रास्त्रयोवयं ४७ तेचैवभ्रातरःपंचवासुदेवोथसात्यकिः अहंचकृतवर्मा
कृपः शारद्वतस्तथा ४८ द्रौपदेयाहताःसर्वेधृष्टद्युम्नस्यचात्मजाः पांचालानिहताःसर्वेमत्स्यशेषंचभारत ४९ कृतेप्रति
कृतंपश्यहतपुत्राहिपांडवाः सौप्तिकेशिबिरंतेषांहतंसनरवाहनं ५० ॥ ॥ ॥ ॥

८३

© Dharmartha Trust J&K. Digitized By eGangotri

५२ ५२ नमेकरोद्गितिपापः कंठगतप्राणोप्यभिनंदतिपापिनं द्रौणिंत्रमसवाल्लघ्नंयांस्तुभुक्तकृतान्तिव ५३

मपावपापकर्मासौध्रष्टद्युम्नोमहीपते अविश्यशिविरंरात्रौपश्चमारेणमारितः ५१ दुर्योधनस्ततांवाचंनिशम्यमनसःप्रियां प्रति
लभ्यपुनश्चेतनइदंवचनमब्रवीत् ५२ नमेकरोत्तत्गांगेयोनकर्णोनचतेपिता पत्वयाकृपभोजाभ्यांसहितेनाद्यतेत ५३ सचसेना
पतिःक्षुद्रोहतःसार्धेशिखंडिना तेनमन्येनृपवनासममात्मानमघवे ५४ स्वस्तिप्राप्नुतभद्रंवः स्वर्गेनःसंगमःपुनः इत्येवमुक्त्वा
तूष्णींसकुरुराजोमहामनाः ५५ प्राणानुत्सृज्यवीरः सुहृदांदुःखमुत्सृजन् अपक्रामद्दिवंपुण्यांशरीरंक्षितिमाविशत् ५६
एवंतेनिधनंयातःपुत्रोदुर्योधनोनृप अग्रेयात्वारणेशूरः पश्चाद्विनिहतःपरैः ५७ तथैवतेनयरिष्वक्ताः परिष्वज्यवतेनपं पु
नःपुनःप्रेक्षमाणास्वकान्यारुरुहुरथान ५८ इत्येवंद्रोणपुत्रस्यनिशम्यकरुणांगिरं प्रत्युषःकालेशोकार्त्तःप्राद्रवन्नगरंप्रति
५९ एवमेषःक्षयोवृत्तः कुरुपांडवसेनयोः घोरोविशसनोरौद्रोराजन्दुर्मंत्रितेतव ६० तवपुत्रेगतेस्वर्गंशोकार्तस्यममानघ
ऋषिदत्तंप्रनष्टंनहिदिव्यदर्शित्वमघवे ६१ वैशंपायनउवाच इतिश्रुत्वासनृपतिः पुत्रस्यनिधनंतदा निश्वस्यदीर्घमुष्णंचततश्चिंता
परोभवत् ६२ इतिमहाभारतेसौसिकपर्वसमाप्तं ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सौप्ती०
२३

जस्य १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ श्लो ९

क्ष ५

नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ वैशंपायनउवाच तस्यांरात्र्यांव्यतीतायांधृष्टद्युम्नस्यसारथिः
शशंसधर्मराजायसौप्तिकेकदनंकृतं १ सूतउ० द्रौपदेयामहाराजद्रुपदस्यात्मजैः सह प्रमत्तानिशिविश्वस्ताः स्वपंतः शिविरे
स्वके २ कृतवर्मणानृशंसेनगौतमेनकृपेणच अश्वत्थाम्नाचपापेनहतंवः शिविरंनिशि ३ एतैर्नरगजाश्वानांप्रासशक्तिपरश्व
धैः सहस्राणिनिकृंतद्भिर्निःशेषंतेबलंकृतं ४ छिद्यमानस्यमहतोवनस्येवपरश्वधैः शुश्रुवेसुमहान्शब्दोबलस्यतवभारत ५ अ
हमेकोविशिष्टस्तस्मात्सैन्यान्महामते मुक्तः कथंचिद्धर्मात्मन्व्यग्रस्यकृतवर्मणः ६ तच्छ्रुत्वावाक्यमशिवंकुंतीपुत्रोयुधिष्ठिरः पपा
तमह्यांदुर्धर्षः पुत्रशोकसमन्वितः ७ पतंतंतमतिक्रम्यपरिजग्राहसात्यकिः भीमसेनोर्जुनश्चैवमाद्रीपुत्रौचपांडवौ ८ लब्धचे
तास्तुकौंतेयः शोकविह्वलयागिरा जित्वाशत्रूनजितः पश्चात्पर्यदेवयदार्तवत् ९ दुर्विदागतिरर्थानामपियेदिव्यचक्षुषः जी
यमानाजयंत्यन्येजयमानावयंजिताः १० हत्वाभ्रातॄन्वयस्यांश्चपितॄन्पौत्रान्सुहृद्गणान् बंधूनमात्यान्पौत्रांश्चजित्वासर्वान्जि
तावयं ११ अनर्थोर्थसंकाशस्तथानर्थोर्थदर्शनः जयोयमजयाकारोजयस्तस्मात्पराजयः १२ यज्जित्वातप्यतेपश्चादापन्नइवदु
र्मतिः कथंमन्येतविजयंततोजितः परैः १३ ॥ ॥ ॥ ॥ ॥

ग्राम०
२२

© Dharmartha Trust J&K. Digitized by eGangotri

१५ १५ अस्मुचंनपुत्राः कर्णास्यकर्णात प्रमादस्त्वस्मत्कृतात्त्वसान्निध्यात् १६ १२ तत्तुत्राणिनानाविधानिशस्त्राणिवतेषांहोमः श्रेष्ठेयोपचन्तंतत

येषामर्थायपायंसाह्निनयसमस्तद्दृधैः निर्जितैरश्वमत्तैर्हिविजित्ताजितकाशिनः १४ कर्णानामालदंष्ट्रस्मावक्त्रजिह्वसमंयुगे वा
पव्यात्तस्पोरेष्ट्रसञ्ज्यातलस्वननादिनः १५ क्रुद्धस्यनरसिंहस्यसंग्रामेष्वपलायिनः येवमुखंतत कर्णांप्रमादान्नरमेहताः १६ २
यद्वद्दंशरवर्षाभिमंतात्वाचितवाहनवाजिमुक्तशक्तष्टिमीनव्वजानागनक्रशरासनावर्तेमहेषुफेनं १७ संग्रामचंद्रेदरथवेगलंद्रोणा
र्णवंस्थानलनेमिघोषं येतेरस्तत्वाम्वचशस्त्रैनोभिरेत्तराजपुत्रानिहताः प्रमादात १८ नहिप्रमादात्परमोस्तिकश्चिद्वधोनराणां
मिहजीवलोके प्रमत्तमर्थाहिनरंसमंतात्यजंत्यनर्थाश्चसमाविशंति १९ ध्वजोत्तमाग्रोच्छ्रितधूमकेतुंशरार्चिषंकोपमहासमीरं महाधनुर्ज्यातलनेमिघोषंतनुत्रनानाविधशस्त्रहोमं २० महाचमूकक्षवराभिपन्नंमहाहवेभीष्ममयाग्निदाहं येसेहुरात्तायुधतीक्ष्णवेगंतेराजपुत्रानिहताः प्रमादात २१ नहिप्रमत्तेननरेणशक्यंविद्यातपःश्रीर्विपुलंयशोवा पश्यप्रमादेननिनिहत्यशत्रूनसर्वान्महेंद्रंसुखमेधमानं २२ इंद्रोपमानपार्थिवपुत्रपौत्रान्पश्याविशेषेणहतान्प्रमादात तीर्त्वासमुद्रंवणिजःसमृद्धाःमग्नाःकुमिवहेलमानाः २३ ॥ ॥ ॥

त्रनानाविधशस्त्रहोम २० भीष्ममयंभीष्मवधानंत्र्यग्निदाहं भीष्मरूपेणाग्निनादाहमिसर्थः तेमहिरेसोढवंतः २१ २२ २३

© Dharmartha Trust J&K. Digitized By eGangotri

सौ०टी०
२४

२४ २५ २६ २७ २८ २९ ३० ३१ . अध्यायः सः सदृष्ट्वा १ ॥ स्याप ॥ ॥ ध ॥

ऽमर्षितैर्येनिहताःशयानानिःसंशयंतेत्रिदिवंप्रपन्नाःकृष्णांतुशोचामिकथंनुसाध्वीशोकार्णवेसाद्यविनशत्यतीति २४ भ्रातॄंश्च
पुत्रांश्चहतान्निशम्यपांचालराजंपितरंचवृद्धं ध्रुवंविसंज्ञापतिताएथिव्यांसाशोष्यतेशोककृशांगयष्टिः २५ तच्छोकजंदुः
खमपारयंतीकथंभविष्यत्युचितासुखानां पुत्रक्षयभ्रातृवधप्रणुन्नाप्रदह्यमानेवहुताशनेन २६ इत्येवमार्त्तःपरिदेवयन्सराजाकु
रूणांनकुलंबभाषे गच्छानयैनामिहमंदभाग्यांसमातृपक्षामितिराजपुत्रीं २७ माद्रीसुतस्तत्परिगृह्यवाक्यंधर्मेणधर्मप्रतिमस्य
राज्ञःप्रयौरथेनालयमाशुदेव्याःपांचालराजस्यचयत्रदाराः २८ प्र[illegible]प्यमाद्रीसुत[illegible]माजमीढःशोकार्दितस्तैःसहितःसु
हृद्भिःरोरूयमाणःप्रययौसुतानामायोधनंभूतगणानुकीर्णं २९ सतत्प्रविश्याशिवमुग्ररूपंददर्शपुत्रान्सुहृदःसखींश्च भ
मौशयानान्रुधिरार्द्रगात्रान्विभिन्नदेहान्हृतोत्तमांगान् ३० सतांस्तुदृष्ट्वाभृशमार्तरूपोयुधिष्ठिरोधर्मभृतांवरिष्ठःउच्चैः
प्रचुक्रोशचकौरवाग्र्यःपपातचोर्व्यांसगणोविसंज्ञः ३१ इतिसौप्तिकेपर्वणिऐषीके वैशंपायनउ० सदृष्ट्वानिहतान्संख्ये
पुत्रान्पौत्रान्सखींस्तथा महादुःखपरीतात्माबभूवजनमेजयः १ ॥ ॥ ॥ ॥

एम०
२५

२ ३ ४ ६ ७ ८ ९ १० ११ १२ १३ १४ दिष्टेति पुत्रनाशापेक्षयाराज्ञ्याप्रासिस्वरवं तवमहदित्यधि न्देप४१

६५

ततस्तस्य महान्शोकः प्रादुरासीन्महात्मनः स्मरतः पुत्रपौत्राणां भ्रातॄणां स्वजनस्य ह २ तमभ्रुपरिपूर्णाक्षं वेपमानमचेतनं स १० १४
ल्हाभ्रुशसंविग्नाः ... मांस्यपांचक्रिरेततः ३ ततस्तस्मिन्कुशोकत्से रथेनादित्यवर्चसा नकुलः कृष्णया ... सार्धमुपायात्परमा
र्तया ४ उपप्लव्यंगतनासात्तच्छ्रुत्वासमहद्विप्रियं तदाविनाशं सर्वेषां पुत्राणां व्यथिताभवत् ५ कंपमानेव कदलीवातेनाभिस
मीरिता कृष्णाराजानमासाद्य शोकार्त्ता न्यपतद्भुवि ६ बभूववदनं तस्याः सहसाशोककर्षितं फुल्लपद्मपलाशाक्ष्यास्तमोग्रस्तर
वोऽशमान् ७ ततस्तांपतितांदृष्ट्वासंरंभीसत्यविक्रमः बाहुभ्यांपरिजग्राहसमुत्पत्यवृकोदरः ८ सासमाश्वासिताते न भीमसेनेन
भामिनी रुदतीपांडवंकृष्णासहभ्रातरंतमब्रवीत् ९ दिष्ट्याराजन्नवाप्येमामखिलांभोक्ष्यसेमहीं आत्मजान्क्षत्रधर्मेणसंप्र
दायययमायवै १० दिष्ट्यात्वंकुशलीपार्थमत्तमातंगगामिनं अवाप्यपृथिवींकृत्स्नांसौभद्रंनस्मरिष्यसि ११ आत्मजान्क्षत्रधर्मेण
शत्रुत्वाशस्त्रान्निपातितान् उपप्लव्येमयासार्द्धंदिष्ट्यात्वंनस्मरिष्यसि १२ प्रसुप्तानांवधंकृत्वाद्रौणिनापापकर्मणा शोकस्त
पतिमांपार्थद्रुताशनइवाशयं १३ तस्यपापकृतोद्रौणेर्नचेदद्यत्वयारणे ह्रियतेसानुबंधस्यप्रुधिविक्रम्यजीवितं १४

© Dharmartha Trust J&K. Digitized by eGangotri

सों०
२५

१५ १६ १७ १८ २० २१ २२ २३ ॥

इहैव प्रायमासिष्ये तन्निबोधत पांडवाः नचेत्फलमवाप्नोति द्रोणिः पापस्य कर्मणः १५ एवमुक्त्वा ततः कृष्णा पांडवं प्रत्युपाविशत्
युधिष्ठिरं याज्ञसेनी धर्मराजं यशस्विनी १६ दृष्ट्वोपविष्टां राजर्षिः पांडवो महिषीं प्रियां प्रत्युवाच स धर्मात्मा द्रौपदीं चारुदर्शनां
१७ धर्म्यं धर्मेण धर्मज्ञे प्राप्तास्ते निधनं शुभे पुत्रास्ते भ्रातरश्चैव तान्न शोचितुमर्हसि १८ स कल्याणि वनं दुर्गं दूरं द्रोणिरितो गतः त
स्य त्वं पातनं संख्ये कथं ज्ञास्यसि शोभने १९ द्रौपद्युवाच द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः निहत्य संख्ये तं पापं पश्येयं
मणिमाहृतं २० राजन् शिरसि तं कृत्वा जीवेयमिति मे मतिः इत्युक्त्वा पांडवं कृष्णा राजानं चारुदर्शना २१ भीमसेनमथागत्य परमं वा
क्यमब्रवीत् त्रातुमर्हसि मां भीम क्षत्रधर्ममनुस्मरन् २२ जहि तं पापकर्माणं शंबरं मघवानिव नहि ते विक्रमे तुल्यः पुमानस्तीह कश्चन
२३ श्रुतं तत्सर्वलोकेषु परमव्यसने यथा द्वीपोऽभूस्त्वं हि पार्थानां नगरे वारणावते २४ हिडिंबदर्शने चैव तथा त्वमभवो गतिः त
था विराटनगरे कीचकेन भृशार्दितां २५ मामप्युद्धृतवान्कृच्छ्रात्पौलोमीं मघवानिव यथैतान्यकृथाः पार्थ महाकर्माणि वै पुरा २६ त
था द्रौणिममित्रघ्न विनिहत्य सुखी भव तस्या बहुविधं दुःखं निशम्य परिदेवितं २७ ॥

म२

विकर्ण४
राम०
२५

© Dharmartha Trust J&K. Digitized By eGangotri

२८ २९ प॰ ३ ३० पदं गमनमार्गं विदित्वा गृहीत्वा आलक्ष्य ३१ अध्यायः तस्मिन् १ २ ३ ४ ५ ६ ७ ८

अमर्षितः कौंतेयो भीमसेनो महाबलः स कांचनविचित्रांगमारुरोह महारथं २८ आदाय रुचिरं चित्रं समार्गणगुणं धनुः नकुलं सा
रथिं कृत्वा द्रोणपुत्रवधे धृतः २९ विस्फार्य सशरं चापं तूर्णमश्वानचोदयत् ते हयाः पुरुषव्याघ्रचोदिता वातरंहसः ३० वेगेन त्वरिता प्रे२
जग्मुर्हरे शीघ्रगामिनः शिविरात्स्वाद्गृहीत्वा स रथस्य पदमच्युतः द्रोणपुत्ररथस्याशु ययौ वेगेन वीर्यवान् ३१ इति सौप्तिके ऐषीकप
र्वणि वैशंपायन उवाच तस्मिन्प्रयाते दुर्धर्षे यदूनामृषभस्ततः अब्रवीत्पुंडरीकाक्षः कुंतीपुत्रं युधिष्ठिरं १ एष पांडव ते भ्राता पुत्र
शोकपरायणः जिघांसुर्द्रौणिमाक्रंदे एक एवाभिधावति २ भीमः प्रियस्ते सर्वेभ्यो भ्रातृभ्यो भरतर्षभ तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्यु
पपद्यसे ३ यत्तदाचष्ट पुत्राय द्रोणः परपुरंजयः अस्त्रं ब्रह्मशिरो नाम दहेत्तत्पृथिवीमपि ४ तन्महात्मा महाभागः केतुः सर्वधनुष्मतां
प्रत्यपादयदाचार्यः प्रीयमाणो धनंजयं ५ तं पुत्रोप्येक एवैनमन्वयाचदमर्षणः ततः प्रोवाच पुत्राय नातिहृष्टमना इव ६ विदितं
चापलं ह्यासीदात्मजस्य महात्मनः सर्वधर्मविदाचार्यः सोन्वशात्स्वं सुतं ततः ७ परमापद्गतेनापि न स्म तात त्वया रणे इदमस्त्रं प्रयो
क्तव्यं मानुषेषु विशेषतः ८ सतर॥ वी ३ प ३

© Dharmartha Trust J&K Digitized By eGangotri

स्प

सौ०प० ९ १० ११ १२ १३ १४ १५ १९ २० २१ स्थाना[illegible]सि मेमर्त्यंदात्तु मिछसितेनविना।यिग्रहाणान्नदीपे।स्त्रेम॥ ॥. ९७ .

२६

इत्युक्तवान्गुरुः पुत्रंद्रोणः पश्चादयोक्तवान् नत्वंजातुसतांमार्गेस्थातेतिपुरुषर्षभ ९ सतदाज्ञायदुष्टात्मापितुर्वचनमप्रियं नि
राशः सर्वकल्याणैः शोकात्पर्यचरन्महीं १० ततस्तदाकुरुश्रेष्ठवनस्थेत्वयिभारत अवसद्द्वारकामेत्यवृष्णिभिः परमार्चितः सक
दाचित्समुद्रांतेवसन्द्वारवतीमनु एकएकंसमागम्यमामुवाचहसन्निव ११ यत्तदुग्रंतपः कृष्णचरन्सत्यपराक्रमः अगस्त्याद्भरता
चार्यः प्रत्यपद्यतमेपिता १२ अस्त्रंब्रह्मशिरोनामदेवगंधर्वपूजितं तदद्यमयिदाशार्हयथापितरिमेतथा १४ अस्मत्तस्तदुपादा
यदिव्यमस्त्रंयदूत्तम ममाप्यस्त्रंप्रयच्छ[illegible]त्वंचक्रंरिपुहरंरणे १५ सराजन्प्रीयमाणेनमयाप्युक्तः कृतांजलिः याचमानः प्रयत्नेन ६३
मत्तोस्त्रंभरतर्षभ १६ देवदानवगंधर्वमनुष्यपतगोरगाः नसमाममवीर्यस्यशतांशेनापिपिंडिताः १७ इदंधनुरियंशक्तिरि[illegible]चक्र
मियंगदा यद्यदिच्छ[illegible]सिचेदस्त्रंमत्तस्तत्तद्ददामिते १८ यच्छक्नोषिसमुद्यंतुंप्रयोक्तुमपिवारणे तद्गृहाणविनास्त्रेणयन्मेदातुम
भीप्सति १९ ससुनाभंसहस्रारंवज्रनाभमयस्मयं वव्रेचक्रंमहाभागोमत्तः स्पर्धन्मयासह २० गृहाणचक्रमित्युक्तोमयातुतद
नंतरं जग्राहोपेत्यसहसाचक्रंसव्येनपाणिना २१ ॥ ॥ ॥ ॥ ॥

सौ०

२१

कृ५

© (c) Dharmartha Trust J&K. Digitized By eGangotri

२२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ॥ ॥ ॥ ॥

५८२

नैवैनमशकत्स्थानात्संचालयितुमच्युतः अथैनं दक्षिणेनापि गृहीतुमुपचक्रमे २२ सर्वयत्नबलेनापि गरुडेनैव मिदं न ततः न

नः सर्वबलेनापि यदैनं न शशाक ह २३ उद्धर्तुं वा चालयितुं द्रौणिः परमदुर्मनाः कृत्वा यत्नं परिश्रान्तः स न्यवर्तत भारत २४ निवृत्त

मनसं तस्मादभिप्रायाद्विचेतसं अहमामंत्र्य संविग्नमश्वत्थामानमब्रुवं २५ यः सदेवमनुष्येषु प्रमाणं परमं गतः गांडीवधन्वा श्वेता

श्वः कपिप्रवरकेतनः २६ यः साक्षाद्देवदेवेशं शितिकंठमुमापतिं द्वंद्वयुद्धे पराजिष्णुस्तोषयामास शंकरं २७ यस्मात्प्रियतरो ना

स्ति मम ग्रामः पुरुषो भुवि नादेयं यस्य मे किंचिदपि दाराः सुतास्तथा २८ तेनापि सुहृदा ब्रह्मन्पार्थेनाक्लिष्टकर्मणा नोक्तपू

वा४ र्वमिदं वाक्यं यत्त्वं मामभिभाषसे २९ ब्रह्मचर्यं महद्घोरं तीर्त्वा द्वादशवार्षिकं हिमवत्पार्श्वमास्थाय यो मया तपसार्जितः ३० स

मानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत सनत्कुमारस्तेजस्वी प्रद्युम्नो नाम मे सुतः ३१ तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं रणे

न प्रार्थितमभून्मूढ यदिदं प्रार्थितं त्वया ३२ रामेणातिबलेनैतन्नोक्तपूर्वं कदाचन न गदेन न सांबेन यदिदं प्रार्थितं त्वया ३३

द्वारकावासिभिश्चान्यैर्वृष्ण्यंधकमहारथैः नोक्तपूर्वमिदं जातु यदिदं प्रार्थितं त्वया ३४ ॥ ॥

© Dharmartha Trust J&K Digitized By eGangotri

ए०टी: ३५ ३६ ३७ ३८ ३९ ४० ४१ अध्यायः एवं १ ११ २ ३ ४ ५ ॥ भी२ ॥ ॥ ७

वै१ प्रति२

२७ भरताचार्यपुत्रस्त्वंमानितः सर्वपार्थ चक्रेणारथिनांश्रेष्ठकंनुयत्नयुयुत्ससे ३५ एवमुक्तोमयाद्रौणिर्मामिदंवाक्यमब्रवीत् प्रद्युम्नभव
तेपूजांयोत्स्येकृष्णत्वयासह ३६ प्रार्थितंतेमयाचक्रंदेवदानवपूजितं अजेयः स्यामितिविभोसत्यमेतद्ब्रवीमिते ३७ त्वत्तोहंदुर्ल
भंकाममनवाप्यैवकेशव [illegible] यास्यामिगोविंदशिवेनाभिवदस्वमां ३८ एतत्सुनाभं [illegible]मानामवृष्णिप्रवरात्त्वयाधृतं
चक्रमप्रतिचक्रेणभुविनान्योभिपद्यते ३९ एतावदुक्त्वाद्रौणिर्मांयुग्यानश्वान्धनानिच आदायोपययौकालेरत्नानिविवि
व५ धानिच ४० ससंरंभीदुरात्माचचपलः क्रूरएवच वेदचास्त्रंब्रह्मशिरस्तस्माद्रक्ष्योवृकोदरः ४१ इतिमहाभारतेसौप्तिकेपर्वणि ॥
॥ वैशंपायनउवाच एवमुक्त्वायुधांश्रेष्ठः सर्वपाण्डवनंदनः सर्वायुधवरोपेतमारुरोहरथोत्तमं १ युक्तंपरमकांबोजैस्तुरगैर्हेम
मालिभिः आदित्योदयवर्णस्यधुरंरथवरस्यतु २ दक्षिणामवहच्छैब्यः सुग्रीवः सव्यतोभवत् पार्ष्णिवाहौतुतस्यास्तांमेघपुष्प
बलाहकौ ३ विश्वकर्मकृतादिव्यारत्नधातुविभूषिता उच्छ्रितेवरथेमायाध्वजयष्टिरदृश्यत ४ वैनतेयः स्थितस्तस्यांप्रभामं
डलरश्मिवान् तस्यसत्त्ववतः केतुर्भुजगारिरदृश्यत ५ ॥ ॥ ॥ ॥ ॥

२१

राम०

२७

© Dharmartha Trust J&K. Digitized By eGangotri

७ ६ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८

अथारोहद्धृषीकेशः केतु केतुः सर्वधनुष्मतां अर्जुनः सत्यकर्मा च कुरुराजो युधिष्ठिरः ६ अशोभेतां महात्मानौ दाशार्हमभि
तः स्थितौ रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवं ७ तावुपारोप्य दाशार्हः स्यंदनं लोकपूजितं प्रतोदेन जवोपेतान् परमा
श्वानचोदयत् ८ ते हयाः सहसोत्पेतुर्गृहीत्वा स्यंदनोत्तमं आस्थितं पांडवेयाभ्यां यदूनामृषभेण च ९ वहतां शार्ङ्गधन्वा
नमश्वानां शीघ्रगामिनां प्रादुरासीन्महाञ्छब्दः पक्षिणां पततामिव १० ते समार्छन्नरव्याघ्राः क्षणेन भरतर्षभ भीमसेनम
हेष्वासं समनुद्रुत्य वेगिताः ११ क्रोधदीप्तेक्षणं कौंतेयं द्विषदर्थे समुद्यतं नाशक्नुवन्वारयितुं समेत्यापि महारथाः १२ स ते
षां प्रेक्षतामेव श्रीमतां दृढधन्विनां ययौ भागीरथीतीरं हरिभिर्भृशवेगिभिः १३ यत्र स्म श्रूयते द्रौणिः पुत्रहंता महात्मनां
सोऽददर्श महात्मानमुदके तं यशस्विनं १४ कृष्णद्वैपायनं व्यासमासीनमृषिभिः सह तं चैव क्रूरकर्माणं घृताक्तं कुशची
रिणं १५ रजसा ध्वस्तमासीनं ददर्श द्रौणिमंतिके तमभ्यधावत्कौंतेयः प्रगृह्य सशरं धनुः १६ भीमसेनो महाबाहुस्तिष्ठ
तिष्ठेति चाब्रवीत् स दृष्ट्वा भीमधन्वानं प्रगृहीतशरासनं १७ भ्रातरौ पृष्ठतश्चास्य जनार्दनरथे स्थितौ व्यथितात्माभवद्द्रौ

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

१९ २० २१ २२ अध्यायः इंगिते १ २ ३ ४ ५ ६ ७ ८ ॥ ॥ १ ॥ ॥

त्रि३ पा३

२८ स तद्दिव्यमदीनात्मा परमास्त्रमचिंतयत तथा ब्रह्मसवैषीकां द्रोणिः सव्येन पाणिना १९ स तामापदमासाद्य दिव्यमस्त्रमुदीरयत
अमृष्यमाणस्तान्शूरान्दिव्यायुधधरान्स्थितान २० अपांडवायेति रुषा व्यसृजद्दारुणं वचः इत्युक्त्वा राजशार्दूल द्रोणपुत्रः
प्रतापवान २१ सर्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह ततस्तस्यामिषीकायां पावकः समजायत २२ प्रधक्ष्यन्निव लोकांस्त्रीन
कालांतकयमोपमः २२ इति सौप्तिके ऐषीके पर्वणि वैशंपायन उवाच इंगितेनैव दाशार्हस्तमभिप्रायमादितः द्रोणेर्बुध्वा
त्प५ महाबाहुरर्जुनं प्रत्यभाषत १ अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते द्रोणोपदिष्टं तस्यायं कालः संप्रति पांडव २ पि[illegible]तृणामा
त्मनश्चैव परित्राणाय भारत विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणं ३ केशवेनैवमुक्तोथ पांडवः परवीरहा अवातरद्
थात्तूर्णं प्रगृह्य सशरं धनुः ४ पूर्वमाचार्यपुत्राय ततोनंतरमात्मने भ्रातृभ्यश्चैव सर्वेभ्यः स्वस्तीत्युक्त्वा परंतपः ५ देवताभ्यो नमस्कृ
त्य गुरुभ्यश्चैव सर्वशः उत्ससर्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यतां ६ ततस्तदस्त्रं सहसा सृष्टं गांडीवधन्वना प्रजज्वाल महा
चिष्मद्युगांतानलसंनिभं ७ तथैव द्रोणपुत्रस्य तदस्त्रं तिग्मतेजसः प्रजज्वाल महाज्वालं तेजोमंडलसंवृतं ॥ ८ ॥ द्रम०

१९

निर्दग्धावहवब्रामनेनतत्स्काः सहस्रशः महद्भयंचभूतानांसर्वेषांसमजायत ७ सशब्दमभवद्घोरंज्वालामालाकुलंभृशं च
चालेचमहीकृत्स्नासपर्वतवनद्रुमा १० तेत्वस्त्रतेजसीलोकांस्तापयंतीव्यवस्थिते महर्षीसहितौतत्रदर्शयामासतुस्तदा ११
नारदः सर्वभूतात्माभरतानांपितामहः उभौशमयितुंवीरौभारद्वाजधनंजयौ १२ तौमुनीसर्वधर्मज्ञौसर्वभूतहितैषिणौ दी
सयोरस्त्रयोर्मध्येस्थितौपरमतेजसौ १३ तदंतरमनाधृष्यावुपगम्ययशस्विनौ आस्तामृषिवरौतत्रज्वलिताविवपावकौ १४
प्राणभृद्भिरनाधृष्यौ देवदानवसंमतौ अस्त्रतेजःशमयितुंलोकानांहितकाम्यया १५ ऋषीऊचतुः नानाशस्त्रविदः
पूर्वेयेप्यतीतामहारथाः नैतदस्त्रंमनुष्येषुतैःप्रयुक्तंकथंचन १६ किमिदंसाहसंवीरौकृतवंतौमहात्ययं १६ इतिश्रीमहा
भारतेसौप्तिकेऐषीकेपर्वणि वैशंपायनउवाच दृष्ट्वैवनरशार्दूलस्तावग्निसमतेजसौ संजहारशरंदिव्यंत्वरमाणोधनंजयः १
उवाचभरतश्रेष्ठस्तावृषीप्रांजलिस्तदा प्रयुक्तमस्त्रमस्त्रेणशाम्यतामितिवैमया २ संहृतेपरमास्त्रेस्मिन्सर्वानस्मानशेषतः
पापकर्माध्रुवंद्रौणिः प्रधक्ष्यत्यस्त्रतेजसा ३ यदत्रहितमस्माकंलोकानांचैवसर्वथा भवंतौदेवसंकाशौतथासंमंतुमर्हथः ४

© Dharmartha Trust J&K. Digitized By eGangotri

सौ०टी० ५ ६ ७ ८ ९ १० ११ १२ १४ १५ १६ १७ आवर्तयितेउपसंहरति एतेनार्जुनस्यास्त्रमुपसंहरति ॥ ॥ ॥

२९७ रस्त्रं सोसंजहाराश्वं पुनरेवधनंजयः संहारो दुष्करस्तस्य देवैरपि हि संयुगे ५ विसृष्टस्य रणे तस्य परमास्त्रस्य संग्रहे अशक्तः पांडवादन्
यः साक्षादपि शतक्रतुः ६ ब्रह्मतेजोद्भवं तद्धि विसृष्टमकृतात्मना नशक्यमावर्तयितुं ब्रह्मचारिव्रतादृते ७ अचीर्णब्रह्मचर्यो यः
सृष्ट्वावर्तयते पुनः तदस्त्रं सानुबंधस्य मूर्धानं तस्य कृंतति ८ ब्रह्मचारी व्रती चापि दुरवापमवाप्य तत् परमव्यसनार्तोपि नार्जुनोस्त्र
मुमुक्षत ९ सत्यव्रतधरः शूरो ब्रह्मचारी च पांडवः गुरुवर्ती च तेनास्त्रं संजहारार्जुनः द्रौणिरथ संप्रेक्ष्य तावृषी पुरतः
स्थितौ नशशाक पुनर्घोरमस्त्रं संहर्तुमोजसा अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे द्रौणिर्दीनमना राजन्द्वैपायनमभाषत
१२ उत्तमव्यसनार्तेन प्राणत्राणमभीप्सुना मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने १३ अधर्मश्च कृतोनेन धार्तराष्ट्रं जिघांसता
मिथ्याचारेण भगवन्भीमसेनेन संयुगे १४ अतः सृष्टमिदं ब्रह्मन्मयास्त्रमकृतात्मना तस्य भूयोद्य संहारं कर्तुं नाहमिहोत्सहे १५
विसृष्टं हि मया दिव्यमेतदस्त्रं दुरासदं अपांडवायेति मुने वह्नितेजोनिम[illegible]वै १६ तदिदं पांडवेयानामंतकायाभिसंहितं अद्य
पांडुसुतान्सर्वान्जीविताद्भ्रंशयिष्यति १७ ॥ ॥ ॥ ॥ ॥ प्तम०

२९१

१९ २० २१ २२ २३ २४ २५ २६ २८ २७ ॥ ७ ॥

कृतंपापमिदंब्रह्मन्‌रोषाविष्टेनचेतसा वधमाशास्यपार्थानांमयास्त्रंसृजतारणे १८ व्यासउवाच अस्त्रंब्रह्मशिरस्तात विद्वा
न्पार्थोधनंजयः उत्सृष्टवान्‌रोषेणाननाशायतवाहवे १९ अस्त्रमस्त्रेणातरणेतवसंशयमिष्यता विसृष्टमर्जुनेनेदंपुनश्चप्र
तिसंहृतं २० ब्रह्मास्त्रमप्यवाप्येन तदुपदेशान्त्विनत्तव सर्वथैवेमीन्महावाहुर्नाकंपत धनंजयः २१ एवंधृतिमतः साधोः सर्वा
स्त्रविदुषः सतः सभ्रातृबंधोः कस्मात्त्वंवधमस्यचिकीर्षसि अस्त्रंब्रह्मशिरोयत्रपरमास्त्रेणवध्यते समाद्वादशपर्जन्यस्तद्राष्ट्रं
नाभिवर्षति २३ एतदर्थंमहावाहुः शक्तिमानपिपांडवः नविहन्यात्तदस्त्रंत्वत्प्रजाहितचि[illegible]कीर्षया २४ पांडवास्त्वंचराष्ट्रं
चसदासंरक्ष्यमेवहि तस्मात्संहरदिव्यंत्वमस्त्रमेतन्महाभुज २५ अरोषस्तवचैवास्तुपार्थाः संतुनिरामयाः नत्यधर्मेणराज
र्षिः पांडवोजेतुमिछति २६ मणिंचैवप्रयच्छायंयस्तेशिरसितिष्ठति एतदादायतेप्राणान्प्रतिदास्यंतिपांडवाः २७
द्रौणिरुवाच पांडवैर्यानिरत्नानिप्रत्याप्तानिकौरवैर्धनं अवाप्तमिहतेभ्योयंमणिर्ममविशिष्यते २८ यमावध्यभयंनास्तिश
स्त्रव्याधिक्षुधाश्रयं देवेभ्योदानवेभ्योवानागेभ्योवाकथंचन २९ ८।४

© (c) Dharmartha Trust, J&K. Digitized By eGangotri

सौ०टी०
१०

३० ३१ ३२ ३३ ३४ ३५ अध्याय: तदा १ २ ३ ४ ५ ६ ॥ ॥ ७ ॥ ॥

नचरक्षोगणभयंनतस्करभयंतथा एवंवीर्योमणिरयंनमेत्याज्यः कथंचन ३० यत्तुमेभगवानाहतन्मेकार्यमनंतरं अ
यंमणिरयंचाहमिषीकातुपतिष्यति ३१ गर्भेषुपांडवेयानाममोघंचैतदुत्तमं नचशक्तोस्मिभगवन्संहर्तुंपुनरुद्यतं ३२ एतदस्त्रम
६४ तश्चैवगर्भेषुविसृजाम्यहं नचवाक्यंभगवतोनकरिष्येमहामुने ३३ व्यासउवाच एवंकुरुनचान्यातुबुद्धिः कार्यात्वयानघ
गर्भेषुपांडवेयानांविसृज्यैतदुपारम ३४ वैशंपायनउवाच ततः परममस्त्रंतुद्रौणिरुद्यतमाहवे द्वैपायनवचः श्रुत्वागर्भेषुप्रमु
मोचह ३५ इतिसौप्तिकेऐषीकेपर्वणि वैशंपायनउवाच तदाज्ञायहृषीकेशोविसृष्टंपापकर्मणा हृष्यमाणइदंवाक्यंद्रौणिंप्र
त्यब्रवीत्तदा १ विराटस्यसुतांपूर्वंस्नुषांगांडीवधन्वनः उपप्लव्यगतांदृष्ट्वाव्रतवान्ब्राह्मणोब्रवीत् परिक्षीणेषुकुरुषुपुत्रस्त
वभविष्यति एतदस्यपरिक्षित्वंगर्भस्थस्यभविष्यति ३ तस्यतद्वचनंसाधोः सत्यमेतद्भविष्यति परीक्षिद्भविताह्येषांपुनर्वंशक
रः सुतः ४ एवंब्रुवाणंगोविंदंसात्वतांप्रवरंतदा द्रौणिः परमसंरब्धः प्रत्युवाचेदमुत्तरं ५ नैतदेवंयथात्थत्वंपक्षपातेनकेशव
वचनंपुंडरीकाक्षनचमद्वाक्यमन्यथा ६ ॥

६ ६ ६ २ ६ ६ ६ ६

एम०
१०

७ ८ ९ १० संविदंसंलापं ११ १२ १३ १४ १५ १६ १७ १८

पतिष्यन्तिनरश्रेष्ठहिरण्मैंतस्मामपोषतं विराद्दुहितः क्षमपन्नरक्षितमिच्छमि ८ श्रीभगवानुवाच अमोघः परमास्त्रस्यपातनस्तस्य
भविष्यति सतुगर्भोमृतोजातुर्दीर्घमापुरवाप्स्यति ९ त्वांतुकापुरुषंपापंविदुः सर्वेमनीषिणः असकृत्पापकर्माणंबालजीवि
तघातकं ९ तस्मात्त्वमस्यपापस्यकर्मणः फलमाप्नुहि त्रीणिवर्षसहस्राणिचरिष्यसिमहीमिमां १० अप्राप्नुवन्क्वचित्कां
चित्संविदंजातुकेनचित् निर्जनान[illegible]सहायस्त्वंदेशान्विचरिष्यसि ११ भवित्रीनहितेक्षुद्रजनमध्येषुसंस्थितिः पूयशोणि
तगंधीचदुर्गकांतारसंश्रयं १२ विचरिष्यसिपापात्मासर्वव्याधिसमन्वितः वयःप्राप्यपरिक्षित्तुवेदव्रतमवाप्यच १३ कृपाच्छा
रद्वताच्छूरः सर्वास्त्राण्युपपत्स्यते विदित्वापरमास्त्राणिक्षत्रधर्मव्रतेस्थितः १४ षष्टिंवर्षाणिधर्मात्मावसुधांपा[illegible]लयिष्यति अत
श्चोर्ध्वंमहाबाहुः कुरुराजोभविष्यति १५ परिक्षित्वामनृपतिर्मिषतस्तेसुदुर्मते अहंतंजीवयिष्यामिदग्धंशस्त्राग्नितेजसा १६
पश्यमेतपसोवीर्यंसत्यस्यचनराधम १६ व्यासउवाच यस्माद्नादृत्यकृतंत्वयास्मानक्रमंदारुणं ब्राह्मणस्यसतश्चैवयस्मात्तेवृत्तमी
दृशं १७ तस्माद्यद्देवकीपुत्रउक्तवानुत्तमंवचः असंशयंतेतद्भाविक्षत्रधर्मस्त्वयाश्रितः १८ ॥ ॥ ॥

२१

मत्ते१

सौ० टी० १९ २० २१ प्रायोपेतेनामरणार्थेयोनिर्[illegible]नोपेतं २२ २३ २४ २५ २६ २७ २८ २९ ३० ॥

३१

अश्वत्थामोवाच सहैवभवताब्रह्मंस्थास्यामिपुरुषेष्विह सत्यवागस्तुभगवानयंचपुरुषोत्तमः १९ वैशंपायनउवाच प्रदाया
थमणिंद्रौणिः पांडवानांमहात्मनां जगामविमनास्तेषांसर्वेषांपश्यतांवनं २० पांडवाश्चापिगोविंदंपुरस्कृत्यहतद्विषः कृ
ष्णद्वैपायनंचैवनारदंचमहामुनिं २१ द्रोणपुत्रस्यसहजंमणिमादायसत्वराः द्रौपदीमभ्यधावंतप्रायोपेतांमनस्विनीं २२ वै
शंपायनउवाच ततस्तेपुरुषव्याघ्राः सदश्वैरनिलोपमैः अभ्ययुः सहदाशार्हैः शिबिरंपुनरेवहि २३ अवतीर्यरथाभ्यांतु
त्वरमाणामहारथाः ददृशुर्द्रौपदींकृष्णामार्तामार्ततराः स्वयं २४ तामुपेत्यनिरानंदांदुःखशोकसमन्वितां परिवार्यव्य
के४ तिष्ठंतपांडवाः सहकेशवाः २५ ततोराज्ञाभ्यनुज्ञातोभीमसेनोमहाबलः प्रददौतंमणिंदिव्यंवचनंचेदमब्रवीत् २६ अयंभद्रे
तवमणिः पुत्रहंताजितः सते उत्तिष्ठशोकमुत्सृज्यक्षत्रधर्ममनुस्मर २७ प्रयाणेवासुदेवस्यशमार्थमसितेक्षणे यान्यु
क्तानित्वयाभीरुवाक्यानिमधुघातिनि २८ नैवमेपतयः संतिनपुत्राभ्रातरोनच नैवत्वमपिगोविंदशममिच्छतिराजनि २९
उक्तवत्यसितीव्राणिवाक्यानिपुरुषोत्तमं क्षत्रधर्मानुरूपाणितानिसंस्मर्तुमर्हसि ३० ॥ ॥ ॥ रान०

३१

३१ भिवकृतांवकुमिछतांवाद्याः निद्याः नैवस्म २१ ३३ ३५ ३६ ३७ अध्यायः १२ ३ ४ ५॥ ॥६

हतोदुर्योधनः पापोराज्यस्यपरिपंथिकः दुःशासनस्यरुधिरंपीतंविस्फुरतोमया ३१ वैरस्यगतमानृण्यंनस्मवाच्याविवक्षतां जिह्वा
मुक्तोद्रोणपुत्रोब्राह्मण्याद्गौरवेणच ३२ यशोस्यपातितंदेवि शरीरंत्ववशेषितं वियोजितश्चमणिनान्यंशितश्चायुधंभुवि ३३
द्रौपद्युवाच केवलानृण्यमाप्तास्मिगुरुपुत्रोगुरुर्मम शिरस्येतंमणिंराजाप्रतिवध्नातुभारत ३४ तंगृहीत्वाततोराजाशिरस्येवाकरो
त्तदा गुरोरुच्छिष्टमित्येवद्रौपद्यावचनादपि ३५ ततोदिव्यंमणिवरंशिरसाधारयन्प्रभुः शुशुभेसतदाराजासचंद्रइवपर्वतः ३६
उत्तस्थौपुत्रशोकार्त्ताततः कृष्णामनस्विनी कृष्णंचापिमहाबाहुः परिपप्रच्छधर्मराट् ३७ इतिश्रीमहाभारतेसौप्तिकैषीकेप ८२
र्वणि वैशंपायनउवाच हतेषुसर्वसैन्येषुसौप्तिकेतैरथैस्त्रिभिः शोचन्युधिष्ठिरोराजादाशार्हमिदमब्रवीत १ कथंनुकृष्णपापेन
क्षुद्रेणाक्लिष्टकर्मणा द्रौणिनानिहताः सर्वेममपुत्रामहारथाः २ तथाकृतास्त्रविक्रांताः सहस्रशतयोधिनः द्रुपदस्यात्म
जाश्चैवद्रोणपुत्रेणपातिताः ३ यस्यद्रोणोमहेष्वासोनप्रादादाहवेमुखं निजघ्नेरथिनांश्रेष्ठंधृष्टद्युम्नंकथंनुसः ४ किंनुतेन
कृतंकर्मतथापुत्रेणनरर्षभ यदेकः समरेसर्वानवधीन्नोगुरोः सुतः ५ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

सौ०
३०

६ ७ ८ ततइति शोकमात्मविदिति युधिष्ठिरादीनां शोकमुपनिनीषुरात्ममहात्म्यमाह आदिरिति यथा कनकं कुण्डलादेरादिर्मध्यमन्तश्चैवं महेशोऽपि जगत इत्यर्थः तर्हि सांख्याभि
मतप्रधानवदचेतनः स्यादित्याशंक्याह विचेष्टत इति कोह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यादिति श्रुतेः प्राणापानचेष्टापि ईश्वरादीनां किमुत मरणादि

श्रीभगवानुवाच ततः स देवदेवानामीश्वरेश्वरमव्ययं जगाम शरणं द्रौणिरेकस्तेनावधीद्बहून ६ प्रसन्नो हि महादेवो दद्यादमरताम
पि वीर्यं च गिरिशो येनेन्द्रमपि शातयेत ७ वेदाहं हि महादेवं तत्त्वेन भरतर्षभ यानि चास्य पुराणानि कर्माणि विविधानि च ८
आदिरेष हि भूतानां मध्यमन्तश्च भारत विचेष्टते जगच्चेदं सर्वमस्यैव कर्मणा ९ एवं सिसृक्षुर्भूतानि ददर्श प्रथमं विभुः पिता
महोऽब्रवीच्चैनं भूतानि सृज माचिरं १० हरिकेशस्तथेत्युक्त्वा भूतानां दोषदर्शिवान दीर्घकालं तपस्तेपे मग्नोऽम्भसि महातपाः
११ सुमहान्तं ततः कालं प्रतीक्ष्यैनं पितामहः स्रष्टारं सर्वभूतानां ससर्ज मनसा परं १२ सोऽब्रवीत्पितरं दृष्ट्वा गिरिशं मग्नमम्भ
सि यदि मे नाग्रजोऽस्त्यन्यस्ततः स्रक्ष्याम्यहं प्रजाः १३ तमब्रवीत्पिता नास्ति त्वदन्यः पुरुषोऽग्रजः स्थाणुरेष जले मग्नो विस्र
ब्धः कुरु वै कृतं १४ ॥ ॥

सर्वस्येश्वराधीनत्वान्नकृतास्त्रनाम्नां पुरुषेण संतापः कार्य इति भावः ९ न केवलं त्रयमेवास्य कर्म किन्तु चेष्टाकर्मापि त्वत्साहाय्योपात्त इत्याह एवमित्यादिना प्रथमं रुद्रं तमोम
विभुर्विष्णुर्महेश्वरः १० ११ अपरं चतुर्मुखं रजोमयं १३ वैकृतं विकारं १४ ॥ ॥ ॥ ॥

एन०
३२

एतदेवस्पष्टमितिसन्नर्व्वैसिद्धिप्रदंचाप्तिकानांमविष्यतीत्यभिप्रायेण २२
१५ १६ आतुरकृत्य १७ १८ १९ २० लिंगापमप्रसामर्थ्यमेवरूपेणाप्रविश्यतमसोपातितवान् एतदेवपूजितं सन्नर्वैसिद्धिप्रदं आप्तिकानां भविष्यतीत्यभिप्रायेण प्रजास्वपरि
२४ तपसेति मेमतस्साजलवासरूपेणप्रजार्थस्त्रलेनानंश्चप्रारक्तमित्येवंरूपेणाप्योषध्योवीजांकुरसंतानक्रमेणायवर्त्तते एवमेवाप्रादेतोद्वारा प्रजास्वपरि

२२

भूतान्यवसृजत्सद्दक्षादींस्तुप्रजापतीन् यैरिमंव्यकरोल्सर्वंभूतग्रामंचतुर्विधं १५ ताः सृष्टमात्राः क्षुधिताः प्रजास्सर्वाः प्र
जापतिं विभक्षयिषवोराजन्स्सहसाप्रादुर्बभूवुस्तदा १६ सभक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् आप्योमांभगवांस्त्रातुवृत्तिरासां
विधीयतां १७ ततस्ताभ्योददावन्नमोषधीः स्थावराणिच जंगमानिभूतानिदुर्बलानिबलीयसां १८ विहितान्नाः प्रजास्ता
स्ताजग्मुः सृष्टायथागतं ततोववृधिरेराजन्प्रीतिमत्यः स्वयोनिषु १९ भूतग्रामेविवृद्धेतुतुष्टेलोकगुरावपि उदतिष्ठज्जला
ज्ज्येष्ठः प्रजाश्चेमाददर्शसः २० बहुरूपाः प्रजाः सृष्टाविवृद्धाश्चस्वतेजसा चुक्रोधभगवान्रुद्रोलिंगंस्वंचाप्यविध्यत २१ तत्प्र
विद्धंतथाभूमौतथैवप्रत्यतिष्ठत तमुवाचाव्ययोब्रह्मावचोभिः शमयन्निव २२ किंकृतंसलिलेशर्वचिरकालस्थितेनते किम
र्थंचेदमुत्पाद्यलिंगंभूमौप्रवेरितं २३

वर्त्ततेततः प्रवाहरूपेणसृष्टिस्थितिकार्ययोनिर्वहितासतस्येनप्रवृत्तेकिमीश्वरेणलिंगेनादृतेसतिरीश्वरानिरोधानमसवानिसर्थः २५ २६ अध्यायः॥

त्रेतायां निरीश्वरतिरोधानान्नंतरं द्वापरयुगे कृतयुगे विना पीश्वराराधनं प्रजाः स्वाभाविकैरेव शमदमादिभिः कृतकृत्या अभवन् अतीतेतद्देवयुगे निरीश्वरास्ताः केवलेन कर्मणैव फलसिद्धिं इच्छंत्योयज्ञमकल्पयन् १२ रुद्रं ईश्वरं यज्ञस्य फलदातारं ३ योवाएतदज्ञात्वा गार्गि विदित्वा ... स्मिंल्लोके यजति जुहोति तदस्यांतवदेव

सोब्रवीत्तानतं भगवांस्तथा लोकगुरुर्गुरुं प्रजाः सृष्टाः परे रोग्याः किं करिष्याम्यनेनवै २४ तपसाधिगतं चान्नं प्रजार्थं मे पितामह औ
षध्यः परिवर्तेरन्न्यथैवं सततं प्रजाः २५ एवमुक्त्वा स सक्रोधो जगाम विमना भवः गिरिं मुंजवतः पादं तपस्तप्तुं महातपाः २६ इ
ति महाभारते सौप्तिके ऐषीके पर्वणि भगवानुवाच ततो देवयुगे तीते देवा वै समकल्पयन् यज्ञं वेदप्रमाणेन विधिवद्यष्टुमीप्स
वः १ कल्पयामासुरव्यग्रेन साधनानि हवींषि च भागार्हा देवताश्चैव यज्ञियं द्रव्यमेव च २ ता वै रुद्रमजानंत्यो याथातथ्येन देवताः
नाकल्पयंत देवस्य स्थाणोर्भागं नराधिप ३ सोकल्प्यमाने भागे तु कृत्तिवासा मखे ऽमरैः ततः साधनमन्विच्छन् धनुरादौ ससर्जह ४

वासवत् द्वीतीति क्रतिरीश्वराराधनहीनो यज्ञो नं च वानितं दर्शयति आख्यायिकामुखेनैव सोकल्प्यमाने इत्यादिना साधनं यज्ञनाशकं ४ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

लोकयज्ञोलोकेषु सर्वोमांसाधुमेवज्ञानानाद्विवासनारूपः क्रियायज्ञोगर्भाधानादिसंस्कारस्व ःगृहयज्ञः पत्नीसाध्याग्निहोत्रादिः पंचभूतनयज्ञः पंचभूतानांगुणाद्विभिर्या
चरणांवेतिस्वरूपः विषयपंतसर्वमित्यर्थः एतैसवतभिर्यज्ञैः सर्वंजगत्सृष्टं ५ नत्रमध्यमयोः शालेक्रयोर्यज्ञयोर्नाशार्थंवषमवरमयज्ञ भोईश्वरोधनुः कृतवान् किंभूतं

धुर

लोकयज्ञः क्रियायज्ञोगृहयज्ञः सनातनः पंचभूतनयज्ञैस्त्वमतज्ञेमर्वमिदंजगत ५ लोकयज्ञैर्नयज्ञैस्तु रूपहींविर
थधनुः धनुः सप्तमभूतस्पपंचर्कि प्रमाराग्नतः ६ वषट्कारोभवद्यान्नुधनुषस्तस्पभारत यज्ञांगानिचचत्वारितस्य
संनहनेभवं ततः क्रुद्धोमहादेवस्तुयाहापकार्मुकं आजागमायत्रतैवयत्रदेवः समोजितो ८ १० ॥ ॥

स्तः पंचहस्तंपंचविषयप्रमाणंलोकवासनादेहवासनाचशब्दादिविषयंवकात्यरतोनोस्तीत्यर्थः ६ वषट्कारसंज्ञेनगृहयज्ञेनतेउभेवासनेकिंविन्संकोचंगच्छत इतिसतत्स्पवासना
द्वयरूपस्पधनुषोसास्यानीयपानितयज्ञांगानिचत्वारिक्रयर्त्विंवद्दहंशास्त्रेधरापर्युदस्तत्वंचतानितस्पधनुषः लोकदेहवासनारूपस्पसन्नहनेहार्यायत्रभवन् ७ यतःय
त्रांगानिलोकेयत्राणैविनियुक्तानिमूढैः ततोहेतोः महादेवः क्रुधोयज्ञंजघानेसाहि ८

स्पष्टार्थौ ८ ४४ १०

© Dharmartha Trust J&K. Digitized by eGangotri

११ १२ रौद्रेणाऽऽहंकारेणार्पि ताऽऽहमेवयत्त्वाज्ञातावितानेनेवंरूपेणापन्नोयज्ञायर्वं अपक्रांतंमुख्याद्दिविदिषंतियज्ञेनेत्याहिशाब्दोक्ताहात्मविविदिषाख्यात्फलात्भ्रष्टः
१३ किंचित्कालंफलंभुंजानोहिविययज्ञमानरूपेणाब्धराजत तथपितेनकालान्मनोहद्रेणाच्वीपमानःसन्ततोप्यपक्रांतःस्वर्गात्च्युतोभूदित्यर्थः १४ अपक्रांतेय

तमात्तकार्मुकंहस्त्वाब्रह्मचारिणमव्ययं विव्यथेपृथिवीदेवीपर्वताश्चचकंपिरे ९ नववौपवनश्चैवनाग्निर्जज्वालचैधितःव
धमश्चापिसंविग्नंदिविनक्षत्रमंडलं १० नबभौभास्करश्चापिसोमःश्रीयुक्तमंडलः तिमिरेणाकुलंसर्वमाकाशंचाभवद्वृतं ११
अभिभूतास्ततोदेवाविषयान्नप्रजज्ञिरे नप्रत्यभाद्वयज्ञःसदेवतास्त्वमिरेतथा १२ ततःसयज्ञंविव्याधरौद्रेणाल्हृदिपत्रिणा
अपक्रांतस्ततोयज्ञोमृगोभूत्वासपावकः १३ सतुतेनैवरूपेणादिवंप्राप्यव्यराजत अचीपमाणोरुद्रेणायुधिष्ठिरनभस्तले १४
अपक्रांतेततोयज्ञेसंज्ञानप्रत्यभात्सुरान् नष्टसंज्ञेषुदेवेषुनप्राज्ञायतकिंचन १५ ॥ ॥श्रीकृष्णायगोविंदायनमोनमः

तेफलेभुंक्तेसनिर्वीर्याद्रोगर्भवासादौवज्ञानेयज्ञेपत्नौसुरानरुंद्रियाणिसंज्ञानप्रत्यभात् सुरान्प्रभवनरसर्थः १५ ॥ श्रीकृष्णायनमः ॥ ॥श्रीरामचंद्रायनमः

© Dharmartha Trust J&K. Digitized by eGangotri

त्र्यंबकः । त्रीणि अम्बकानि नेत्राणि यस्य सः त्र्यंबकः । श्रवणमननिदिध्यासनानि त्र्यंबकानि गमकानि यस्य स परमेश्वरः सवितुर्यज्ञपशोर्देहस्य वाक्कर्मकरणहेतुत्वात् तया भगस्य नेत्रे मनसः संकल्पात्मकत्वात् अहमिदं न करिष्ये इत्येवं रूपे विहिते प्रतिषिद्धे रूपे पूष्णो दशनान् वागिंद्रियस्थानानि मंत्रान् इत्यर्थः एतानि सर्वाणि धनुः कोट्या पूर्वोक्तपालो केपाणपाप्मशातयत् १७ एवं यज्ञन ष्टेपि धनुः कोटिमपि गुणाभावात् पूर्वोक्तां रुरोधनतत्तो लोकदेहपोरपि रंजनं कुर्वितमभूदित्यर्थः १८ ततो मौरुक्तावाक् विविदिषंति यज्ञेनेति श्रुत्योक्ता वेदवाणीत्यां श्रोतयज्ञरूपां धनुष: पूर्वोक्तया सनाहृयात्मकान् अच्छिनत् हरिश्चर्को निष्कामेश्वरश्रीत्यर्थं यतं कारितवतीत्यर्थः १९ विधनुष्कं काम्यकर्महीनं देवश्रात्मानं देवाः इंद्रियाणि उपागमन् विज्ञश्रयध्यति शर्पोत्रात्मव

त्र्यंबकः सवितुर्बाहू भगस्य नयने तथा पूष्णश्च दशनानक्रुद्धो धनुः कोट्याव्यशातयत् १६ प्राद्रवंत ततो देवा यज्ञांगानि च सर्वशः केचि त्तत्रैव घूर्णतो गतासव इवाभवन् १७ स तु विद्राव्य तत्सर्वं शितिकंठोवहस्य च अवष्टभ्य धनुष्कोटिं रुरोध विबुधांस्ततः ततो वागमरैरुक्ता ज्यातस्य धनुषोच्छिनत् अथ तत्सहसा राजन् छिन्नज्यं विस्फुरद्धनुः १९ ततो विधनुषं देवा देवश्रेष्ठमुपागमन् शरणं सह यज्ञेन प्रसादं चाकरोत्प्रभुः २० ततः प्रसन्नो भगवान् स्थाप्य कोपं जलाशये स जलं पावको भूत्वा शोषयत्यनिशं प्रभो २१ भगस्य नयने चैव बाहू च सवि तुस्तथा प्रादात् पूष्णश्च दशनान् पुनर्यज्ञांश्च पांडव २२ ततः सर्वमिदं स्वस्थं बभूव पुनरेव हि सर्वाणि च हवींष्यस्य देवा भागमकल्पयन् २३ त स्मिन् क्रुद्धेऽभवत्सर्वमस्वस्थं भुवनं प्रभो प्रसन्ने च पुनः स्वस्थं प्रसन्नो स च वीर्यवान् २४ ततस्ते निहताः सर्वे तव पुत्रा महारथाः अन्ये च बह वः शूराः पांचालाश्च सपदानुगाः २५ न तन्मनसि कर्तव्यं न च तद्द्रौणिना कृतं महादेवप्रसादेन कुरु कार्यमनंतरं २६ इति श्रीमहाभार

रूपाण्यभूवन् ततः स्वरस्तेश शरणीकृतः प्रसन्नोभूत् २० कोपं रजस्तमोरूपं जलाशये मन्मृचिते २१ ते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिके ऐषीके पर्वसमासे पर्वद्वयमिदं ततः सात्त्विको यतः प्रहर्षस्तस्मात् भगस्येति स्पष्टेवरर्थः २२ सर्वाणि हवींषि सर्वाणि कर्माणि ईश्वरार्पितानि एव अकुर्वन्नित्यर्थः २३ २४ २५ फलितमाह न तदिति ईश्वरस्य वशे सर्वमिति तात्पर्यं

© Dharmartha Trust J&K. Digitized By eGangotri

सौप्तीपर्व
३५

© Dharmartha Trust J&K. Digitized By eGangotri

गोरल

© Dharmartha Trust J&K. Digitized by eGangotri

मं॰
मो॰ टी॰
१

ॐ श्रीगणेशाय नमः॥ पूर्वस्मिन्पर्वणि सूचितानां धर्मार्थकाममोक्षाणां मध्ये मभावनयोर्यत्नसमष्टिनिग्रहमतीर्थसेवना
दिना धर्मः प्रतिपादितः विरागप्रसङ्गेकेसेवानीतिर्हिसान्तकुलकुलक्षयादिनार्थः शोकप्रदो निरूपितः ज्ञादशोर्थफलभू
तकामः सोपसर्गो निरूपणं च मोक्षपदं निरूपितं भयोत्पादादित्रयेमोहहेरूक्त्वानविद्यावनवासाश्रमनिरूपणेऽश्वमेधपर्वणि हू॰

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ वैशंपायन उ॰ षट्त्रिं
शे त्वथ संप्राप्ते वर्षे कौरवनन्दनः ददर्श विपरीतानि निमित्तानि युधिष्ठिरः २ ववुर्वाताश्च निर्घाता रूक्षाः
शर्करवर्षिणः अपसव्यानि शकुना मण्डलानि प्रचक्रिरे ३ प्रत्यगूहुर्महानद्यो दिशो नीहारसंवृताः उल्का
श्चाङ्गारवर्षिण्यः प्रपेतुर्गगनाद्भुवि ४ आदित्यो रजसा राजन्समवच्छन्नमण्डलः विरश्मिरुदये नित्यं कब
न्धैः समदृश्यत ५ परिवेषाश्च दृश्यन्ते दारुणाश्चन्द्रसूर्ययोः त्रिवर्णाः श्यामरूक्षान्तास्तथा भस्मारुणप्रभाः
एते चान्ये च बहव उत्पाता भयशंसिनः दृश्यन्तेऽहरहो राजन्हृदयोद्वेगकारकाः ६ कस्यचित्त्वथ कालस्य कु
रुराजो युधिष्ठिरः शुश्राव वृष्णिचक्रस्य मौसले कदनं कृते ७ विमुक्तं वासुदेवं च श्रुत्वा रामं च पाण्डवः स॰

वहनमनाश्रित्य येकेवलमर्थकामसक्तास्तेमदादिकलहेमयसनेनर्विनश्यन्तीति प्रतिपाद्यते सप्तदशोनिष्कामधर्मस्यफलेष्टहारे
स्यागोष्टादशेतस्यविकाशर्गप्राप्तिश्चनिरूपयिष्यति तत्रादौमौसलपर्वणेषड्विंशतमवर्षे सर्वेनाशाय बहुवचकान्त्युत्पातान्वैशंपायनः

१६।
१

भवन् अभवन् ९ ९ मौसले मुसलकृते कदने समाश्रित्य मनसि ध्वा ॥ ॥ मुसलैः परकालग्रैर्मुसलकीर्णः ३ ॥ २

परस्परंसमासाद्यब्रह्मदंडबलात्कृतान् वृष्णीन्विनष्टांस्तेश्रुत्वाव्यथिताःपांडवाभवन् ९ निधनंवा
सुदेवस्यसमुद्रस्येवशोषणं वीरानश्रद्दधुस्तस्यविनाशंशार्ङ्गधन्वनः १० मौसलंतेपरिश्रुत्यदुःखशो
कसमन्विताः विषण्णाहतसंकल्पाःपाण्डवाःसमुपाविशन् ११ जनमेजयः कथंविनष्टाभगवन्नन्धा
कावृष्णिभिःसह पश्यतोवासुदेवस्यभोजाश्चैवमहारथाः १२ वैशंपायनउ० षट्त्रिंशेवर्षेततःकालेवृष्णी
नामनयोमहान् अन्योन्यंमुसलैस्तेतुनिजघ्नुःकालचोदिताः १३ जनमेजयउ० केनानुशप्तास्तेवीराः
क्षयंवृष्ण्यन्धकागताः भोजाश्चद्विजवर्यत्वंविस्तरेणवदस्वमे १४ वैशंपायनउ० विश्वामित्रंचकण्वंचनार
दंचतपोधनं सारणप्रमुखावीरादहृशुर्द्वारकागतान् १५ तेवैसाम्बंपुरस्कृत्यभूषयित्वास्त्रियंयथा
अब्रुवन्नुपसंगम्यदैवदंडनिपीडिताः १६ इयंस्त्रीपुत्रकामस्यबभ्रोरमिततेजसः ऋषयःसाधुजानीत
किमियंजनयिष्यति १७ इत्युक्तास्तेतदाराजन्विप्रलम्भप्रधर्षिताः प्रत्यब्रुवंस्तान्मुनयोयत्तच्छृ
णुनराधिप १८ ऋषयऊ० वृष्ण्यन्धकविनाशायमुसलंघोरमायसं वासुदेवस्यदायादःसाम्बोयंजन
यिष्यति १९ येनयूयंसुदुर्वृत्तानृशंसाजातमन्यवः उच्छेत्तारःकुलंकृत्स्नमृतेरामजनार्दनौ २०

© Dharmartha Trust J&K. Digitized By eGangotri

म॰
मौ॰टी॰
२

जरानामकश्चित्कैवर्तः २१ अभ्यसूयन्मनसा अस्माभिर्मर्त्तः शापस्तथा यादृशस्तथा भवति २२ २५ किंकारोयमहतस्तत्तत्त्वं २६ २६ स्वयं
समुद्रेऽप्यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः जराकृष्णं महात्मानं शयानं भुवि भेत्स्यति २१ इत्युक्त्वा ते
तो राजन्मैरलब्धात्मेऽडरात्मभिः मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परं तथोक्त्वा मुनयस्ते ततः के
शवमभ्ययुः अथाब्रवीत्तदा वृष्णीञ्छ्रुत्वैवं मधुसूदनः अन्तज्ञो मतिमांस्तस्य भवितव्यं तथेति तान् २२ ए
वमुक्त्वा हृषीकेशः प्रविवेश पुरं तदा कृतान्तमन्यथा नैच्छत्कर्तुं स जगतः प्रभुः २८ श्वोभूतेऽथ ततः साम्बो
मुसलं तत्तदसृजत्वै येन वृष्ण्यन्धककुले पुरुषा भस्मसात्कृताः २५ वृष्ण्यन्धकविनाशाय किंकरप्रतिमं महत्
प्रसूतमापन्नं तं राज्ञे न्यवेदयन् २१ विषण्णरूपस्तद्राजा सूक्ष्मं चूर्णमकारयत् तच्चूर्णं सागरे चा
पि प्राक्षिपन्पुरुषा नृप २२ अघोषयंश्च नगरे वचनादाहुकस्य ते जनार्दनस्य रामस्य बभ्रोश्चैव महात्मनः
अद्यप्रभृति सर्वेषु वृष्ण्यन्धककुलेष्विह सुरासवो न कर्तव्यः सर्वैर्नगरवासिभिः २४ यश्च नोऽविदितं कु
र्यात्पेयं कश्चिन्नरः क्वचित् जीवन्स शूलमारोहेत्स्वयं कृत्वा सबान्धवः ३० ततो राजभयात्सर्वे नि
यमं चक्रिरे तदा नराः शासनमाज्ञाय रामस्याक्लिष्टकर्मणः ३१ इति मौसलपर्वणि प्रथमः वैशम्पा २०
हत्वास्वयेकवी ३ ३१ इति भारते मौसलपर्वणि प्रथमः १ पर्वकालः कपोतोलूकादिरूपेण १ ॥

© (O) Dharmartha Trust J&K. Digitized By eGangotri

यएवंवक्रचितःकालादिरयोबृहस्पतेर्वक्रचिते आवेदयन्परिकामन्निति शेषः २ सर्वभूतानामशस्त्रयोनाशाय स्मात् ३ मणिका·

करालो विकटो मण्डः शृङ्गः शृङ्गपिंगलः शृङ्गाण्यावेदयन्सीनां नाना बृहस्पतेर्वक्रचिते चिते २ तमश्च

तमहेषासाः घोरैः शतसहस्रशः नचाशाकानबद्धेऽसर्वभूतान्ययस्तरा ३ उत्तरदिशे महावाताद्दारु

णाश्चदिने दिने बृहस्पत्यक विनाशायवरद्वारोमहर्षयणाः ४ विहङ्गमूषिकाश्चापि विभिन्नमणिका

स्तथा केशान रवाश्च समानानामघत्ते मूषिकैर्निशि ५ वाचीकुचीति वाशाति शाविका हस्तिवेश्मसु

नोपशाम्यतिशङ्खः ससदिवारात्रमेव हि ६ अग्नुकुर्वमलूकानां सावसाविकृतेतथा अजाः शिवानीवि

हतमञुकुर्वत भारत ७ पाण्डरा सकृपादाश्च विहङ्गा कालचोदिताः बृहस्पकानां नगेहेषु कपोताश्चव·

रेत्तरा ८ अजायेव वरागोगुकरभास्तरीश्च शुनीश्चापि विडालाश्च मूषिकानकुलीश्च ९ नापत्र·

पत्नपापानि कुर्वन्तो बृहस्पयस्तदा शादिषत्वाह्मणांश्चापि पितृन्देवांस्तथैव च १० गर्भस्त्रावं मनुष्या

न्नाणमनवादैनो पत्न्यः पतीञ्श्च रतपतीश्च पतयस्तथा ११ विभावसुः प्रज्वलितो वामे विपरिवर्तते

नीललोहितमंजिष्ठा विसृजन्नर्चिषः पृथक् १२ उदयास्तमने नित्यं संध्यासंध्यात्स्यादिवाकरः बृहस्पता·

कबन्धैः कबंधैः परिवारितः १३ ॥

मत्याश्रारणि ५ ७ १० उग्रांतवेचितवश्च: ११ १२ १३

आहार्यमाने ऽग्रे १४ १५ परस्परैरिति स्वनक्षत्रादर्शनमपि स्वमृत्युसूचकमित्यर्थः १६ १७ एवमिति त्रयोदशादिवसः कुस

महानसेषु सिद्धेषु संस्कृते ऽतीव भारत आहार्यमाणे कृमयो व्यदृश्यन्त नराधिपः १४ पुण्याहे वाच्यमाने
तज्जपत्सु च महात्मसु अभिधावन्तः श्रूयन्ते न चादृश्यत कश्चन १५ परस्परं च नक्षत्रं हन्यमानं पुनः पुनः
ग्रहैरपश्यन्सर्वे ते नात्मनस्तु कथंचन १६ नदन्तं पाञ्चजन्यं च वृष्ण्यन्धकनिवेशने समन्तात्प्रत्यवाश्यन्त रासभा
दारुणस्वराः एवं पश्यन्हृषीकेशः संप्राप्तं कालपर्ययं त्रयोदश्याममावास्यां तान्दृष्ट्वा प्राब्रवीदिदं १८
चतुर्दशी पञ्चदशी कृतेयं राहुणा पुनः प्राप्ते वै भारते युद्धे प्राप्ता चाद्य क्षयाय नः १९ विमृशन्नेव कालं तं
परिचिन्त्य जनार्दनः मेने प्राप्तं स षट्त्रिंशं वर्षं वै केशिसूदनः २० पुत्रशोकाभिसंतप्ता गान्धारी हतबा-
न्धवा यदनुव्याजहारार्ता तदिदं समुपागतं २१ इदं च तदनुप्राप्तमब्रवीद्यद्युधिष्ठिरः पुरा व्यूढेष्व-
नीकेषु दृष्ट्वोत्पातान्सुदारुणान् २२ इत्युक्त्वा वासुदेवस्तु चिकीर्षुः सत्यमेव तत् आज्ञापयामास
तदा तीर्थयात्रामरिंदमः २३ अघोषयन्त पुरुषास्तत्र केशवशासनात् तीर्थयात्रा समुद्रे वः कार्येति
पुरुषर्षभाः २४ इति मौसलपर्वणि २ वैशंपायनः काली स्त्री पाण्डुरैर्दन्तैः प्रविश्य हसती निशि

पत्तो ऽभूदित्यर्थः १८ एवं सत्यग्निरपत्ये वध्याभावे ऽन्तत्र जाते ऽप्यसत्पक्षातिथिः तीणान्तत्रग्रहणे राजा तमिस्राह चतुर्दे।

म॰
वि॰ मे॰

२ ५ ८ १ निशाम्यदृष्ट्वाग्रन्थविशारदःमोक्षपंडितः ॥ १ ब्राह्मणार्थेस्थितिब्राह्मणार्थद्रव्यस्यान्यविनियोजनमाश्रुत्य
अग्निहोत्रनिकेतेशुवास्तमध्येषुवेषमस्य स्वस्यान्तकानवादतस्मिन्नुल्काभयानकाः २ अलंकारा
श्वच्छत्रवधूजाश्चकवचानिच क्रियमाणान्यदृश्यन्तरक्तोमिभिःसुभयानकैः ३ तत्राग्निदत्तंकृष्णस्यवज्रना
भमयोमयं दिवसाचक्रमेवचक्रंदृश्यतेनापश्यतातदा ४ युक्तरथंदिव्यमादित्यवर्णंहयाहृतन्यपश्यतोबाहु
कस्य तेस्मागरस्यापरिष्टाद्वर्तनमनोजवाश्वतरोवाजिशुभ्राः ५ नालःसुपर्णश्चमहाध्वजोतोमहा
जितोरामजनार्दनाभ्यां उग्रेश्चेजेकृरथस्योदिव्यातिशोभावश्वाश्चगम्यतातीर्थयात्रा ६ ततोजिगमिषतः
तेनदृश्यन्त्यकमहारथाः स्नातःशुभातदातीर्थयात्रामेवकुरुषर्षभाः ७ ततोभोज्यंचभक्ष्यंचपेयंवान्यक
दृश्यः बहूनानाविधंचकृमेध्यमांसमनेकशः ८ ततःसैनिकवर्गाश्चनिर्ययुर्नगराद्बहिः यानैश्चैश्चा
गजैश्चैववश्रीमतस्तिग्मतेजसः ९ ततःशुभांसमवसत्ययोहिष्टयथाश्रुतं प्रभूतभक्ष्यपेयास्तेसदा
यादवासुरा १० निविष्टास्तानिशिम्याथमुख्यात्तेसयोगवित् जगामासुमतोनीरात्तद्धर्मार्थविशा
रदः ॥ तंप्रविष्टंतेमहात्मानमभिवाद्यकृताञ्जलिं जानतिनाशोदृश्यतेनेच्छुद्वारयितेहविः १२ त
तःकालपरीतास्तेदृश्यन्त्यकमहारथाः अपश्यन्नुद्धवेयानंतेजसाहृसरोदसी
हकरमिमर्थः १३

म॰ मौ॰ टी ४

१६ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ ॥

ब्राह्मणार्थेषुपन्यस्तमन्नंतेषांमहात्मनां तद्वानरेभ्यःप्रददुःसुरागन्धसमन्वितं १४ ततस्तूर्यशताकी-
र्णेनटनर्तकसंकुले प्रावर्ततमहापानंप्रभासेतिग्मतेजसां १५ कृष्णस्यसन्निधौरामःसहितःकृतवर्म-
णा अपिबद्युयुधानश्चगदोबभ्रुस्तथैवच १६ ततःपरिषदोमध्येयुयुधानोमदोत्कटः अब्रवीत्कृतव-
र्माणमवहस्यावमन्यच १७ कःक्षत्रियोमन्यमानःसुप्तान्हन्यान्मृतानिव नतन्मृष्यन्तिहार्दिक्ययादवाय-
त्वयाकृतं १८ इत्युक्तेयुयुधानेनपूजयामासतद्वचः प्रद्युम्नोरथिनांश्रेष्ठोहार्दिक्यमवमन्यच १९ ततःप-
रमसंक्रुद्धःकृतवर्मातमब्रवीत् निर्दिशन्निवसावज्ञंतदासव्येनपाणिना २० भूरिश्रवाश्छिन्नबाहुर्युद्धे-
प्रायगतस्त्वया वधेनसुनृशंसेनकथंवीरेणपातितः २१ इतितस्यवचःश्रुत्वाकेशवःपरवीरहा तिर्य-
क्सरोषयादृष्ट्यावीक्षांचक्रेसमन्युमान् २२ मणिःस्यमन्तकश्चैवयःससत्राजितोभवत् तांकथांस्मारया-
माससात्यकिर्मधुसूदनं तच्छ्रुत्वाकेशवस्यांकमगमद्रुदतीतदा सत्यभामाप्रकुपिताकोपयन्तीजनार्दनं
ततउत्थायसक्रोधःसात्यकिर्वाक्यमब्रवीत् पंचानांद्रौपदेयानांधृष्टद्युम्नशिखंडिनोः २५ एषगच्छामि
पदवींसत्येनचतथाशपे सौप्तिकेयेचनिहताःसुप्तानेनदुरात्मना २६ द्रोणपुत्रसहायेनपापेनकृतवर्म- ४

© Dharmartha Trust J&K. Digitized by eGangotri

२० २८ ३। २८ विपत्नाद्गते तदन्तर्हीनः विध्यातैरादिकाद्विधेविश्य चलन्नुणाः कः ततो हार्थयः विध्यविधा ७० ॥
इत्येवमुक्त्वा रवञ्च्नते केशवस्य समीपतः अभिद्रुत्याशिरः क्रुद्धस्त्रिस्त्रेदकृत वर्मिणाः तथाम्यानपितृन्
ते पुत्रपुत्रानेसन्नतः अम्भसा बहुहृषीकेशेनाविनिवारयितेतदा २९ एकीभूतास्ततः सर्वे कालपर्यायचो
दिताः भौमात्यकामहाराजशैनेयं पर्यवारयन् ३० तान्दृष्ट्वापततस्तूर्णमभिक्रुद्धो जनार्दनः नवद्यो
यमहातेजानाराचकालस्यपर्षयं ३१ तेतत्पापतन्मरा विशिखैश्चादिताः कालधर्मणा युयुधानमथाभ्यद्रव
च्छ्रिभौमजनेस्तु ३२ हन्यमानेतशैनेये क्रुद्धोरुक्मिनिनन्दनः तदतत्समागच्छन्मानयिष्यंशितेषुते ३३
सभौमैः सहैवश्वकः सामकिश्चात्मकैः सह नावयस्तुमौ नौतावीवौवाजद्रविणशालिनो ३४ बहुनाभि
हतैोतत्र्यभौकृत्सपप्रपतः हतेदृष्ट्वातु शैनेये पत्रैवयदुनन्दनः ३५ एवकानातदाश्लिष्टिकोपाज्जयार
केशवः तद्भूत्त्वसलेचौरवज्रकल्पमयोमयं ३६ जघानतूस्ववलाले नपंपेप्रमुखतोभवन् ततोत्यकाश्च
भौमाश्चशैनेयाहस्सयस्तथा ३७ जग्नुरन्योन्यमाक्रन्दोसमसैः कालचोदिताः यस्तेषामेककोकाश्चि
न्नयाहक्रोपितोत्तय ३८ वज्रभूतेवस्ताराणमहृषपततद्दाविभा तर्णचस्रसलीभूतमपितत्रद्बहेषपते ३९
ब्रह्लदेउकृतेसर्वमतितद्विद्विपार्थिव अविध्यातिविध्यातेराजलक्षिययतिसमयतरणां ४० ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

म०   ४१ ४२ ४३ ४६ ४७ इतिमौसलपर्वणि २ ततोपततंतःशीघ्रंगच्छतः १२४

मौ टी तद्वज्रभूतंमुसलंव्यदृश्यततदादृढं अवधीत्पितरंपुत्रःपितापुत्रंचभारत ४१ मत्ताःपरिपतंतिस्मयोध
यंतःपरस्परं पतंगाइवचाग्नौतेनिपेतुःकुकुरांधकाः ४२ नासीत्पलायनेबुद्धिर्वध्यमानस्यकस्यचि

५ त् तत्रापश्यन्महाबाहुर्जानन्कालस्यपर्ययं मुसलंसमवष्टभ्यतस्थौसमधुसूदनः ४३ सांबंचनिहतंदृष्ट्वा
चारुदेष्णंचमाधवः प्रद्युम्नंचानिरुद्धंचततश्चुक्रोधमाधवः ४४ गदवीरंशयानंचभृशंकोपसमन्वितः
सनिःशेषंतदाचक्रेशार्ङ्गचक्रगदाधरः ४५ तंनिघ्नंतंमहातेजाबभ्रुःपरपुरंजयः दारुकश्चैवदाशार्ह
मूचतुर्यन्निबोधतत् ४६ भगवन्निहताःसर्वेत्वयाभूयिष्ठशोनराः रामस्यपदमन्विच्छतत्रगच्छामयत्र
सः ४७ इतिमौसलपर्वणितृतीयः ३ वैशंपायनः ततोययुर्दारुकःकेशवश्चबभ्रुश्चरामस्यपदं
पतंतः अथापश्यन्राममनंतवीर्यंवृक्षेस्थितंचिंतयानंविविक्ते १ ततःसमासाद्यमहानुभावंकृष्णस्त
दादारुकमन्वशासत् गत्वाकुरून्सर्वमिमंमहांतंपार्थायशंसस्ववधंयदूनां २ ततोर्जुनःक्षिप्रमिहो
पयातुश्रुत्वामृतान्यादवान्ब्रह्मशापात् इत्येवमुक्तःसययौरथेनकुरूंस्तदादारुकोनष्टचेताः ३ त
तोगतेदारुकेकेशवोथदृष्ट्वांतिकेबभ्रुमुवाचवाक्यं स्त्रियोभवान्रक्षितुंयातुशीघ्रंनैताहिंस्युर्दस्यवो

हृदेलोहस्य हृदेषु कं बहु सलेवालणयामे चलमलेसयमेवनिपत्यावाधीत्ता

तत्र स्थितः केशवो नागशिरोहोमदात्तरोत्तातिवधार्दितश्च ते विश्रान्ते सन्निधौ केशवस्य ड्ररनमेकेसह
सैव वर्क्षं बलात्रशाममवधीमहहैकूटेषुकं समलेलब्धकस्य ५ ततोहृष्टानिहत्तेव श्रेमाहकृसोय
जेभ्रातरघ्रयतेजः इहैव वर्तेमोप्रतीतस्य रामयावत्तिहयो तातिवशाकरोमि ६ ततः श्रीहरवतीप्रवि
श्यपन्नतार्दनः पितवंशासवाको शिवेषाम्भवान्वत्ततः समग्रापञ्जयस्यागमनेप्रतीक्षन् ७ रामोवा
नतेप्रतिपालयन्मामालेघाहंतेनसमागमिष्ये हृहमयेदेनियतं येहतोरात्तावपूर्वकुरुष्व भगवा
न् ८ तांहविनाय डंभिधायदवानोश्रीमिमामश्रोकं इष्टमथ तपश्च विष्यामि निवोयतत्मैरामेजन
सोर्वैवनमभ्ययात ९ इतीदशुक्त्वा शिरसा च पादौ समस्पयपहृत्स स्वर्जितोजगाम ततो महालिंग दाः अ
डवासीत्स सौक्कमावस्य पुरस्तस्य १० अथाब्रवीत्केशवः सत्निवर्मेषाहेस्कयोषितो क्राशतीना पुरी
मिमामेष्यवि हृहपस्माचीसवोड्डुः खोन्मात्तायिता नराञ्जः ११ ततोगत्वा केशवस्तं ददर्श रामवेन
स्थितमेकं विविक्ते अथापयपपरेगणुक्त स्तस्य नागश्च वानिश्वरहेमहात्ते १२ श्वेतययो सततः
प्रेरूयमाणो महार्णवो येन महानुभावः सहस्रशीर्षः पर्वताभोगवर्षा रक्ताननस्तां ततत्ता विश्रुष

© Dharmartha Trust J&K. Digitized by eGangotri

१३ १५ १६ १७ १८ १९ २० २१ २२ २३ ॥

म॰

मो॰ टी॰

६

सम्प्राप्तास्ते सागराः सत्यपूर्णा नागा दिव्याः सरितश्चैव पुण्याः कार्कोटको वासुकिस्तक्षकश्च पृथुश्र
वा वरुणः कुंजरश्च १४ मिश्री शंखः कुमुदः पुण्डरीकस्तथा नागो धृतराष्ट्रो महात्मा ह्रादः क्राथः
शितिकण्ठोग्रतेजास्तथा नागौ चक्रमन्दातिषण्डौ १५ नागश्रेष्ठो दुर्मुखश्चाम्बरीषः स्वयं राजा वरु
णश्चापि राजन् प्रत्युद्गम्य स्वागतेनाभ्यनन्दंस्ते पूजयंश्चार्घ्यपाद्यक्रियाभिः १६ ततो गते भ्रातरि वासु
देवो जानन्सर्वा गतयो दिव्यदृष्टिः वने शून्ये विचरंश्चिन्तयानो भूमौ चाथ संविवेशाग्र्यतेजाः १७ सर्वं ते
न प्राक्तदा वित्तमासीद्गान्धार्या यद्वाक्यमुक्तः स पूर्वं दुर्वाससा पायसोच्छिष्टलिप्ते यच्चाप्युक्तं तच्च सस्मा
र वाक्यं १८ स चिन्तयानोऽन्धकवृष्णिनाशं कुरुक्षयं चैव महानुभावः मेने ततः संक्रमणस्य कालं ततश्च
कारेन्द्रियसंनिरोधं १९ तथा च लोकत्रयपालनार्थमात्रेयवाक्यप्रतिपालनाय देवोपि सन्देहविमो
क्षहेतोर्निमित्तमैच्छत्सकलार्थतत्त्ववित् २० स संनिरुद्धेन्द्रियवाङ्मनास्तु शिश्ये महायोगमुपेत्य कृ
ष्णः जराथ तं देशमुपाजगाम लुब्धस्तदानीं मृगलिप्सुरुग्रः २१ स केशवं योगयुक्तं शयानं मृगाशंकी
लुब्धकः सायकेन जराविध्यत्पादतले त्वरावांस्तं चाभितस्तज्जिघृक्षुर्जगाम २२ ॥ ६

© Dharmartha Trust J&K. Digitized By eGangotri

२३ २४ २५ २६ २७ २८ इति मौसलपर्वणि ४ । ३ । ४ । ५ ॥

अथापश्यत्पुरुषं योगयुक्तं पीतांबरं लुब्धकोनेकबाहुं मत्वात्मानं त्वपराद्धं स तस्य पादौ जगृहे शोकितात्मा २३ आश्वासयंस्तं महात्मा तदानीं गच्छन्नूर्ध्वं रोदसी व्याप्य लक्ष्म्या दिवं प्राप्तं वासवो थाश्विनौ च रुद्रादित्या वसवश्चाथ विश्वे २४ प्रत्युद्ययुर्मुनयश्चापि सिद्धा गंधर्वमुख्याश्च सहाप्सरोभिः ततो राजन्भगवानुग्रतेजा नारायणः प्रभवश्चाव्ययश्च २५ योगाचार्यो रोदसी व्याप्य लक्ष्म्या स्थानं प्राप स्वं महात्माप्रमेयं ततो देवैरृषिभिश्चापि कृष्णः समागतश्चारणैश्चैव राजन् गंधर्वाग्र्यैरप्सरोभिर्वराभिः सिद्धैः साध्यैश्चानतैः पूज्यमानः ते वै देवाः प्रत्यनंदंत राजन्मुनिश्रेष्ठा वाग्भिरानर्चुरीशं २७ गंधर्वाश्चाप्युपतस्थुः स्तुवंतः प्रीत्या चैनं पुरुहूतोभ्यनंदत् २८ इति मौसलपर्वणि चतुर्थः

वैशंपायनः दारुकोपि कुरून्गत्वा दृष्ट्वा पार्थान्महारथान् आचष्ट मौसले वृष्णीनन्योन्येनोपसंहृतान् १ श्रुत्वा विनष्टान्वार्ष्णेयान्सभोजांधककौकुरान् पांडवाः शोकसंतप्ता वित्रस्तमनसोभवन् २ ततोर्जुनस्तानामंत्र्य केशवस्य प्रियः सखा प्रययौ मातुलं द्रष्टुं नेदमस्तीति चाब्रवीत् ३ स वृष्णिनिलयं गत्वा दारुकेन सह प्रभो ददर्श द्वारकां वीरो मृतनाथामिव स्त्रियं ४ याः स्म ता लोकनाथेन नाथवत्यः

© Dharmartha Trust J&K. Digitized by eGangotri

६ ७ ८ ९ १२ १३ १५ इतिमौसलपर्वणि ॥ १ २ ३

म०
मौ टी
८

षोडशस्त्रीसहस्राणि वासुदेवपरिग्रहः तासामासीन्महानादो दृष्ट्वार्जुनमागतं ६ तास्तु दृष्ट्वैव
कौरव्यो बाष्पेणापिहितेक्षणः हीनाः कृष्णेन पुत्रैश्च नाशकत्सोभिवीक्षितुं ७ सतां वृष्ण्यन्धकजलां
हयमीनां रथोडुपां वादित्ररथघोषौघां वेश्मतीर्थमहाग्रहां ८ रत्नशैवलसंघातां वज्रप्राकारमा-
लिनीं रथ्यास्रोतोजलावर्तां चत्वरस्तिमितह्रदां ९ रामकृष्णमहाग्राहां द्वारकासरितं तदा काल-
पाशग्रहां भीमां नदीं वैतरणीमिव १० ददर्शवासविर्धीमान्विहीनां वृष्णिपुंगवैः गतश्रियं निरान-
न्दां पद्मिनीं शिशिरे यथा ११ तां दृष्ट्वा द्वारकां पार्थस्ताश्च कृष्णस्य योषितः सस्वनं बाष्पमुत्सृज्य निपपा-
त महीतले १२ सात्राजिती ततः सत्या रुक्मिणी च विशांपते अभिपत्य प्ररुरुदुः परिवार्य धनंजयं १३
ततस्तं काञ्चने पीठे समुत्थाप्योपवेश्य च अब्रुवन्त्यो महात्मानं परिवार्योपतस्थिरे १४ ततः संस्तूय गो-
विन्दं कथयित्वा च पाण्डवः आश्वास्य ताः स्त्रियश्चापि मातुलं द्रष्टुमभ्यगात् १५ इति मौसलपर्वणि ७
वैशंपायन उ० तं शयानं महात्मानं वीरमानकदुन्दुभिं पुत्रशोकेन संतप्तं ददर्श कुरुपुंगवः १ तस्याश्रुप-
रिपूर्णाक्षो व्यूढोरस्को महाभुजः आर्तस्यार्ततरः पार्थः पादौ जग्राह भारत २ ॥ ८

१ ५ शिशोगश्च समात्यकी ९ ० ९ काशिराजेपौण्ड्रके ॥ एतेवेंशत्त्यमनयान्वालानामपरयान्नत्वपिसामर्थ्ये·
तस्यसूर्थानमाज्ञाव मिथेषानवडेउभिः स्वसीयस्यमहावाहूर्नेशशाकचशत्रुहन् २ समालिंग्याजनेते·
हृद्ः सभुजाभ्यांमहाभुजः हस्त्यन्ज्ञानमरत्स्वानिललापमहाविह्वलः भ्रातृस्त्रयाश्चपौत्राश्चदाहिशान्त
सर्वानपि ४ वसुदेवः येनिर्जिताभूमिपाला देशाश्चशतशोर्जुन तान्दृष्ट्वानेहपश्यामिजीवाम्यवेनदुर्म
तः ५ यौववर्जनशिष्यावतेप्रियोवक्रमेतौतदा तयोरपनयात्पार्थवृष्णयोनिधनंगताः ६ यौतौवृष्णिप्र·
वीराणांहावेवाभिमतौमम तौ प्रमुप्तावपयानस्त्रकथयत्कतेमचेयौ ७ तौसदाकृष्णशार्दूलकृष्णस्यप्रि
यभाजिनौ तावुभौवृष्णिनाशस्यकारणमाक्तायतेजय ८ नतुगार्हीशिशोने पंहार्दिक्यंचाहमर्जुन अक्रूरं
रौक्मिणेयंवैरागपोतेवाचकारणं ९ केशिनेयस्तुकंसंच विक्रम्यजगतःप्रभुः विदेहानकरोत्पार्थचै
द्यंचबलगर्वितं १० नैषादिमेकलव्यंच चक्रेकालिंगमागधान् गांधारान्काशिराजंचमरुभूमौचपार्थिवा
न् ॥ प्राच्यांश्चदाक्षिणात्यांश्चपार्वतीयांस्तथान्नृपान् सोभ्युपेक्षितवानेतमनुयानमधुसूदनः ११ ते
हितेनारदस्यैवक्षत्रियस्यसनातनं गोविंदमनथंदेवमभिशस्तोनधमच्युते १२ अश्वापपयश्च सविंझ्ज्ञाति
नयेत्पाकरणमनयस्त्वस्मात्‌हा १२ १४ तयमथोत्तणःसनुपेक्षितवानिमंस्वयेतमसमपृत्रकः १४

म० मो० टी० ८

१५ १६ १७ योहमितिनरनारायणौविज्ञीवपरमात्मनोयतिहारेणभवताप्रभेदज्ञेत्वंज्ञातापिवदन्नपिवसुदेवोनशोकंसं

गात्यायीवचनेयत्वहर्षीणांचपरंतप उन्नमन्यथाकंबैनैकत्वंजगतःप्रभुः १५ अत्यन्तेभवतश्चापित
वपौत्रःपुरंतप अस्यत्याश्चाहतश्चापिजीवितस्यपतेजसा १६ इमांस्तनैच्छत्रातीत्वांत्वदितिंससखातव
ततःपुत्रांश्चपौत्रांश्चभ्रातॄंतथसखीनपि १७ मायानामिहतान्दृष्ट्वाततोमामब्रवीदिदं तंसोप्मोयायमसा
नःकुलस्यभरतर्षभ आगमिष्यतिबीभत्सुविमोहावतीपुरी आलोक्यंतस्यपद्हूंतेहसीलोबैशासमहत् १९
मन्त्रंश्रुत्वामहातेजायदृत्तानियतंप्रभो आगताहिप्रमेवेहतमेनास्तिविचारणा २० योतेमन्त्रेविद्वियो
मेनःसोहमेवत यदृत्याततथाकार्यमितिवृत्तसभारत २१ सत्त्वीभ्रामकालाक्षपांडवोबालकेभ्रव प्रं
तिपत्स्यतिबीभत्सुर्भवतश्चाश्चदेहिकं २२ इमांचनगरींसद्यःप्रतियातेधनंजये माकामाद्दालकोपेतां
सभ्रद्रःस्नावयिष्यति २३ अहंदेशांतकस्मिंश्चित्पुण्येपनियमसमास्थितः कालंकर्तासमपवरामेणसहधी
मता २४ एवमुक्त्वाहृषीकेशोमामचिन्त्यपराक्रमः हित्वामांबालकैःसार्धंदिशंकामप्यगात्प्रभुः २५
सोहंतौचमहात्मानौचिंतयन्भ्रातरौतव घोरंज्ञातिवधंचैवनभुंजेशोककर्षितः २६ ॥

अतीताश्चैर्यंभगवन्मायावलमितिभावः २१ २२ अलमितिकालेमतेमात्मनःकर्त्ताकरिष्यामिसमसतनेनमद्वाकोसंशयोनक

२० २८ षष्ठोध्यायः ६ एवमुक्तः सबीभत्सुर्विति संख्याः १ ३ ५ ६ ८ ११ ॥
नभोक्ष्येनचजीविष्येदिष्ट्याप्राप्तोसिपांडव यदुक्तंपार्थकृष्णेनतत्सर्वमखिलंकुरु १९ एतत्तेपार्थिवंराज्यं
चस्त्रियोरत्नानिचैवहि इष्टान्प्राणानहंहीमांस्त्यक्ष्यामिमधुसूदन २० मौसलपर्वणि ६ वैशंपाय
नः एवमुक्तःसबीभत्सुर्मातुलेनपरंतपः दुःखेनदीनमनसावसुदेवमुवाचह १ नाहंवृष्णिप्रवीरेण
मधुभिश्चैवमातुल विहीनांपृथिवींद्रष्टुंशक्तश्चिरेहकथंचन २ राजाचभीमसेनश्चसहदेवश्चपांडवः
नकुलोयाज्ञसेनीचषडेकमनसोवयं ३ राज्ञःसंक्रमणेचापिकालोयंवर्ततेध्रुवं तमिमंविद्धिसंप्राप्तं
कालंकालविदांवर ४ सर्वथावृष्णिदारांस्तुबालवृद्धांस्तथैवच नयिष्येपरिगृह्याहमिंद्रप्रस्थमरिंदम
इत्युक्त्वादारुकमिदंवाक्यमाहधनंजयः अमात्यान्वृष्णिवीराणांद्रष्टुमिच्छामिमाचिरं ६ इत्येवमुक्त्वाव
चनंसुधर्मांयादवींसभां प्रविवेशार्जुनःशूरःशोचमानोमहारथान् ७ तमासनगतंतत्रसर्वाःप्रकृतय
स्तथा ब्राह्मणानैगमाश्चैवपरिवार्योपतस्थिरे ८ तान्दीनमनसःसर्वान्निभृतान्गतचेतसः उवाचेदंवचः
कालेपार्थोदीनतरस्तथा ९ शक्रप्रस्थमहंनेष्येवृष्ण्यंधकजनंस्वयं इदंतुनगरंसर्वंसमुद्रःप्लावयिष्य
ति १० सज्जीकुरुतयानानिरत्नानिविविधानिच वज्रोयंभवतांराजाशक्रप्रस्थेभविष्यति ११ ॥

© (c) Dharmartha Trust, J&K. Digitized By eGangotri

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ ॥

म॰ मौ॰ टी॰ ८

सप्तमे दिवसे चैव रवौ विमल उद्गते बहिर्विवेश्माम्नहसर्वे सज्जीभवत चिरं १२ इत्युक्तास्तेन ते सर्वे पार्थेनाक्लि
ष्टकर्मणा सज्जमाश्च ततश्चक्रुः स्वसिद्ध्यर्थं समुत्सुकाः १३ तां तु रात्रिमवसत्पार्थः केशवस्य निवेशने महता
शोकमोहेन सहसाभिपरिप्लुतः १४ श्वोभूतेथ ततः शौरिर्वसुदेवः प्रतापवान् युक्त्वात्मानं महातेजा जगा
म गतिमुत्तमां १५ ततः शब्दो महानासीद्वसुदेवनिवेशने दारुणः क्रोशतीनां च रुदतीनां च योषितां १६ प्र
कीर्णमूर्धजाः सर्वा विमुक्ताभरणस्रजः उरांसि पाणिभिर्घ्नन्त्यो व्यलपन्करुणं स्त्रियः १७ तं देवकी च भद्रा च
च रोहिणी मदिरा तथा अन्वारोहन्त च तदा भर्तारं योषितां वराः १८ ततः शौरिं नृयुक्तेन बहुमाल्येन भा
रत यानेन महता पार्थो बहिर्निष्क्रामयत्तदा १९ तमन्वयस्तत्र तत्र दुःखशोकसमाहताः द्वारकावासि
नः सर्वे पौरजानपदा हिताः २० तस्याश्वमेधिकं छत्रं दीप्यमानाश्च पावकाः पुरस्तात्तस्य यानस्य याजकाश्च
ततो ययुः २१ अनुजग्मुश्च तं वीरं देव्यस्ता वै स्वलंकृताः स्त्रीसहस्रैः परिवृता वधूभिश्च सहस्रशः २२ यस्तु
देशः प्रियस्तस्य जीवितो भून्महात्मनः तत्रैनमुपसंकल्प्य पितृमेधं प्रचक्रिरे २३ तं चितानिगतं वीरं शूरपु
त्रं वरांगनाः ततोन्वारुरुहुः पत्न्यश्चतस्रः पतिलोकगाः २४ तं वै चतस्रभिः स्त्रीभिरन्वितं पाण्डुनन्दनः अद

८

ततः प्रादुरभूच्छब्दः समिद्धस्य विभावसोः सामगानांच निर्घोषो नारीणां रुदतामपि २६ ततो वज्रप्रधानास्ते वृष्ण
न्यन्धककुमारकाः सर्वे चैवोदकंचक्रुः स्त्रियश्चैव महात्मनः २७ अलुप्तधर्मस्तंधर्मं कारयित्वा स फाल्गुनः जगा
म वृष्णयो यत्र विनष्टा भरतर्षभ २८ स तान्दृष्ट्वा निपतितान्कदने भृशदुःखितः बभूवातीव कौरव्यः प्राप्तका
लं चकार ह २९ यथाप्रधानतश्चैव चक्रे सर्वास्तथा क्रियाः ये हता ब्रह्मशापेन मुसलैरेरकोद्भवैः ३० ततः श
रीरे रामस्य वासुदेवस्य चोभयोः अन्विष्य दाहयामास पुरुषैराप्तकारिभिः ३१ स तेषां विधिवत्कृत्वा प्रेतकार्या
णि पाण्डवः सप्तमे दिवसे प्रायाद्रथमारुह्य सत्वरः ३२ अश्वयुक्तै रथैश्चापि गोखरोष्ट्रयुतैरपि स्त्रियस्ता वृष्णिवी
राणां रुदत्यः शोककर्षिताः ३३ अनुजग्मुर्महात्मानं पाण्डुपुत्रं धनंजयं भृत्यास्त्वन्धकवृष्णीनां सादिनो रथिन
श्च ये ३४ वीरहीनं वृद्धबालं पौरजानपदास्तथा ययुस्ते परिवार्याथ कलत्रं पार्थशासनात् ३५ कुंजरैश्च गजा
रोहा ययुः शैलनिभैस्तथा सपादरक्षैः संयुक्ताः सान्तरायुधिका ययुः ३६ पुत्राश्चान्धकवृष्णीनां सर्वे पार्थमनु
व्रताः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महाधनाः ३७ दश षट् च सहस्राणि वासुदेवावरोधनं पुरस्कृत्य
ययुर्वज्रं पौत्रं कृष्णस्य धीमतः ३८ बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च भोजवृष्ण्यन्धकस्त्रीणां हतनाथानि नि
र्ययुः ३९ तत्सागरसमप्रख्यं वृष्णिचक्रं महर्द्धिमत् उवाह रथिनां श्रेष्ठः पार्थः परपुरंजयः ४० ॥

निर्याते तज्जने तस्मिन्सागरो मकरालयः द्वारकां रत्नसंपूर्णां जलेनाप्लावयत्तदा यद्यद्धि पुरुषव्याघ्रो भूमेस्तस्या
म· व्यमुंचत तत्तत्संप्लावयामास सलिलेन स सागरः ४२ अपवीक्ष्य तदा सर्वान्प्राणिनस्तत्र सागरः तत्कासवर्णानि
मो टी· वयान्त्रत्नानि विविधानि च भाजनानि च हैमानि रौप्याणि च सहस्रशः परित्यज्येह संज्ञातं ममेदं द्रव्यमुत्तमं स
१९ वेश्मिकाश्रीवैयेहेः यात्स्यामयाधुना पुनर्येऽवतारस्य भविष्यति कृते युगे कोशाध्यक्षोऽस्य हे तस्य अवतारवः
तोयने तदद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः तूर्णात्तूर्णतरं जग्मुरहो दैवमिति ब्रुवन् ४३ काननेषु च
रम्येषु पर्वतेषु नदीषु च निवसन्नानयामास हृष्टिदारान्धनंजयः ४४ स पंचनदमासाद्य धीमानतिसमृद्धिमा
न् देशे गोपशुधान्याढ्ये निवासमकरोत्प्रभुः ४५ ततो लोभः समभवद्दस्यूनां निहतेश्वराः दृष्ट्वा स्त्रियो नीयमा
नाः पार्थेनैकेन भारत ततस्ते पापकर्माणो लोभोपहतचेतसः आभीरा मन्त्रयामासुः समेत्याशुभदर्शनाः ४७
अयमेकोऽर्जुनो धन्वी वृद्धबालं हतेश्वरं नयत्यस्मानतिक्रम्य योधाश्चेमे हतौजसः ४८ ततो यष्टिप्रहरणा दस्यव
स्ते सहस्रशः अभ्यधावन्त वृष्णीनां तज्जनं लोप्त्रहारिणः ४९ महता सिंहनादेन द्रावयन्तः पृथग्जनं अभिपेतुर्व
धार्थं ते कालपर्यायचोदिताः ५० ततो निवृत्तः कौन्तेयः सहसा सपदानुगः उवाच तान्महाबाहुरर्जुनः प्रहसन्नि
व ५१ निवर्तध्वमधर्मज्ञा यदि जीवितुमिच्छथ इदानीं शरैर्निर्भिन्नाः शोचध्वं निहता मया ५२ ॥ १९

© Dharmartha Trust J&K. Digitized by eGangotri

तथ्याकालेन वीरेण कदर्थीकृत्य तद्वचः अभिपेतुर्जनं मूढा वार्यमाणाः पुनः पुनः ५३ ततोर्जुनोपि तद्दिव्यं
गांडीवमजरं महत् आरोपयितुमारेभे यत्नादिव कथंचन ५४ चकार सज्जं कृच्छ्रेण संभ्रमे तुमुले सति चि-
न्तयामास चास्त्राणि न च सस्मार तान्यपि ५५ वैकृत्यं तन्महद्दृष्ट्वा भुजवीर्ये तथा युधि दिव्यानां च महास्त्राणां वि-
नाशाद्व्रीडितोभवत् ५६ वृष्णियोधाश्च ते सर्वे गजाश्वरथयायिनः न शेकुरावर्त्तयितुं ह्रियमाणं च तं जनं ५७
कलत्रस्य बहुत्वाद्धि संपतत्सु ततस्ततः प्रयत्नमकरोत्पार्थो जनस्य परिरक्षणे ५८ मिषतां सर्वयोधानां त-
तस्ताः प्रमदोत्तमाः समन्ततोवकृष्यन्त कामाच्चान्याः प्रवव्रजुः ५९ ततो गांडीवनिर्मुक्तैः शरैः पार्थो धनंजयः
जघान दस्यून्सोद्वेगो वृष्णिभृत्यैः सह प्रभुः ६० क्षणेन तस्य ते राजन् क्षयं जग्मुः पतत्रिणः अक्षया हि पुरा भूत्वा
क्षीणाः क्षतजभोजनाः ६१ स शरक्षयमासाद्य दुःखशोकसमाहतः धनुष्कोट्या तदा दस्यूनवधीत्पाकशास-
निः ६२ प्रेक्षतस्त्वेव पार्थस्य वृष्ण्यन्धकवरस्त्रियः जग्मुरादाय ते म्लेच्छाः समन्ताज्जनमेजय ६३ धनंजयस्तु दैवं त-
न्मनसा चिन्तयत्प्रभुः दुःखशोकसमाविष्टो निःश्वासपरमोभवत् ६४ अस्त्राणां च प्रणाशेन बाहुवीर्यस्य सं-
क्षयात् धनुषश्चाविधेयत्वाच्छराणां संक्षयेण च ६५ बभूव विमनाः पार्थो दैवमित्यनुचिन्तयन् न्यवर्त्तत ततो राजन्
नेदमस्तीति चाब्रवीत् ६६ ततः स शेषमादाय कलत्रस्य महामतिः हृतभूयिष्ठरत्नस्य कुरुक्षेत्रमवातरत् ६७

(c) Dharmartha Trust J&K. Digitized By eGangotri

६८ ७० ७१ ७२ ७३ ७४ ७५ ७८ ८० अध्यायः प्रविशन १ २ ३

म॰ एवं कलत्रमानीय हृतशेषं तं शेषितं न्यवेशयत कौरव्यस्तत्रतत्र धनंजयः ६८ हार्दिक्यतनयं पार्थो नगरं

मौ॰टी मर्त्तिकावतं भोजराजकलत्रं च हृतशेषं नरोत्तमः ६९ ततो बालांश्च वृद्धांश्च स्त्रियश्चादाय पाण्डवः वीरैर्वि

११ हीनान्सर्वांस्तान्शक्रप्रस्थे न्यवेशयत ७० यौयुधानिं सरस्वत्यां पुत्रं सात्यकिनः प्रियं न्यवेशयत धर्मात्मा

वृद्धबालपुरस्कृतं ७१ इन्द्रप्रस्थे ददौ राज्यं वज्राय परवीरहा वज्रेणाक्रूरदारास्तु वार्यमाणाः प्रवव्रजुः ७२

रुक्मिणी त्वथ गान्धारी शैब्या हैमवतीत्यपि देवी जाम्बवती चैव विविशुर्जातवेदसं ७३ सत्यभामा तथैवा

न्या देव्यः कृष्णस्य संमताः वनं प्रविविशू राजंस्तापस्ये कृतनिश्चयाः ७४ फलमूलादिभोजिन्यो हरिध्यानैक

तत्पराः हिमवन्तमतिक्रम्य कलापग्राममाविशन् ७५ द्वारकावासिनो ये तु पुरुषाः पार्थमन्वयुः यथा

र्हं संविभज्यैतांस्तान्वज्रे पर्यददज्जयः ७६ स तत्कृत्वा प्राप्तकालं बाष्पेणापिहितोऽर्जुनः कृष्णद्वैपायनं व्यासं द

दर्शासीनमाश्रमे ७७ इति मौसलपर्वणि सप्तमः ७ वैशंपायनः प्रविशन्नर्जुनो राजन्नाश्रमं सत्यवादि ५

नः ददर्शासीनमेकान्ते मुनिं सत्यवतीसुतं १ स तमासाद्य धर्मज्ञमुपतस्थे महाव्रतं अर्जुनोऽस्मीति नामास्मै ६

निवेद्याभ्यवदत्ततः २ स्वागतं तेऽस्त्विति प्राह मुनिः सत्यवतीसुतः आस्यतामिति चोवाच प्रसन्नात्मा महामु ११

© Dharmartha Trust J&K. Digitized by eGangotri

४ नखोदकं केशोदकं वस्त्रमात्रोरशानासास्रुदकोक्रमसुरखोदकं च अवीरजाना काञ्चनमला अवीरा निष्फसि सतेसमरः त
स्मारजः अस्त्रवकालेदिनत्रयादर्वाक्‌ ग्रजुगमनेतत्संमेपुत्रेबालणस्ववधः अजुदेपराजयश्चे तिसप्तभिर्निमित्तैः अरुदः अशः
तमप्रतीतमनसंनिश्वसंतं पुनः पुनः निर्विसमनसं दृष्ट्वा पार्थं व्यासोऽब्रवीदिदं ४ नखकेशादशाक्रम्य
वारिणा किं समुद्गितः अवीरनानुगमने बालणो वाहतस्त्वया ५ पुत्रे पराजितो वासि गतश्रीर्विवलस्य मे
न त्वाऽभिमन्युं जानामि किमिदं भरतर्षभ ६ श्रोतव्यं चेन्मया पार्थ क्षिप्रमाख्यातुमर्हसि अर्जुनः यः सभेघवपुः
श्रीमान्बृहत्पंकजलोचनः सकृत्स सहरामेणायुक्तादेहे दिवं गतः ७ मौसले हृसिवीराणां विनाशो ब्रह्म
शापजः बभूव वीरांतकरः प्रभासे लोमहर्षणः ८ य ते शूरा महात्मानः सिंहदर्पा महाबलाः भोजवृष्ण्य
न्धकाब्रह्मन्नन्योन्यं तेहि ते हताः ९ गदापरिघशक्तीनां सहाः परिघबाहवः तएरकाभिर्निहताः पश्य कालस्य
स्य पर्ययं १० हतं पंचशतं तेषां सहस्रं बाहुशालिनां निधनं समनुप्राप्तं समासाद्येतरेतरं ११ पुनः पुनर्न मृ
ष्यामि विनाशममितौजसां चिंतयानो यदूनां च कृष्णस्य च यशस्विनः १२ ॥
श्रीर्भवति ५ अभिमन्युपराजितेनोकदाचिदपि नजानामि ६ ८ हतं मृतं मारितं वतं मन्त्रस्यार्थः ९ १० पंचशतं सहस्रं हे उत्पलि
तेसहस्रपंचलक्षाणीत्यर्थः ११ नकेवलंहततेताडितमपितनिधनं प्राप्ते ११ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

१३ १४ पश्यतः अनादरेषु दृष्टीमां पश्यतमनादृतेनमर्थः १६ १७ कृष्णश्चेति इदमेव रूपं चतुर्भुजेनित्य मन्नेन हृष्टोचरोस्ति अत
म. श्रेणा पूर्णसागरस्येव पर्वतस्येव चालनं नभसः पतनं चैव घोत्थमश्रेस्तथैव च १३ अश्रद्धेयमहं मन्ये विनाशं
मो टी. शार्ङ्गधन्वनः नचेदृश्यात्तमिच्छामि लोकेकृत्स्नविनाकृतः १४ अतःकष्टतरं चान्यच्छृणु पांडुनंदनप्राधन
१२ मनोमदीयं तेयेन — — — सर्वेशकृः १५ पश्यतोहृष्टमिदंमांश्रममव्यक्तलक्षणस्वशः आभीरैर्बहुसत्याजोह
तापंचनवालयैः १६ यत्प्रसादायतस्माहं नाकं तस्यपूर्वतो यथाश्राचमेवीर्यं भुजनेतथाभवन् १७ अ
स्त्राणिमे प्रणष्टानि विविधानि महात्मने शरास्थत्वयमापन्नाः तृणेनेवसमन्ततः १८ कृष्णस्याप्रमे
यात्मा शंखचक्रगदाधरः चतुर्भुजः पीतवासाः श्यामः पद्मदलेक्षणः १९ यश्चयातिपुरस्तान्मे रथस्य
सुमहाद्युतिः प्रदहन्रिपुसैन्यानि नपश्याम्यहमच्युतं २० येनपूर्वं प्रदग्धानि शत्रुसैन्यानि तेजसा शरैः
गांडीवनिर्मुक्तैर्देहपश्चाच्छ्नाशयं २१ तमपश्यन् विषीदामि घूर्णामेवचसत्तम परितिविस्मचेताश्च शा
तिंनोपलभेति च २२ विनाजनार्दनंवीरं माहंजीवितुमुत्सहे श्रुत्वेवहिगतेविष्णौ ममापिमुमुहुर्दिशः २३
प्रणष्टज्ञातिवीर्यस्य शून्यस्य परिधावतः उपदेष्टुमममश्रेयो भवानर्हतिसत्तम २४
एवविश्वरूपदर्शनानन्तरमुक्तं तेनैवरूपेणचतुर्भुजेनसहस्रबाहोभवविश्वमूर्तेइति अथयादिभुजेनेमवश्यमतर्भुजेनेतिना १२

२५ ३१ बुद्धिरूपस्थितकार्यावधारणेनातेजःप्रागल्भ्यप्रतिपत्तिःप्रनायतावेत्तृणांभवति उत्पद्यतेभवकालेषुऐश्वर्यं
वन्हसमयेषुविपर्ययेविनाशकालेविपद्यतेविनश्यति ३२ कालईश्वरःजगद्बीजंवियदादिपंचकंसमादत्तेसंहरति य
थासः ब्रह्मशापविनिर्दिष्टयाहृस्यान्यकमहारथ्याः विनष्टाःकुरुषाहूलनतांछ्रोचितुमर्हसि २५ भवि
तव्यंतथातच्चदिष्टमेतन्महात्मना उपेक्षितंचकृष्णेनशक्तेनापिव्यपोहितुं २६ त्रैलोक्यमपिगोविंदः
कृत्स्नंस्थावरजंगमं प्रसहेदन्यथाकर्तुंकुतःशापंमहात्मना २७ रथस्यपुरतोयातियःसचक्रगदाधरः
तवस्नेहात्पुराणर्षिर्वासुदेवश्चतुर्भुजः २८ कृत्वाभारावतरणंपृथिव्याःपृथुलोचनः मोक्षयित्वातज्जगत्स
र्वंगतःस्वस्थानमुत्तमम २९ त्वयापीहमहत्कर्मदेवानांपुरुषर्षभ कृतंभीमसहायेनयमाभ्यांचमहाभु
ज ३० कृतकृत्यांश्चवोमन्येसंसिद्धान्कुरुपुंगव गमनंप्राप्तकालंवःश्रेयस्करंविभो ३१ एवंबुद्धिश्च
तेजश्चप्रतिपत्तिश्चभारत भवतिभवकालेषुविपद्यन्तेविपर्यये ३२ कालमूलमिदंसर्वंजगद्बीजंधनं
जय कालएवसमादत्तेपुनरेवयदृच्छया ३३ सएवबलवान्भूत्वापुनर्भवतिदुर्बलः सएवेशश्चभूत्वे
हभूतानामपिसंहारोभवतिक्रियांसत्त्वमीतिकान्ता इह्यवेशनाप्यतेपुनः ३४ ॥
नाशइतितदर्थंशोकोनुचितइतिभावः ३३ यएवबलवान्सएवदुर्बलोभवतिएवंविजयोपिकालमूलोज्ञेय ३४ ॥

© Dhamarth Trust J&K. Digitized By eGangotri

कृतेति भवतोऽप्यस्त्रवत्कृतकृत्यता इति भावः पुनरेष्यंति जन्मान्तरे ३५ शख्यां गतिं स्वर्गं गन्तुमेतत्प्रस्थाने ३६ ३७ ३८ इति श्री

कृतकृत्यानि चास्त्राणि गतान्यद्य यथागतं पुनरेष्यंति ते हस्तं यदा कालो भवि-
ष्यति ३५ कालो गन्तुं गतिं मुख्यां भवतामपि भारत एतच्छ्रेयो हि वो मन्ये परमं भ-
रतर्षभ ३६ वैशंपायनः एतद्वचनमाज्ञाय व्यासस्यामिततेजसः अनुज्ञातो ययौ
पार्थो नगरं नागसाह्वये ३७ प्रविश्य च पुरीं वीरः समासाद्य युधिष्ठिरं आचष्ट तद्य-
थावृत्तं वृष्ण्यन्धकजनं प्रति ३८ इति महाभारते मौसलपर्वणि अष्टमोध्यायः ८
मौसलपर्व समाप्तम् ॥

महाभारते शान्तमहस्त्रां नीलकण्ठी भारतभावदीपे मौसलार्थप्रकाशः अष्टमोध्यायः ८ ॥ शुभमस्तु सर्व
जगताम् ॥

© (Dharmartha Trust J&K) Digitized By eGangotri

© Dharmartha Trust J&K Digitized By eGangotri

शिवर्व

© Dharmarth Trust J&K. Digitized by eGangotri

स्त्री०
१

श्रीगणेशायनमः गतेभगवतिव्यासेइत्यादिस्त्रीपर्व तत्रप्रथमोध्यायेव्याख्यातप्रायः गते १३ विगतप्रज्ञाव्यासदत्तदिव्यज्ञानं ॥ ॥ ॥ ॥

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ जनमेजयउवाच गते
भगवतिव्यासेधृतराष्ट्रोमहीपतिः किमचेष्टतविप्रर्षेतन्मेव्याख्यातुमर्हसि २ तथैवकौरवोराजाधर्मपुत्रोमहामनाः
कृपप्रभृतयश्चैवकिमकुर्वततेत्रयः ३ अश्वत्थाम्नःश्रुतंकर्मशापश्चान्योन्यकारितः वृत्तांतमुत्तरंब्रूहियदभाषत
संजयः ३ वैशंपायनउवाच हतेदुर्योधनेचैवहतेसैन्येचसर्वशः संजयोविगतप्रज्ञोधृतराष्ट्रमुपस्थितः ४ संजय०।
आगम्यनानादेशेभ्योनानाजनपदेश्वराः पितृलोकंगताराजन्सर्वेतवसुतैःसह ५ याच्यमानेनसततंतवपुत्रेण
भारतघातितापृथिवीसर्वावैरस्यांतंविधित्सता ६ पुत्राणामथपौत्राणांपितृणांचमहीपते आनुपूर्व्येणसर्वेषांप्रे
तकार्याणिकारय ७ वैशं० तच्छ्रुत्वावचनंघोरंसंजयस्यमहीपतिः गतासुरिवनिश्चेष्टोन्यपतत्पृथिवीतले ८ तंश
यानमुपागम्यपृथिव्यांपृथिवीपतिं विदुरःसर्वधर्मज्ञइदंवचनमब्रवीत् ९ उत्तिष्ठराजन्किंशेषेमाशुचोभरतर्ष
भ एषावैसर्वसत्वानांनरेश्वरपरागतिः १० अभावादीनिभूतानिभावमध्यानिभारत अभावनिधनान्येवतत्रकाप
रिदेवना ११

राम०
१

(c) Dharmartha Trust J&K Digitized By eGangotri

२० आचक्षेकथयामि २१ कायंशवरंपकर्त्तेंमुद्दकदानादि २३ प्रथम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नशोचन्मृतमन्वेतिनशोचन्म्रियतेनरः एवंसांसिद्धिकेलोकेकिमर्थमनुशोचसि १२ अयुध्यमानोम्रियतेयुध्यमानश्च
जीवति कालंप्राप्यमहाराजनकश्चिदतिवर्त्तते १३ कालः कर्षतिभूतानिसर्वाणिविविधान्युत नकालस्यप्रियः कश्चिन्न
द्वेष्यः कुरुसत्तम १४ यथावायुस्तृणाग्राणिसंवर्त्तयतिसर्वतः तथाकालवशंयान्तिभूतानिभरतर्षभ १५ एकसा
र्थप्रयातानांसर्वेषांतत्रगामिनां यस्यकालः प्रयात्यग्रेतत्रकापरिदेवना १६ यांश्चापिनिहतान्युद्धेराजंस्त्वमनुशोचसि अ
शोच्याहिमहात्मानः सर्वेतेत्रिदिवंगताः १७ नयज्ञैर्दक्षिणावद्भिर्नतपोभिर्नविद्यया तथास्वर्गमुपायान्तियथाशूरा
स्तनुत्यजः १८ सर्वेवेदविदः शूराः सर्वेसुचरितव्रताः सर्वेचाभिमुखाः क्षीणास्तत्रकापरिदेवना १९ शरीराग्निषु
शूराणांजुहुवुस्तेशराहुतीः हूयमानान्शरांश्चैवसेहुरुत्तमपूरुषाः २० एवंराजंस्तवाचक्षेस्वर्ग्यंपंथानमुत्तमं नयुद्धाद
धिकंकिंचित्क्षत्रियस्येहविद्यते २१ क्षत्रियास्तेमहात्मानः शूराः समितिशोभनाः आशिषंपरमांप्राप्तानशोच्याः स
र्वएवहि २२ आत्मनात्मानमाश्वास्यमाशुचः पुरुषर्षभ नाद्यशोकाभिभूतस्त्वंकायमुत्स्रष्टुमर्हसि २३ इतिमहाभा
रतेस्त्रीपर्वणि ॥ ॥ ॥ ॥ ॥ ॥

स्त्री०
२

विदुरस्य १० किशोरीणां अश्वशावकानां किशोराश्वसशावकः इति मेदिनी अंगणेऽन्त्यभूमि स्वाभूमौ १२ ॥ ॥ ॥ ॥ ॥ ॥

वैशंपायन उवाच विदुरस्य तु तद्वाक्यं श्रुत्वा तु पुरुषर्षभः युज्यतां यानमित्युक्त्वा पुनर्वचनमब्रवीत् १ शीघ्रमानय गांधारीं
सर्वाश्च भरतस्त्रियः वधूं कुंतीमुपादाय याश्चान्यास्तत्र योषितः २ एवमुक्त्वा स धर्मात्मा विदुरं धर्मवित्तमं शोकविप्रहतज्ञा
नो यानमेवान्वपद्यत ३ गांधारी पुत्रशोकार्त्ता भर्त्तुर्वचनचोदिता सह कुंत्या यतो राजा सह स्त्रीभिरुपाद्रवत् ४ ताः समासा
द्य राजानं भृशं शोकसमन्विताः आमंत्र्यान्योन्यमीयुः स्म भृशमुच्चुक्रुशुस्ततः ५ ताः समाश्वासयत्क्षत्ता ताभ्यश्चार्त्ततरः
स्वयं अश्रुकंठीः समारोप्य ततोऽसौ निर्ययौ पुरात् ६ ततः प्रणादः संजज्ञे सर्वेषु कुरुवेश्मसु आकुमारं च तत्सर्वमभवच्छोक
कर्षितं ७ अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि पृथग्जनेन दृश्यंते तास्तदा निहतेश्वराः प्रकीर्य केशान्सुशुभान्भूषणा
न्यवमुच्य च एकवस्त्रधरा नार्यः परिपेतुरनाथवत् श्वेतपर्वतरूपेभ्यो गृहेभ्यस्तास्त्वपाक्रमन् गुहाभ्य इव शैलानां पृष
त्यो हतयूथपाः १० तान्युदीर्णानि नारीणां तदा वृंदान्यनेकशः शोकार्त्तान्यद्रवन्राजन्किशोरीणामिवांगणे ११ प्रगृ
ह्य बाहून्क्रोशंत्यः पुत्रान्भ्रातॄन्पितॄनपि दर्शयंतीव ता ह स्म युगांते लोकसंक्षयं १२ ॥ ॥ ॥ ॥

राम०
२

© Dharmartha Trust J&K. Digitized By eGangotri

१३ १४ २० द्वितीयः क्रोशमात्रं १ २ ३ ४

विलपंत्योरुदंत्यः स्मधावमानास्ततस्ततः शोकेनाभ्याहतज्ञानाः कर्त्तव्यंनप्रजज्ञिरे १३ व्रीडांजग्मुःपुरायाःस्मस
खीनामपियोषितः एकवस्त्रास्त्वनिर्लज्जाःश्वश्रूणांपुरतोभवन् १४ परस्परंसुसूक्ष्मेषुशोकेष्वाश्वासयंस्तदा ताः
शोकविह्वलाराजन्ननैवैक्षंतपरस्परं १५ ताभिःपरिवृतोराजारुदंतीभिःसहस्रशः निर्ययौनगराद्दीनस्तूर्णमायोध
नंप्रति १६ शिल्पिनोवणिजोवैश्याःसर्वकर्मोपजीविनः तेपार्थिवंपुरस्कृत्यनिर्ययुर्नगराद्बहिः १७ तासांविक्रोशमा
नानामार्त्तानांकुरुसंक्षये प्रादुरासीन्महाञ्छब्दोव्यथयन्भुवनान्युत १८ युगांतकालेसंप्राप्तेभूतानांदह्यतामिव अ
भावःस्यादयंप्राप्तइतिभूतानिमेनिरे १९ भृशमुद्विग्नमनसस्तेपौराःकुरुसंक्षये प्राक्रोशंतमहाराजस्वनुरक्तास्तदाभृशं
२० इतिमहाभारतेस्त्रीपर्वणि वैशंपायनउवाच क्रोशमात्रंततोगत्वाददृशुस्तान्महारथान् शारद्वतंकृपंद्रौणिं
कृतवर्माणमेवच १ तेतुदृष्ट्वैवराजानंप्रज्ञाचक्षुषमीश्वरं अश्रुकंठाविनिःश्वस्यरुदंतमिदमब्रुवन् २ सुतस्तव
महाराजकृत्वाकर्मसुदुष्करं गतःसानुचरोराजन्शक्रलोकंमहीपते ३ दुर्योधनबलान्मुक्तावयमेवत्रयोरथाः स
र्वमन्यत्परिक्षीणंसैन्यंतेभरतर्षभ ४ इत्येवमुक्त्वाराजानंकृपःशारद्वतस्ततः गांधारींपुत्रशोकार्त्तामिदंवचनमब्रवी

© Dharmartha Trust J&K. Digitized By eGangotri

स्त्री०
३

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ निष्क्रांतंमरणांतं १७

अभीतायुध्यमानास्तेघ्नंतः शत्रुगणानबहून् वीरकर्माणिकुर्वाणाः पुत्रास्तेनिधनंगताः ६ अंधसंप्राप्यलोकांस्तेनि
र्मलान्शस्त्रनिर्जितान् भासुरैदेहमास्थायविचरंत्यमराइव ७ नहिकश्चिद्धिशूराणांयुध्यमानः पराङ्मुखः शस्त्रेण
निधनंप्राप्तोनचकश्चित्कृतांजलिः ८ एवंतांक्षत्रियस्याहुः पुराणाः परमांगतिं शस्त्रेणनिधनंसंख्येतन्नशोचितुमर्हसि ९
नचापिशत्रवस्तेषांयुध्यंतेराजिपांडवाः श्रृणुयत्कृतमस्माभिरश्वत्थामपुरोगमैः १० अधर्मेणहतंश्रुत्वाभीमसेनेनते
सुतं सुप्तंशिबिरमाविश्यपांडूनांकदनंकृतं ११ पांचालानिहताः सर्वेधृष्टद्युम्नपुरोगमाः द्रुपदस्यात्मजाश्चैवद्रौपदे
याश्चपातिताः १२ तथाविशसनंकृत्वापुत्रशत्रुगणस्यते प्राद्रवामरणास्पते प्राद्रवामरणेस्थातुंनहिशक्यामहेत्रयः
१३ तेहिशूरामहेष्वासाः क्षिप्रमेष्यंतिपांडवाः अमर्षवशमापन्नावैरंप्रतिजिहीर्षवः १४ तेहतानात्मजान्श्रुत्वाप्र
मत्ताः पुरुषर्षभाः निरीक्षंतः पदंशूराः क्षिप्रमेवयशस्विनी १५ तेषांतुकदनंकृत्वासंस्थातुंनोत्सहामहे अनुजा
नीहिनोराज्ञिमाचशोकेमनः कृथाः १६ राजंस्त्वमनुजानीहिधैर्यमातिष्ठचोत्तमं दृष्टांतंपश्यचापित्वंक्षात्रंधर्मं
चकेवलं १७ ॥ ॥ ॥ ॥

एम०
३

© Dharmartha Trust J&K. Digitized By eGangotri

२३ तदनंतरं २४ तृतीयःहतेषु १ २ ३ ४ ५ कृपाचार्यकृतवर्मभ्यांवियोगानंतरं ॥ ॥ ॥

इत्येवमुक्त्वाराजानंकृत्वाचाभिप्रदक्षिणं कृपश्चकृतवर्माचद्रोणपुत्रश्चभारत १८ अवेक्ष्यमाणाराजानंधृतराष्ट्रंमनीषिणं गंगा
मनुमहात्मानस्तूर्णमश्वानचोदयन १९ अपक्रम्यतुतेराजनसर्वएवमहारथाः आमंत्र्यान्योन्यमुद्विग्नास्त्रिधातेप्रययुस्तदा २०
जगामहास्तिनपुरंकृपः शारद्वतस्तदा स्वमेवराष्ट्रंहार्दिक्योद्रौणिर्व्यासाश्रमंययौ २१ एवंतेप्रययुर्वीरावीक्ष्यमाणाःपरस्परं भया
र्त्ताः पांडुपुत्राणामागस्कृत्वामहात्मनां २२ समेत्यवीराराजानंतदात्वनुदितेरवौ विप्रजग्मुर्महाराजयथेच्छकमरिंदमाः २३ स
मासाद्याथवैद्रौणिंपांडुपुत्रामहारथाः अजयंस्तरसाराजनविक्रम्यतदनंतरं २४ इतिमहाभारतेस्त्रीपर्वणि वैशंपायनउ
वाच हतेषुतेषुसैन्येषुधर्मराजोयुधिष्ठिरः शुश्रुवेपितरंवृद्धंनिर्यातंनागसाह्वयात १ सोभ्ययात्पुत्रशोकार्त्तःपुत्रशोकपा
रिप्लुतं शोचमानंमहाराजभ्रातृभिःसहितस्तदा २ अन्वीयमानोवीरेणदाशार्हेणमहात्मना युयुधानेनचतथा तथा
चैवयुयुत्सुना ३ तमन्वयात्सुदुःखार्त्ताद्रौपदीशोककर्षिता सहपांचालयोषिद्भिर्यास्तत्रासन्समागताः ४ सगंगा
मनुवृंदानिस्त्रीणांभरतर्षभ कुररीणामिवार्त्तानांक्रोशंतीनांददर्शच ५ ५ ॥स१ ॥ ॥ ॥

स१

स्त्री०
५

प्रियाप्रिये: पांडवानांप्रिया: अभिमन्युप्रभृतय: अप्रिया: दुर्योधनादय: तैर्हेतुभि: क्रोशंतीभीरितिसंबंध: १४ आक्षिप्यनिवार्यआपसंलोहमयं १५ सं

ताभि: परिवृतोराजाक्रोशंतीभि: सहस्रश: ऊर्ध्ववाहुभिरार्ताभीरुदंतीभि: प्रियाप्रिये: ६ क्वनुधर्मज्ञतारा राज्ञ: क्वनुसाद्यान्टशंस
ता यच्चावधीत्पितॄन्भ्रातॄन्गुरुपुत्रान्सखीनपि ७ घातयित्वाकथंद्रोणंभीष्मंचापिपितामहं मनस्तेभून्महाराजहत्वाचापि
जयद्रथं ८ किंनुराज्येनतेकार्यंपितॄन्भ्रातॄनपश्यत: अभिमन्युंचदुर्धर्षंद्रौपदेयांश्चभारत ९ अतीत्यतामहावाहु: क्रोशंती:
कुररीरिव ववंदेपितरंज्येष्ठंधर्मराजोयुधिष्ठिर: १० ततोभिवाद्यपितरंधर्मेणामित्रकर्षणा: न्यवेदयंतनामानिपांडवास्तेपि
सर्वश: तमात्मजांतकरणंपितापुत्रवधार्दित: अप्रीयमाण: शोकार्त्त: पांडवंपरिषस्वजे १२ धर्मराजंपरिष्वज्यसांत्वयि
त्वाचभारत दुष्टात्माभीममन्विच्छन्दिधक्षुरिवपावक: १३ सकोपपावकस्तस्यशोकवायुसमीरित: भीमसेनमयंदावंदि
धक्षुरिवदृश्यते १४ तस्यसंकल्पमाज्ञायभीमंप्रत्यशुभंहरि: भीममाक्षिप्यपाणिभ्यांप्रददौभीममायसं १५ प्रागेवतु
महावुद्धिर्वुध्वात्तस्येंगितंहरि: संविधानंमहाप्राज्ञस्तत्रचक्रेजनार्दन: १६ तंगृहीत्वैवपाणिभ्यांभीमसेनमयस्मयं वभं
जवलवान्राजामन्यमानोवृकोदरं १७

विधानंआपसस्यभीमस्यनिर्माणं १७ १७ ॥ ॥ ॥

राम०
५

© Dharmartha Trust J&K. Digitized By eGangotri

२० पुत्रेतिधर्मादपकृष्टंआलिंगनच्छलेनभीमवधः कर्तव्यइत्याशयः ३० हेकौरव्यात्महताश्चापिनजीवेयुःगतायुषस्ते॥ ॥ ॥ ॥ ॥ ॥

नागायुतवलप्राणः सराजाभीममायसं भंक्काविमथितोरस्कः सुस्रावरुधिरंमुखात् १८ ततः पपातमेदिन्यांतथैवरुधिरोक्षि
तः प्रपुष्पिताग्रशिखरः पारिजातइवद्रुमः १९ प्रत्यगृह्णाच्चतंविद्वान्सूतोगावल्गणिस्तदा मैवमित्यब्रवीच्चैनंशमयन्सान्त्वयन्नि
व २० सतुकोपंसमुत्सृज्यगतमन्युर्महामनाः हाहाभीमेतिचुक्रोशनृपः शोकसमन्वितः २१ तंविदित्वागतक्रोधंभीमसेनव
धार्दितं वासुदेवोवरः पुंसामिदंवचनमब्रवीत् २२ माशुचोधृतराष्ट्रत्वंनैषभीमस्त्वयाहतः आयसीप्रतिमाह्येषात्वयाराज
न्निपातिता २३ त्वांक्रोधवशमापन्नंविदित्वाभरतर्षभ मयापकृष्टः कौंतेयोमृत्योर्दंष्ट्रांतरंगतः २४ नहितेराजशार्दूलवले
तुल्योस्तिकश्चन कःसहेतमहावाहोवाह्वोर्निग्रहणंनरः २५ यथांतकमनुप्राप्यजीवन्कश्चिन्नमुच्यते एवंबाह्वंतरंप्रा
प्यतवजीवेन्नकश्चन २६ तस्मात्पुत्रेणयातेसौप्रतिमाकारितायसी भीमस्यसेयंकौरव्यतवैवोपहृतामया २७ पुत्रशो
काभिसंतप्तंधर्मादपकृतंमनः तवराजेंद्रतेनत्वंभीमसेनंजिघांससि २८ नचतत्तेक्षमंराजन्हन्यास्त्वंयद्वृकोदरं नहिपुत्रा
महाराजजीवेयुस्तेकथंचन २९ तस्माद्यत्कृतमस्माभिर्मन्यमानैः शमंप्रति अनुमन्यस्वतत्सर्वंमाचशोकेमनःकृथाः ३०

इतिमहाभारतेस्त्रीपर्वणि॥ ॥

६५

© Dharmartha Trust J&K. Digitized by eGangotri

ततः १ ३ ततस्तथाः ततस्तत वान्सिच्चउभावश्चार्थः ६ श्रेयोहिताहितेचउत्तमानानगर्हिलोते इत्यन्वयः १० अनागसिश्चापराधाभ्यावेपिपरित्यागोराज्यात्प्र

वैशंपायनउवाच ततएनमुपातिष्ठन्शौचार्थंपरिचारकाः कृतशौचंपुनश्चैनंप्रोवाचमधुसूदनः १ राजन्नधीतावेदास्तेशास्त्रा
णिविविधानिच कृतानिचपुराणानिरा जधर्माश्चकेवलाः २ एवंविद्वान्महाप्राज्ञः समर्थःसन्बलाबले आत्मापराधात्
स्मात्त्वंकुरुषेकोपमीदृशं ३ उक्तवांस्तानतैदेवास्भीष्मद्रोणौचभारत विदुरःसंजयश्चैवत्वंतुराजन्ननतैयथा ४ सर्वायमारोगा
नास्माकमकार्षीर्वचनंनरा पाण्डवानधिकान्राजन्बलेशौर्येचकौरव ५ राजाहिपंस्थिरप्रज्ञः स्वयंदोषानवेक्षते देशकालविभा
गंचपरंश्रेयः सविंदति ६ उत्तमानन्वयः श्रेयोगर्हलीनेनोहिताहिते आपदः समनुप्राप्यसशोचत्यनयेस्थितः ७ त
तोऽस्यवृत्तमाज्ञानेसमवेक्षस्वभारत राजस्त्वंह्यविधेयात्मादुर्योधनवशेस्थितः ८ आत्मापराधात्पन्नस्तत्किंभीमंजिघांससि
तस्मात्संयच्छयकोपंत्वंस्वमनुस्मृत्यदुष्कृतं ९ यस्तांस्पर्द्धयाक्षुद्रः पांचालीमानयत्सभां सहतोभीमसेननेवैरंप्रतिजि
हीर्षता १० आत्मनोतिक्रमंपश्यपुत्रस्यचदुरात्मनः पदनागसिपांडूनांपरित्यागः परंतप ११ वैश० एवमुक्तस्तकृ
ष्णेनसर्वंसत्यंजनाधिप उवाचेदंवकीपुत्रंधृतराष्ट्रोमहीपतिः १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रोनेननिरस्कारः ११ ११ ११ ११ ११

© (P) Dharmartha Trust J&K. Digitized By eGangotri

१७ पंचमः ध्रत ६ सततवचः पांडवान्प्रत्युमुघंतवाकंयं ७ ॥ ॥ ॥ ॥

एवमेतन्महाबाहोयथावदसिमाधव पुत्रस्नेहस्तुधर्मात्मन्धैर्यान्मांसमचालयत् १३ दिष्ट्यात्तुपुरुषव्याघ्रोबलवान्सत्यवि
क्रमः त्वद्गुप्तोनागमत्कृत्स्नंभीमोवाइंतरंमम १४ इदानींत्वहमेकाग्रागतमन्युर्गतज्वरः मध्यमंपांडवंवीरंस्पृष्टुमिच्छामिकेशव
१५ हतेषुपार्थिवेंद्रेषुपुत्रेषुनिहतेषुवै पांडुपुत्रेषुवेशमेप्रीतिस्त्वाप्यवतिष्ठति १६ ततःसभीमंचधनंजयंचमाद्र्याश्चपुत्रौ
पुरुषप्रवीरौ पस्पर्शगात्रैः प्ररुदन्सुगात्रानाश्वास्यकल्याणमुवाचचैतान् १७ इतिमहाभारतेस्त्रीपर्वणि वैशंपायनउ
वाच धृतराष्ट्राभ्यनुज्ञातास्ततस्तेकुरुपुंगवाः अभ्ययुर्भ्रातरःसर्वेगांधारीसहकेशवाः १ ततोज्ञात्वाहतामित्रंधर्मराजंयुधि
ष्ठिरं गांधारीपुत्रशोकार्त्ताशप्तुमैच्छदनिंदिता २ तस्याःशापमभिप्रायंविदित्वापांडवान्प्रति ऋषिःसत्यवतीपुत्रःप्रागेव
समबुध्यत ३ सगंगायामुपस्पृश्यपुण्यगंधिपयःशुचि तंदेशमुपसंपेदेपरमर्षिर्मनोजवः ४ दिव्येनचक्षुषापश्यन्म
नसा तद्गतेनचसर्वप्राणभृतांभावंसतत्रसमबुध्यत ५ सस्नुषामब्रवीत्कालेकल्यवादीमहातपाः शापकालमवाक्षि
प्यशममाकालयुधीरयन् ६ नकोपःपांडवेकार्योगांधारिसमवाप्नुहि वचोनिगृह्यतामेतत्शृणुचेदंवचोमम ७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्री० ८५

९ नचास्यंतातमितिपोचेस्यस्यनंदुर्योधनंतोषमाणायाः आशीर्वचनेनतोषयंत्यास्तितवतांतांवाच वितथांनस्मरामीत्यच्चयः १७ कृतमानाः कृता

उक्तास्म्यहंदृष्ट्वाहानिपुत्रेणजयमिच्छता शिवमाशंसमेमातर्युध्यमानस्यशत्रुभिः ८ सातथावाच्यमानातुंकालेकालेजि
येषिणाउक्तवत्यस्मिगांधारियतोधर्मस्ततोजयः ९ नचाप्यतीतांगांधारिवाचंतेवितथामहं स्मरामितोषमाणायास्तथा
प्राणिहितात्वयि १० विग्रहेतुमुलेराज्ञांगत्वापारमसंशयं जितंपांडुसुतैर्युद्धेनूनंधर्मस्ततोधिकः ११ क्षमाशीलापुराभू
त्वासाद्यनक्षमसेकथं अधर्मंजहिधर्मज्ञेयतोधर्मस्ततोजयः १२ त्वंचधर्मंपरिस्मृत्यवाचंचोक्तांमनस्विनी कोपंसंय
च्छगांधारिमैवंभूः सत्यवादिनि १३ गांधार्युवाच भगवन्नाभ्यसूयामिनैता निच्छामिनश्यतः पुत्रशोकेनतुबला
त्मनोविह्वलतीवमे १४ यथैवकुंत्याकौंतेयारक्षितव्यास्तथामया तथैवधृतराष्ट्रेणरक्षितव्यामयायथा १५
दुर्योधनापराधेनशकुनेःसौबलेनच कर्णदुःशासनाभ्यांचहृत्तोयंकुरुसंक्षयः १६ नापराध्यतिबीभत्सुर्नचपार्थो
वृकोदरः नकुलःसहदेवोवानैवजातुयुधिष्ठिरः १७ युध्यमानाहिकौरव्याः कृतमानाः परस्परं निहताःसहिता
श्चान्यैस्तत्रनास्त्यप्रियंमम १८ किंतुकर्माकरोद्भीमोवासुदेवस्यपश्यतः दुर्योधनंसमाहूयगदायुद्धेमहामनाः
१९ शिक्षयाभ्यधिकंज्ञात्वाचरंतंबहुधारणे अधोनाभ्यांप्रहृतवांस्तन्मेकोपमवर्धयत् २० ॥ ॥ ॥ ॥

राम० ६

२१ यद्य: तच्छ्रुत्वा १ ५ उक्तवान्नहितेपत्तय: संजीमारि ६ अंसंगृह्य अनुपसंहृत्य ११ ॥

कथंनुधर्मंधर्मज्ञै: समुद्दिष्टंमहात्मभि: त्यजेत्पुराहेवृकोदर: प्राणहेतो: कथंचन २१ इतिमाहाभारते स्त्रीपर्वणि वैशंपायनउवाच
तच्छ्रुत्वावचनंतस्याभीमसेनोथभीतवत् गांधारींप्रत्युवाचेदंवच: सानुनयंतदा १ अधर्मोयदिवाधर्मस्त्रासात्तत्रमयाकृत: आ
त्मानंत्रातुकामेनतन्मेत्वंक्षंतुमर्हसि २ नहियुद्धेनपुत्रस्तेधर्मेणसमहाबल: नशक्य: केनचिद्धंतुमतोविषममाचरं ३
सैन्यस्यैकोवशिष्टोयंगदायुद्धेचवीर्यवान् मांहत्वानहरेद्राज्यमितिचैतत्कृतंमया ४ अधर्मेणजित: पूर्वंतेनचापियुधिष्ठिर:
निकृताश्चसदैवास्मततोविषममाचरं ५ राजपुत्रींचपांचालीमेकवस्त्रांरजस्वलां भवत्याविदितंसर्वमुक्तवान्यत्सुतस्त
व ६ दुर्योधनमसंगृह्यनशक्याभू: ससागरा केवलाभोक्तुमस्माभिरतश्चैतत्कृतंमया ७ तच्चाप्यप्रियमस्माकंपुत्रस्तेसमु
पाचरत् द्रौपद्यायत्सभामध्येसव्यमूरुमदर्शयत् ८ तत्रैववध्य: सोस्माकंदुराचारोम्बतेसुत: धर्मराजाज्ञयाचैवस्थिता:स्मस
मयेतदा ९ वैरमुद्दीपितंराज्ञिपुत्रेणतवतन्महत् क्लेशिताश्चवनेनित्यंततएतत्कृतंमया १० वैरस्यास्यगत: पारंह
त्वादुर्योधनंरणे राज्यंयुधिष्ठिर: प्राप्तोवयंचगतमन्यव: ११ ॥ ॥ ॥ ॥ ॥ ॥

स्त्री०
७

१६ वृषसेनेन कर्णपुत्रेण १७ दंतोष्ठात् अधरोष्ठादुपरि न गतमित्यर्थः दंतोष्ठादित्यपाठः २० कंचित् कमपि नशेषयः ॥ ॥ ॥

गांधार्युवाच नैतस्यैष वधस्तात यत्प्रशंससि मे सुतं कृतवांश्चाप्यशक्यं वै यदिदं मां प्रशंससि १२ हताश्वे नकुले यत्तु वृषसेने
न भारत अपिबः शोणितं संख्ये दुःशासनशरीरजं १३ सद्भिर्विगर्हितं घोरमनार्यजनसेवितं क्रूरं कर्माकरोस्तस्मात्तदयु
क्तं वृकोदर १४ भीमसेन उवाच अन्यस्यापि न पातव्यं रुधिरं किं पुनः स्वकं यथैवात्मा तथा भ्राता विशेषो नास्ति कश्च
५५ न १५ रुधिरं न व्यतिक्रामद्दंतोष्ठादंब मा शुचः वैवस्वतस्तु तद्वेद हस्तौ मे रुधिरोक्षितौ १६ हताश्वं नकुलं दृष्ट्वा वृषसे
नेन संयुगे भ्रातॄणां संप्रहृष्टानां त्रासः संजनितो मया १७ केशपक्षपरामर्शे द्रौपद्या द्यूतकारिते क्रोधाद्यदब्रुवं चाहं त
च्च मे तद्धृदि वर्तते १८ क्षत्रधर्माच्च्युतो राज्ञि भवेयं शाश्वतीः समाः प्रतिज्ञां तामनिस्तीर्य ततस्तत्कृतवानहं १९ न मामर्हसि
गांधारि दोषेण परिशंकितुं अनिगृह्य पुरा पुत्रानस्मास्वनपराधिषु अधुना किं तु दोषेण परिशंकितुमर्हसि २० गांधा
र्युवाच वृद्धस्यास्य शतं पुत्रान्निघ्नंस्त्वमपराजितः कस्मान्नाशेषयः कंचिद्येनाल्पमपराधितं २१ संतानमावयोस्तात एम०
वृद्धयोर्हृतराज्ययोः कथमंधद्वयस्यास्य यष्टिरेका न वर्जिता २२ शेषे ह्यवस्थिते तात पुत्राणामंतके त्वयि नेमदु
ःखं भवेदेतद्यदि त्वं धर्ममाचरेः २३

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

२९ कुनखीभूतोहस्तेदेशाङ्गनिरीक्षणः ३० ३१ ३२ ३३ ३४ ३५ ३६

वैशंपायनउवाच एवमुक्त्वातुगांधारीयुधिष्ठिरमपृछ्छत कसराजेतिसक्रोधापुत्रपौत्रवधार्दिता २४ तामभ्यगछ्छद्राजेंद्रो
वेपमानः कृतांजलिः युधिष्ठिरइदंचैनांमधुरंवाक्यमब्रवीत २५ पुत्रहंतानृशंसोहंतवदेवियुधिष्ठिरः शापार्हः पृथिवीना
शेहेतुभूतः शपस्वमां २६ नहिमेजीवितेनार्थोनराज्येनधनेनवा तादृशान्सुहृदोहत्वामूढस्यास्यसुहृद्द्रुहः २७ तमेवंव
दिनंभीतंसंनिकर्षगतंतदा नोवाचकिंचिद्गांधारीनिश्वासपरमाभृशं २८ तस्यावनतदेहस्यपादयोर्निपतिष्यतः
युधिष्ठिरस्यनृपतेर्धर्मज्ञादीर्घदर्शिनी २९ अंगुल्यग्राणिददृशेदेवीपटांतरेणसा ततः सकुनखीभूतोदर्शनीयन
खोनृपः ३० तंदृष्ट्वाचार्जुनोगछ्छद्वासुदेवस्यपृष्ठतः एवंसंचेष्टमानांस्तानितश्चेतश्चभारत ३१ गांधारीविगतक्रो
धासांत्वयामासमातृवत तयातेसमनुज्ञातामातरंवीरमातरं ३२ अभ्यगछ्छंतसहिताः पृथांपृथुलवक्षसः चिरस्यद
ष्ट्वासापुत्रान्पुत्राधिभिरभिप्लुता ३३ वाष्पमाहारयद्देवीवस्त्रेणावृत्यवैमुखं ततोवाष्पंसमुत्सृज्यसहपुत्रैस्तथापृ
था ३४ अपश्यदेतान्शस्त्रौघैर्बहुधापरिविक्षतान् सातानेकैकशः पुत्रान्संस्पृशंतीपुनः पुनः ३५ अन्वशोचत
दुःखार्ताद्रौपदींचहतात्मजां रुदतीमथपांचालींददर्शपतितांभुवि ३६

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्री० ८

द्रौपद्युवाच आर्यपुत्राः क्वतेसर्वेसौभद्रसहितागताः नत्वांतेद्याभिगछंतिचिरंदृष्ट्वातपस्विनीं ३७ किंनुराज्येनवैकार्यंविही
नायाःसुतैर्मम तांसमाश्वासयामासपृथापृथुललोचना ३८ उत्थाप्ययाज्ञसेनींतुरुदंतींशोककर्षितां तयैवसहितावापि
पुत्रैरनुगतान्नृप ३९ अभ्यगछतगांधारीमार्त्तामार्त्ततरास्वयं तामुवाचाथगांधारीसहवध्वायशस्विनी ४० मैवंपुत्रीतिदुः
खार्त्तापश्यमामपिदुःखितां मन्येलोकविनाशोयंकालपर्यायचोदितः ४१ अवश्यभावीसंप्राप्तःस्वभावाल्लोमहर्षणः इ
दंतत्समनुप्राप्तंविदुरस्यवचोमहत् ४२ अपिसिद्धानुनयेकृष्णेयदुवाचमहामतिः तस्मिन्नपरिहार्येर्थेअतीतेचविशेषत
:माशुचोनहिशोच्यास्तेसंग्रामेनिधनंगताः तथैवत्वंतथैवाहंकोवामाश्वासयिष्यति ४४ ममैवह्यपराधेनकुलमग्र्यंवि
नाशितं इतिमहाभारतेस्त्रीपर्वणि वैशंपायनउवाच एवमुक्त्वातुगांधारीकुरूणामवकर्त्तनं अपश्यत्तत्रतिष्ठंतीह
ष्टिदिव्येनचक्षुषा १ पतिव्रतामहाभागासमानव्रतचारिणी उग्रेणतपसायुक्तासततंब्रह्मचारिणी २ वरदानेनकृष्णस्य
महर्षेःपुण्यकर्मणः दिव्यज्ञानबलोपेताविविधंपर्यदेवयत् ३ ददर्शसाबुद्धिमतीदूरादपिमथांतिके रणाजिरंनृवीरा एम० ८
णामद्भुतंलोमहर्षणं ४ ॥ ॥ ॥ ॥

© (c) Dharmartha Trust J&K. Digitized by eGangotri

अस्थिकेशपरिस्तीर्णं शोणितौघपरिप्लुतं शरीरैर्बहुसाहस्रैर्विनिकीर्णं समंततः ५ गजाश्वरथयोधानामावृतं रुधिराविलैः शरीरै
रशिरस्कैश्च विदेहैश्च शिरोगणैः ६ गजाश्वनरनारीणां निःस्वनैरभिसंवृतं सृगालवककाकोलकंककाकनिषेवितं ७ रक्षसां पुरुषा
दानां मोदनं कुरराकुलं अशिवाभिः शिवाभिश्च नादितं गृध्रसेवितं ८ ततो व्यासाभ्यनुज्ञातो धृतराष्ट्रो महीपतिः पांडुपुत्राश्च ते सर्वे यु
धिष्ठिरपुरोगमाः ९ वासुदेवं पुरस्कृत्य हतबंधुं च पार्थिवं कुरुस्त्रियः समासाद्य जग्मुरायोधनं प्रति १० समासाद्य कुरुक्षेत्रं ताः स्त्रियो
निहतेश्वराः अपश्यंत हतांस्तत्र भ्रातॄन्पुत्रान्पितॄन्पतीन ११ क्रव्यादैर्भक्ष्यमाणान्वै गोमायुवलवायसैः भूतैः पिशाचै रक्षोभिर्वि
विधैश्च निशाचरैः १२ रुद्राक्रीडनिभं दृष्ट्वा तदा विशसनं स्त्रियः महार्हेभ्योथ यानेभ्यो विक्रोशंत्यो निपेतिरे १३ अदृष्टपूर्वं पश्यंत्यो दुः
खार्त्ता भरतस्त्रियः शरीरेष्वस्खलन्नन्या न्यपतंश्चापरा भुवि १४ श्रांतानां चाप्यनाथानां नासीत्काचन चेतना पांचालकुरुयोषा
णां कृपणं तदभून्महत् १५ दुःखोपहतचित्ताभिः समंतादनुनादितं दृष्ट्वायोधनमत्युग्रं धर्मज्ञा सुबलात्मजा १६ ततः सा पुं
डरीकाक्षमामंत्र्य पुरुषोत्तमं कुरूणां वैशसं दृष्ट्वा दुःखाद्वचनमब्रवीत् १७ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्री०
९

२५ पांचालानांस्हतानांरथिआरीवांआदीनां कुरुपांचालवधात्कृत्स्नंपापंमेनिकंजगन्मिमितिभाव: २६ २७ ३०

श्प५

पश्यैतांपुंडरीकाक्षस्नुषास्तेनिहतेश्वरा: प्रकीर्णकेश्य: क्रोशंत्य: कुररीरिवमाधव १८ अमूस्त्वभिसमागम्यस्मरंत्योभरतर्षभान्
पृथगेवाभ्यधावंतपुत्रान्भ्रातॄन्पितॄन्पतीन् १९ वीरसूभिर्महाबाहोहतपुत्राभिरावृतं क्वचिच्चवीरपत्नीभिर्हतवीराभिरावृतं २०
शोभितंपुरुषव्याघ्रैर्भीष्मकर्णाभिमन्युभि: द्रोणद्रुपदशल्यैश्चज्वलद्भिरिवपावकै: २१ कांचनै: कवचैर्निष्कैर्मणिभिश्चमहा
त्मनां अंगदैर्हस्तकेयूरै: स्रग्भिश्चसमलंकृतं २२ वीरबाहुविसृष्टाभि: शक्तिभि: परिघैरपि खड्गैश्चविविधैस्तीक्ष्णै: सशरै
श्चशरासनै: २३ क्रव्यादसंघै: सहितैस्तिष्ठद्भिर्विविधै: क्वचित् क्वचिदाक्रीडमानैश्च शयानैरपरै: क्वचित् २४ एतदेवंविधंवीर
संपश्यायोधनंविभो पश्यमानाहिदह्यामिशोकेनाहंजनार्दन २५ पांचालानांकुरूणांचविनाशंमधुसूदन पंचानामिवभूता
नामहंवधमचिंतयं २६ तान्सुपर्णाश्चगृध्राश्चविकर्षंत्यसृगुक्षिता: निगृह्यचरणैर्गृध्राभक्षयंतिसहस्रश: २७ जयद्रथस्यक
र्णस्यतथैवद्रोणभीष्मयो: अभिमन्योर्विनाशंचकश्चिंतयितुमर्हति २८ अवध्यकल्पान्निहतान्दृष्ट्वाहंमधुसूदन गृध्रकंकव
टश्येनश्वसृगालादनीकृतान् २९ अमर्षवशमापन्नान्दुर्योधनवशेस्थितान् पश्येमान्पुरुषव्याघ्रान्संशांतान्पावकानि

व ३०

राम०
९

© Dharmartha Trust J&K. Digitized By eGangotri

शयनान्युचिताः सेवेमहार्हाणि विमलानि च विपर्यस्तैर्वसुधां विवृतामधिशेरते ३१ वंदिभिः सततं कालेस्तवैरग्र्यैरभिनंदिताः शिवा मा
महिवा घोराः श्रृण्वंति विविधा गिरः ३२ ये पुरा शेरते वीराः शयनेषु यशस्विनः चंदनागुरुदिग्धांगास्ते पांसुषु शेरते तेषामाभरणा
न्येते गृध्रगोमायुवायसाः आक्षिपंत्यशिवा घोरा विनदंत्यः पुनः पुनः ३४ बाणान्युधि विनिशितान्पीतान्निस्त्रिंशान्विमलानगदाः युद्धाभि
मानिनः प्रीता जीवंत इव बिभ्रति ३५ सुरूपवर्णा बहवः क्रव्यादैरवघट्टिताः आर्षभप्रतिरूपाश्च शेरते हरितस्रजः ३६ अपरे पुनरालिंग्य ग
दाः परिघबाहवः शेरतेभिमुखाः शूराः दयिता इव योषितः ३७ बिभ्रतः कवचान्यन्ये निर्मलान्यायुधानि च न धर्षयंति क्रव्यादा जी
वंतीति जनार्दन ३८ क्रव्यादैः कृष्यमाणानामपरेषां महात्मनां शातकौम्भ्यः स्रजश्चित्रा विनिकीर्णाः समंततः ३९ एते गोमायवो भी
ता निहतानां महात्मनां कंठांतरगतान्हारानाक्षिपंति सहस्रशः ४० सर्वेष्वपररात्रेषु यानानंदंत वंदिभिः स्तुतिभिश्च परार्ध्याभिरुप
चारैश्च शिक्षिताः ४१ तानिमाः परिदेवंति दुःखार्त्ताः परमांगनाः कृपणं वृष्णिशार्दूल दुःखशोकार्दिता भृशं ४२ रक्तोत्पलव
नानीव विभांति रुचिराणि च मुखानि परमस्त्रीणां परिशुष्काणि केशव ४३ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

४६ स्त्राः शोचन्तीः अभिलक्ष्यन्तिशेषः ५३ विजग्धानमक्षितान् ५४ ५५ ५५ ५५

हृदिदिताषरस्त्रास्ताध्यायंत्यः संपरिप्लुताः कुरुस्त्रियोभिगच्छंति तेनतेनैव दुःखिताः ४४ एतास्त्वादित्यवर्णानि तपनीयनिभानि
च रोषरोदनताम्राणि वक्त्राणि कुरुयोषितां ४५ आसामपरिपूर्णार्थं निशम्य परिदेवितं इतरेतरसंक्रन्दान्न विजानंति योषित
ः ४६ एता दीर्घं विनिश्वस्य विलप्य च पुनः पुनः विस्पन्दमाना दुःखेन वीरा जहति जीवितं ४७ बह्व्यो दृष्ट्वा शरीराणि क्रोशन्ति वि
लपंति च पाणिभिश्चापरा घ्नंति शिरांसि मृदुपाणयः ४८ शिरोभिः पतितैर्हस्तैः सर्वांगैर्यूथशः कृतैः इतरेतरसंपृक्तैरा
कीर्णा भाति मेदिनी ४९ विशिरस्कानथो कायान्दृष्ट्वा घोराभिनन्दिनः मुह्यंत्यनुचिता नार्यो विदेहानि शिरांसि च ५०
शिरः कायेन संधाय प्रेक्षमाणा विचेतसः अपश्यंत्यो परं तत्र नेदमस्येति दुःखिताः ५१ बाहूरुचरणानन्यान्विशिखान्म
थितान्पृथक् संदधत्यः सुखाविष्टा मूर्छंत्येताः पुनः पुनः उत्कृत्तशिरसश्चान्यान्विजग्धान्मृगपक्षिभिः दृष्ट्वा काश्चि
न्न जानंति भर्तॄन्भरतयोषितः ५३ पाणिभिश्चापरा घ्नंति शिरांसि मधुसूदन प्रेक्ष्य भ्रातॄन्पितॄन्पुत्रान्पतींश्च निहतान्य
ैः ५४ बाहुभिश्च सखड्गैश्च शिरोभिश्च सकुण्डलैः अगम्यकल्पा पृथिवी मांसशोणितकर्दमा ५५

© Dharmartha Trust J&K. Digitized By eGangotri

पर्व अष्टमः नतो १ २ ३ ४ ५ ८ ॥

नष्टाः स्वप्नचिताः पूर्वेर्दुः खंगांहस्तनिर्जिताः भ्रातृभिः पितृभिः पुत्रैरुपकीर्णांवसुंधरां ५६ यथानिवकिशोरीणांसुकेशीनां
जनार्दन स्नुषाणांधृतराष्ट्रस्यपश्यपश्यवृन्दानेकशः ५७ इतोदुःखतरंकिंनुकेशवप्रतिभातिमे यदिमाः कुर्वतेसर्वारूपमुच्चाव
चस्त्रियः ५८ नूनमाचरितंपापंमयापूर्वेषुजन्मसु यापश्यामिहतान्पुत्रान्पौत्रान्भ्रातॄंश्चकेशव एवमार्त्ताविलपतीहद
शनिहतंसुतं ५९ इतिमहाभारतेस्त्रीपर्वणि वैशंपायनउवाच ततोदुर्योधनंदृष्ट्वागांधारीशोकमूर्छिता सहसान्यपतद्भूमौ
छिन्नेवकदलीवने १ सातुलब्ध्वापुनःसंज्ञांविक्रुश्यचपुनःपुनः दुर्योधनमभिप्रेक्ष्यशयानंरुधिरोक्षितं २ परिष्वज्यच
गांधारीकृपणंपर्यदेवयत् हाहापुत्रेतिशोकार्त्ताविललापाकुलेंद्रिया ३ सुगूढजत्रुंविपुलंहारनिष्कनिषेवितं वा
रिणानेत्रजेनारःसिंचंतीशोकतापिता ४ समीपस्थंहृषीकेशमिदंवचनमब्रवीत् उपस्थितेस्मिन्संग्रामेज्ञातीनांसंक्ष
येविभो ५ मामयंप्राहवार्ष्णेयप्रांजलिर्नृपसत्तमः अस्मिन्ज्ञातिसमुद्धर्षेजयमंबाब्रवीतुमे ६ इत्युक्तेजानतीसर्वमहं
स्वव्यसनागमं अब्रुवंपुरुषव्याघ्रयतोधर्मस्ततोजयः ७ यथाचयुध्यमानस्त्वंनवैमुह्यसिपुत्रक ध्रुवंशस्त्रजितान्लो
कान्प्राप्स्यस्यमवरत्प्रभो ८ ॥ ॥ ॥

स्त्री०
११

दृश्यैवमनुवंपूर्वैनैनंशोचाम्यहंसुतं धृतराष्ट्रंतुशोकार्त्तमिकृपणमनुबांधवं ९ अमर्षणंयुधांश्रेष्ठंकृतास्त्रंपुरदुर्मदं शयानंवीर
शयनेपश्यमाधवमेसुतं १० योयंमूर्धाभिषिक्तानामग्रेयातिपरंतप सोयंपांसुषुशेतेद्यपश्यकालस्यपर्ययं ११ ध्रुवंदुर्योधनोवीरो
गतिंनसुलभांगतः तथाह्यभिमुखःशेतेशयनेवीरसेविते १२ यंपुरापर्युपासीनारमयंतिवराःस्त्रियः तंवीरशयनेसुप्तंरमयंत्यशि
वाःशिवाः १३ यंपुरापर्युपासीनारमयंतिमहीक्षितः महीतलस्थंनिहतंगृध्रास्तंपर्युपासते १४ यंपुराव्यजनैरग्र्यैरुपवीजं
तियोषितः तमद्यपक्षव्यजनैरुपवीजंतिपक्षिणः १५ एषशेतेमहाबाहुर्बलवान्सत्यविक्रमः सिंहेनेवद्विपःसंख्येभीमसेनेनन
पातितः १६ पश्यदुर्योधनंकृष्णशयानं रुधिरोक्षितं निहतंभीमसेनेनगदामुद्यम्यभारत १७ अक्षौहिणीर्महाबाहुर्दशचैका
चकेशव आनयद्यःपुरासंख्येसोनयान्निधनंगतः १८ एषदुर्योधनःशेतेमहेष्वासोमहारथः शार्दूलइवसिंहेनभीमसेनेनपा
तितः १९ विदुरंह्यवमन्येषपितरंचैवमंदभाक् बालोवृद्धावमानेनमंदोमृत्युवशंगतः २० निःसपत्नामहीयस्यत्रयोदशस
मास्थिता सशेतेनिहतोभूमौपुत्रोमेपृथिवीपतिः २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम०
११

© Dharmartha Trust J&K. Digitized By eGangotri

ईई पंचशाखाभ्यां पंचांगुलिभ्यां ३० ३१ नवमः ४५५५ १ १ ११

अपश्यंकृत्स्नांपृथिवींधार्त्तराष्ट्रानुशासितां शून्यांहस्तिगवाश्वेनवार्ष्णेयनतुतच्चिरं २२ तामेवाद्यमहाबाहोपश्याम्य
न्यानुशासनां हीनांहस्तिगवाश्वेनकिंनुजीवामिमाधव २३ इदंकृच्छ्रतरंपश्यपुत्रस्यापिवधान्मम यदिमाः पर्युपासंतेहता
न्शूरान्रणेस्त्रियः २४ प्रकीर्णकेशांसुश्रोणींदुर्योधनभुजांकगां रुक्मवेदीनिभांपश्यकृष्णलक्ष्मणमातरं २५
नूनमेषापुराबालाजीवमानेमहाभुजे भुजावाश्रित्यरमतेसुभुजस्यमनस्विनी २६ कथंतुशतधानेदंहृदयंमेविदी
र्यते पश्यंत्यानिहतंपुत्रंपुत्रेणसहितंरणे २७ पुत्रंरुधिरसंसिक्तमुपजिघ्रत्यनिंदिता दुर्योधनंतुवामोरूः पा
णिनापरिमार्जति २८ किंनुशोचतिभर्त्तारंपुत्रंचैषामनस्विनी तथाह्यवस्थिताभातिपुत्रंचाप्यभिवीक्ष्यमे २९
स्वशिरः पंचशाखाभ्यामभिहत्यायतेक्षणा पतत्युरसिवीरस्यकुरुराजस्यमाधव ३० पुंडरीकमिवाभातिपुंडरीकांत
रप्रभा मुखंप्रमृज्यपुत्रस्यभर्त्तुश्चैवतपस्विनी ३१ यदिचाप्यागमाःसंतियदिवाश्रुतयस्तथाध्रुवंलोकानवाप्तोयं
नृपोबाहुबलार्जितान् ३२ इतिमहाभारतेस्त्रीपर्वणि गांधार्युवाच पश्यमाधवपुत्रान्मेशतसंख्यान्जितक्लमान्
गदयाभीमसेनेनभूयिष्ठंनिहतान्रणे १ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्री०
१२

४ कासंमितमध्यमामुष्टिप्रमितमध्या ५ ६ ८ १४

इंद्र्द्रुः स्वतरंमेघयदिमामुक्तामर्ष्वेजाः हतपुत्रारणोवालाः परिधावंतिमेस्नुषाः १ प्रासादतलचारिण्यस्वरणोर्भूषणा
न्विताः आपन्नायतस्त्रंगतोमातृधिराईवसुधंरा २ गृध्राणुन्सारयंत्यस्वजत्यागोमायुवायसान् शोकेरार्त्तोविघूर्णितो
मत्ताइवचंरत्युत ४ यथावैत्वनवघांगीकार्समितमध्यमा घोरंतेहृशसंदृष्ट्वानिपतत्यनिरुः स्थिता ५ दृष्ट्वामेपार्थिवसु
सेतामेतां ४ तोलक्ष्मरणमातरं राजपुत्रीमहावाहोमनोनत्युपशाम्यति ६ भ्रातृभ्यान्याः पतीभ्यान्याः पुत्राभ्यानिहतानरणे दृष्ट्वाप
रिपतंत्येताः मगत्यस्वभुजाभुजानमध्यमानानुनारीणांच[illegible]वानां वापराजितः श्वांकंदहतवंघूनोदारुणोवैशसेमृरणा ८
रथनीडानिदेहांश्चहतानांगजवाजिनां श्राश्रिताः श्रममोहान्ताः स्थितापश्यमहावले ९ श्रमंपाचापदृतंकायाजनेवा
रुक्तुंडलमुन्नसं स्वस्यवंधोः शिरः कृष्णगृहीलापश्यतिपद्मनी १० पूर्वजातिकृतंपापंमनेमेनाल्पमिवानघ एताभिरन
वद्याभिर्मयाचैवाल्पमेधसा ११ यदिदृंधर्मराजेनपातितंनोजनार्दन नहिनाशोस्तिवाष्णेयकर्मरणोः शुभपापयोः
प्रत्यग्रवयसेभ्यवदर्शनीयकुचोदरा कुलेषुजाताह्रीमस्यः कृष्णपश्याक्षिमर्ष्वेजाः १३ हंसगद्गदभाषिण्यपीडुः
खशोकप्रमोहिताः सारस्यइववाशांसः पतिताः पश्यमाधव १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
१२

पु

नीलपद्मप्रकाशानि पुंडरीकाक्षयोषितां अनवद्यानि वक्त्राणि तान्यपश्यत्स्वरश्मिवान् १५ दृष्ट्वेरांणाममपुत्राणां वासुदेवाविरोधनं मन्नमातं
गदर्पाणांपश्यत्स्वघ्रपृथग्जनाः १६ शतचंद्राणि चर्माणि ध्वजांश्चादित्यसन्निभान् रौक्माणि चैव कर्माणि निष्कानपि च कांचनान् १७
शीर्षत्राणानि चैतानि पुत्राणां मे महीतले पश्य दीप्तानि गोविंद पावकान् सुहुतानिव १८ समदुःशासनः शेते शूरेणामित्रघातिना पी
तशोणितनसर्वाणायुधि भीमेन पातितः १९ गदया भीमसेनेन पश्य माधव मे सुतं द्यूतक्लेशाननुस्मृत्य द्रौपद्या चोदितेन च २० उक्ताद्य
नेन पांचाली सभायां द्यूतनिर्जिता प्रियं चिकीर्षता भ्रातुः कर्णस्य च जनार्दन २१ सहैव सहदेवेन नकुलेनार्जुनेन च दासभार्यासि पांचा
ली क्षिप्रं प्रविश नो गृहं २२ ततोहमब्रुवं कृष्णं तदा दुर्योधनं नृपं मृत्युपाशपरिक्षिप्तं शकुनिं पुत्र वर्जय २३ निरोधेनं सुदुर्बुद्धिं मातुलं
कलहप्रियं क्षिप्रमेनं परित्यज्य पुत्र शाम्यस्व पांडवैः २४ न बुध्यसे त्वं दुर्बुद्धे भीमसेनममर्षणं वाङ्नाराचैस्तुदंस्तीक्ष्णैरुल्काभिरि
व कुंजरं २५ तानेवं रहसि क्रुद्धो वाक्शल्यानवधारयन् उत्ससर्ज विषं तेषु सर्पो गोवृषभेष्विव २६ एष दुःशासनः शेते विक्षिप्य
विपुलौ भुजौ निहतो भीमसेनेन सिंहेनेव महागजः २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नै१

© Dharmartha Trust J&K. Digitized By eGangotri

स्त्री०
१२

२८ इयामः एवमाधवेतिसप्तार्थः १ २ ३ ४ १० ११

अस्यर्थमकरोद्रौद्रं भीमसेनोत्यमर्षणः दुःशासनस्य यत्क्रुद्धोऽपिबच्छोणितमाहवे २८ इतिमहाभारते स्त्रीपर्वणि गांधार्युवाच १
एषमाधवपुत्रोमेविकर्णः प्राज्ञसंमतः भूमौविनिहतः शेतेभीमेनशतधाकृतः १ गजमध्येहतः शेतेभीमेनशतधाकृतः १ गजम
ध्येहतः शेतेविकर्णोमधुसूदन नीलमेघपरिक्षिप्तः शरदीवनिशाकरः २ अस्यचापग्रहेणैषपाणिः कृतकिणोमहान् कथंचि
छिद्यतेगृध्रैरत्तुकामैस्तलत्रवान् ३ अस्यभार्यामिषप्रेप्सून् गृध्रानेतांस्तपस्विनी वारयत्यनिशंबालानचशक्नोतिमाधव ४ युवा
वृंदारकः शूरोविकर्णः पुरुषर्षभः सुखोचितः सुखार्हश्चशेतेपांसुषुमाधव ५ कर्णिनालीकनाराचैर्भिन्नमर्माणमाहवे अ
द्यापिनजहात्येनंलक्ष्मीर्भरतसत्तम ६ एषसंग्रामशूरेणप्रतिज्ञां पालयिष्यता दुर्मुखोभिमुखः शेतेहतोरिगणहारिणा ७ अ
स्यैतद्वदनंकृष्णश्वापदैरर्धभक्षितं विभात्यभ्यधिकंतातसप्तम्यामिवचंद्रमाः ८ शूरस्यहिरणेकृष्णपश्याननमथेदृशं सकथं
निहतोमित्रैः पांसून्ग्रसतिमेसुतः ९ यस्याहवमुखेसौम्यस्थातानैवोपपद्यते सकथंदुर्मुखोमित्रैर्हतोविबुधलोकजित् १०
चित्रसेनंहतंभूमौशयानंमधुसूदन धार्तराष्ट्रमिमंपश्यप्रतिमानंधनुष्मतां ११ ॥ ॥

राम०
१३

११ एकादशः अध्यर्धगुणं सार्धगुणं १ २ ३ ३ ३ ३

२६१

तंचित्रमाल्याभरणांयुवत्यः शोककर्शिताः क्रव्यादसंघैः सं[?]ताः कृष्टस्य पर्युपासते ११ स्त्रीणांरुदितनिर्घोषः श्वापदानांचग
र्जितं चित्ररूपमिदं कृष्ण विचित्रं प्रतिभातिमे १३ युवाहं दारकोनित्यंप्रवरस्त्रीनिषेवितः विविंशतिरसौशेतेध्वस्तः पांसुषुमाध
व १४ शरसंकृत्तवर्माणंवीरंविशसनेहतं परिवार्यासतेगृध्राः परिवंश द्विविंशतिं १५ प्रविश्यसमरेवीरः पाण्डवानामनीकिनीं
सवीरशयनेशेतेपुरः सत्पुरुषोचिते १६ स्मितोपपन्नंसुनसंसुभ्रु ताराधिपोपमं अतीवशुभ्रंवदनंपश्यकृष्णविविंशतेः १७
यमंतंपर्युपासंतेवसुवासवयोषितः क्रीडंतमिवगंधर्वे देवकन्याः सहस्रशः १८ हंतारंवीरसेनानांशूरंसमितिशोभनं नि
वर्हणममित्राणांदुःसहंविसहेतकः १९ दुःसहस्यैतदाभातिशरीरंसंवृतंशरैः गिरिरात्मरुहैः फुल्लैः कर्णिकारैरिवावृतः
२० शातकौंभ्यास्रजाभातिकवचेनचभास्वता अग्निनेवगिरिः श्वेतोगतासुरपिदुःसहः २१ इतिमहाभारते स्त्रीपर्वणि गां
धार्युवाच अध्यर्धगुणमाहुर्यंबलेशौर्येचकेशव पित्रात्वयाचदाशार्हदृप्तंसिंहमिवोत्कटं १ योबिभेदचमूमेकोममपुत्रस्य
दुर्भिदां सभूत्वामृत्युरन्येषांमृत्योस्तुवशमागतः २ तस्योपलक्षयेकृष्णकार्ष्णेरमिततेजसः अभिमन्योर्हतस्यापिप्रभानैवो
पशाम्यति ३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्री० १५

एषा विराटदुहिता स्नुषा गाण्डीवधन्वनः आर्त्ता बालपतिं वीरं दृष्ट्वा शोचत्यनिन्दिता ४ तमेषा हि समासाद्य भार्या भर्त्तारमन्तिके विरा
टदुहिता हस्तपाणिना परिमार्ज्जति ५ तस्य वक्त्रमुपाघ्राय सौभद्रस्य मनस्विनी विबुद्धकमलाकारं कम्बुवृत्तशिरोधरं ६ काम्यरूप
वती चैषा परिष्वजति भामिनी लज्जमाना पुरा चैनं माध्वीकमदमूर्छिता ७ तस्य क्षतजसंदिग्धं जातरूपपरिष्कृतं विमुच्य कवचं
वीरशरीरमभिवीक्षते ८ अवेक्षमाणा सा बाला कृष्ण त्वामभिभाषते अयं ते पुण्डरीकाक्ष सदृशाक्षो निपातितः ९ बले वीर्ये च स
दृशस्तेजसा चैव तेनघ रूपेण च तथात्यर्थं शेते भुवि निपातितः १० अत्यन्तसुकुमारस्य राङ्कवाजिनशायिनः कच्चिदद्य शरीरं ते भूमौ
न परितप्यते ११ मातङ्गभुजवर्ष्माणौ ज्याक्षेपकठिनत्वचौ काञ्चनाङ्गदिनौ शेते निक्षिप्य विपुलौ भुजौ १२ व्यायम्य बहुधा नूनं सु
खसुप्तः श्रमादिव एवं विलपतीमार्त्तां न हि मामभिभाषसे १३ न स्मराम्यपराधं ते किं मां न प्रतिभाषसे ननु मां त्वं पुरा दूरादभिवी
क्ष्याभिभाषसे १४ न स्मराम्यपराधं मे किं मां न प्रतिभाषसे आर्यामार्यां सुभद्रां त्वमिमांश्च त्रिदशोपमान् १५ पितॄन्मां चैव दुः
खार्त्तां विहाय क्व गमिष्यसि तस्य शोणितदिग्धान्केशानुद्यम्य पाणिना १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम० १५

© Dharmartha Trust J&K. Digitized By eGangotri

उत्संगेवक्त्रमाधायजीवंतमभिपृच्छसि स्वस्त्रीयंवासुदेवस्यसुतंगांडीवधन्विनः १७ कथंत्वांरणमध्यस्थंजघ्नुरेतेमहारथाः धिगस्तुक्रू
रकर्तॄंस्तान्नृपकरुणानपत्रपान् १८ द्रोणकर्णादयोनीचाभीमेपेरसिमसनीकृतः नरर्षभाणांसर्वेषांकथमासीत्तदात्मनः १९ बालंत्वां
परिवार्यैकंममदुःखायपञ्चषुत्रुषा कथंनुपांडवेयानांपांचालानांचपश्यतां २० त्वंवीरनिधनंप्राप्तोनाथवान्सन्ननाथवत् हत्वात्वांवहु
भिःसंख्येहतंवीरपितातव २१ वीरःपुरुषशार्दूलःकथंजीवतिपांडवः नराज्यलाभोविपुलःशत्रूणांवापराभवः २२ प्रीतिंधास्यति
पार्थानांत्वामृतेपुष्करेक्षण तवशस्त्रजितान्लोकान्धर्मेणाचरमेनच २३ क्षिप्रमेवागमिष्यामितत्रमांपरिपालयपुत्रमेरुपुनःप्राप्तोका
लमवतिकेनचित् २४ यदृहंत्वांरणेहत्वाहतंजीवामिदुर्भगा कास्मिहीनीनरस्याघ्नश्लक्ष्णायास्मितयागिरा २५ पितृलोकेसमेत्यान्या
नामिवांमंत्रयिष्यसि नूनमप्सरसांस्वर्गेमनांसिप्रमथिष्यसि २६ परमेणाचरूपेणगिराचस्मितपूर्वया प्राप्यपुण्यकृतान्लोका
नप्सरोभिःसमेयिवान् २७ सौभद्रविहरन्कालंस्मरेथाःसुकृतानिमे एतावानिहसंवासोविहितस्त्वमयासह २८ षण्मासान्सप्त
मेमासित्वंवीरनिधनंगतः इत्युक्तवचनामेतामपकर्षन्तिदुःखिता २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

स्त्री०
१५

३५ द्वादशः एषवैकर्त्तनः १ २ ३ ४ ५ ६

उत्तरांमोघसंकल्पांमत्स्यराजकुलस्त्रियः उत्तरामपकृष्यैनामार्त्तामार्त्ततराः स्वयं ३० विराटंनिहतंदृष्ट्वाक्रोशंतिविलपंतिच द्रो
णास्त्रशरसंकृत्तंशयानंरुधिरोक्षितं ३१ विराटंवितुदंत्येतेगृध्रगोमायुवायसाः विनद्यमानंविहगैर्विराटमसितेक्षणाः ३२
नशक्नुवंतिविवशाविवर्त्तयितुमातुराः आसामातपतप्तानामायासेनचयोषितां ३३ श्रमेणाचविवर्णानांवक्त्राणांविप्लुतंव
पुः उत्तरंचाभिमन्युंचकांबोजंचसुदक्षिणं ३४ शिशूनेतान्हतान्पश्यलक्ष्मणंचसुदर्शनं आयोधनशिरोमध्येशयानंप
श्यमाधव ३५ इतिमहाभारतेस्त्रीपर्वणि गांधार्युवाच एषवैकर्त्तनः शेतेमहेष्वासोमहाबलः ज्वलितानलवत्संख्येसंशांत
:पार्थतेजसा १ पश्यवैकर्त्तनंकर्णंनिहत्यातिरथान्बहून् शोणितौघपरीतांगंशयानंपतितंभुवि २ अमर्षीदीर्घरो
षश्चमहेष्वासोमहारथः रणेविनिहतः शेतेशूरोगांडीवधन्वना ३ यस्मात्पांडवसंत्रासात्ममपुत्रमहारथाः प्रायुध्यंत
पुरस्कृत्यमातंगाइवयूथपं ४ शार्दूलमिवसिंहेनसमरेसव्यसाचिना मातंगमिवमत्तेनमातंगेननिपातितं ५ समेता
:पुरुषव्याघ्रंनिहतंशूरमाहवे प्रकीर्णमूर्द्धजाः पत्न्योरुदंत्यः पर्युपासते ६

राम०
१५

१४ अध्यायः इति आवंतंभीमसेनेनेतिचस्त्रौर्थ्या ॥ १ २ ३

उद्विग्नः सततं यस्माद्धर्मराजो युधिष्ठिरः त्रयोदश समा निद्रां चिंतयंनाध्यगच्छत ७ अनाधृष्यः परैर्युद्धे शत्रुभिर्मघवानिव युगांता
ग्निरिवार्चिष्मान्हिमवानिव च स्थिरः ८ स भूत्वा शरणं वीरो धार्त्तराष्ट्रस्य माधव भूमौ विनिहतः शेते वातरुग्ण इव द्रुमः ९ पश्य क
र्णस्य पत्नीं त्वं वृषसेनस्य मातरं लालप्यमानां करुणं रुदतीं पतितां भुवि १० आचार्यशापोनुगतो ध्रुवं त्वां यदग्रसच्चक्रमिदं धरित्री
ततः शरेणापहृतं शिरस्ते धनंजयेनाहवशत्रुमध्ये ११ हाहा धिगेषा पतिता विसंज्ञा समीक्ष्य जांबूनदबद्धकक्षं कर्णं महाबाहुमदी
नसत्वं सुषेणमाता रुदती भृशार्त्ता १२ अल्पावशेषो पि कृतो महात्मा शरीरभक्षैः परिभक्षयद्भिः द्रष्टुं न नः प्रीतिकरः शशीव
कृष्णस्य पक्षस्य चतुर्दशाहे १३ सावर्तमाना पतिता पृथिव्यामुत्थाय दीना पुनरेव चैषा कर्णस्य वक्त्रं परिजिघ्रमाणा रोरूयते पु
त्रवधाभितप्ता १४ इति श्रीमहाभारते स्त्रीपर्वणि गांधार्युवाच आवंत्यं भीमसेनेन भक्ष्यंति निपातितं गृध्रगोमायवः शूर बहुबं
धुमबंधुवत् १ तं पश्य कदनं कृत्वा शत्रूणां मधुसूदन शयानं वीरशयने रुधिरेण समुक्षितं २ तं सृगालाश्च कंकाश्च क्रव्या
दाश्च [illegible] पृथग्विधाः तेन तेन विकर्षंति पश्य कालस्य पर्ययं ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dhaamantha Trust & K Digitized By eGangotri

स्त्री०
१६

शयानंवीरशयनेवीरमाक्रंदकारिणं आवंत्यसंहितानायोरुहंसः पर्युपासते ४ प्रीतिपंपमेहष्वासंहतंभेमसेनवाह्लिकं प्रसुप्तमिव
शार्दूलंपश्यकृष्णमनस्विनं ५ अतीवमुखवर्णोस्यनिहतस्यापिशोभते सोमस्येवाभिपूर्णस्यपौर्णमास्यांसमुद्यतः ६ पुत्रशोका
भितप्तेनप्रतिज्ञांपरिरक्षता पाकशासनिनासंख्येवार्धक्षत्रिर्निपातितः ७ एकादशचमूर्भित्वारक्ष्यमाणंमहात्मना सत्यंचिकीर्षता
पश्यपहतमेनंजयद्रथं ८ सिंधुसौवीरभर्तारंदर्पपूर्णंमनस्विनं भक्षयंत्यशिवागृध्राजनार्दनजयद्रथं ९ संरक्ष्यमाणंभार्याभिरनुरक्ता
भिरच्युत रक्षंत्योव्यपकर्षंतिगहनंनिम्नमंतिकात् १० तमेताः पर्युपासंतेरक्ष्यमाणंमहाभुजं सिंधुसौवीरभर्तारंकांबोजयवनस्त्रियः
११ यदाकृष्णामुपादायप्राद्रवत्केकयैः सह तदैववध्यः पांडूनांजनार्दनजयद्रथः १२ कथमद्यनतांकृष्णमानयंतिस्मतेपुनः दुः
शलामानयन्निस्तुपदात्सर्क्तोजयद्रथः १३ सैषाममसुताबालाविलपंतीसुदुःखिता प्रमापयतिचात्मानमाक्रोशंतीचपांड
वान् १४ किंनुदुःखतरंकृष्णपरंममभविष्यति मत्सुताविधवाबाला लास्नुषाश्चनिहतेश्वराः १५ हाहाधिक्दुःशलांपश्यवी राम०
तशोकभयामिव शिरोभर्तुरनासाद्यधावमानामितस्ततः १६ ॥ ॥ ॥ ॥ ॥ ॥ १६

(c) Dharmartha Trust J&K. Digitized By eGangotri

१८ चतुर्दश: एवशल्य: ७ वासिता: करिण्य: गृष्टय: सकृत्प्रसूता: ८ १० ११

वीरयामासय: सर्वान्पांडवानूपुत्रगृद्धिन: हत्वासविपुलांसेनांस्वर्गमप्युपागत: १० तंमत्तमिवमातंगंवीरंपरमदुर्जयं प
रिवार्यरुदंत्येता: स्त्रियश्चंद्रोपमानना: १८ इतिमहाभारतेस्त्रीपर्वणि गांधार्युवाच एषशल्योहत:शेतेसाक्षान्नकुलमा
तुल: धर्मज्ञेनहतस्तातधर्मराजेनसंयुगे १ यस्त्वयास्पर्धतेनित्यंसर्वत्रपुरुषर्षभ: सएषनिहत: शेतेमद्रराजोमहारथ:
२ येनसंगृह्णतातातरथमाधिरथेर्युधि जयार्थंपांडुपुत्राणांतदातेजोवध: कृत: ३ हाहाधिक्पश्यशल्यस्यपूर्णचंद्रसुदर्श
नं मुखंपद्मपलाशाक्षंकाकैरादष्टमव्रणं ४ अस्यचामीकराभस्यतप्तकांचनसप्रभा आस्याद्विनि:सृताजिह्वाभक्ष्यतेकृष्ण
पक्षिभि: ५ युधिष्ठिरेणनिहतंशल्यंसमितिशोभनं रुदंत्य:पर्युपासंतेमद्रराजकुलस्त्रिय: ६ एता: सुसूक्ष्मवसनाम
द्रराजंनरर्षभं क्रोशंत्यथसमागम्यक्षत्रिया: क्षत्रियर्षभं ७ शल्यंनिपतितंनार्य:परिवार्याभित: स्थिता: वासितागृष्टय: पं
केपरिमग्नमिवद्विपं ८ शल्यंशरणदंशूरंपश्येमंरथसत्तमं शयानंवीरशयनेशरैर्विशकलीकृतं ९ एषशैलालयो
राजाभगदत्त: प्रतापवान् गजांकुशधर: श्रीमान् शेतेभुविनिपातित: १० यस्यरुक्ममयीमालाशिरस्येषाविराजते श्वा
पदैर्भक्ष्यमाणस्यशोभयंतीवमूर्धजान् ११

स्त्री०
१०

अहिनात्त्वासुरेण १२ भीष्मकृतमयंकरकर्मेकृत्त्व २० निर्गोपपाराशवैयेणपराशवैरोपरलोकेइहलोकेतद्विपेरापाराशवैयेराज्ञोनेननत्त्वज्ञानवलेनप्राणानधा

एतेनकिलपार्थस्ययुद्धमासीत्सुदारुणं लोमहर्षणमत्यर्थंशक्रस्येवाहिनायथा १२ योधयित्वामहाबाहुरेषपार्थंधनंजयं संश
येगमयित्वाचकुंतीपुत्रेणपातितः १३ यस्मन्नास्तिसमोलोकेशौर्येवीर्येचकश्चन सएषनिहतः शेतेभीष्मोभीष्मकृदाहवे
१४ पश्यशांतनवंकृष्णशयानंसूर्यवर्चसं युगांतइवकालेनपातितंसूर्यमंबरात् १५ एषतप्त्वारणेशत्रून्शस्त्रतापेनवीर्यवा
न् नरसूर्योस्तमभ्येतिसूर्योस्तमिवकेशव १६ शरतल्पगतंवीरंधर्मेदेवापिनाशनं शयानंवीरशयनेपश्यपश्यपुरनिषेवितं
१७ कर्णिनालीकनाराचैरास्तीर्यशयनोत्तमं आविश्यशेतेभगवानस्कंदः शरवणंयथा १८ अतूलपूर्णंगांगेयप
स्त्रिभिर्वाणैः समन्वितं उपधायोपधानाग्र्यंदत्तंगांडीवधन्वना १९ पालयानंपितुः शास्त्रमूर्ध्वरेतामहायशाः एष
शांतनवः शेतेमाधवाप्रतिमोयुधि २० धर्मात्मावततधर्मज्ञः पाराशवैयेणनिर्णये अमर्त्यइवमर्त्यः सन्नेषप्राणानधा
रयत् २१ नास्तियुद्धेकृतीकश्चिन्नविद्वान्नपराक्रमी यत्रशांतनवोभीष्मः शेतेद्यनिहतः परैः २२ स्वयमेतेनशू
रेणपृच्छ्यमानेनपांडवैः धर्मज्ञेनाहवेमृत्युराख्यातः सत्यवादिना २३ प्रनष्टः कुरुवंशश्च सपुनर्येनसमुद्धृतः सगतः।
कुरुभिः सार्धंमहाबुद्धिः पराभवं २४ ॥ ॥ ॥ ॥

एयदित्सर्थः २४ ॥ ॥ ॥ ॥ ॥ ॥

राम०
१०

धेमेषु कुरवः कन्नु परिप्रक्ष्यंति माधव गतेदेवव्रतेस्वर्गे देवकल्पे नरर्षभे अर्जुने[..]स्य विनेतारमाचार्ये सात्यकेस्तथा तं पश्य पतितं
द्रोणं कुरूणां द्विजसत्तमं २६ अस्त्रं चतुर्विधं वीर यथैव त्रिदशेश्वरः भार्गवो वा महावीर्यस्तथा द्रोणोपि माधव २७ यस्य प्रसादाद्बी
भत्सुः पांडवः कर्मदुष्करं चकार सहतः शेते नैनमस्त्राण्यपालयन् २८ यं पुरोधाय कुरव आह्वयंते स्म पांडवान् सोयं शस्त्रभृतां
श्रेष्ठो द्रोणः शस्त्रैः परिष्कृतः २९ यस्य निर्दहतः सेनां गतिरग्नेरिवाभवत् स भूमौ निहतः शेते शांतार्चिरिव पावकः ३० धनुर्मुष्टि
रशीर्णश्च हस्तावापश्च माधव द्रोणस्य निहतस्यापि दृश्यते जीवतो यथा ३१ वेदा यस्माच्च चत्वारः सर्वास्त्राणि च केशव अनपेता
नि वै वरा यथैवादौ प्रजापतेः ३२ वंदनार्हाविमौ तस्य वंदिभिर्वंदितौ शुभौ गोमायवो विकर्षंति पादौ शिष्यगणार्चितौ ३३ द्रो
णं द्रुपदपुत्रेण निहतं मधुसूदन कृपी कृपणमन्वास्ते दुःखोपहतचेतना ३४ तां पश्य पतितां मार्तां मुक्तकेशीमधोमुखीं ह
तं पतिमुपासंतीं द्रोणं शस्त्रभृतां वरं ३५ बाणैर्भिन्नतनुत्राणं धृष्टद्युम्नेन केशव उपास्ते वै मृधे द्रोणं धृष्टद्युम्नेन केशव ३६
प्रेतकृत्ये च यतते कृपी कृपणमातुरा हतस्य समरे भर्तुः सुकुमारी यशस्विनी ३७ ॥ ॥ ॥ ॥ ॥

यस्य दग्धा ४१ पंचदशः सोमदत्तसुतमिति स्पष्टार्थः १ २ ३ ७

अग्निमाहृत्य विधिवत्तच्चितां प्रज्वाल्य सर्वशः द्रोणमाधाय गायंति त्रीणि सामानि सामगाः ३८ कुर्वंति च चितां मेने जटि
ला ब्रह्मचारिणः धनुर्भिः शक्तिभिश्चैव रथनीडैश्च माधव ३९ शस्त्रैश्च विविधैरन्यैर्धक्ष्यते भूरितेजसं इति द्रोणं समाधा
य शंसंति च रुदंति च ४० सामभिस्त्रिभिरंतस्थैरनुशंसंति चापरे अग्नावग्निं समाधाय द्रोणं हुत्वा हुताशने ४१ गच्छंत्यभि
मुखा गंगां द्रोणशिष्या द्विजातयः अपसव्यां चितिं कृत्वा पुरस्कृत्य कृपीं तदा ४२ इति भारते स्त्रीपर्वणि गांधार्युवाच सोम
दत्तसुतं पश्य युयुधानेन पातितं विलुप्यमानं विहगैर्बहुभिर्माधवांतिके १ पुत्रशोकाभिसंतप्तः सोमदत्तो जनार्दन यु
युधानं महेष्वासं गर्हयन्निव दृश्यते २ असौ हि भूरिश्रवसो माता तापरमदुःखिता आश्वासयति भर्तारं सोमदत्तमनिंदि
ता ३ दिष्ट्यानेनं महाराजदारुणं भरतक्षयं कुरुसंक्रंदनं घोरं युगांतमनुपश्यसि ४ दिष्ट्या यूपध्वजं वीरं पुत्रं भूरि
सहस्रदं अनेकक्रतुयज्वानं निहतं नाय पश्यसि ५ दिष्ट्या स्नुषाणामाक्रंदं घोरं विलपितं बहु न पश्यसि महा
राज सारसानामिवार्णवे ६ एकवस्त्रानुसंवीताः प्रकीर्णासितमूर्धजाः स्नुषास्ते परिधावंति हतापसा हतेश्व
राः ७

© (c) Dharmarth Trust J&K. Digitized By eGangotri

रु

कां गतिं नु गमिष्यामि त्वया हीना जनेश्वर इत्येवं धुन्वती नाथ वेपन्ती मुहुर्मुहुः स्वना ४ आतपे क्लाम्यमानानां विविधानामिव स्रजां क्लान्तानामपि
नारीणां न श्रीर्जहति वै तनूः ५ शयानमभितः शूरं कालिंगं मधुसूदन पश्य दीप्ताङ्गदयुगप्रतिबद्धमहाभुजं मागधानामधिपतिं जयत्सेनं
जनार्दन मनःश्रुतिहरो नादो मनो मोहयतीव मे ७ परिवार्य प्ररुदिता मागध्यः पश्य योषितः आसामायतनेत्राणां सुस्वराणां जनार्दन
८ प्रकीर्णसर्वाभरणा रुदन्त्यः शोककर्षिताः आस्तीर्णशयनोपेता मागध्यः शेरते भुवि ९ कोशलानामधिपतिं राजपुत्रं बृहद्बलं भर्तारं प
रिवार्यैताः पृथक् प्ररुदिताः स्त्रियः १० अस्य गात्रगतान् बाणान् कार्ष्णिबाहुबलार्पितान् उद्धरन्त्यसुखाविष्टा मूर्छमानाः पुनः पुनः ११
आसां सर्वानवद्यानामातपेन परिश्रमात् प्रम्लाननलिनाभानि भान्ति वक्त्राणि माधव १२ द्रोणेन निहताः शूराः शेरते रुचिरांगदाः धृष्टद्यु
म्नसुताः सर्वे शिशवो हेममालिनः १३ रथाग्न्यगारं चापार्चिः शरशक्तिगदेन्धनं द्रोणमासाद्य निर्दग्धाः शलभा इव पावकं १४ तथैव निहताः
शूराः शेरते रुचिरांगदाः द्रोणेनाभिमुखाः सर्वे भ्रातरः पंच केकयाः १५ तप्तकांचनवर्माणस्ताम्रध्वजरथस्रजः भासयंति महीं भासा
ज्वलिता इव पावकाः १६

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्री०
१८

१९ पौड्राः कांबोजास्तरणं कंबलविशेषं १ २ ३ ३

२

दृष्ट्वैवं गर्हयित्वैषा तत्स्त्रीमांसास्त्रवरांगना तामेनामनुशोचंति सपत्न्यः स्वामिवत्स्नुषा २१ गांधारराजः शकुनिर्बलवान्सत्यवि
क्रमः निहतः सहदेवेन भागिनेयेन मातुलः २२ यः पुरा हेमदंडाभ्यां व्यजनाभ्यां स्म वीज्यते स एष पक्षिभिः पक्षैः शयान उपवी
ज्यते २३ यः स्म रूपाणि कुरुते शतशोथ सहस्रशः तस्य मायाविनो माया दग्धाः पांडवतेजसा २४ मायया निकृतिप्रज्ञो जि
तवान्यो युधिष्ठिरं सभायां विपुलं राज्यं स पुनर्जीवितं जितः २५ शकुंताः शकुनिं कृष्ण समंतात्पर्युपासते कैतवे मम पुत्रा
णां विनाशायोपशिक्षितं २६ एतेनैतन्महद्वैरं प्रसक्तं पांडवैः सह वधाय मम पुत्राणामात्मनः सगणस्य च २७ यथैव
मम पुत्राणां लोकाः शस्त्रजिता विभो एवमस्यापि दुर्बुद्धेर्लोकाः शस्त्रेण वै जिताः २८ कथं च नायं तत्रापि पुत्रान्मे भ्रातृभि
ः सह विरोधयेदृजुप्रज्ञाननृजुर्मधुसूदन २९ इति महाभारते स्त्रीपर्वणि गांधार्युवाच कांबोजं पश्य दुर्धर्षं कांबोजास्तरणो
चितं शयानमृषभस्कंधं हतं पांसुषु माधव १ यस्य क्षतजसंदिग्धौ बाहू चंदनभूषितौ अवेक्ष्य करुणं भार्या विलपत्यतिदुः
खिता २ इमौ तौ परिघप्रख्यौ बाहू शुभतलांगुली ययोर्विवरमापन्नां न रतिर्मां पुरा जहात् ३ ॥ ॥ ॥ ॥ ॥

स्त्री०
१८

आपीडं मेक्ष्यमाणात्तमहो दिष्ट्या न पश्यसि छिन्नबाहुं नरव्याघ्रमर्जुनेननिपातितं ८ शलंविनिहतंसंख्ये भूरिश्रवसमेवच सुषाश्चविव
वाः सर्वादिष्ट्यानाद्यहिपश्यसि ९ दिष्ट्यातत्कांचनंछत्रंयूपकेतोर्महात्मनः विनिकीर्णंरथोपस्थेसौमदत्तेनपश्यसि १० अमूस्तुभूरिश्र
वसोभार्याःसात्यकिनाहतं परिवार्यानुशोचंतिभर्तारमसितेक्षणाः ११ एताविलप्यबहुलंभर्तुःशोकेनकर्षिताः पतंत्यभिमुखंभूमौकृप
णंत्वंकेशव १२ बीभत्सुरतिबीभत्संकर्मेदमकरोत्कथं प्रमत्तस्ययदच्छैषीद्बाहुंशूरस्ययज्वनः १३ ततः पापतरंकर्मकृतवानपिसात्व
किः यस्मात्प्रायोपविष्टस्यप्राहार्षीत्संशितात्मनः १४ एकोद्वाभ्यांहतः शेषेत्वमधर्मेणधार्मिक इतियूपध्वजस्यैताःस्त्रियः क्रोशंति
माधव भार्यायूपध्वजस्यैताकरसंमितमध्यमा कृत्वोत्संगेभुजंभर्तुः कृपणंपर्यदेवयत् १६ अयंसरसनोत्कर्षीपीनस्तनविमर्दनः
नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनः करः १७ अयंसहंताशत्रूणांमित्राणामभयप्रदः प्रदातागोसहस्राणांक्षत्रियांतकरःकरः १८
वासुदेवस्यसंनिधौपार्थेनाक्लिष्टकर्मणा युध्यतः समरेऽन्येनप्रमत्तस्यनिपातितः १९ किंनुवक्ष्यसिसंसत्सुकथासुचजनार्दन
अर्जुनस्यमहत्कर्मस्वयंवासकिरीटवान् २० ॥ ॥ श्रीरामनारायणनमः ॥ ॥ श्रीकृष्णायनमः ॥ ॥

स्त्री०
२०

२३ दाशार्हपुत्रजं इत्यत्र पुत्राणामपि पुत्रशब्दः २५ पितरमिति पितृपरस्याहृतिः शोकाकुलत्वान्नदोषः २९ १९

५

द्रोणेनद्रुपदंसंख्येपश्यमाधवपातितं महाद्विपमिवारण्येसिंहेनमहताहतं १७ पांचालराज्ञोविमलंपुंडरीकाक्षपांडुरं आतपत्रंस
माभातिशरदीवनिशाकरः १८ एतास्तुद्रुपदंवृद्धंस्नुषाभार्याःसुदुःखिताः दग्ध्वागच्छंतिपांचाल्यंराजानमपसव्यतः १९ धृष्टकेतुं
महेष्वासंचेदिपुंगवमंगनाः द्रोणेननिहतंशूरंहरंतिहृतचेतसः २० द्रोणास्त्रमभिहत्यैषविमर्देमधुसूदनः महेष्वासोहतःशेतेन
(२४) द्याहृतइवद्रुमः २१ एषचेदिपतिःशूरोधृष्टकेतुर्महारथः शेतेविनिहतःसंख्येहत्वाशत्रून्सहस्रशः २२ वितुद्यमानंविहगैस्तं
भार्याःपर्युपस्थिताः चेदिराजंहृषीकेशसुवेषं चारुकुंडलं २३ दाशार्हपुत्रजंवीरंशयानंसत्यविक्रमं आरोप्यांकेरुदंत्येता
श्चेदिराजवरांगनाः २४ अस्यपुत्रंहृषीकेशसुवक्त्रंचारुकुंडलं द्रोणेनसमरेपश्यनिकृत्तंबहुधाशरैः २५ पितरंनूनमाजिस्थं
युध्यमानंपरैःसह नाजहात्पितरंवीरमद्यापिमधुसूदन २६ एवंममापिपुत्रस्यपुत्रः पितरमन्वगात् दुर्योधनंमहाबाहोलक्ष्म
णःपरवीरहा २७ विंदानुविंदावावंत्यौपतितौपश्यकेशव हिमांतेपुष्पितौशालौमरुतागलिताविव २८ कांचनांगदवर्माणौ
बाणखड्गधनुर्धरौ ऋषभप्रतिरूपाक्षौशयानौविमलस्रजौ २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
२०

© (c) Dharmartha Trust J&K Digitized By eGangotri

३५ तयोः भीष्मविदुरयोः दर्शनं अनागतावेक्षणं ३६ ३७ ३८ ३९ ४०

अवध्याः पांडवाः कृष्ण सर्वे एव त्वया सह ये मुक्ता द्रोणभीष्माभ्यां कर्णाद्वैकर्तनात्कृपात् ३० दुर्योधनाद्द्रोणसुतात्सैंधवाच्च
महारथात् सोमदत्ताद्विकर्णाच्च शूराच्च कृतवर्मणः ३१ ये हन्युः शस्त्रवेगेन देवानपि नरर्षभाः त इमे निहताः संख्ये पश्य कालस्य
पर्ययं ३२ नातिभारोऽस्ति दैवस्य ध्रुवं माधव कश्चन यदिमे निहताः शूराः क्षत्रियैः क्षत्रियर्षभाः ३३ तदैव निहताः कृष्ण मम
पुत्रास्तरस्विनः यदैवाकृतकामस्त्वमुपप्लव्यं गतः पुनः ३४ शांतनोश्चैव पुत्रेण प्राज्ञेन विदुरेण च तदैवोक्तास्मि मा स्नेहं कुरु
ष्वात्मसुतेष्विति ३५ तयोर्न दर्शनं तात मिथ्या भवितुमर्हति अचिरेणैव पुत्रा मे भस्मीभूता जनार्दन ३६ वैशंपायन उवा
च इत्युक्त्वा न्यपतद्भूमौ गांधारी शोककर्शिता दुःखोपहतविज्ञाना धैर्यमुत्सृज्य भारत ३७ ततः कोपपरीतांगी पुत्रशो
कपरिप्लुता जगाम शौरिं दोषेण गांधारी व्यथितेंद्रिया ३८ गांधार्युवाच पांडवा धार्तराष्ट्राश्च दग्धाः कृष्ण परस्परं उपे
क्षिता विनश्यंतस्त्वया कस्माज्जनार्दन ३९ शक्तेन बहुभृत्येन विपुले तिष्ठता बले उभयत्र समर्थेन श्रुतवाक्येन चैव
ह ४० इच्छतोपेक्षितो नाशः कुरूणां मधुसूदन यस्मात्त्वया महाबाहो फलं तस्मादवाप्नुहि ४१ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

स्त्री० २१ ४२ तवापीति अनिरतः परस्परं सोयानि शक्रमुपेक्ष्य कं कुलध्वंसमसमर्त्तानि गांधार्या ध्वकेशवं ४४ चीर्णं चरसि मरनु[illegible]ष्टितमेवानुतिष्ठ[illegible]सि स्वतपोनाश

पतिशुश्रूषया यन्मे तपः किंचिदुपार्जितं तेन त्वां दुरवापेन शप्स्ये चक्रगदाधर ४२ यस्मात्परस्परं घ्नंतो ज्ञातयः कुरुपांडवाः उ
पेक्षितास्ते गोविंद तस्मात्ज्ञातीन्वधिष्यसि ४३ त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन हतज्ञातिर्हतामात्यो हतपुत्रो वनेचरः ४४
कुत्सितेनाभ्युपायेन निधनं समवाप्स्यसि तवाप्येवं हतसुता निहतज्ञातिबांधवाः स्त्रियः परिपतिष्यंति यथैव भरतस्त्रियः
४५ वैशंपायन उवाच एतच्छ्रुत्वा तु वचनं वासुदेवो महामनाः उवाच देवीं गांधारीमीषदभ्युत्स्मयन्निव ४६ संहर्ता वृष्णिच
क्रस्य मदन्यो न हि विद्यते जाने त्वमेवमप्येवं चीर्णं चरसि क्षत्रिये ४७ अवध्यास्ते नरैरन्यैरपि वा देवदानवैः परस्परकृतं
नाशं यतः प्राप्स्यंति यादवाः ४८ इत्युक्तवति दाशार्हे पांडवास्त्रस्तचेतसः बभूवुर्भृशसंविग्ना निराशाश्चापि जीविते ४९
इति महाभारते स्त्रीपर्वणि भगवानुवाच उत्तिष्ठोत्तिष्ठ गांधारि मा[illegible] शोके मनः कृथाः तवैव ह्यपराधेन कुरवो निधनं ग
ताः १ यस्त्वं पुत्रं दुरात्मानमीर्षुमत्यंतमा[illegible]निनं दुर्योधनं पुरस्कृत्य दुष्कृतं साधु मन्यसे २ निष्ठुरं वैरपुरुषं वृद्धानां शा
सनातिगं कथमात्म[illegible]कृतं दोषं मय्याधातुमिहेच्छसि ३

र्थमिति भावः ४९ समदृशः उत्तिष्ठ १ दुष्कृतं दुराचरितं स्वकीयं २ वैरप्रियं पुरुषं वैरपुरुषं ३ ॥ ॥ रान० २१

द्वौपूर्वापरदुःखद्वयरूपौ ४ तयोरूपामार्थायायवसत्रंतपोऽर्थीयं त्वद्विधावधार्थीयमेवगर्भंधत्ते त्वानुजयार्थीयंकीर्त्यार्थं मयीतिभावः ०५ ६ १५

मृतंवायदिवानष्टंयोतीतमनुशोचति दुःखेनलभतेदुःखंद्वावनर्थौप्रपद्यते ४ तपोर्थीयंब्राह्मणीधत्तगर्भंगौर्वोढारंधावितारं
तुरंगी शूद्रादासंपशुपालंचवैश्यावधार्थीयंत्वद्विधाराजपुत्री ५ वैशं० तच्छ्रुत्वावासुदेवस्यपुनरुक्तंवचोप्रियं तूष्णींब
भूवगांधारीशोकव्याकुललोचना ६ धृतराष्ट्रस्तुराजर्षिर्निगृह्याबुद्धिजंतमः पर्यपृच्छतधर्मात्माधर्मराजंयुधिष्ठिरं ७ जीवतां
परिमाणज्ञःसैन्यानामसिपांडव हतानांयदिजानीषेपरिमाणंवदस्वमे ८ युधिष्ठिरउवाच दशायुतानामयुतंसहस्राणिचविं
शतिः कोट्यःषष्टिश्चषट्चैव यस्मिन्राजन्मृधेहताः ९ अलक्षितानांवीराणांसहस्राणिचतुर्दश दशचान्यानिराजेंद्र
शतंषष्टिश्चपंचच १० धृतराष्ट्रउ० युधिष्ठिरगतिंकांतेगताः पुरुषसत्तम आचक्ष्वमेमहाबाहोसर्वज्ञोह्यसिमेमतः ११
युधिष्ठिरउवाच यैर्हुतानिशरीराणिहृष्टैःपरमसंयुगे देवराजसमांल्लोकान्गतास्तेसत्यविक्रमाः १२ येत्वहृष्टेनम
नसामर्त्तव्यमितिभारत युध्यमानाहताःसंख्येतेगंधर्वैःसमागताः १३ येचसंग्रामभूमिष्ठायाचमानाःपराङ्मुखाः शा
स्त्रेणनिधनंप्राप्ताःगतास्तेगुह्यकान्प्रति १४ पात्यमानाःपरैर्येतुहीयमानानिरायुधाः ह्रीनिषेवामहात्मानःपराननि
मुखारणे १५

स्त्री०
२२

२३ सुधर्माणंदुर्योधनपुरोहितं २५ २६ २७

छिद्यमानाःशितैःशस्त्रैःक्षत्रधर्मपरायणाः गतास्तेब्रह्मसदनंहतवीराःसुवर्चसः १६ येत्रनिहताराजन्नंतरायोधनंप्रति
यथाकथंचित्तेराजनसंप्राप्तास्त्रतान्कुरून् १७ धृतराष्ट्र उ० केनज्ञानबलेनैवंपुत्रपश्यसिसिद्धवत् तन्मेवदमहाबाहो
श्रोतव्यंयदिमन्यसे १८ युधिष्ठिर उवाच निदेशाद्भवतःपूर्वंवनेविचरतामया तीर्थयात्राप्रसंगेनसंप्राप्तोयमनुग्रहः १९
देवर्षिर्लोमशोदृष्टस्ततःप्राप्तोस्म्यनुस्मृतिं दिव्यंचक्षुरनुप्राप्तंज्ञानयोगेनवैपुरा २० धृतराष्ट्र उवाच येत्रानाथाजन
स्यास्यसनाथायेचभारत कच्चित्तेषांशरीराणिधक्ष्यंतिविधिपूर्वकं २१ नयेषांसंतिकर्त्तारोनचयेत्राहिताग्नयः वयंचक
स्यकुर्यामोवहुत्वात्तातकर्मणः २२ यान्सुपर्णाश्चगृध्राश्चविकर्षंतियतस्ततः तेषांतुकर्मणालोकाभविष्यंतियुधिष्ठिर
२३ वैशंपायन उवाच एवमुक्तोमहाप्राज्ञःकुंतीपुत्रोयुधिष्ठिरः आदिदेशसुधर्माणंधौम्यंसूतंचसंजयं २४ विदुरंचम
हाबुद्धिंयुयुत्सुंचैवकौरवं इंद्रसेनमुखांश्चैवभृत्यान्सूतांश्चसर्वशः २५ भवंतःकारयंत्वेषांप्रेतकार्याण्यनेकशः यथा राम०
चानाथवत्किंचिच्छरीरंनविनश्यति २६ शासनाद्धर्मराजस्यक्षत्तासूतश्चसंजयः सुधर्माधौम्यसहितइंद्रसेनादयस्तथा २२
२७

CC-0. Dhamaarth Trust J&K. Digitized by eGangotri

चंदनागुरुकाष्ठानि तथा कालीयकान्युत घृतं तैलं च गंधांश्च क्षौमाणि वसनानि च २८ समाहृत्य महार्हाणि दारूणां चैव संचयान्
रथांश्च मृदितांस्तत्र नानाप्रहरणानि च २९ चिताः कृत्वा प्रयत्नेन यथामुख्यान्नराधिपान् दाहयामासुरव्यग्रा विधिदृष्टेन कर्मणा ३० दु
र्योधनं च राजानं भ्रातॄंश्चास्य शताधिकान् शल्यं शलं च राजानं भूरिश्रवसमेव च ३१ जयद्रथं च राजानमभिमन्युं च भारत दौःशासनिं लक्ष्मणं
च धृष्टकेतुं च पार्थिवं ३२ बृहन्तं सोमदत्तं च सृंजयांश्च शताधिकान् राजानं क्षेमधन्वानं विराटद्रुपदौ तथा ३३ शिखंडिनं च पांचाल्यं धृ
ष्टद्युम्नं च पार्षतं युधामन्युं च विक्रान्तमुत्तमौजसमेव च ३४ कौशल्यं द्रौपदेयांश्च शकुनिं चैव सौबलं अचलं वृषकं चैव भगदत्तं च पार्थिवं
३५ कर्णं वैकर्त्तनं चैव सहपुत्रममर्षणं केकयांश्च महेष्वासांस्त्रिगर्त्तांश्च महारथान् ३६ घटोत्कचं राक्षसेंद्रं बकभ्रातरमेव च अ
लंबुषं राक्षसेंद्रं जलसंधं च पार्थिवं ३७ अन्यांश्च पार्थिवान् राजन् शतशोथ सहस्रशः घृतधाराहुतैर्दीप्तैः पावकैः समदाहय
न् ३८ पितृमेधाश्च केषांचिद्वर्त्तंत महात्मनां सामभिश्चाप्यगीयंत ते च शोच्यंत चापरैः साम्नामृचां च नादेन स्त्रीणां च रुदितस्वनैः
कश्मलं सर्वभूतानां निशायां समजायत ४० ॥ ॥ श्रीरस्तु विष्णुमधुकैटभारये श्रीरामनारायणनमः ॥ ॥ ॥ ।

(c) Dharmartha Trust J&K. Digitized by eGangotri

स्त्री०
२३

५२ स्नेहपाचितैः स्नेहेनसंयुक्तैः ५४ अग्रतस्तः तेसमासाद्य गांविस्तनानिउष्णीषकटिबंधनानि ४ सूपतीर्था शोभनजलावतरणमार्गा ८ ॥ ॥ ॥

मि०४

तेविधूतप्रदीप्तास्तुदीप्यमानाश्चपावकाः नभसीवान्वदृश्यंतग्रहास्तन्वभ्रसंवृताः ५१ येचाप्यनाथास्तत्रासन्नानादेशसमागताः तांश्चसर्वान्समानाय्यराशीन्कृत्वासहस्रशः ५२ चित्वादारुभिरव्यग्रैःप्रभूतैःस्नेहपाचितैः दाहयामासविदुरोधर्मराजस्यशासनात् ५३ कारयित्वाक्रियास्तेषांकुरुराजोयुधिष्ठिरः धृतराष्ट्रंपुरस्कृत्यगंगामभिमुखोगमत् ५४ इतिश्रीमहाभारतेस्त्रीपर्वणि वैशंपायनउवाच तेसमासाद्यगंगांतुशिवांपुण्यजलोचितां ह्रदिनीवप्रसन्नांचमहारूपांमहावनां १ भूषणान्युत्तरीयाणिवेष्टनान्यवमुच्यच ततःपितॄणांभ्रातॄणांपौत्राणांस्वजनस्यच २ पुत्राणामार्यकाणांचपतीनांचकुरुस्त्रियः उदकंचक्रिरेसर्वारुदंत्योभृशदुःखिताः ३ सुहृदांचापिधर्मज्ञाःप्रचक्रुःसलिलक्रियाः उदकेक्रियमाणेतुवीराणांवीरपत्निभिः ४ सूपतीर्थाभवद्गंगाभूयोविप्रससारच तन्महोदधिसंकाशंनिरानंदमनुत्सवं ५ वीरपत्नीभिराकीर्णंगंगातीरमशोभत ततःकुंतीमहाराजसहसाशोककर्षिता ६ रुदतीमंदयावाचापुत्रान्वचनमब्रवीत् यःसशूरोमहेष्वासोरथयूथपयूथपः ७ अर्जुनेनहतःसंख्येवीरलक्षणलक्षितः यंसूतपुत्रंमन्यध्वंराधेयमितिपांडवाः ८ ॥ ॥ ॥ ॥

एम०
२३

© Dharmartha Trust J&K. Digitized by eGangotri

१४ भवन अभवन १४ १५ १६ १७

योवैराजत्वमूमध्येदिवाकरइवप्रभुः ममपुत्रस्तवः सर्वानुगवः सपदानुगान ९ दुर्योधनवलंसर्वेयः प्रकर्षन्त्वीरोच
त यस्यनास्तिसमोवीर्येपृथिव्यामपिकश्चन १० योहत्तीनपत्रः शूरः प्रोतोरपिसदाभुवि सत्यसंधस्यस्फुरस्यसंग्रामेष्वप
लापिनः ११ कुरुध्वमुत्कंतस्यभ्रातुरक्लिष्टकर्मणः सहिवः पूर्वजोभ्राताभास्करात्मप्रजापत १२ कुंडलीकवचीशूरो
दिवाकरसमप्रभः श्रुत्वातुपांडवाः सर्वेमातुर्वचनमप्रियं १३ कर्णमेवान्वशोचंतभूयश्चार्ततराभवन् ततः सपुरुष
व्याघ्रः कुंतीपुत्रोयुधिष्ठिरः १४ उवाचमातरंवीरोनिश्वसन्निवपन्नगः यः शरोर्मिध्वजावर्तोमहाभुजमहाग्रहः १५
ततः शराह्नुनिर्हतोमहाकक्षमहारथः यस्येषुपातमासाद्यनान्यस्तिष्ठेद्धनंजयात् १६ भवत्याः सकथंपुत्रोदेवगर्भः
पुराभवत् यस्यबाहुप्रतापेनतापिताः सर्वतोवयं १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dhanvantari Trust. Digitized By eGangotri

स्त्री० २५

२३ नेहस्मेति कर्णोभ्रान्त्वेनज्ञातेसमितन्दुखसागरणामस्माकं किमपिदुर्लभंनामभविष्यन्नापिकौरवाणां ॥ ॥ ॥ ॥

त्वामग्निमिवधस्त्राणाकथंत्वादितवत्यसि यस्यवाहुवलंनित्यंधार्तराष्ट्रेरुपासितं १८ उपासितंयथास्माभिर्वलंगांडीवधन्वन
: भूमिपानांचसर्वेषां वलंवलवतांवर: १९ नास्य:कुंतीसुतात्कर्णोरुहस्ताद्गृध्रिनीरथी सत: अयमजोभ्रातासर्वशस्त्रभृतां
वर: २० अमृतंतंभवतस्येकथमद्भुतविक्रमं अहोभवस्मामंत्रस्यरहेनेनवयंहता: २१ निधनेनविकर्णस्यपीडिता: स्मस
वांधवा: अभिमन्योर्विनाशेनद्रौपदेयवधेनच २२ पांचालानांचनाशेनकुरूणांपतनेनच तत: शतगुणंदु:खमिदंस्मा
मस्पृशदद्भुतं २३ कर्णमेवानुशोचंहिसंदह्ये ग्राग्निवाहित: नेहस्मकिंचिदप्राप्यंभवेदपिदिविस्थितं २४ नचस्मवै
शान्तंघोरंकौरवांतकरंभवेत एवंविलप्यवहुलंधर्मराजोयुधिष्ठिर: विनदन्नेदु:खितोराजन्चकारास्योदकंप्रभु: २५ राम० २५

© (c) Dharmartha Trust J&K. Digitized By eGangotri

२८ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेस्त्रीपर्वदीपप्रकाशः समाप्तिमगमत् एकोन

ततोविनेदुः सहसास्त्रियस्ताः खलुसर्वशः अभितोयाः स्थितास्तत्रतस्मिन्नुदककर्मणि २६ ततआनाययामासकर्णस्यस
परिच्छदाः स्त्रियः कुरुपतिर्धीमान्भ्रातुः प्रेम्णायुधिष्ठिरः २७ सताभिः सहधर्मात्माप्रेतकृत्यमनंतरं कृत्वोत्ततारगंगाया
सलिलादाकुलेंद्रियः २८ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांस्त्रीपर्वसमाप्तमिदं अस्यानंतरंराज
धर्मस्याद्यः श्लोकः कृतोदकास्तेसुहृदांसर्वेषांपांडुनंदनाः विदुरोधृतराष्ट्रश्चसर्वाश्चभरतस्त्रियः ॥ श्रीकृष्णायनमः

विंशोऽध्यायः समाप्तिमिदमेकादशपर्व   शुभमस्तुः श्रीरस्तु मंगलमस्तुः सिद्धमस्तु ॥ ॥ ॥ ॥ ॥ ॥

© (c) Dharmartha Trust J&K. Digitized By eGangotri

स्त्रीपर्व विशोक
२५

© Dharmartha Trust J&K. Digitized By eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः। पूर्वस्मिन्पर्वणि धर्मस्य फलमुक्त्वा स्वर्गे नृशंस्यादित्या युधिष्ठिरस्य दृष्टान्तेन दर्शितम्। इदानीं तु स्वर्गफलं दर्शयितुं स्वर्गारोहणपर्व आरभते स्वर्गं त्रि
विष्टपमिति यथा श्रूयमाणे त्यायामल्पसंख्या तन्मे ब्रूहि स्वर्गं त्रिविष्टपं निभुवनानि फलानि रुक्षश्रवणानन्तरं भवन्ति नाहं शापि स्वर्गं प्राप्य त्रिविष्टपं भुवनं तत्र इति समरः १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ जनमेजय उवाच स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपिता
महाः पांडवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे २ एतदिच्छाम्यहं श्रोतुं सर्ववित्त्वासि मे मतः महर्षिणाभ्यनुज्ञातो व्यासेनाद्भुत
कर्मणा ३ वैशं० स्वर्गं त्रिविष्टपं प्राप्य तव पूर्वपितामहाः युधिष्ठिरप्रभृतयो यदकुर्वत तच्छृणु ३ स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो
युधिष्ठिरः दुर्योधनं श्रिया जुष्टं ददर्शासीनमासने ४ भ्राजमानमिवादित्यं वीरलक्ष्म्याभिसंवृतं देवैर्भ्राजिष्णुभिः साध्यैः सहितं पु
ण्यकर्मभिः ५ ततो युधिष्ठिरो दृष्ट्वा दुर्योधनममर्षितः सहसा संनिवृत्तोऽभूच्छ्रियं दृष्ट्वा सुयोधने ६ ब्रुवन्नुच्चैर्वचस्तान्वै नाहं
दुर्योधनेनैव सहितः कामये लोकाँल्लुब्धेनादीर्घदर्शिना ७ यत्कृते पृथिवी सर्वा सुहृदो बांधवास्तथा हतास्माभिः प्रसह्याजौ
क्लिष्टैः पूर्वं महावने ८ ॥ ॥ ॥ ॥

२ ३ ४ ५ तत इति सर्गेऽप्यमर्षो दुस्त्यज इति संस्काराणां प्राबल्यमुक्तं ६ ७ हताः अस्माभिः संधिराधे ८ श्रीकृष्णाय नमः ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

ते १० विकृढंद्वैरादिकं नश्यति श्रनर्धीयते ११ १४ अभीतश्निछेदः १५ १६ सुहृद्द्रुस्पंदंतःश्राहुः २० २१ ॥ ॥ ॥ ॥ ॥ ॥

द्रौपदी च सभामध्ये पांचाली धर्मचारिणी पर्यकृष्यत नवद्यांगी पत्नीनो गुरुसंनिधौ ९ अस्ति देवा न मे कामः सुयोधनमुदीक्षि
तुं तत्राहं गंतुमिच्छामि यत्र ते भ्रातरो मम १० नैवमित्यब्रवीत्तं तु नारदः प्रहसन्निव स्वर्गे निवासे राजेंद्र विरुद्धं चापि नश्यति ११
युधिष्ठिर महाबाहो मैवं वोचः कथंचन दुर्योधनं प्रति नृप शृणु चेदं वचो मम १२ एष दुर्योधनो राजा पूज्यते त्रिदशैः सह सद्भि
श्च राजप्रवरैर्य इमे स्वर्गवासिनः १३ वीरलोकगतिं प्राप्तो युद्धे हुत्वात्मनस्तनुं यूयं सर्वे सुरसमाः सर्वे देवा न हिंसिताः १४ स ए
ष क्षत्रधर्मेण स्थानमेतदवाप्तवान् भये महति योऽभीतो बभूव पृथिवीपतिः १५ न तन्मनसि कर्तव्यं पुत्र यद्द्यूतकारितं द्रौप
द्याश्च परिक्लेशं न चिंतयितुमर्हसि १६ ये चान्येऽपि परिक्लेशा युष्माकं ज्ञातिकारिताः संग्रामेष्वथ वान्यत्र न तान्संस्मर्तुमर्ह
सि १७ समागच्छ यथान्यायं राज्ञा दुर्योधनेन वै स्वर्गोऽयं नेह वैराणि भवंति मनुजाधिप १८ नारदेनैवमुक्तस्तु कुरुरा
जो युधिष्ठिरः भ्रातॄन्प्रपच्छ मेधावी वाक्यमेतदुवाच ह १९ यदि दुर्योधनस्यैते वीरलोकाः सनातनाः अधर्मज्ञस्य पापस्य पृ
थिवीसुहृद्द्रुहः २० यत्कृते पृथिवी नष्टा सहया सनरद्विपा वयं च मन्युना दग्धा वैरं प्रतिचिकीर्षवः २१ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

स्व॰टी॰ २२ २६ प्रथमोऽध्यायः नेह १ २ ३ ४ ५ ६ ७

२ २३

य एते वीरा महात्मानो भ्रातरो मे महाव्रताः सत्यप्रतिज्ञा लोकस्य शूरा वै सत्यवादिनः २२ तेषामिमे निर्जिता लोका द्रष्टुमिच्छामि ता
न् हं कर्णं चैव च महात्मानं कौन्तेयं सत्यसंगरं २३ धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान् ये च शस्त्रैर्वधं प्राप्ताः क्षत्रधर्मेण
पार्थिवाः २४ क्व नु ते पार्थिवा ब्रह्मन्नैतान्पश्यामि नारद विराटद्रुपदौ चैव धृष्टकेतुमुखांश्च तान् २५ शिखंडिनं तु पांचाल्यं द्रौ
पदेयांश्च सर्वशः अभिमन्युं च दुर्धर्षं द्रष्टुमिच्छामि नारद २६ इति महाभारते स्वर्गारोहणपर्वणि युधिष्ठिर उवाच नेह पश्या
मि विबुधा राधेयममितौजसं भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ १ जुहुवुर्ये शरीराणि रणवह्नौ महारथाः राजानो
राजपुत्राश्च ये मदर्थे हता रणे २ क्व ते महारथाः सर्वे शार्दूलसमविक्रमाः तैरप्ययं जितो लोकः कच्चित्पुरुषसत्तमैः ३
यदि लोकानिमान्प्राप्तास्ते च सर्वे महारथाः स्थितं विद्धि हि मां देवाः सहितं तैर्महात्मभिः ४ कच्चिन्न तैरवाप्तोऽयं नृपैर्लोको
क्षयः शुभः न तैरहं विना रंस्ये भ्रातृभिर्ज्ञातिभिस्तथा ५ मातुर्हि वच नं श्रुत्वा तदा सलिलकर्मणि कर्णस्य क्रियतां तोय
मिति तपामि तप्यामि तेन वै ६ इदं च परितप्यामि पुनः पुनरहं सुराः यन्मातुः सदृशौ पादौ तस्याहममितात्मनः ७ राम॰

२

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०

दृष्ट्वैवैतोनानुगतः कर्णःपरबलार्दनः नत्वस्मान्कर्णसहितान्द्रेपेच्छेत्रपिसंयुगे ८ तमहंयत्रगतंतत्रद्रष्टुमिच्छामिसूर्यजं
अविज्ञातोमयायोसौघातितःसव्यसाचिना ९ भीमंचभीमविक्रान्तंप्राणेभ्योपिप्रियंमम अर्जुनंचेंद्रसंकाशंयमौचैवयमो
पमौ १० द्रष्टुमिच्छामितांचाहंपांचालींधर्मचारिणीं नचेहस्थातुमिच्छामिसत्यमेवंब्रवीमिवः ११ किंमेभ्रातृविहीनस्यव
रेणसुरसत्तमाः यत्रतेममसस्वर्गोभ्रातरो वै मतोमम १२ देवाऊचुः यदिवैतत्रतेश्रद्धागम्यतांपुत्रमाचिरं प्रियेहितववर्
तामोदेवराजस्यशासनात १३ वैशं० इत्युक्त्वातंततोदेवदेव दूतमुपादिशन् युधिष्ठिरस्यसुहृदोदर्शयेतिपरंतप १४
ततःकुंतीसुतोराजादेवदूतश्चजग्मतुः सहितौराजशार्दूलयत्रतेपुरुषर्षभाः १५ अग्रतोदेवदूतस्तुययौराजाचपृ
ष्ठतः पंथानमशुभंदुर्गंसेवितंपापकर्मभिः १६ तमसासंवृतंघोरंकेशशैवलशाद्वलं युक्तंपापकृतांगंधैर्मांसशोणि
तकर्दमं १७ दंशोत्पातमल्लूकमक्षिकामशकावृतं इतश्चेतश्चकुणपैःसमंतात्परिवारितं १८ अस्थिकेशसमाकी
र्णंकृमिकीटसमाकुलं ज्वलनेनप्रदीप्तेनसमंतात्परिवेष्टितं १९ अयोमुखैश्चकाकाद्यैर्गृध्रैश्चसमभिद्रुतं सूचीमु
खैस्तथाप्रेतैर्विंध्यशैलोपमैर्वृतं २० ॥

© Dharmartha Trust J&K Digitized By eGangotri

स्व०टी०
३

प्रवेरितैः इतस्ततः पातितैः २१ २३ करंभवालुकास्तप्ताः सूक्ष्मवालुकाः करंभवालुके मध्ये: २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३

मेदोरुधिरयुक्तैश्च छिन्नबाहूरुपाणिभिः निकृत्तोदरपादैश्च तत्र तत्र प्रवेरितैः २१ स तत्कुणपदुर्गंधमशिवं लोमहर्षणं जगा
म राजा धर्मात्मा मध्ये बहु विचिंतयन् २२ ददर्शोष्णोदकैः पूर्णां नदीं चापि सुदुर्गमां असिपत्रवनं चैव निशितं क्षुरसंवृतं २३
करंभवालुकास्तप्ता आयसीश्च शिलाः पृथक् लोहकुंभीश्च तैलस्य क्वाथ्यमानाः समंततः २४ कूटशाल्मलिकं चापि दुःस
र्शं तीक्ष्णकंटकं ददर्श चापि कौंतेयो यातनाः पापकर्मिणां २५ स तं दुर्गंधमालक्ष्य देवदूतमुवाच ह कियदध्वानमस्माभि
र्गंतव्यमिममीदृशं २६ क्व च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि देशोयं कश्च देवानामेतदिच्छामि वेदितुं २७ स संनिववृते श्रु
त्वा धर्मराजस्य भाषितं देवदूतोब्रवीच्चैनमेतावद्गमनं तव २८ निवर्तितव्यो हि मया तथास्म्युक्तो दिवौकसैः यदि श्रांतोसि रा
जेंद्र त्वमथागंतुमर्हसि २९ युधिष्ठिरस्तु निर्विण्णस्तेन गंधेन मूर्छितः निवर्तने धृतमनाः पर्यावर्तत भारत ३० स संनिवृ
त्तो धर्मात्मा दुःखशोकसमाहतः शुश्राव तत्र वदतां दीना वाचः समंततः ३१ भो भो धर्मज राजर्षे पुण्याभिजन पांडव अनुग्र
हार्थमस्माकं तिष्ठ तावन्मुहूर्तकं ३२ आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः तव गंधानुगस्तात येनास्मान्सुखमागमत् ३३

राम०
३

© (O) Dharmartha Trust J&K. Digitized By eGangotri

३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८

नैवयंपार्थदीर्घस्यकालस्यपुरुषर्षभ सुखमासादयिष्यामस्त्वांदृष्ट्वाराजसत्तम ३४ संनिवर्त्तस्वमहावाहोमुहूर्त्तमपिभारत त्वयिति
ष्ठतिकौरव्ययातनानास्मान्नवाधते ३५ एवंवहुविधावाचः कृपणावेदनावतां तस्मिन्देशेसशुश्रावसमंताद्वदतांनृप ३६ ते
षांतुवचनंश्रुत्वादयावाक्यानिभाषितां अहोकृच्छ्रमितिप्राहतस्थौसचयुधिष्ठिरः ३७ सतागिरःपुरस्तादिश्रुतपूर्वाःपुनः
पुनः ग्लानानांदुःखितानांवचनान्यजानतपांडवः ३८ अवुध्यमानस्तावाचोधर्मपुत्रोयुधिष्ठिरः उवाचकेभवंतोवैकिमर्थमिह
तिष्ठतः ३९ इत्युक्तास्तेततःसर्वेसमंतादवभाषिरे कर्णोहंभीमसेनोहमर्जुनोहमितिप्रभो ४० नकुलःसहदेवश्चधृष्टद्युम्नो
हमित्युत द्रौपदीद्रौपदेयाश्चइत्येवंतेविचुक्रुशुः ४१ तावाचःसततदाश्रुत्वातद्देशसदृशीर्नृप ततोविममृशेराजाकिंन्विदंदैव
कारितं ४२ किंनुतत्कलुषंकर्मकृतमेभिर्महात्मभिः कर्णेनद्रौपदेयैर्वापांचाल्यावासुमध्यया ४३ यइमेपापगंधेस्मिन्देशे
संतिसुदारुणे नाहंजानामिसर्वेषांदुष्कृतंपुण्यकर्मणां ४४ किंकृत्वाधृतराष्ट्रस्यपुत्रोराजासुयोधनः तथाश्रियायुतःपा
पैःसहसर्वैःपदानुगैः ४५ महेंद्रइवलक्ष्मीवानास्तेपरमपूजितः कस्येदानींविकारोयंयइमेनरकंगताः ४६ ॥ ॥

५७ ५८ विममर्षविवांस्कृतवान् ४९ ५१ दूताःखिन्नाः ५२ ५४ द्वितीयोध्यायः स्थिते १ २ ३ ॥ ॥ ॥

सर्वधर्मविदः शूराः सत्यागमपरायणाः क्षत्रधर्मपराः संतो यज्वानो भूरिदक्षिणाः ४७ किंनुसुप्तोस्मिजागर्मि चेतयामि न
चेतये अहो चित्तविकारोयं स्याद्वामे चित्तविभ्रमः ४८ एवंबहुविधं राजा विममर्ष युधिष्ठिरः दुःखशोकसमाविष्टश्चिंताव्या
कुलितेंद्रियः ४९ क्रोधमाहारयच्चैव तीव्रंधर्मसुतो नृपः देवांश्चगर्हयामास धर्मं चैव युधिष्ठिरः ५० सतीव्रगंधसंतप्तो देव
दूतमुवाच ह गम्यतां तत्रयेषां त्वं दूतस्तेषामुपांतिकं ५१ नह्यहं तत्रयास्यामि स्थितोस्मीति निवेद्यतां मत्संश्रयादिमे दूताः सु
खिनो भ्रातरोहिमे ५२ इत्युक्तः सतदा दूतः पांडुपुत्रेणधीमता जगाम तत्रयत्रास्ते देवराजः शतक्रतुः ५३ निवेदयामास
चतद्धर्मराजचिकीर्षितं यथोक्तंधर्मपुत्रेण सर्वमेव जनाधिप ५४ इति स्वर्गारोहणपर्वणि २ वैशंपायन उवाच स्थिते मुहू
र्ते पार्थेतु धर्मराजे युधिष्ठिरे आजग्मुस्तत्रकौरव्य देवाः शक्रपुरोगमाः १ सचविग्रहवान्धर्मो राजानं प्रसमीक्षितुं तत्रा
जगाम यत्रासौ कुरुराजो युधिष्ठिरः २ तेसुभासुरदेहेषु पुण्याभिजनकर्मसु समागतेषु देवेषु व्यगमत्तत्तमो नृप ३ नादृ
श्यंतचतास्तत्र यातनाः पापकर्मिणां नदी वैतरणी चैव कूटशाल्मलिना सह ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© (O) Dharmartha Trust J&K Digitized By eGangotri

५ ११ यातॄणां स्वर्गो भ्रातॄणां नरकः इति युधिष्ठिरस्य ईर्ष्यां विषादं वापनयति यदि इति १३ १४ हतः कुंजर इति अश्वत्थामवधे द्रोण उपाचीर्णः वंचितः गत्र

लोहकुंभ्यः शिलाश्चैव नादृश्यंत भयानकाः विकृतानि शरीराणि यानि तत्र समंततः ५ ददर्श राजा कौरव्यस्तान्यदृश्यानि चाभव
न् ततो वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः ६ ववौ देवसमीपस्थः शीतलोतीव भारत मरुतः सह शक्रेण वसवश्चाश्विनौ स
ह ७ साध्या रुद्रास्तथादित्या ये चान्येपि दिवौकसः सर्वे तत्र समाजग्मुः सिद्धाश्च परमर्षयः ८ यत्र राजा महातेजा धर्मपुत्रः स्थितो
भवत् ततः शक्रः सुरपतिः श्रिया परमया युतः ९ युधिष्ठिरमुवाचेदं सांत्वपूर्वमिदं वचः युधिष्ठिर महाबाहो प्रीता देवगणास्तव
१० एह्येहि पुरुषव्याघ्र कृतमेतावता विभो सिद्धिः प्राप्ता महाबाहो लोकाश्चाप्यक्षयास्तव ११ न च मन्युस्त्वया कार्यः शृणु
चेदं वचो मम अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः १२ शुभानामशुभानां च द्वौ राशी पुरुषर्षभ यः पूर्वं सुकृतं भुंक्ते पश्चा
न्निरयमेव सः १३ पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते १४ तेन त्वमेवं गमितो मया
श्रेयोर्थिना नृप व्याजेन हि त्वया द्रोण उपचीर्णः सुतं प्रति १५ व्याजेनैव ततो राजन् दर्शितो नरकस्तव यथैव त्वं तथा भीम
स्तथा पार्थो यमौ तथा १६

वाचीर्णो द्रोणो मनुष्यपरत्वेन ज्ञापितस्तस्योपचारश्छलेनेत्यर्थः १५ १६ ॥ ॥ ॥ ॥ ॥

तुभ्यंतव १८ २४ असिकद्दितान् खड्गवलेनहर्षिसापितान् २५ २६ २९

५ द्रौपदी च तथा कृष्णा व्याजेन नरकं गता। आगच्छ नरशार्दूल मुक्तास्ते वै च कल्मषात् १७ स्वपक्षाश्चैव ये तु अपार्थिवा नि
हता रणे सर्वे स्वर्गमनुप्राप्तास्तान्पश्य भरतर्षभ १८ कर्णश्चैव महेष्वासः सर्वशस्त्रभृतां वरः स गतः परमां सिद्धिं यदर्थं परि
तप्यसे १९ तं पश्य पुरुषव्याघ्रमादित्यतनयं विभो स्वस्थानस्थं महाबाहो जहि शोकं नरर्षभ २० भ्रातॄंश्चान्यांस्तथा पश्य स्व
पक्षांश्चैव पार्थिवान् स्वं स्वं स्थानमनुप्राप्तान्व्येतु ते मानसो ज्वरः २१ कृच्छ्रं पूर्वं चानुभूय इतः प्रभृति कौरव विहरस्व मया सार्द्धं
गतशोको निरामयः २२ कर्मणां तात पुण्यानां जितानां तपसा स्वयं दानानां च महाबाहो फलं प्राप्नुहि पार्थिव २३ अद्य त्वां
देवगंधर्वा दिव्याश्चाप्सरसो दिवि उपसेवंतु कल्याणं विरजोंवरभूषणाः २४ राजसूयजितांल्लोकानश्वमेधाभिवर्द्धितान् प्रा
प्नुहि त्वं महाबाहो तपसश्च महाफलं २५ उपर्युपरि राज्ञां हि तव लोका युधिष्ठिर हरिश्चंद्रसमाः पार्थ येषु त्वं विहरिष्यसि २६
मांधाता यत्र राजर्षिर्यत्र राजा भगीरथः दौष्यंतिर्यत्र भरतस्तत्र त्वं विहरिष्यसि २७ एषा देवनदी पुण्या पार्थ त्रैलोक्यपावनी आ एम०
काशगंगा राजेंद्र तत्राप्लुत्य गमिष्यसि २८ अत्र स्नातस्य भावस्ते मानुषो विगमिष्यति गतशोको निरायासो मुक्तवैरो भविष्यसि ५

२९ पा२ ॥ ॥

© (In) Dharmartha Trust J&K. Digitized By eGangotri

३० ३१ जिज्ञासापरीक्षा ३२ ३३ स्वर्गाधिरोहणेऽष्टोपघात्मसोदर्येषुविनष्टेषुसमुत्थानपर्वणिरागाश्रुनरूपिरागाष्टोपघाश्तिपंचमीपाठेनतमारभ्यसर्थेः ३४

एवंब्रुवतिदेवेन्द्रे कौरवेन्द्रंयुधिष्ठिरं धर्मोविग्रहवान्साक्षादुवाचसुतमात्मनः ३० भोभोराजन्महाप्राज्ञप्रीतोस्मितवपुत्रक मद्भक्त्या
सत्यवाक्येनक्षमयाचदमेनच ३१ एषातृतीयाजिज्ञासातवराजन्कृतामया नशक्यसेचालयितुंस्वभावात्पार्थहेतुतः ३२ पूर्वं
परीक्षितोहित्वंप्रश्नैर्द्वैतवनेमया अरणीसहितस्यार्थेतच्चनिस्तीर्णवानसि ३३ सोदर्येषुविनष्टेषुद्रौपद्यांतत्रभारत श्वरूपधारि
णापत्रपुनस्त्वंमेपरीक्षितः ३४ इदंतृतीयंभ्रातॄणामर्थेयत्स्थातुमिच्छसि विशुद्धोसिमहाभागसुखीविगतकल्मषः ३५ नचैते
भ्रातरःपार्थनरकार्हाविशांपते मायैषादेवराजेनमहेन्द्रेणप्रयोजिता ३६ अवश्यंनरकास्तातद्रष्टव्याःसर्वराजभिः ततस्त्वया
प्राप्तमिदंमुहूर्तंदुःखमुत्तमं ३७ नसव्यसाचीभीमोवायमौवापुरुषर्षभौ कर्णोवासत्यवाक्शूरोनरकार्हाश्चिरंनृप ३८ न
कृष्णाराजपुत्रीचनरकार्हायुधिष्ठिर एह्येहिभरतश्रेष्ठपश्यगंगांत्रिलोकगां ३९ एवमुक्तःसराजर्षिस्तवपूर्वपितामहः जगा
मसहधर्मेणसर्वैश्चत्रिदिवालयैः ४० गंगांदेवनदींपुण्यांपावनीमृषिसंस्तुतां अवगाह्यततोराजातनुंतत्याजमानुषीं ४१
ततोदिव्यवपुर्भूत्वाधर्मराजोयुधिष्ठिरः निर्वैरोगतसंतापोजलेतस्मिन्समाप्लुतः ४१ ॥ ॥ ॥ ॥ ॥ ॥

३५ ३६ ३७ ३८ ३९ ४० ४१ ४१ ४२

© Dhanwantari Trust. Digitized By eGangotri

स्व० टी० ४३ यत्रेनकुरवस्तत्रदेवैः सहयथाविधिहयोः संबंधः ४४ तृतीयोध्यायः ततो १ ब्राह्मेणवपुषाराघवेन २ उपस्थितंसेवितंत्रस्त्रैः ३ ४
५९ [यत्र ते] पर्णो तत्र ३

६ ततोययौवृतोदेवैः कुरुराजोयुधिष्ठिरः धर्मराजसहितोधीमान्स्तूयमानोमहर्षिभिः ४३ यत्रेतपुरुषव्याघ्राः शूराविगतमन्यवः
योधास्तेधार्त्तराष्ट्राश्चस्वानिस्थानानिभेजिरे ४४ इतिस्वर्गारोहणपर्वणि वैशंपायनउवाच ततोयुधिष्ठिरोराजादेवैः सर्षिम
रुद्गणैः स्तूयमानोययौतत्रकुरुपुंगवाः १ ददर्शतत्रगोविंदंब्राह्मेणवपुषान्वितं तेनैवदृष्टपूर्वेणसादृश्येनोपसूचितं २ दी
प्यमानंस्ववपुषादिव्यैरस्त्रैरुपस्थितं चक्रप्रभृतिभिर्घोरैर्दिव्यैः पुरुषविग्रहैः ३ उपास्यमानंवीरेणफाल्गुनेनसुवर्चसा
तथास्वरूपंकौंतेयोददर्शमधुसूदनं ४ तावुभौपुरुषव्याघ्रौसमुदीक्ष्ययुधिष्ठिरं यथावत्प्रतिपेदातेपूजयादेवपूजितौ
५ अपरस्मिन्नथोदेशेकर्णंशस्त्रभृतांवरं द्वादशादित्यसहितंददर्शकुरुनंदनः ६ अथापरस्मिन्नुद्देशेमरुद्गणवृ
तंविभुं भीमसेनमथापश्यत्तेनैववपुषान्वितं ७ वायोर्मूर्त्तिमतः पार्श्वेदिव्यमूर्त्तिसमन्वितं श्रियापरमयायुक्तंसिद्धिं
परमिकांगतं ८ अश्विनोस्तुतथास्थानेदीप्यमानौस्वतेजसा नकुलंसहदेवंचददर्शकुरुनंदनः ९ तथाददर्शपां
चालींकमलोत्पलमालिनीं वपुषास्वर्गमाक्रम्यतिष्ठंतीमर्कवर्चसं १० ॥ ॥ ॥ ॥ ॥ राम० ६

५ ६ ७ ८ ९ १० १० ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

११ मानुषंमानुषभावं १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ चतुर्थोध्यायः ४

अखिलंसहसाराजाप्रष्टुमैछद्युधिष्टिरः ततोस्यभगवानिंद्रःकथयामासदेवराट् ११ श्रीरेषाद्रौपदीरूपात्वदर्थेमानुषंग
ता अयोनिजालोककांतापुण्यगंधायुधिष्टिर १२ रत्यर्थंभवतांह्येषानिर्मिताशूलपाणिना द्रुपदस्यकुलेजाताभवद्भिश्चो
पजीविता १३ एतेपंचमहाभागागंधर्वाः पावकप्रभाः द्रौपद्यास्तनयाराजन्युष्माकममितौजसः १४ पश्यगंधर्वराजानंधृ
तराष्ट्रंमनीषिणं एनंचत्वंविजानीहिभ्रातरंपूर्वजंपितुः १५ अयंतेपूर्वजोभ्राताकौंतेयःपावकद्युतिः सूर्यपुत्रोग्रजःश्रे
ष्टोराधेयइतिविश्रुतः १६ आदित्यसहितोयातिपश्यैनंपुरुषर्षभ साध्यानामथदेवानांविश्वेषांमरुतामपि १७ गणेषु
पश्यराजेंद्रवृष्ण्यंधकमहारथान् सात्यकिप्रमुखान्वीरान्भोजांश्चैवमहाबलान् १८ सोमेनसहितंपश्यसौभद्रमपरा
जितं अभिमन्युंमहेष्वासंनिशाकरसमद्युतिं १९ एषपांडुर्महेष्वासःकुंत्यामाद्र्याचसंगतः विमानेनसदाभ्येतिपितातवम
मांतिकं २० वसुभिःसहितंपश्यभीष्मंशांतनवंनृप द्रोणंबृहस्पतेःपार्श्वेगुरुमेनंनिशामय २१ एतेचान्येमहीपाला
योधास्तवचपांडव गंधर्वैःसहितायांतियक्षैःपुण्यजनैस्तथा २२ गुह्यकानांगतिंचापिकेचित्प्राप्तानराधिपाः त्यक्त्वादे
हंजितस्वर्गाःपुण्यवाग्बुद्धिकर्मभिः २३ इतिस्वर्गारोहणपर्वणि

घ्रा ४

स्व० गो० भीष्म १ २ पूर्वस्मिन्नध्याये यो [illegible] यस्य यस्य देवस्यांशः स स्वर्गं गत्वा स्वस्य स्वस्यांशिनः सांनिध्यं प्राप्त इत्युक्तं तत्र संशयः किमेते अंशाः कारुक
७ हारिणामंशा इव रथ्यकुंसमारि[illegible]तप्रासाः उतेतेषां वा शिखाअनुलीयंते आद्ये कर्मतेरूहपरंपरया तत्वज्ञानमंतरेणोच्छेदायोगात् तेषामनिर्मोक्षः सा

जनमेजय उवाच भीष्मद्रोणौ महात्मानौ धृतराष्ट्रश्च पार्थिवः विराटद्रुपदौ चोभौ शंखश्चैवोत्तरस्तथा १ धृष्टकेतुर्जयत्से
नो राजा चैव सत्यजित् दुर्योधनसुताश्चैव शकुनिश्चैव सौबलः २ कर्णपुत्राश्च विक्रांता राजा चैव जयद्रथः घटो
त्कचादयश्चैव ये चान्ये नानुकीर्तिताः ३ ये चान्ये कीर्तिता वीरा राजानो दीप्तमूर्तयः स्वर्गे कालं कियंतं ते तस्थुस्तदपि
शंस मे ४ आहोस्विच्छाश्वतं स्थानं तेषां तत्र द्विजोत्तम अंते वा कर्मणां कां ते गतिं प्राप्ता नरर्षभाः ५ एतदिच्छाम्य
हं श्रोतुं प्रोच्यमानं द्विजोत्तम तपसा हि प्रदीप्तेन सर्वं त्वमनुपश्यसि ६ सौतिरुवाच इत्युक्तः स तु विप्रर्षिरनुज्ञातो
महात्मना व्यासेन नृपतेस्तस्य आख्यातुमुप[illegible]चक्रमे ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रित्वमस्मदादिवत्स्यात् द्वितीये मानुष्यभोगैर्वैतैः कृतानां कर्मणां नाशः पात्रीणि इति संदिहानो जनमेजयः पृच्छति भीष्मद्रोणाविति तेषामंते कां राम०
गतिं पुण्यभोगांतेंशिनां सह ऐक्यं वा सालोक्यं वा शाश्वतं प्राप्नुवंति उत भूमौ वा[illegible]वर्तंत इति प्रश्नः ५ ६ ७ ॥ ॥ ७

वा

अत्रोत्तरमाह न शक्यमिति कर्मणा मर्त्ये तेन सर्वेण प्रकृतिं गन्तुं न शक्यमित्यस्यार्थः अयोज्यं परिहार्यं सर्वं यदि जन्तुः प्रारब्धे कर्मणि तेन प्रकृतिं गच्छेत् तर्हि सर्वेऽपि मुक्ता
स्युः संसारश्चादिमान् भवेत् ततश्च कृतहानाकृताभ्यागमप्रसंगो विधिप्रतिषेधशास्त्रानर्थक्यं च स्यात् किं चिदेकं कर्मणा मर्त्ये तेन प्रकृतिं भुंजते न सर्वं इति किं
तर्हि ये प्रकृतिं न प्राप्तास्ता नुद्दिश्य पर्यन्ते तल्लयेऽपि प्राप्तव्यः सम्यक् प्रयोजिता ८ तत्र केचित् स्वर्गप्रापककर्मणा मर्त्ये ते सर्वे देवा इति भिस्तादृशं प्राप्तं योग्यान् ये

वैशं० न शक्यं कर्मणा मर्त्ये तेन सर्वेण मनुजाधिप प्राप्तुं गतिं किं तु सम्यक् प्रैशोषां सम्प्रयोजिता ८ शृणु गुह्यमिदं राजन् देवानामभ
रतर्षभ यद्युवाच महातेजा दिव्यचक्षुः प्रतापवान् ९ मुनिः पुराणः कौरव्य पाराशर्यो महाव्रतः अगाधबुद्धिः सर्वज्ञो ग
तिज्ञः सर्वकर्मणां १० वसूनेव महातेजा भीष्मः प्राप महाद्युतिः अष्टावेव हि दृश्यन्ते वसवो भरतर्षभ ११ बृहस्पतिं विवे
शाथ द्रोणो ह्यंगिरसां वरं कृतवर्मा तु हार्दिक्यः प्रविवेश मरुद्गणान् १२ सनत्कुमारं प्रद्युम्नः प्रविवेश गतागतं धृतरा
ष्ट्रो धनेशस्य लोकान् प्राप दुरासदान् १४ धृतराष्ट्रेण सहिता गान्धारी च यशस्विनी पत्नीभ्यां सहितः पाण्डुर्महेन्द्रस्य सदनं य
यौ १४ विराटद्रुपदौ चोभौ धृष्टकेतुश्च पार्थिवः निशठोऽक्रूरसांबश्च भानुः कंपो विदूरथः १५ ॥ ॥ ॥ ॥

गजह्वयं प्राप्य पर्यन्तं परिगणयति वृष्णि अश्वादिना इति तेषां स्वर्गगतानामपि पुनरावर्तनं एते तु उत्तरोत्तरं मुक्तोर्ध्वं क्रमेण गतिं प्राप्य अन्ते ब्रह्मणा सह मुच्यं
ते तेन देवत्वप्रापकमेव कर्मणि यज्ञदानतपःप्रभृतीनि कर्तव्यान्येव न तु तेन दोष इति सर्वं मनवद्यं ९ १० १५ ॥ ॥ ॥

स०टी० १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८

८

भूरिश्रवाः शलश्चैव भूरिश्च पृथिवीपतिः कंसश्चैवोग्रसेनश्च वासुदेवस्तथैव च १६ उत्तरश्च सह भ्रात्रा शंखेन नरपुं
गवाः विश्वेषां देवतानां ते विविशुर्नरपुंगवाः १७ वर्चा नाम महातेजाः सोमपुत्रः प्रतापवान् सोभिमन्युर्नृसिंहस्य
फाल्गुनस्य सुतोभवत् १८ स युध्वा क्षत्रधर्मेण यथा नान्यः पुमान् क्वचित् विवेश सोमं धर्मात्मा कर्मणांते महारथः १९
आविवेश रविं कर्णो निहतः पुरुषर्षभ द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकं २० धृतराष्ट्रात्मजाः सर्वे यातुधाना ब
लोत्कटाः ऋद्धिमंतो महात्मानः शस्त्रपूता दिवंगताः २१ धर्ममेवाविशत् क्षत्ता राजा चैव युधिष्ठिरः अनंतो भग
वान्देवः प्रविवेश रसातले २२ पितामहनियोगाद्धि यो योगाद्गामधारयत् यः सनारायणो नाम देवदेवः
सनातनः २३ तस्यांशो वासुदेवस्तु कर्मणांते विवेश ह षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहः २४ अमज्जं
स्ताः सरस्वत्यां कालेन जनमेजय तत्र त्यक्त्वा शरीराणि दिवमारुरुहुः पुनः २५ ताश्चैवाप्सरसो भूत्वा वासुदेव
मुपागमन् हतास्तस्मिन्महायुद्धे ये वीरास्तु महारथाः २६ घटोत्कचादयश्चैव देवान्यक्षांश्च भेजिरे दुर्यो
धनसहायाश्च राक्षसाः परिकीर्तिताः २७ प्राप्तास्ते क्रमशो राजन्सर्वलोकाननुत्तमान् भवनं च महेंद्रस्य कुबेरस्य

राम०

८

© Dharmartha Trust J&K. Digitized By eGangotri

एवंपाण्डवानांकथेंसमाप्यजनमेजयस्यवैशंपायनएवंकथामुक्तवानितिप्रकृतमनुसंधानः सौतिरुवाच एतच्छ्रुत्वेत्यादि ३० ३४ समाप्तामपास्तेन या

वर्त्तन्तस्तथालोकान्विविधुः पुरुषर्षभाः एतत्तेसर्वमाख्यातंविस्तरेणमहाद्युते कुरूणांचरितंकृत्स्नंपाण्डवानांचभारत २९
सौतिरुवाच एतच्छ्रुत्वाद्विजश्रेष्ठात्सराजाजनमेजयः विस्मितोभवदत्यर्थंपन्नगकर्मान्तरेष्वथ ३० ततःसमापयामासःकर्मतत्र
सयाजकाः आस्तीकस्याभवत्प्रीतःपरिमोक्ष्यभुजंगमान् ततोद्विजातीन्सर्वांस्तान्दक्षिणाभिरतोषयत् पूजिताश्चापितेराज्ञा
ततोजग्मुर्यथागतं ३२ विसर्ज्यपित्वाविप्रांस्तान्राजापिजनमेजयः ततस्तक्षशिलायाःसपुनरायाद्गजाह्वयं ३३ एतत्तेसर्वमाख्या
तंवैशंपायनकीर्त्तितं व्यासाज्ञयासमाख्यातं सर्पसत्रेनृपस्यहि ३४ पुराणंपार्थमितिहासाख्यं पवित्रंचेदमुत्तमं कृष्णेनमु
निनाविप्रनिर्मितंसत्यवादिना ३५ सर्वज्ञेनविधिज्ञेनधर्मज्ञानवतासता अतीन्द्रियेणशुचिनातपसाभावितात्मना ३६
ऐश्वर्येवर्त्ततावैवसांख्ययोगवतातथा नैकतन्त्रविबुद्धेनदृष्ट्वादिव्येनचक्षुषा ३७ कीर्त्तिंप्रथयतालोकेपाण्डवानांमहात्म
नां अन्येषांक्षत्रियाणांचभूरिद्रविणतेजसां ३८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सांज्ञयावैशंपायनेनकीर्त्तितंच ३५ ३६ विधिज्ञेनवेदज्ञेनअतीन्द्रियेणइन्द्रियाणिपतिक्रान्तेनयोगवलाद्देवसर्वदर्शनसिद्धेरित्याहतपसेतिभावितात्मनाशो
धितचित्तेन ३७ ३८

© Dharmarth Trust J&K. Digitized By eGangotri

सर्वेषां तृतीयांतानां निर्मित्तमित्येनेनान्वयः अन्येषामपि कीर्तिं प्रथयतेति संबंधः ३९ ब्रह्मभूयाय कल्पते ब्रह्मसाधनानुष्ठानक्रमेण ४० अन्ततः निक
टे ४१ ४२ ४३ अह्नेति महाभारतस्य स्वल्पमपि पश्चिमायां संध्यायां पठ्यते चेद्दिनकृतं पापं नश्यति सर्वं प्रातः संध्यायां रात्रिकृतं [illegible] इत्यर्थः ४४ निरुक्तं ना

यश्चेदं श्रावयेद्विद्वान्सदा पर्वणि पर्वणि धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय गच्छति ३९ कार्ष्णं वेदमिमं सर्वं शृणुयाद्यः समाहितः
ब्रह्महत्यादिपापानां कोटिस्तस्य विनश्यति ४० यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः अक्षय्यमन्नपानं वै पितॄंस्तस्योप
तिष्ठते ४१ अह्ना यदेनः कुरुते इन्द्रियैर्मनसापि वा महाभारतमाख्याय पश्चात्संध्यां प्रमुच्यते ४२ यद्रात्रौ कुरुते पापं
ब्राह्मणः स्त्रीगणैर्वृतः महाभारतमाख्याय पूर्वां संध्यां प्रमुच्यते ४३ महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते निरुक्तमस्य
यो वेद सर्वपापैः प्रमुच्यते ४४ धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् ४५ जयो
नामेतिहासोयं श्रोतव्यो मोक्षमिच्छता ब्राह्मणेन च राज्ञा च गर्भिण्या चैव योषिता ४६ स्वर्गकामो लभेत्स्वर्गं जयकामो ल
भेज्जयं गर्भिणी लभते पुत्रं कन्यां वा बहुभागिनी ४७ अनागतश्च मोक्षश्च कृष्णद्वैपायनः प्रभुः संदर्भं भारतस्यास्य कृतवान्ध
र्मकाम्यया ४८

मनिर्वचनं धर्मे चेति चकारस्त्वनुक्तसमुच्चयार्थः धर्मादिष्वन्यत्र तु पृथक्पृथगत्रोक्तं ह्रानाद्येष्विति बोध्यं ४५ ४६ अनागतो नागन्तुकोऽनित्यसिद्ध इति यावत् एवंविधो यो मो
क्षः कैवल्यं नित्यस्वस्वरूपं यस्य स मोक्षः यद्वा मोक्तुमिच्छन्मु[illegible]चोऽकर्मकस्य गुणेष्वपि स निर्गुणोऽभ्यासे लोपश्च मुमुक्षुरित्यर्थः लोकहितभावः ४८

© Dharmarth Trust J&K. Digitized By eGangotri

अन्नं वेदचतुष्टयं संहिताभ्यः पृथग्भूतं तान्दृष्टवान् ४९ ५१ श्रावयेत्येनयः शृणोतीत्यर्थः उभयत्र विभक्तिव्यत्ययश्छान्दसः ५२ ५३ भारताध्ययनादित्यिमार्द्
श्लोकः ५४ आसः इमां संहितां शुकं पुत्रमध्यापयत् स्वमधीयतो भारतस्य पितेति हा संस्करः स्मृत्वा च ग्रन्थरूपेण प्रणायतः भक्त्या परया उद्यो व्यासस्य एव प्र

षष्टिं शतसहस्राणि चकारान्यां स संहितां त्रिंशच्छतसहस्राणि देवलोके प्रतिष्ठितं ४९ पित्र्ये पंचदश ज्ञेयं पक्षलोके चतुर्दश एकं शत
सहस्रं तु मानुषेषु प्रभाषितं ५० नारदोऽश्रावयद्देवानसितो देवलः पितॄन् रक्षोयक्षाञ्छुको मर्त्यान्वैशंपायन एव तु ५१ इतिहास
मिमं पुण्यं महार्थं वेदसंमितं व्यासोक्तं श्रूयते येन कृत्वा ब्राह्मणमग्रतः ५२ स नरः सर्वकामांश्च कीर्तिं प्राप्येह शौनक गच्छेत्परमि
कां सिद्धिमत्र मे नास्ति संशयः ५३ भारताध्ययनात्पुण्यादपि पादमधीयतः श्रद्धया परया भक्त्या श्राव्यते चापि येन तु ५४ य इमां
संहितां पुण्यां पुत्रमध्यापयच्छुकः मातापितृसहस्राणि पुत्रदारशतानि च संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ५५ हर्षस्था
नसहस्राणि भयस्थानशतानि च दिवसे दिवसे मूढमाविशन्ति न पंडितं ५६ ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे धर्मादर्थ
श्च कामश्च स किमर्थं न सेव्यते ५७

उपसन्नस्य वाक्यं प्रमाणं मे वेत्यास्तिकत्वबुद्ध्या येन पुंसा श्रद्धया श्राव्यते स पुण्यात् पुण्यकरात् अपि पादः श्लोकः द्वयोः पादः ग्रन्थपादो वा भारतस्याध्ययनात् परमिकां सिद्धिं गच्छे
दिति पूर्वेणान्वयः आसेव्य श्रद्धा च श्रद्धा भारतमध्येतव्यमित्यर्थः ५४ संध्यायां भारतं पठनीयमित्युक्तं तत्र पठनयोग्यं भारतसारसंग्रहं चतुःश्लोकीरूपमाह मा
तेति ५५ ५७

५८ ५९ ६० ६१ पंचमोऽध्यायः भगवन् १ २ ३ ४ ५ ॥ ॥ ॥ ॥ ॥

नजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोः निसोधर्मःसुखदुःखेत्वनित्येनीवोनिसोहेतुरस्यत्वनित्यः ५८
इमांभारतसावित्रींप्रातरुत्थाययःपठेत् सभारतफलंप्राप्यपरंब्रह्माधिगच्छति ५९ यथासमुद्रोभगवान्यथाचहिमवान्गिरिः
ख्यातावुभौरत्ननिधीतथाभारतमुच्यते ६० इमंभारतमाख्यानंयःपठेत्सुसमाहितः सगच्छेत्परमांसिद्धिमितिमेनास्तिसं
शयः ६१ द्वैपायनोष्ठपुटनिःसृतमप्रमेयंपुण्यंपवित्रमथपापहरंशिवंच योभारतंसमधिगच्छतिवाच्यमानंकिंतस्यपु
ष्करजलैरभिषेचनेन ६२ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांस्वर्गारोहणकेनामपर्वसमाप्तमगमा
तु जनमेजय० भगवन्केनविधिनाश्रोतव्यंभारतंबुधैः फलंकिंकेचदेवाश्चपूज्यावैपारणेष्विह १ देयंसमाप्तेभगवन्किंचप
पर्वणि र्वणि वाचकः कीदृशश्चात्रप्रष्टव्यस्तद्ब्रवीहिमे २ वैशंपायनउवाच शृणुराजन्विधिमिमंफलंयच्चापिभारतात् श्रु
तात्संभवतिराजेंद्रयत्त्वंमामनुपृच्छसि ३ दिविदेवामहीपालक्रीडार्थमवनिंगताः ४ आदित्याश्चाश्विनौदेवालोकपाला एम०
महर्षयः गुह्यकाश्चसगंधर्वानागाविद्याधरास्तथा ५ ॥ ॥ ॥ ॥ ॥ १०.

© Dharmartha Trust J&K. Digitized by eGangotri

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १७ १८

श्री स्यधर्मोस्त्वयंनस्मन्मुनिभिः कायवोचरः गिरयः सागरानद्यस्तथैववाप्सरसांगणाः ६ ग्रहाः संवत्सराश्चैवचायनान्यृतवस्तथा
स्थावरंजंगमंचैवजगत्सर्वंसुरासुरं ७ भारतेभरतश्रेष्ठएकस्थमिहदृश्यते तेषांश्रुत्वाप्रतिष्ठानंनामकर्मानुकीर्तनात् ८ कृ
त्वापिपातकंघोरंसद्यमुच्यतमानवः इतिहासमिमंश्रुत्वायथावदनुपूर्वशः ९ संयतात्माशुचिर्भूत्वापारंगत्वाचभारते तेषांश्राद्धानि
देयानिश्रुत्वाभारतभारत १० ब्राह्मणेभ्योयथाशक्त्याभक्त्याचभरतर्षभ महादानानिदेयानिरत्नानिविविधानिच ११ गांकांस्या वः
पदोहाश्चकन्याश्चैववस्त्रालंकृताः सर्वकामगुणोपेतायेयानिविविधानिच १२ भवनानिविचित्राणिभूमिर्वासांसिकांचनं वाहना
पा॰ निचदेयानिहयामत्ताश्चवारणाः १३ शयनंशिबिकाश्चैवस्यंदनाश्चस्वलंकृताः यद्यद्गृहेवरंकिंचिद्यद्वास्तिमहद्वसु १४ तत्त
द्देयंद्विजातिभ्यआत्मादाराश्चसूनवः श्रद्धयापरयारक्तेक्रमशस्तस्यपारगः १५ शक्तितःसुमनाहृष्टःशुश्रूषुरविकल्पकः सा
सार्जवरतोदांतःशुचिःशौचसमन्वितः १६ श्रद्दधानोजितक्रोधोयथासिध्यतितच्छृणु शुचिःशीलान्वितावारःशुक्लवासा
जितेंद्रियः १७ संस्कृतःसर्वशास्त्रज्ञःश्रद्दधानोनुसूयकः रूपवान्सुभगोदांतःसत्यवादीजितेंद्रियः १८ ॥ ॥

८१

© Dharmartha Trust J&K. Digitized By eGangotri

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३१ ३१

स्व० रो० टी०

११

दानमानगृहीतश्च कोपोभवतिवाचकः अविलंबमनायस्तमद्रुतंधीरमूर्जितं १९ असंसक्ताक्षरपदंस्वरभावसमन्वितं त्रिष
ष्टिवर्णसंयुक्तमष्टस्थानसमीरितं २० वाचयेद्वाचकःस्वस्थःस्वासीनःसुसमाहितः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींस
रस्वतींचैवततोजयमुदीरयेत् २१ ईदृशाद्वाचकाद्राजन्श्रुत्वाभारतभारतं नियमस्थःशुचिःश्रोताश्रृणवन्सफलमश्नुते २२ पा
रणंप्रथमंप्राप्यद्विजान्कामैस्तर्पयेत् अग्निष्टोमस्ययज्ञस्यफलंवैलभतेनरः २३ अप्सरोगणसंकीर्णंविमानंलभतेमह
त् प्रहृष्टःसतुदेवैश्चदिवंयातिसमाहितः २४ द्वितीयंपारणंप्राप्यसोतिरात्रफलंलभेत् सर्वरत्नमयंदिव्यंविमानमधिरो
हति २५ दिव्यमाल्यांबरधरोदिव्यगंधविभूषितः दिव्यांगदधरोनित्यंदेवलोकेमहीयते २६ तृतीयंपारणंप्राप्यद्वादशा
हफलंलभेत् वसत्यमरसंकाशोवर्षाण्ययुतशोदिवि २७ चतुर्थेवाजपेयस्यपंचमेद्विगुणंफलं उदितादित्यसंकाशंज्व
लंतमनलोपमं २८ विमानंविबुधैःसार्धमारुह्यदिविगच्छति वर्षायुतानिभवनेशक्रस्यदिविमोदते २९ षष्ठेद्विगु
णमत्तीतिसप्तमेत्रिगुणंफलं कैलासशिखराकारंवैडूर्यमणिवेदिकं ३० परिक्षिप्तंचबहुधामणिविद्रुमभूषितं
विमानंसमधिष्ठायकामगंसाप्सरोगणं ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०

११

© Dharmartha Trust J&K. Digitized By eGangotri

३१ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५

वै॰ ३

सर्वान्लोकान्विचरते द्वितीय इव भास्करः अष्टमे राजसूयस्य पारणे लभते फलं ३१ चंद्रोदयनिभं रम्यं विमानमधिरोहति चं
द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ३३ सेव्यमानो वरस्त्रीणां चंद्रकांताननैः शुभैः मेखलानां निनादेन नूपुराणां च निःस्वनैः
३४ एकपरमनारीणां सुखसुप्तो विबुध्यते नवमे क्रतुराजस्य वाजिमेधस्य भारत ३५ कांचनस्तंभनिर्व्यूहं वैडूर्यकृतवेदिकं जां
बूनदमयैर्दिव्यैर्गवाक्षैः सर्वतो वृतं ३६ सेवितं चाप्सरःसंघैर्गंधर्वैर्दिविचारिभिः विमानं समधिष्ठाय श्रिया परमया ज्वलन् ३७
दिव्यमाल्यांबरधरो दिव्यचंदनभूषितः मोदते दैवतैः सार्धं दिवि देव इवापरः ३८ दशमं प्राप्य यज्ञानां द्विजातीनामिवंघव किं
किणीजालनिर्घोषं पताकाध्वजशोभितं ३९ रत्नवेदिकसंबाधं वैडूर्यमणितोरणं हेमजालपरिक्षिप्तं प्रवालवलभीमु
खं ४० गंधर्वैर्गीतकुशलैरप्सरोभिश्च शोभितं विमानं सुकृतावासं सुखेनैवोपपद्यते ४१ मुकुटेनाग्निवर्णेन जांबूनद
विभूषिणा दिव्यचंदनदिग्धांगो दिव्यमाल्यविभूषितः ४२ दिव्याल्लोकान्विचरति दिव्यैर्भोगैः समन्वितः विबुधानां प्रसादेन
श्रिया परमया युतः ४३ अथ वर्षगणानेवं स्वर्गलोके महीपते अप्सरोगंधर्वसहितः सहस्राण्येकविंशतिः ४४ ॥ ॥

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

स०टि० ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

१२

पुरंदरपुरेरम्ये शक्रेणसहमोदते दिव्ययानविमानेषु लोकेषु विविधेषु च ४५ दिव्यनारीगणाकीर्णो निवसत्यमरोयथा त
तः सूर्यस्यभवनेचंद्रस्यभवनेतथा ४६ शिवस्यभवनेराजन्विष्णोर्यातिसलोकतां एवमेतन्महाराजनात्रकार्याविचारणा
४७ श्रद्धानेनैवभाव्यमेवमाहगुरुर्मम वाचकस्यतुदातव्यंमनसायद्यदिच्छति ४८ हस्त्यश्वरथयानानिवाहनानिविशे
षतः कटकंकुंडलेचैववज्रसूत्रंतथापरं ४९ वस्त्रंचैवविचित्रंचगंधंचैवविशेषतः देववत्पूजयेत्तंतुविष्णुलोकमवाप्नु
यात् ५० अतःपरंप्रवक्ष्यामियानिदेयानिभारत वाच्यमानेतुविप्रेभ्योराजन्पर्वणिपर्वणि ५१ ज्ञातिदेशंचसंस्थं
चमाहात्म्यंभरतर्षभ धर्मवृत्तिंचविज्ञायक्षत्रियाणांनराधिप ५२ स्वस्तिवाच्यद्विजानादौततः कार्यंप्रवर्त्तते समाः
प्तेपर्वणितत्रः स्वशक्त्यापूजयेद्द्विजान् ५३ आदौतुवाचकंचैववस्त्रगंधसमन्वितं विधिवद्भोजयेद्राजन्मधुपाय
समुत्तमं ५४ ततोमूलफलप्रायंपायसंमधुसर्पिषा आस्तीकेभोजयेद्राजन्घाचैवगुडोदनं ५५ अष्टपेष्वेवषट्
पेष्वमोदकैश्चसमन्वितं सभापर्वणिराजेंद्रहविष्यंभोजयेद्द्विजान् ५६ आरण्यकेतुमूलफलैस्तर्पयेत्तुद्विजोत्त
मान् अरणीपर्वण्यासाद्यजलकुंभप्रदापयेत् ५७

एम०
१२

तर्पणानि च मुख्यानि धान्यमूलफलानि च सर्वकामगुणोपेतं विप्रेभ्योन्नं प्रदापयेत् ५८ विराटपर्वणि तथा वासांसि विविधानि च उद्योगे
भरतश्रेष्ठ सर्वकामगुणान्वितं ५९ भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलंकृतान् भीष्मपर्वणि राजेन्द्र दत्वा यानमनुत्तमं ६० ततः सर्वगुणो
पेतमन्नं दद्यात्सुसंस्कृतं द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितं ६१ शय्याश्च देया राजेन्द्र चापान्यसिवरांस्तथा कर्णपर्वण्यपि तथा भोज
नं सार्वकामिकं ६२ विप्रेभ्यः संस्कृतं सम्यक् दद्यात्संयतमानसः शल्यपर्वणि राजेन्द्र मोदकैः सगुडोदनैः ६३ अपूपैस्तर्पणैश्चैव
सर्वमन्नं प्रदापयेत् गदापर्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ६४ स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् घृतौदनं पुरस्ताच्च
ऐषिके दापयेत्पुनः ६५ ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतं शान्तिपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ६६ आश्वमेधि
के समासाद्य भोजनं सार्वकामिकं तथाश्रमनिवासे तु हविष्यं भोजयेद्द्विजान् ६७ मौसले सार्वगुणिकं गन्धमाल्यानुलेपनं मा
हाप्रस्थानिके तद्वत्सर्वकामगुणान्वितं ६८ स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् हरिवंशस्य समाप्तौ तु सहस्रं भोजये
द्द्विजान् ६९ गामेकां निष्कसंयुक्तां ब्राह्मणाय निवेदयेत् तदर्धेनापि दातव्या दरिद्रेणापि पार्थिव ७० सर्वपर्वसमाप्तौ तु पुस्त
कं वै विचक्षणः सुवर्णेन च संयुक्तं वाचकाय निवेदयेत् ७१ हरिवंशे पर्वणि च पायसं तत्र भोजयेत् पारणे पारणे राजन्यथावद्भ
रतर्षभ ७२ समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृतः शुक्लाम्बरधरः स्रग्वी सु
चिर्भूत्वा स्वलंकृतः ७३ अर्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् संहितापुस्तकान्राजन्प्रयतः सुसमाहितः ७४

CC-0. Dhanvantari Trust, UK. Digitized By eGangotri

भक्ष्यंभोज्यैस्तथापेयैस्सर्वकामैस्तथाविविधैःशुभैः हिरण्यंचसुवर्णंच दक्षिणामथदापयेत् ७५ देवताःकीर्त्तयेत्सर्वानरनारायणौतथा
ततोगंधैश्चमाल्यैश्चस्वलंकृत्यद्विजोत्तमान् ७६ तर्पयेद्विविधैःकामैर्दानैश्चोच्चावचैस्तथा अतिरात्रस्ययज्ञस्यफलंप्राप्नोतिमान
वः ७७ प्राप्नुयाच्चक्रतुफलंतथापर्वणिपर्वणि वाचकोभरतश्रेष्ठव्यक्ताक्षरपदस्वरः ७८ भविष्यश्रावयेद्विद्वान्भारतंभरतर्षभ
भुक्तवत्सुद्विजेंद्रेषुयथावत्संप्रदापयेत् ७९ वाचकंभरतश्रेष्ठभोजयित्वास्वलंकृतं वाचकेपरितुष्टेतुशुभाप्रीतिरनुत्तमा ८० ब्राह्मणे
षुतुतुष्टेषुप्रसन्नाःसर्वदेवताः ततोहिवरणंकार्यंद्विजानांभरतर्षभ ८१ सर्वकामैर्यथान्यायंसाधुभिश्चपृथग्विधैः इत्येषविधिरुद्दि
ष्टोमयातेद्विपदांवर श्रद्दधानेनवैभाव्यंयन्मांत्वंपरिपृच्छसि ८२ भारतश्रवणेराजन्पारणेचनृपोत्तम सदाप्रयत्नवताभाव्यंश्रेयस्तु
परमिच्छता ८३ भारतंशृणुयान्नित्यंभारतंपरिकीर्त्तयेत् भारतंभवनेयस्यतस्यहस्तगतोजयः ८४ भारतंपावनंपुण्यंभारतेवि
विधाःकथाः भारतंसेव्यतेदेवैर्भारतंपरमंपदं ८५ भारतंसर्वशास्त्राणामुत्तमंभरतर्षभ भारतात्प्राप्यतेमोक्षस्तत्वेनैतद्ब्रवीमि
ते ८६ महाभारतमाख्यानंक्षितिंगांचसरस्वतीं ब्राह्मणान्केशवंचैवकीर्त्तयन्नावसीदति ८७ वेदेरामायणेपुण्येभारतेभरतर्ष
भ आदौचांतेचमध्येचहरिःसर्वत्रगीयते ८८ यत्रविष्णुकथादिव्याःश्रुतयश्चसनातनाः तच्छ्रोतव्यंमनुष्येणपरंपदमिहेच्छ
ता ८९ एतत्पवित्रंपरममेतद्धर्मनिदर्शनं एतत्सर्वगुणोपेतंश्रोतव्यंभूतिमिच्छता ९० कायिकंवाचिकंचैवमनसासमुपार्जि
तं तत्सर्वंनाशमायातितमःसूर्योदयेयथा ९१ अष्टादशपुराणानांश्रवणाद्यत्फलंभवेत् तत्फलंसमवाप्नोतिवैष्णवोनात्रसंश

© Dharmartha Trust J&K. Digitized By eGangotri

स्व० टी० १५

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्यकृतौभारतभावदीपेस्वर्गारोहणपर्वार्थप्रकाशः समा

सं२

स्त्रियश्चपुरुषश्चैववैष्णवंपदमाप्नुयुः स्त्रीभिश्चपुत्रकामाभिः श्रोतव्यंवैष्णवंयशः ९३ दक्षिणाचात्रदेयावैनिष्कांप
चसुवर्णकंवाचकायप्रयाशक्त्यायथोक्तफलमिच्छता ९४ स्वर्णश्रृंगींचकपिलांसवत्सांवस्त्रसंवृतां वाचकायप्रद
द्याद्धिस्वात्मनःश्रेयइच्छता ९५ अलंकारंप्रदद्याच्चपाण्योर्वैभरतर्षभ कर्णस्याभरणंदद्याद्धनंचैवविशेषतः ९६
भूमिदानंसमादद्याद्वाचकायनराधिप भूमिदानसमंदानंनभूतंनभविष्यति ९७ शृणोतिश्रावयेद्वापिसततंचै
वयोनरः सर्वपापविनिर्मुक्तोवैष्णवंपदमाप्नुयात् ९८ पितृनुद्धरतेसर्वानेकादशसमुद्भवान् आत्मानंससुतंचै
वस्त्रियंचभरतर्षभ ९९ दशांशश्चैवहोमोपिकर्तव्योत्रनराधिपः इदंमयातवाग्रेचप्रोक्तंसर्वंनरर्षभ १०० इति
श्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांस्वर्गपर्वानुकीर्तनंसमाप्तमगमत् ॥ ॥ ॥ ॥

राम० १५

श्रीमगमत् [illegible] श्रीकृष्णायनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

ॐ

[illegible]

[illegible]

स्वपर्व
१८

© (c) Dharmartha Trust J&K. Digitized By eGangotri

महाप्रक

महाप्र क

(c) Dharmartha Trust J&K. Digitized By eGangotri

मौ० १

श्रीगणेशाय नमः एवं आदिपर्वणि सूत्रितानां धर्मार्थकाममोक्षाणां मध्ये सभावनपर्वयोः सत्यद्यूतिगुरुसत्रीधर्मैर्वे
नादिनाधर्मः प्रतिपादितः विराटप्रभृतिके सेवाजीवितिहिं एवं तत्कुलक्षयादिनार्थः शोकप्र दानिरूपितः दृष्टः शेषेर्थ
फलमूतः कामः स्त्रीपर्वणि तच्छ्वतं च मोक्षे पदं निरूपितं तत्र दशादित्रये मोक्ष हेतून दानविधावनवासाश्च नि

ॐ नमः नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत १ वैशंपायन उवाच षट्त्रिंशेत्व
थ संप्राप्ते वर्षे कौरवनंदनः ददर्श विपरीतानि निमित्तानि युधिष्ठिरः १ ववुर्वाताश्च निर्घाता रूक्षाः शर्करव
र्षिणः अपसव्यानि शकुना मंडलानि प्रचक्रिरे २ प्रत्यगूहुर्महानद्यो दिशो नीहारसंवृताः
उल्काश्चांगारवर्षिण्यः प्रापतन् गगनाद्भुवि ३ आदित्यो रजसा राजन् समवच्छन्नमंडलः विरश्मि
रुदये नित्यं कबंधैः समदृश्यत ४ परिवेषाश्च दृश्यंते दारुणाश्चंद्रसूर्ययोः त्रिवर्णाः श्यामरू
क्षांतास्तथा भस्मारुणप्रभाः ५ एते चान्ये च बहव उत्पाता भयशंसिनः दृश्यंते हरहो राजन् हृदयोद्वे
गकारकाः ६ ॥ ॥

रूप्यबोडशेष्वनतराप्लुवनवनमना श्रित्यपेके वलं अर्थेकार्के सक्ताः स्तेमरादिकालहूनक्रमसनेन विनश्यंतीतिप्रतिपाद्य
ते। सप्तदशेनिष्कामधर्मस्यफलं गृहादेरत्या गोष्टादशे तत्पूर्विकास्वर्गप्राप्तिश्च निरूपयिष्यते। तत्र राज्यप्राप्य
नंतरं षट्त्रिंशत्तमे वर्षे नाशसूचकानुत्पातानाह वैशंपायनः षट्त्रिंशेइति १ २ ३ ४ ५ ६ ॥ ॥ श्रीराम० १

मा १

© Dharmartha Trust J&K. Digitized by eGangotri

८ भवना अभवन् १० मौसलं मुसलकृतं कदनं समाश्रित्य समनसिध्यत्वा १२ मुसलैः एरकाजन्यैर्मुसलकरैः १३ १४ ५

कृष्णवृत्तिस्थ था कालस्य कुरुराजो युधिष्ठिरः अश्रृणोद्धि महिमचक्रस्य मौसलं कदनं कृतं ७ विमुक्तं वासुदेवं च श्रुत्वा रामं च पाण्डवः समानीयाब्रवीद्भ्रातॄन् किं करिष्याम इत्युत ८ परस्परं समासाद्य ब्रह्मदण्डबलात्कृतान् वृष्णीन्विनष्टांस्ते श्रुत्वा व्यथिताः पाण्डवाभवन् ९ निधनं वासुदेवस्य समुद्रस्येव शोषणं वीरा न श्रद्दधुस्तस्य विनाशं शार्ङ्गधन्वनः १० मौशलं ते समाश्रित्य दुःखशोकसमन्विताः विषण्णा हतसंकल्पाः पाण्डवाः समुपाविशन् ११ जनमेजय उवाच कथं विनष्टा भगवन्नन्धका वृष्णिभिः सह पश्यतो वासुदेवस्य भोजाश्चैव महारथाः १२ वैशंपायन उवाच षट्त्रिंशेऽथ ततो वर्षे वृष्णीनामनयो महान् अन्योन्यं मुशलैस्ते तु निजघ्नुः कालचोदिताः १३ जनमेजय उवाच केनानुशप्तास्ते वीराः क्षयं वृष्ण्यंधका गताः भोजाश्च द्विजवर्य त्वं विस्तरेण वदस्व मे १४ वैशंपायन उवाच विश्वामित्रं च कण्वं च नारदं च तपोधनं सारणप्रमुखा वीरा ददृशुर्द्वारकां गतान् १५ ते तान् साम्बं पुरस्कृत्य भूषयित्वा स्त्रियं यथा अब्रुवन्नुपसंगम्य दैवदण्डनिपीडिताः १६ इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः ऋषयः साधु जानीत किमियं जनयिष्यति १७ इत्युक्तास्ते तदा राजन्विप्रलंभप्रधर्षिताः प्रत्यब्रुवंस्तान्मुनयो यत्तच्छृणु नराधिप

तर

२० जरानामा कश्चित्कैवर्तः २१ अप्ययमेन सम्बन्धस्माभिर्दत्तः शापस्त्वयाक्षंतव्य इति २५ किंकरोम्यहं भूतसंकल्पं २९ स्व

७१

वृष्ण्यंधकविनाशायमुशलंघोरमायसं वासुदेवस्यदायादः सांबोयंजनयिष्यति १९ येनयूयंसुदुर्वृत्तानृशंसाजातम
न्यवः उच्छेत्तारःकुलंकृत्स्नमृतेरामजनार्दनौ २० समुद्रंयास्यतिश्रीमांस्त्यक्त्वादेहंहलायुधः जराकृष्णंमहात्मा
नंशयानंभुविभेत्स्यति २१ इत्यब्रुवंस्ततोराजन्प्रलब्धास्तैर्दुरात्मभिः मुनयःक्रोधरक्ताक्षाःसमीक्ष्याथपरस्परं
२२ तथोक्त्वामुनयस्तेतुततःकेशवमभ्ययुः अथाब्रवीत्तदावृष्णीन्श्रुत्वैवमधुसूदनः अंतज्ञोमतिमा
न्तस्यभवितव्यंतथेतितान् २३ एवमुक्त्वाहृषीकेशःप्रविवेशपुरंतदा कृतांतमन्यथानैच्छत्कर्तुंसजगतः
प्रभुः २४ श्वोभूतेथततःसांबोमुसलंतदसूतवै येनवृष्ण्यंधककुलेपुरुषाभस्मसात्कृताः २५ वृष्ण्यंध
कविनाशायकिंकरप्रतिमंमहत् असूतशापजंघोरंतच्चराज्ञेन्यवेदयन् २६ विषण्णरूपस्तद्राजासूक्ष्मंचू
र्णमकारयत् तच्चूर्णंसागरेचापिप्राक्षिपन्पुरुषानृप २७ अघोषयंश्चनगरेवचनादाहुकस्यते जनार्दनस्यरामस्य
बभ्रोश्चैवमहात्मनः २८ अद्यप्रभृतिसर्वेषुवृष्ण्यंधककुलेष्विह सुरासवोनकर्तव्यःसर्वैर्नगरवासिभिः
२९ यश्चनोविदितंकुर्यात्पेयंकश्चिन्नरःक्वचित् जीवन्सशूलमारोहेत्स्वयंकृत्वासबांधवः ३० ॥

यंकृत्वास्वयंकर्त्ता ३० ३० ॥ ३१ ३२ ३३॥

© Dharmartha Trust J&K. Digitized by eGangotri

३२ मौशलेप्रथमः एवंकालःकपोतोलूकादिरूपेण १ पएवंकश्चित्करादिरूपोदृश्यतकश्चित्त्रावेक्ष्यपश्चिा

ततोराजभयात्सर्वेनियमंचक्रिरेतदा नराःशासनमाज्ञायरामस्याक्लिष्टकर्मणः ३२ इतिमौसलपर्वणि

वैशंपायनउवाच एवंप्रयतमानानांवृष्णीनामंधकैःसह कालोगृहाणिसर्वेषांपरिचक्रामनित्यश

ः १ करालोविकटोमुंडःपुरुषःकृष्णपिंगलः गृहाण्यपवेक्ष्यवृष्णीनांनादृश्यतकश्चित् २ तमघ्नं कृचिन ३

तमहेष्वासाःशरैःशतसहस्रशः नचाशक्यतवेद्धुंसर्वभूतात्यय[illegible]स्तदा ३ उत्पेदिरेमहावाता

दारुणाश्चदिनेदिने वृष्ण्यंधकविनाशायबहवोलोमहर्षणाः ४ विवृद्धमूषिकारथ्याविभिन्नमणि

कास्तथा केशानखाश्चसुप्तानामघंतेमूषिकैर्निशि ५ चीचीकूचीतिवाशंतिसारिकावृष्णिवेश्मसु नो सारि ५

पशाम्यतिशब्दःसदिवारात्रंचैवहि ६ अनुकुर्वन्नुलूकानांसारसाविरुतंतथा अजाःशिवा

नांविरुतमन्वकुर्वतभारत ७ पांडुरारक्तपादाश्चविहंगाःकालचोदिताः वृष्ण्यंधकानांगेहेषुकपोता

व्यचरंस्तदा ८ व्यजायंतखरागोषुकरभाश्वतरीषुच शुनीष्वपिबिडालाश्चमूषिकानकुलीषुच ९

नापत्रपंतपापानिकुर्वंतोवृष्णयस्तदा प्राद्विषन्ब्राह्मणांश्चापिपितॄन्देवांस्तथैवच १०

बृ४ का५

मंनितिशेषः २ सर्वभूतानांअत्ययोनाशोयस्मात् ३ ४ मणिकाम्नत्पात्राणि ५ ६

© Dharmartha Trust J&K. Digitized by eGangotri

मौ०
३

उच्चरंतवंचितवन्तः १३ आहार्यमाणेत्यंते १५ परेतिस्वनक्षत्रादर्शनमपिस्वमत्पुसव्वकंदत्यर्थः १७ एवमिति

गुरूंश्चाप्यवमन्यंतनतत्रासन्जनार्दनो पत्न्यःपतीनुच्चरंतपत्नीश्चपतयस्तथा ११ विभावसुःप्रज्वलितोवामंवि
परिवर्तते नीललोहितमंजिष्ठाविसृजन्नर्चिषःपृथक् १२ उदयास्तमनेनित्यंपुर्यांतस्यांदिवाकरः व्यदृश्यता
सकृत्पुंभिःकबंधैःपरिवारितः १३ महानसेषुसिद्धेषुसंस्कृतेतीवभारत आहार्यमाणेकृमयोव्यदृश्यंतन
सहस्रशः १४ पुण्याहेवाच्यमानेतुजपत्सुचमहात्मसु अभिधावंतःश्रूयंतेनचादृश्यतकश्चन १५ परस्प
रंचनक्षत्रंहन्यमानंपुनःपुनः ग्रहैरपश्यन्सर्वेतेनात्मनस्तुकथंचन १६ नदंतंपांचजन्यंचवृष्ण्यंधकनि
वेशने समंतात्प्रत्यवाश्यंतरासभादारुणस्वराः १७ एवंपश्यन्हृषीकेशःसंप्राप्तंकालपर्ययं त्रयोदश्या
ममावास्यांतान्दृष्ट्वाप्राब्रवीदिदं १८ चतुर्दशीपंचदशीकृतेयंराहुणापुनः प्राप्तेवैभारतेयुद्धे प्राप्ताद्याक्ष पि ३
यायनः १९ विमृशन्नेवकालंतंपरिचिंत्यजनार्दनः मेनेप्राप्तंसषट्त्रिंशंवर्षंवैकेशिसूदनः २०
पुत्रशोकाभिसंतप्तागांधारीहतबांधवा यदनुव्याजहारार्त्तातदिदंसमुपागमत् २१ इदंचतद
नुप्राप्तमब्रवीद्यद्युधिष्ठिरः पुराव्यूढेष्वनीकेषुदृष्ट्वोत्पातान्सुदारुणान् २२ ॥ छ

त्रयोदशदिवसःकृष्णपक्षोभूदित्यर्थः १८ एवंसत्यधिमपक्षेकृष्णामावास्यांतंनजातंप्रत्युतएकातिथिःक्षीणातत्रग्र
हणंचजातमित्याहचतुर्दशीति १९ २० २१ २२ ॥ ॥ छ ॥ श्री

श्री एम०
३

© Dharmartha Trust J&K. Digitized by eGangotri

इत्युक्त्वावासुदेवस्तुचिकीर्षुःस्वयमेवतत् आज्ञापयामासतदातीर्थयात्रामरिंदमः २३ अघोषयंतपुरुषास्त
त्र केशवशासनात् तीर्थयात्रासमुद्रेवः कार्येतिपुरुषर्षभाः २४ इतिमौशलपर्वणि वैशंपायनउवाच
कालीस्त्रीपांडुरैर्दंतैः प्रविश्यहसतीनिशि स्त्रियःस्वप्नेषुमुष्णंतीद्वारकांपरिधावति १ अग्निहोत्रनिकेते
षुवास्तुमध्येषुवेश्मसु वृष्ण्यंधकानखादंतस्स्वप्नेषूल्काभयानकाः २ अलंकाराश्चछत्रंचध्वजाश्चकव
चानिच ह्रियमाणान्यदृश्यंतरक्षोभिःसुभयानकैः ३ तच्चाग्निदत्तंकृष्णस्यवज्रनाभमयोमयं दिव
माचक्रमेचक्रंवृष्णीनांपश्यतांतदा ४ युक्तंरथंदिव्यमादित्यवर्णंहयाहरन्पश्यतोदारुकस्य तेसाग
रस्योपरिष्टादवर्तन्मनोजवाश्चतुरोवाजिमुख्याः ५ तालःसुपर्णश्चमहाध्वजौतौसुपूजितौरामज
नार्दनाभ्यां उच्चैर्जह्रुरप्सरसोदिवानिशंवाचश्चोचुर्गम्यतांतीर्थयात्रा ६ ततोजिगमिषंतस्तेवृष्ण्यंध
कमहारथाः सांतःपुरास्तदातीर्थयात्रामैच्छन्नरर्षभाः ७ ततोभोज्यंचभक्ष्यंचपेयंचांधकवृष्णयः
बहुनानाविधंचक्रुर्मद्यंमांसमनेकशः ८ ततःसैनिकवर्गाश्चनिर्ययुर्नगराद्बहिः यानैरश्वैर्गजैश्चै
वश्रीमंतस्तिग्मतेजसः ९

CC-0. Dharmartha Trust J&K. Digitized By eGangotri

मौ० ४

निशाम्य दृष्ट्वा अर्थविशारदः मोक्षपंडितः १३ ब्राह्मणार्थेषु इति ब्राह्मणार्थे द्रव्यस्यान्यत्र विनियोजनं आयुःक्षयकं

ततः प्रभासे न्यवसन्यथोद्देशं यथागृहं प्रभूतभक्ष्यपेयास्ते सदारा यादवास्तदा १० निविष्टांस्तान्निशम्याथ समुद्रांते स योगवित् जगामामंत्र्य तान्वीरानुद्धवोर्थविशारदः ११ तं प्रस्थितं महात्मानमभिवाद्य कृतांजलिं जानन्विनाशं वृष्णीनां नैच्छद्वारयितुं हरिः १२ ततः कालपरीतास्ते वृष्ण्यंधकमहारथाः अपश्यन्नुद्धवं यांतं तेजसावृत्य रोदसी १३ ब्राह्मणार्थेषु यत्सिद्धमन्नं तेषां महात्मनां तद्वानरेभ्यः प्रददुः सुरागंधसमन्वितं १४ ततस्तूर्यशताकीर्णं नटनर्तकसंकुलं अवर्तत महापानं प्रभासे तिग्मतेजसां १५ कृष्णस्य संनिधौ रामः सहितः कृतवर्मणा अपिबद्युयुधानश्च गदो बभ्रुस्तथैव च १६ ततः परिषदो मध्ये युयुधानो मदोत्कटः अब्रवीत्कृतवर्माणमवहस्यावमन्य च १७ कः क्षत्रियो हन्यमानः सुप्तान्हन्यान्मृतानिव तन्न मृष्यंति हार्दिक्य यादवा यत्त्वया कृतं १८ इत्युक्ते युयुधानेन पूजयामास तद्वचः प्रद्युम्नो रथिनां श्रेष्ठो हार्दिक्यमवमन्य च १९ ततः परमसंक्रुद्धः कृतवर्मा तदब्रवीत् निर्दिशन्निव सावज्ञं तथा सव्येन पाणिना २० भूरिश्रवाश्छिन्नबाहुर्युद्धे प्रायगतस्त्वया वधेन सुनृशंसेन कथं वीरेण पातितः २१ इति तस्य वचः श्रुत्वा केशवः परवीरहा तिर्यक्सरोषया दृष्ट्या वीक्षां चक्रे स मन्युमान् २२

रामित्यर्थः १४ २० २३ २४ २५ २६ २७ २८ ॥ श्री

श्रीराम० ४

मणिःस्यमंतकश्चैवयःसत्राजितोभवत् तांकथांस्मारयामाससात्यकिर्मधुसूदनं २३ तच्छ्रुत्वाकेश
वस्यांकमगमद्रुदतीतदा सत्यभामाप्रकुपिताकोपयंतीजनार्दनं २४ ततउत्थायसक्रोधःसात्यकि
र्वाक्यमब्रवीत् पंचानांद्रौपदेयानांधृष्टद्युम्नशिखंडिनोः २५ एषगच्छामिपदवींसत्येनचतथाशपे
सौप्तिकेयेचनिहताःसुप्तायेनदुरात्मना २६ द्रोणपुत्रसहायेनक्षतवर्मणा समाप्तंस्याद्ययशश्चैवसु
मध्यमे २७ इत्येवमुक्त्वाखड्गेनकेशवस्यसमीपतः अभिद्रुत्यशिरःक्रुद्धश्चिच्छेदकृतवर्मणः
२८ तथान्यानपिनिघ्नंतंयुयुधानंसमंततः अभ्यधावद्धृषीकेशोविनिवारयितुंतदा २९ ए
कीभूतास्ततःसर्वेकालपर्यायचोदिताः भोजांधकामहाराजशैनेयंपर्यवारयन् ३० तान्दृष्ट्वापततस्तू
र्णमभिक्रुद्धान्जनार्दनः नचुक्रोधमहातेजाजानन्कालस्यपर्ययं ३१ तेतुपानमदाविष्टाश्चोदिता
कालधर्मेण युयुधानमथाभ्यघ्नन्नुच्छिष्टैर्भाजनैस्तदा ३२ हन्यमानेतुशैनेयेक्रुद्धोरुक्मिणी
नंदनः तदनंतरमागच्छन्मोक्षयिष्यन्शिनेःसुतं ३३ सभोजैःसहसंयुक्तःसात्यकिश्चांधकैःसह
व्यायच्छमानौतौवीरौबाहुद्रविणशालिनौ ३४ बहुत्वान्निहतौतत्रउभौकृष्णस्यपश्यतः हतंदृष्ट्वातुशैने
यंपुत्रंचयदुनंदनः ३५

मौप ४

हरि

३९ विध्वस्ताऽनंतदनं [illegible]नं आविध्याविध्य तो दाशार्हिकाद्वेरिगपमतलक्षणाध्वः ततो हर्षेण विघ्नविध्वा ४२ ततेति पर्यस्त

भोजाश्च २

ज्ञी

एरकाणां तदा मुष्टिं कोपात् जग्राह केशवः तदभून्मुशलं घोरं व[illegible] कल्पमयोमयं ३६ जघान कृष्णस्तांस्तेन येये प्रमुख तोऽभवन् ततोंऽधकाश्चशैनेयावृष्णयस्तथा जघ्नुरन्योन्यमाक्रन्दे मुशलैः कालचोदिताः यस्तेषामेरकां कश्चिज्जग्राह कुपितो नृपः ३८ वज्रभूतेव साराजन्नदृश्यत तदा विभो तृणं च मुशलीभूतमपि तत्र व्यदृश्यत ३९ ब्रह्मदंडकृतं सर्वमिति तद्विद्धि पार्थिव आविध्याविध्य ते राजन्प्रक्षिपंति स्म यत्तृणं ४० तद्वज्रभूतं मुशलं व्यदृश्यत तदा दृढं अवधीत्पितरं पुत्रः पिता पुत्रं च भारत ४१ मत्ताः परिपतंति स्म योधयंतः परस्परं पतंगा इव चाग्नौ ते निपेतुः कुकुरांधकाः ४२ नासीत्पलायने बुद्धिर्वध्यमानस्य [illegible]कस्यचित् तत्रापश्यन्महाबाहुर्जानन् कालस्य पर्ययं मुशलं समवष्टभ्य तस्थौ स मधुसूदनः ४३ सांबं च निहतं दृष्ट्वा चारुदेष्णं च माधवः प्रद्युम्नं चानिरुद्धं च ततश्चुक्रोध माधवः ४४ गदं वीक्ष्य शयानं च भृशं कोपसमन्वितः स निःशेषं तदा चक्रे शार्ङ्गचक्रगदाधरः ४५ तं निघ्नंतं महातेजा बभ्रुः परपुरंजयः दारुकश्चैव दाशार्हं मूचतुर्यन्निबोध तत् ४६ भगवन्निहताः सर्वे त्वया भूयिष्ठशो नराः रामस्य पदमन्विच्छ तत्र गच्छाम यत्र सः ४७ इति मौशलपर्वणि ॥ ॥

मपश्यत तदेवाव्यष्टभ्य तस्थौ ४७ तृतीयोऽध्यायः ॥ ॥छ १ २ ३ ४

© (C) Dharmartha Trust J&K. Digitized By eGangotri

ततोपतंतः शीघ्रंगछंतः ४ कूटेनोन्मुक्तेयक्तंवर्द्धंमुसलंब्रह्मशरणाशाप्तंबभ्रुंशरणंस्वयमेवनियत्यावधीत्तस्मिंश्लोकः

वैशंपायनउवाच ततोययुर्दारुकःकेशवश्चबभ्रुश्चरामस्यपदंपतंतः अथापश्यन्रामममनंतवीर्यंवृक्षेस्थि
तिंचिंतयानंविविक्ते १ ततःसमासाद्यमहानुभावंकृष्णस्तदादारुकमन्वशासत् गत्वाकुरून्सर्वमिदं
महांतंपार्थायशंसस्ववधंयदूनां २ ततोर्जुनःक्षिप्रमिहोपयातुश्रुत्वामृतान्यादवान्ब्रह्मशापात् इत्येव
मुक्तःसययौरथेनकुरूंस्तदादारुकोनष्टचेताः ३ ततोगतेदारुकेकेशवोथदृष्ट्वांतिकेबभ्रुमुवाचवाक्यं
स्त्रियोभवान्रक्षितुंयातुशीघ्रंनैतांहिंस्युर्दस्यवोवित्तलोभात् ४ सप्रस्थितःकेशवेनानुशिष्टोमदातुरो
ज्ञातिवधार्दितश्च तंविश्रांतंसंनिधौकेशवस्यदुरंतमेकंसहसैवबभ्रुं ब्रह्मानुशप्तमवधीन्महद्वैकूटे
मुक्तंमुसलंलुब्धकस्य ५ ततोदृष्ट्वानिहतंबभ्रुमाहकृष्णोग्रजंभ्रातरमुग्रतेजाः इहैवत्वंमाम्प्रती
क्षस्वरामयावत्स्त्रियोज्ञातिवशाःकरोमि ६ ततःपुरींद्वारवतींप्रविश्यजनार्दनःपितरंप्राहवाक्यं
स्त्रियोभवान्रक्षतुनःसमग्राधनंजयस्यागमनंप्रतीक्षन् ७ रामोवनांतेप्रतिपालयन्मामास्ते
द्याहंतेनसमागमिष्ये दृष्टंमयेदंनिधनंयदूनांराज्ञांचपूर्वंकुरुपुंगवानां ८ नाहंविनायदुभि
र्यादवानांपुरीमिमामशकंद्रष्टुमद्य तपश्चरिष्यामिनिबोधतन्मेरामेणसार्धंवनमभ्युपेत्य ९

© (c) Dharmartha Trust J&K. Digitized By eGangotri

मौ०
६

इतीदमुक्त्वा शिरसा च पादौ संस्पृश्य कृष्णस्त्वरितो जगाम ततो महान्निनदः प्रादुरासीत्सस्त्रीकुमारस्य पुरस्य तस्य १० अ
थाब्रवीत्केशवः संनिवर्त्य शब्दं श्रुत्वा योषितां क्रोशतीनां पुरामिमामेष्यति सव्यसाची स वो दुःखान्मोक्षयिता नराग्र्यः
११ ततो गत्वा केशवस्तं ददर्श रामं वने स्थितमेकं विविक्ते अथापश्यद्योगयुक्तस्य तस्य नागं मुखान्निःसरन्तं महान्तं
१२ श्वेतं ययौ स ततः प्रेक्ष्यमाणो महार्णवो येन महानुभावः सहस्रशीर्षः पर्वताभोगवर्ष्मा रक्ताननः स्वां तनुं तां
विमुच्य १३ सम्यक्च तं सागरः प्रत्यगृह्णान्नागा दिव्याः सरितश्च पुण्याः कर्कोटको वासुकिस्तक्षकश्च पृथु
श्रवा वरुणः कुंजरश्च १४ मिश्री शंखः कुमुदः पुंडरीकस्तथा नागो धृतराष्ट्रो महात्मा ह्रादः क्राथः शितिकंठोग्र
तेजास्तथा नागौ चक्रमंदातिषंडौ १५ नागश्रेष्ठो दुर्मुखश्चांबरीषः स्वयं राजा वरुणश्चापि राजन् प्रत्युद्गम्य स्वा
गतेनाभ्यनंदंस्ते पूजयंश्चार्घ्यपाद्यक्रियाभिः १६ ततो गते भ्रातरि वासुदेवो जानन्सर्वा गतयो दिव्यदृष्टिः
वने शून्ये विचरंश्चिंतयानो भूमौ चाथ संविवेशाग्र्यतेजाः १७ सर्वं तेन प्राक्तदा चिंत्यमासीद्गांधार्या यद्वाक्य
मुक्तः स पूर्वं दुर्वाससा पायसोच्छिष्टलिप्ते यच्चाप्युक्तं तच्च सस्मार वाक्यं १८ संचिंतयन्नंधकवृष्णिनाशं कुरुक्ष
यं चैव महानुभावः मेने ततः संक्रमणस्य कालं ततश्चकारेंद्रियसन्निरोधं १९ तथा च लोकत्रयपालनार्थं
मात्रेयवाक्यप्रतिपालनाय देवोपि सन्देहविमोक्षहेतोर्निर्णीतिमैच्छत्सकलार्थतत्त्ववित् २० स संनिरुद्धें
द्रियवाङ्मनास्तु शिश्ये महायोगमुपेत्य कृष्णः जराथ तं देशमुपाजगाम लुब्धस्तदानीम् ॥ श्री

श्रीराम०
६

गमं द्वेषुरुस्य: २१ स केशवं योगयुक्तं शयानं मृगाशंकी लुब्धकः सायकेन जराविध्यत्पादतले त्वरावांस्तं वाभितस्त
जिघृक्षुर्जगाम २२ अथापश्यत्पुरुषं योगयुक्तं पीतांबरं लुब्धको नेकबाहुं मत्वात्मानं त्वपराधं स तस्य पादौ जरा
जग्राह शंकितात्मा २३ आश्वासयंस्तं महात्मा तदानीं गच्छन्नूर्ध्वं रोदसी व्याप्य लक्ष्म्या दिवं प्राप्तं वासवो थाश्वि
नौ च रुद्रादित्या वसवश्चाथ विश्वे २४ प्रत्युद्ययुर्मुनयश्चापि सिद्धा गंधर्वमुख्याश्च सहाप्सरोभिः ततो राजन्भगवा
नुग्रतेजा नारायणः प्रभवश्चाव्ययश्च २५ योगाचार्यो रोदसी व्याप्य लक्ष्म्या स्थानं प्राप स्वं महात्मा प्रमेयं ततो देवै
र्ऋषिभिश्चापि कृष्णः समागतश्चारणैश्चैव राजन् २६ गंधर्वाग्र्यैरप्सरोभिर्वराभिः सिद्धैः साध्यैश्चानतैः पूज्यमानः
तं वै देवाः प्रत्यनंदंत राजन्मुनिः श्रेष्ठा ऋग्भिरानर्चुरीशं २७ तं गंधर्वाश्चापि तस्थुः स्तुवंतः प्रीत्या चैनं पुरुहूतो
भ्यनंदत् २८ इति मौशलपर्वणि वैशं० दारुको पि कुरून्गत्वा दृष्ट्वा पार्थान्महारथान् आचष्ट मौशले वृष्णी
नन्योन्येनोपसंहृतान् १ श्रुत्वा विनष्टान्वार्ष्णेयान्स भोजांधककौकुरान् पांडवाः शोकसंतप्ता वित्रस्तमनसो
भवन् २ ततोर्जुनस्तानामंत्र्य केशवस्य प्रियः सखा प्रययौ मातुलं द्रष्टुं नेदमस्तीति चाब्रवीत् ३ स वृष्णिनिलयं ग
त्वा दारुकेण सह प्रभो ददर्श द्वारकां वीरो मृतनाथामिव स्त्रियं ४ याः स्म ता लोकनाथेन नाथवत्यः पुराभवन् तास्त्व
नाथास्तदा नाथं पार्थं दृष्ट्वा विचुक्रुशुः ५ षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहः तासामासीन्महान्नादो दृष्ट्वै
वार्जुनमागतं ६ तास्तु दृष्ट्वैव कौरव्यो बाष्पेणापिहितेक्षणः हीनाः कृष्णेन पुत्रैश्च नाशकत्सोभिवीक्षितुं
७ स तां वृष्ण्यंधकजलां हयमीनां रथोडुपां वादित्ररथघोषौघां वेश्मतीर्थमहाग्रहां ८ रत्नशैवलसंघातां व

मौ०
७

ज्ञप्राकारमालिनीं रथ्याश्रोतोजलावर्त्तचत्वरस्तिमितहृदां ए रामकक्ष्ममहाग्राहांद्वारकांसरितंतदा कालापाश
ग्रहांभीमांनदींवैतरणीमिव १० ददर्शवासविर्धीमान्विहीनांदाश्मिपुंगवैः गतश्रियंनिरानंदांपद्मिनींशिशि
रेयथा ११ तांदृष्ट्वाद्वारकांपार्थस्ताश्चकूलस्पयोचितः सस्वनंवाष्पमुत्सृज्य निपपातमहीतले १२ १२

श्रीराम०
७

© Dharmartha Trust J&K. Digitized By eGangotri

१८ पंचमोध्यायः तंशयानं ५ शिष्योन प्रद्युम्नसात्यकी ६ ७ ८ ॥ ॥ छ ॥ ॥ श्री ः छ

६

त्वा जितीततः सत्याराक्मिणीचविशांपते अभिपत्यप्रसंदुः परिवार्यधनंजयं १३ ततस्तंकांचनेपीठेसमुत्था
योपवेश्यच अब्रुवंस्तोमहात्मानंपरिवार्योपतस्थिरे १४ ततःसंस्तूयगोविंदंकथयित्वाचपांडवः आश्वास्य
ताश्चियश्चापिमातुलंद्रष्टुमभ्यगात् १५ इतिमौशलपर्वणि वैशंपायनउवाच तंशयानंमहात्मानंवीरमा
नकदुंदुभिं पुत्रशोकेनसंतप्तंददर्शकुरुपुंगवः १ तस्याश्रुपरिपूर्णाक्षोव्यूढोरस्कोमहाभुजः आर्त्तस्यार्त्त
तरःपार्थःपादौजग्राहभारत २ तस्यमूर्धानमाघ्रातुमियेषानकदुंदुभिः स्वस्रीयस्यमहाबाहुर्नशशाकच
शत्रुहन् ३ समालिंग्यार्जुनंवृद्धःसभुजाभ्यांमहाभुजः रुदन्पुत्रान्स्मरन्सर्वान्विललापसुविह्वलः
भ्रातृन्पुत्रांश्चपौत्रांश्चदौहित्रान्ससखीनपि ४ वसुदेवउवाच येर्जिताभूमिपालाश्चदैत्याश्चशतशोर्जुन
तांदृष्ट्वानेहपश्यामिजीवाम्यर्जुनदुर्मरः ५ यौताववर्जुनशिष्यौतेप्रियौबहुमतौसदा तयोरपनया
त्पार्थवृष्णयोनिधनंगताः ६ यौतौवृष्णिप्रवीराणांद्वावेवातिरथौमतौ प्रद्युम्नोयुयुधानश्च
कथयन्कत्थसेचयौ ७ तौसदाकुरुशार्दूलवृष्णीनांप्रियभाजनौ तावुभौवृष्णिनाशस्यमुखमास्तांधनंजय ८

© Dharmartha Trust J&K. Digitized by eGangotri

१० काशिराजं पौंड्रकं ११ एतं वंशक्षयं अनयाद्बालानामपराधान्हन्त्यपि हामर्थ्येन पेक्षाकरेण मनयस्तस्माद्धा १२ सामर्थ्ये

सतु गर्हामि शैनेयं हार्दिक्यं वा हमर्जुन अक्रूरं रौक्मिणेयं वै शापो ह्येवात्र कारणं ९ केशिनं यस्तु कंसं च विक्रम्य जगतः प्र
भुः विदेहान्वकरोत्तात्र्थे वे धं च बलगर्वितं १० नैषादिमेकलव्यं च चक्रे कालिंगमागधान् गांधारान्काशिराजं च म
रुभूमौ च पार्थिवान् ११ प्राच्यांश्च दाक्षिणात्यांश्च पार्वतीयांस्तथा नृपान् सोभ्युपेक्षितवानेतमनयान्मधुसूदनः १२
त्वं हि तं नारदश्चैव मुनयश्च सनातनं गोविंदमनघं देवमभिजानीध्वमच्युतं १३ प्रत्यपश्यच्च स विभुर्ज्ञातिक्षय
मधोक्षजः समुपेक्षितवान्नित्यं स्वयं सम मम पुत्रकः १४ गांधार्या वचनं यत्तद् ऋषीणां च परंतप तन्नूनमन्यथाक
र्तुं नैच्छत्त्वान ज्ञातीन् रक्षितुं सखा तव ततः पुत्रांश्च पौत्रांश्च भ्रातृन्स जगतः प्रभुः १५ प्रत्यक्षं भवतश्चापि तव
पौत्रः परंतप अश्वत्थाम्ना हतश्चापि जीवितस्तस्य तेजसा १६ इमांस्तु नैच्छत्त्वानज्ञातीन्रक्षितं स सखा तव
ततः पुत्रांश्च पौत्रांश्च भ्रातृनथ सखीनथ १७ शयानान्निहतान्दृष्ट्वा ततो मामब्रवीदिदं संप्राप्तोद्य यमस्यां तः
कुलस्य भरतर्षभ १८ आगमिष्यति वीभत्सुरिमां द्वारवतीं पुरीं आख्येयं तस्य यद्वृत्तं वृष्णीनां वैशसं महत्
१९ स तु श्रुत्वा महातेजा यदूनां निधनं प्रभो आगंता क्षिप्रमेवेह न मेत्रास्ति विचारणा २०

मेवाहत्वमिति १४ १५ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ ॥७॥

© Dharmartha Trust J&K. Digitized by eGangotri

युः २२ यस्तुदेहः प्रियपुत्रस्यजीवतोभून्महात्मनः तत्रैनमुपसंकल्पपितृमेधंप्रचक्रिरे २३ तांचितामग्निगतंवीरं
शूरपुत्रंवरांगनाः ततोन्वारुरुहुः पत्न्यश्चतस्रः पतिलोकगाः २४ तंवैचतसृभिस्त्रीभिरन्वितंपांडुनंदनः
अदाहयच्चंदनैश्चगंधैरुच्चावचैरपि २५ ततः प्रादुरभूच्छब्दः समिद्धस्यविभावसोः सामगानांचनिर्घोषो
नराणांरुदतामपि २६ ततोवज्रप्रधानास्तेवृष्ण्यंधककुमारकाः सर्वेचैवोदकंचक्रुः स्त्रियश्चैवमहात्मनः २७
अलुप्तधर्मस्तंधर्मंकारयित्वासफाल्गुनः जगामवृष्णयोयत्रविनष्टाभरतर्षभ २८ सतांदृष्ट्वानि
पतितान्कदनेभृशदुःखितः बभूवातीवकौरव्यः प्राप्तकालंचकारह २९ यथाप्रधानतश्चैवचक्रेसर्वा
स्तथाक्रियाः येहताब्रह्मशापेनमुशलैरेरकोद्भवैः ३० ततः शरीरेरामस्यवासुदेवस्यचोभयोः अन्विष्य
दाहयामासपुरुषैराप्तकारिभिः ३१ सतेषांविधिवत्कृत्वाप्रेतकार्याणिपांडवः सप्तमेदिवसेप्रायाद्रथमारु
ह्यसत्वरः ३२ अश्वयुक्तैरथैश्चापिगोखरोष्ट्रयुतैरपि स्त्रियस्तावृष्णिवीराणांरुदंत्यः शोककर्शिता
: ३३ अनुजग्मुर्महात्मानंपांडुपुत्रंधनंजयं भृत्यास्त्वंधकवृष्णीनांसादिनोरथिनश्चये ३४ वीरहीनंवृद्ध
बालंपौरजानपदास्तथा ययुस्तेपरिवार्याथकलत्रंपार्थशासनात् ३५ कुंजरैश्चगजारोहाययुः शैलनिभैस्तथा सपा
दरक्षैः संयुक्ताः सांतकायुधिकाययुः ३६ पुत्राश्चांधकवृष्णीनांसर्वेपार्थमनुव्रताः ब्राह्मणाः क्षत्रियावैश्याः

© Dharmartha Trust J&K. Digitized By eGangotri

हाध्वनाः ३७ दशषट्च सहस्राणि वासुदेवावरोधनं पुरस्कृत्य ययुर्वज्रं पौत्रं कृष्णस्य धीमतः ३८ बहूनि च सह
स्राणि प्रयुतान्यर्बुदानि च भोजवृष्ण्यन्धकस्त्रीणां हृतनाथानि निर्ययुः ३९ तत्सागरसमप्रख्यं वृष्णिचक्रं महर्द्धि
मत् उवाह रथिनां श्रेष्ठः पार्थः परपुरंजयः ४० निर्याते तु जने तस्मिन्सागरो मकरालयः द्वारकां रत्नसंपू
र्णां जलेनाप्लावयत्तदा ४१ यद्यद्धि पुरुषव्याघ्रो भूमेस्तस्याभ्यमुंचत तत्तत्संप्लावयामास सलिलेन स सागरः
४२ तदद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः तूर्णात्तूर्णतरं जग्मुरहो दैवमिति ब्रुवन् ४३ काननेषु च
रम्येषु पर्वतेषु नदीषु च निवसन्नानयामास वृष्णिदारान्धनंजयः ४४ स पंचनदमासाद्य धीमानतिसमृ
द्धिमत् देशे गोपशुधान्याढ्ये निवासमकरोत्प्रभुः ४५ ततो लोभः समभवद्दस्यूनां निहतेश्वराः दृष्ट्वा
स्त्रियो नीयमानाः पार्थेनैकेन भारत ४६ ततस्ते पापकर्माणो लोभोपहतचेतसः आभीरा मंत्रयामा
सुः सामात्याः शुभदर्शनाः ४७ अयमेकोऽर्जुनो धन्वी वृद्धबालं हतेश्वरं नयत्यस्मानतिक्रम्य योधाश्चेमे हतौज
सः ४८ ततो यष्टिप्रहरणा दस्यवस्ते सहस्रशः अभ्यधावंत वृष्णीनां तं जनं लोप्त्रहारिणः ४९ महता सिं
हनादेन त्रासयंतः पृथग्जनं अभिपेतुर्वधार्थं ते कालपर्यायचोदिताः ५० ततो निवृत्तः कौंतेयः सहसा सपदानु
गः उवाच तान्महाबाहुरर्जुनः प्रहसन्निव ५१ निवर्तध्वमधर्मज्ञा यदि जीवितुमिच्छथ इदानीं शर[?]पि नि
र्भिन्नाः शोचध्वं निहता मया ५२ तथोक्तास्तेन वीरेण कदर्थीकृत्य तद्वचः अभिपेतुरर्जुनं मूढा वार्यमाणाः पु

© Dharmartha Trust J&K. Digitized By eGangotri

नः पुनः ५४ ततोऽर्जुनो धनुर्दिव्यं गांडीवमजरं महत् आरोपयितुमारेभे यत्नादिव कथंचन
चकार सज्यं कृच्छ्रेण संभ्रमे तुमुले सति चिंतयामास शास्त्राणि न च सस्मार तान्यपि ५५ वैकृत्यं
तं महद्दृष्ट्वा भुजवीर्ये तथा युधि दिव्यानां महदस्त्राणां विनाशाद्व्रीडितोऽभवत् ५६ हस्तिमियोधाश्वृते
सर्वे गजाश्वरथयोधिनः न शेकुरावर्तयितुं ह्रियमाणं च तं जनं ५७ कलत्रस्य बहुत्वाद्धि सं
पतत्सु ततस्ततः प्रयत्नमकरोत्पार्थो जनस्य परिरक्षणे ५८ मिषतां सर्वयोधानां ततस्ताः
प्रमदोत्तमाः समंततोऽवकृष्यंत कामाच्चान्याः प्रवव्रजुः ५९ ततो गांडीवनिर्मुक्तैः शरैः
पार्थो धनंजयः जघान दस्यून्सोद्विग्नो वृष्णिभृत्यैः सह प्रभुः ६० क्षणेन तस्य ते रा
जन् क्षयं जग्मुरजिह्मगाः अक्षया हि पुरा भूत्वा क्षीणाः क्षतजभोजनाः ६१ स शरक्षयमा
साद्य दुःखशोकसमाहतः धनुःकोट्या तदा दस्यूनवधीत्पाकशासनिः ६२ प्रेक्षतस्त्वेव पार्थस्य
वृष्ण्यंधकवरस्त्रियः जग्मुरादाय ते म्लेच्छाः समंताज्जनमेजय ६३ धनंजयस्तु दैवं तन्मनसाचिंतयत्प्रभुः

© Dhanantar Trust, J&K. Digitized By eGangotri

मौ०
११

दुःखशोकसमाविष्टो निश्वासपरमोऽभवत् ६४ अस्त्राणां च प्रणाशेन बाहुवीर्यस्य संक्षयात् धनुषश्चा
विधेयत्वाच्छराणां संक्षयेन च ६५ बभूव विमनाः पार्थो दैवमित्यनुचिंतयन् न्यवर्त्तत ततो
राजन्नेदमस्तीति चाब्रवीत् ६६ ततः स शेषमादाय कलत्रस्य महामतिः हृतभूयिष्ठरत्नस्य
कुरुक्षेत्रमवातरत् ६७ एवं कलत्रमानीय वृष्णीनां हृतशेषितं न्यवेशयत कौरव्यस्तत्र तत्र
धनंजयः ६८ हार्दिक्यतनयं पार्थो नगरं मार्त्तिकावतं भोजराजकलत्रं च हृतशेषं नरोत्तमः
६९

© Dharmartha Trust J&K. Digitized By eGangotri

ततोबालांश्चवृद्धांश्चस्त्रियश्चादायपांडवः वीरैर्विहीनान्सर्वांस्ताञ्छक्रप्रस्थेन्यवेशयत ७० यौयुधा
नंसरस्वत्यांपुत्रंसात्यकिनःप्रियं न्यवेशयतधर्मात्मावृद्धबालपुरस्कृतं ७१ इंद्रप्रस्थेददौराज्यंव
ज्रायपरवीरहा वज्रेणाक्रूरदारास्तुवार्यमाणाःप्रवव्रजुः ७२ रुक्मिणीत्वथगांधारीशैब्याहैमवती
त्यपि देवीजांबवतीचैवविविशुर्जातवेदसं ७३ सत्यभामातथैवान्यादेव्यःकृष्णस्यसंमताः
वनंप्रविविशूराजंस्तापस्येकृतनिश्चयाः ७४ फलमूलादिभोजिन्योहरिध्यानैकतत्पराः
हिमवंतमभिक्रम्यकालापग्राममाविशन ७५ द्वारकावासिनोयेतुपुरुषाःपार्थमन्वयुः
यथार्थंसंविभज्यैनांवज्रेपर्यददज्जयः ७६ सतत्कृत्वाप्राप्तकालंबाष्पेणापिहितोर्जुनः
कृष्णद्वैपायनंव्यासंददर्शासीनमाश्रमे ७७ मौशलपर्वणि वैशंपायनउवाच प्रविशन्नर्जु
नोराजन्नाश्रमंसत्यवादिनः ददर्शासीनमेकांतेमुनिंसत्यवतीसुतं १ सतमासाद्यधर्मज्ञमुपतस्थे
महाव्रतं अर्जुनोस्मीतिनामास्मैनिवेद्याभ्यवदत्ततः २ स्वागतंतेस्त्वितिप्राहमुनिःसत्यवतीसुतः आ
स्यतामितिचोवाचप्रसन्नात्मामहामुनिः ३ तमप्रतीतमनसंनिश्वसंतंपुनःपुनः निर्विण्णमनसंदृष्ट्वा
पार्थंव्यासोब्रवीदिदं ४

© Dharmartha Trust J&K. Digitized By eGangotri

नरवोदकं केशोदकं वस्त्राप्नानोदशाता मांसदकं कुंभं मुखोदकं च अवीरजा नारी जरवता तस्याज्ञा प्रसवकाले दिनत्रयादर्वा
क् अनुगमनपर्यंतं तस्या मैथुनं। ब्राह्मणस्य वधः युद्धे पराजयश्चेति सप्तभिर्निमित्तैः पुरुषः भ्रष्टश्रीर्भवति ५ अमित्रैः पराजितं त्वा

नखकेशदशाकुंभवारिणा किं नु प्रोक्षितः अवीरजानुगमनं वा ब्रह्मणो वा हतस्त्वया ५ युद्धे पराजितो वा
प्रिगतश्रीरिवलक्ष्यसे न त्वां प्रभिन्नं जानामि किं चिदं भरतर्षभ ६ श्रोतव्यं चेन्मया पार्थ क्षिप्रमाख्या
तुमर्हसि अर्जुन उवाच यः स मेघवपुः श्रीमान् बृहत्पंकजलोचनः सह रामः सहरामेण त्यक्त्वा देहं
दिवं गतः ७ मौशले वृष्णिवीराणां विनाशो ब्रह्मशापजः बभूव वीरांतकरः प्रभासे लोमहर्षणः
८ येते शूरा महात्मानः सिंहदर्पा महाबलाः भोजवृष्ण्यंधका ब्रह्मन्नन्योन्यं तै हतं युधि ९ गदापरि
घशक्तीनां सहाः परिघबाहवः त एरकाभिर्निहताः पश्य कालस्य पर्ययं १० हतं पंचशतं तेषां सह
स्रं बाहुशालिनां निधनं समनुप्राप्तं समासाद्येतरेतरं ११ पुनः पुनर्न मृष्यामि विनाशममित
तौजसां चिंतयानो यदूनां च कृष्णस्य च यशस्विनः १२ शोषणं सागरस्येव पर्वतस्येव चालनं नभ
सः पतनं चैव शैत्यमग्नेस्तथैव च १३ अश्रद्धेयमहं मन्ये विनाशं शार्ङ्गधन्वनः न च्चेह स्थातुमिच्छा
मि लोके कृष्णविना कृतः १४

कदाचिदपि न जानामि ८ हतं मृतं मारितवंत इत्यर्थः १० पंचशतं सहस्रं गु
णितं सहस्रगुणितं सहस्रपंचलक्षाणीत्यर्थः॥ न केवलं हतं तानि तेऽपि तु निधनं प्राप्तं १४ ॥ ७

© Dharmartha Trust J&K. Digitized By eGangotri

१५ यस्यतः अनादरे षष्ठी मां पश्यंतमनादृत्येत्यर्थः १८ पुरुषश्चेति इदमेव रूपं चतुर्भुजं नित्यमर्जुन त्वमोचरोक्षी अत एव विश्वरू

रूतः कष्टतरं चान्यत्कृष्णात्किं तपोधन मनो मे दीर्यते येन चिंतयानस्य वै मुहुः १५ पश्यतो हि मे दारां स्वसमक्षं ह
त्रशः आभीरैरनुसृत्याजौ हृताः पंचजनालयैः १६ धनुराद्यायतस्याहं नाशकं तस्य पूरणे यथा पुरा च मे
वीर्यं भुजयोर्न तथाभवत् १७ अस्त्राणि मे प्रनष्टानि विविधानि महामुने शराश्चाक्षयमापन्नाः क्षणेने
वसमं ततः १८ पुरुषश्चाप्रमेयात्मा शंखचक्रगदाधरः चतुर्भुजः पीतवासाः श्यामः पद्मदलेक्षणः
१९ यश्च याति पुरस्तान्मे रथस्य सुमहाद्युतिः प्रदहन् रिपुसैन्यानि न पश्याम्यहमच्युतं २० येन पू
र्वं प्रदग्धानि शत्रुसैन्यानि तेजसा शरैर्गांडीवनिर्मुक्तैरहं पश्चाद्घनाशयं २१ तमपश्यन्विषीदामि घू
र्णामि च वसत्तम परिनिर्विण्णचेताश्च शांतिं नोपलभेऽपि च २२ विना जनार्दनं वीरं नाहं जीवितुमुत्स
हे श्रुत्वैव हि गतं विष्णुं ममापि मुमुहुर्दिशः २३ प्रनष्टज्ञातिवीर्यस्य शून्यस्य परिधावतः उपदेष्टुं म
मश्रेयो भवानर्हति सत्तम २४ व्यास उवाच ब्रह्मशापविनिर्दग्धा वृष्ण्यंधकमहारथाः विनष्टा
:कुरुशार्दूल न तांछोचितुमर्हसि २५ भवितव्यं तथा तच्च दिष्टमेतन्महात्मनां उपेक्षितं च कृष्णेन श
क्तेनापि व्यपोहितुं २६

पदर्शनानंतरमुक्तं तेनैव रूपेणा चतुर्भुजेन महाबाहो भव विश्वमूर्ते इति अन्यथा हि भुजेनेत्युपक्रम्य स्वचतुर्भुजेति नावक्ष्य

श्व १७

© Dharmartha Trust J&K. Digitized By eGangotri

मौ० १३

३१ बुद्धिरुपस्थितकार्यावधारणं तेजः प्रागल्भ्यं प्रतिपत्तिः अनागतावेक्षणं भवन्ति उत्पद्यन्ते भवकालेषूदयकालेषु भवन्ति समयेषु विपर्यये विनाशकाले विपद्यन्ते विनश्यन्ति ३२ कालः ईश्वरः जगद्बीजं पृथिव्यादिपंचकं समादत्ते संहरति यदा भूतानामपि संहारो भ

त्रैलोक्यमपि गोविंदः कृत्स्नं स्थावरजंगमं प्रसहेदन्यथा कर्तुं कृतः शापं महात्मना २७ रथस्य पुरतो
याति यः स चक्रगदाधरः तव स्नेहात्पुराणर्षिर्वासुदेवश्चतुर्भुजः २८ कृत्वा भारावतरणं पृथिव्याः
पृथुलोचनः मोक्षयित्वा तनुं प्राप्तः कृष्णः स्वस्थानमुत्तमं २९ त्वयापीह महत्कर्म देवानां पुरुषर्ष
भ कृतं भीमसहायेन यमाभ्यां च महाभुज ३० कृतकृत्यांश्च वो मन्ये संसिद्धान्कुरुपुंगव गम
नं प्राप्तकालं च तद्धि श्रेयस्करं विभो ३१ एवं बुद्धिश्च तेजश्च प्रतिपत्तिश्च भारत भवंति भवकालेषु वि
पद्यंते विपर्यये ३२ कालमूलमिदं सर्वं जगद्बीजं धनंजय काल एव समादत्ते पुनरेव यदृच्छया ३३
स एव बलवान्भूत्वा पुनर्भवति दुर्बलः स एवेशश्च भूत्वेह परैराज्ञाप्यते पुनः ३४ कृतकृत्या
नि चास्त्राणि गतान्यद्य यथागतं पुनरेष्यंति ते हस्तं यदा कालो भविष्यति ३५ ॥ ८॥

वतीति कियन्तत्र भौतिकास्त्राणां नाश इति तदर्थे शोको नुचित इति भावः ३३ य एव बलवान्स एव दुर्बलो भवत्येवं विजयोपि कालमू
लो ज्ञेयः ३४ कृतेति भवन्तोपि अस्त्रवत्कृतकृत्या इति भावः पुनर्युगान्तरे ३५ ॥ ४२ ॥ ८ श्रीराम० १३

© Dharmartha Trust J&K. Digitized By eGangotri

मुख्यांगतिंस्वर्गंतुंए ततप्रस्थानं ३८ इतिनैलकंठीयेभारतभावदीपेमौशलार्थप्रकाशः अष्टमोध्यायः॥ ॥

कालोगंतुंगतिंमुख्यांभवतामपिभारत एतच्छ्रेयोहिवोमन्येपरमंभरतर्षभ
३६ वैशंपायनउवाच एतद्वचनमाज्ञायव्यासस्यामिततेजसः अनुज्ञा
तोययौपार्थोनगरंनागसाह्वयं ३७ प्रविश्यचपुरींवीरः समासाद्ययुधिष्ठि
रं आचष्टतद्यथावृत्तंवृष्ण्यंधककुलंप्रति ३८ इतिश्रीमहाभारतेमौशलप
र्वणिसमाप्तं ॥ ॥

श्रीकृष्णजयकृष्णजयजयकृष्णश्रीकृष्णजयकृष्णजयजयकृष्णश्रीकृष्णायनमः ॥ श्री

योऽहमितितदस्यपरोगतिजीवपरमात्मनोर्व्याप्तिहरिरामभगवतीत्र्याभिदउक्तस्तंज्ञात्वानुवदन्नपिवसुदेवोनशोकंमुंचतीत्पाश्चर्यं
भगवन्मायावतामितिभावः २३ अहमितिकालंमत्स्वंआत्मानःकर्त्ताकरिष्यामि। मन्यरन्यनेनमहात्मेसं

योहंतमर्जुमंविद्धियोर्जुनःसोहमेवतु यद्रूपान्तन्तथाकार्यमितिनिधम्मस्वभारत २१ सस्त्रीषुप्राम्रकालासुपांडवो
बालकेषुच प्रतिपुत्स्यतिवीभत्सुर्भवतश्चौछेदेहिकं २२ इमांचनगरीसद्यःप्रतियातेधनंजये प्राकारट्टालकोपेतां
समुद्रःप्लावयिष्यति २३ अहंदेशेतुकास्मिंश्चित्पुण्येनियममास्थितः कालंकर्त्तामत्यएवरामेणसहधीमता
२४ एवमुक्त्वाहृषीकेशोमामचिंत्यपराक्रमः हित्वामांबालकैःसार्धंदिशंकामप्यगात्प्रभुः २५ सोहंतौचमहा
त्मानौचिंतयनभ्रातरौतव घोरंज्ञातिवधंचैवनभुंजेशोककर्शितः २६ नभोक्ष्येनचजीविष्येदिष्ट्याप्राप्तोसिपां
डव यदुक्तंपार्थकृष्णेनतत्सर्वमखिलंकुरु २७ एतत्तेपार्थराज्यंचस्त्रियोरत्नानिचैवहि इष्टान्प्राणानहंही ७
मांस्त्यक्ष्यामिमधुसूदन २८ इतिमौशलपर्वणि वैशंपायनउवाच एवमुक्तःसवीभत्सुर्मातुलेनपरंतपः
दुर्मनादीनमनसंवसुदेवमुवाचह १ नाहंद्रष्टुमिमांवीरएवंवृष्णिभिर्मातुल विहीनांपृथिवींद्रष्टुंशक्यामी
हकथंचन २ राजाचभीमसेनश्चसहदेवमुवाचह १ नाहंद्रष्टुमिमांवीरएवंवृष्णिभिश्चपांडवः नकुलोयाज्ञसे १८८
नीचषडेकमनसोवयं ३ राज्ञःसंक्रमणोवापिकालोयंवर्ततेध्रुवं तममंविद्धिसंप्राप्तंकालंकालविदांवरो

रायोनकर्तव्यइत्युक्तं २८ षष्ठोध्यायः एवमुक्तःसवीत्सुरितिस्पष्टार्थः १ २ ३ ४

© (c) Dharmartha Trust J&K Digitized By eGangotri

मौ० ९ सर्वथाह्यास्मि दारांस्तु बालं वृद्धं तथैव च नयिष्ये परिगृह्याहमिंद्रप्रस्थमरिंदम ५ इत्युक्त्वा दारुकमिमं वाक्यमाह धनंजयः
अमात्यान्वृष्णिवीराणां द्रष्टुमिच्छामि माचिरं ६ इत्येवमुक्त्वा वचनं सुधर्मां यादवीं सभां प्रविवेशार्जुनः शूरो शोचमानो
महारथान् ७ तमासनगतं तत्र सर्वाः प्रकृतयस्तथा ब्राह्मणा नैगमास्तत्र परिवार्योपतस्थिरे ८ तान्दीनमनसः सर्वान्
निभृतान्गतचेतसः उवाचेदं वचः काले पार्थो दीनतरस्तथा ९ शक्रप्रस्थमहं नेष्ये वृष्ण्यंधकजनं स्वयं इदं तु नगरं सर्वं समु
द्रः प्लावयिष्यति १० सज्जीकुरुत यानानि रत्नानि विविधानि च वज्रोयं भवतां राजा शक्रप्रस्थे भविष्यति ११ सप्तमे
दिवसे चैव रवौ विमल उद्गते बहिर्वत्स्यामहे सर्वे सज्जीभवत माचिरं १२ इत्युक्तास्तेन ते सर्वे पार्थेनाक्लिष्टकर्मणा स
ज्जमाशु ततश्चक्रुः स्वसिद्ध्यर्थे समुत्सुकाः १३ तां रात्रिमवसत्पार्थः केशवस्य निवेशने महता शोकमोहेन सहसाभि
परिप्लुतः १४ श्वोभूतेथ ततः शौरिर्वासुदेवः प्रतापवान् युक्त्वात्मानं महातेजा जगाम गतिमुत्तमां १५ ततः शब्दो म
हानासीद्वसुदेवनिवेशने दारुणः क्रोशतीनां च रुदतीनां च योषितां १६ प्रकीर्णमूर्धजाः सर्वा विमुक्ताभरणस्रजः
उरांसि पाणिभिर्घ्नंत्यो व्यलपन्करुणं स्त्रियः १७ तं देवकी च भद्रा च रोहिणी मदिरा तथा अन्वारोहंत च तदा भर्तारं यो
षितां वराः १८ ततः शौरिं नृयुक्तेन बहुमाल्येन भारत यानेन महता पार्थो बहिर्निष्क्रामयत्तदा १९ तमन्वयुस्तत्र तत्र दुःख
शोकसमाहताः द्वारकावासिनः सर्वे पौरजानपदा हिताः २० तस्याश्वमेधिकं छत्रं दीप्यमानाश्च पावकाः पुरस्तात्तस्य या श्रीराम० ९
नस्य याजकाश्च ततो ययुः २१ अनुजग्मुश्च तं वीरं देव्यस्ता वै स्वलंकृताः स्त्रीसहस्रैः परिवृता वधूभिश्च सहस्र ॥

© Dharmartha Trust J&K. Digitized By eGangotri

ॐ

[illegible]

[illegible]

मौशलपर्व
१४

[illegible]

(c) Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized By eGangotri

म०प्र०टी०

१

श्रीगणेशाय नमः कृतकृत्यानां दुःसहदुःखग्रस्तानां महाप्रस्थानादिना उपायेन देहत्यागो युक्त इति यां स्वाचरणादर्शयन् महाप्रस्थानिकं पर्वारभते प्रसंतांश्च स्वर्गनिघातिवंधकांदो
षांश्च दर्शयति संक्षेपेण एवं वृष्ण्यंधककुले इत्यादिना १ प्रस्थाने स्वर्गे तं गृहान्निःसरणे २ पाशं तत्कृतमाकर्षमरणमिति यावत् त्वदर्हं ममेत्यंगीकरोमि त्वमप्येतत् द्रष्टुं

नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ जनमेजय उवाच एवं वृष्ण्यंधककुले श्रुत्वा मौशलमाहवं पांडवाः
किमकुर्वंत तथा कृष्णे दिवं गते १ वैशंपायन उवाच श्रुत्वैवं कौरवो राजा वृष्णीनां कदनं महत् प्रस्थाने मतिमाधाय वाक्यमर्जुनमब्रवी
त् २ कालः पचति भूतानि सर्वाण्येव महामते कालपाशमहं मन्ये त्वमपि द्रष्टुमर्हसि ३ इत्युक्तः स तु कौंतेयः कालः काल इति ब्रुवन् अ काल: २
न्वपद्यत तद्वाक्यं भ्रातुर्ज्येष्ठस्य धीमतः ४ अर्जुनस्य मतं ज्ञात्वा भीमसेनो यमौ तथा अन्वपद्यंत तद्वाक्यं यदुक्तं सव्यसाचिना ५ ततो यु
युत्सुमानाय्य प्रव्रजन् धर्मकाम्यया राज्यं परिददौ सर्वं वैश्यापुत्रे युधिष्ठिरः ६ ॥ ॥ ॥ ॥

प्र१

आलोचितं ३ कालः कालः इत्यतिनित्यार्थे द्विरुक्तं अपरिहार्यः कालो मृत्युः सोऽधुनास्माकं किंचिरेणोत्साहपः ४ ५ धर्मकाम्यया प्रव्रजन्नत उद्योगेन यत्परिददौ तद्दीनं कृतवा
नत स्वामियेकेन धिकारात् ६ ॥ ॥ ॥ ॥ ॥ ॥ ग्रम०

१

स्वराज्ये हास्तिनपुरे ७ ८ अथमैयपरिक्षिद्वज्रयोर्बालयोररक्षणाजे महाप्रस्थानमिमंमाकुर्यादितिभावः ९ १० ११ स्त्रियः दास्याः १७ अनुमान्य अनुमतिपदं

त्वं २

अभिषिच्य स्वराज्ये च राजानं च परिक्षितं दुःखार्त्तश्चाब्रवीत्सुभद्रां पाण्डवाग्रजः ७ एषपुत्रस्य ते पुत्रः कुरुराजो भविष्यति यदूनांप
रिशेषश्च वज्रोराजाकृतश्चह ८ परिक्षिद्धास्तिनपुरे शक्रप्रस्थे च यादवः वज्रो राजात्वया रक्ष्यो मा धर्मे मनः कृथाः ९ इत्युक्त्वा धर्मरा
जः सवासुदेवस्य धीमतः मातुलस्य च वृद्धस्य रामादीनां तथैव च १० भ्रातृभिः सहधर्मात्मा कृत्वोदकमतन्द्रितः श्राद्धान्युद्दिश्य सर्वेषां च
कारविधिवन्नृप ११ द्वैपायनं नारदं च मार्कण्डेयं तपोधनं भारद्वाजं याज्ञवल्क्यं हरिमुद्दिश्य यत्नवान् १२ अभोजयत्स्वादु भोज्यं कीर्त्तयि
त्वा च शार्ङ्गिणं ददौ रत्नानि वासांसि ग्रामानश्वान्रथांस्तदा १३ स्त्रियश्च द्विजमुख्येभ्यस्तदा शतसहस्रशः कृपमभ्यर्च्य च गुरुम
थ पौरपुरस्कृतं १४ शिष्यं परिक्षितं तस्मै ददौ भरतसत्तम ततस्तु प्रकृतीः सर्वाः समानाय्य युधिष्ठिरः १५ सर्वमाचष्ट राजर्षिश्चिकी
र्षितमथात्मनः ते श्रुत्वैव वचस्तस्य पौरजानपदा जनाः १६ भृशमुद्विग्नमनसो नाभ्यनन्दन्त तद्वचः नैवं कर्त्तव्यमिति ते तदोचुस्ते नरा
धिपं १७ न च राजा तथाकार्षीत्कालपर्यायधर्मवित् ततोनुमान्य धर्मात्मा पौरजानपदं जनं १८ गमनाय मतिं चक्रे भ्रातरश्चास्य ते त
दा ततः स राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः १९ ॥

कृत्वा १९ श्रीरामायनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

© (P) Dharmartha Trust J&K. Digitized By eGangotri

म० टी० २० नैष्ठिकीं पर्यन्तिकीं उत्तमां गतिमित्यर्थः आत्मनिस्वग्नीन्समारोप्याप्स्वग्नीनुत्सृजेतिज्ञेयं २१ २७ अमाः युधिष्ठिरादीनां भार्याः अर्जुनसोमादीनां भार्याः अर्जुनसोमादीनां

१ उत्सृज्याभरणान्यंगाज्जगृहे वल्कलान्युत भीमार्जुनयमाश्चैव द्रौपदी च यशस्विनी १० तथैव जगृहुः सर्वे वल्कलानि नराधिप विधिवत्कारयित्वेष्टिं नैष्ठिकीं भरतर्षभ ११ समुत्सृज्याप्सु सर्वेऽग्नीन्प्रतस्थुर्नरपुंगवाः ततः प्ररुरुदुः सर्वाः स्त्रियो दृष्ट्वा नरोत्तमान् १२ प्रस्थितान्द्रौपदीषष्ठान्पुरा द्यूतजितान्यथा हर्षोऽभवच्च सर्वेषां भ्रातॄणां गमनं प्रति १३ युधिष्ठिरमतं ज्ञात्वा वृष्णिक्षयमवेक्ष्य च भ्रातरः पंच कृष्णा च षष्ठी श्वा चैव सप्तमः १४ आत्मना सप्तमो राजा निर्ययौ गजसाह्वयात् पौरैरनुगतो दूरं सर्वैरंतःपुरैस्तथा १५ न चैनमशकत्कश्चिन्निवर्तस्वेति भाषितुं न्यवर्तंत ततः सर्वे नरा नगरवासिनः १६ कृपप्रभृतयश्चैव युयुत्सुं पर्यवारयन् विवेश गंगां कौरव्य उलूपी भुजगात्मजा १७ चित्रांगदा ययौ चापि मणिपूरपुरं प्रति शिष्टाः परिक्षितं त्वन्या मातरः पर्यवारयन् १८ पांडवाश्च महात्मानो द्रौपदी च यशस्विनी कृतोपवासाः कौरव्य प्रययुः प्राङ्मुखास्ततः १९ योगयुक्ता महात्मानस्त्यागधर्ममुपेयुषः अभिजग्मुर्बहून्देशान्सरितः सागरांस्तथा २० युधिष्ठिरो ययावग्रे भीमस्तु तदनंतरं अर्जुनस्तस्य चान्वेव यमौ चापि यथाक्रमं २१ पृष्ठतस्तु वरारोहा श्यामा पद्मदलेक्षणा द्रौपदी योषितां श्रेष्ठा ययौ भरतसत्तम २२ एम०

पातरः २८ २९ ३० ३१ ३२ ॥ ॥ ० ५ २

लोहित्यंउदयाचलप्रांतस्थंसमुद्रं ३३ ३८ अनेनगांडीवेनअर्थः प्रयोजनं ३९ कालेनअवतारांतरे ४१ ४२ ४३ ४४ ४५ ॥ ॥

आचैवानुपपावकः प्रस्थितानांपांडवाद्भुतं क्रमेणानेपपूर्व्वाणलौहितंसलिलार्णवं ३३ गांडीवंतुधनुर्दिव्यंनमुमोचधनंजयः रत्न
लोहान्महाराजतेचाक्षय्येमहेषुधी ३४ अग्निंतेददृशुस्तत्रस्थितंशैलमिवायतः मार्गमावृत्यतिष्टंतंसाक्षात्पुरुषविग्रहं ३५
ततोदेवः सप्तार्चिः पांडवानिदमब्रवीत् भोभोः पांडुसुतावीराः पावकंमांनिबोधत ३६ युधिष्टिरमहाबाहोभीमसेनपरंतप
अर्जुनाश्विसुतौवीरौनिबोधतवचोमम ३७ अहमग्निः कुरुश्रेष्टामयादग्धंचखांडवं अर्जुनस्यप्रभावेनतथानारायणस्यच
३८ अयंवः फाल्गुनोभ्रातागांडीवंपरमायुधं परित्यज्यवनेयातुनानेनार्थोस्तिकश्चन ३९ चक्ररत्नंतुयत्कृष्णेस्थितमासी
न्महात्मनि गतंतच्चपुनर्हस्तेकालेनैष्यतितस्यहं ४० वरुणादाहृतंपूर्वंमयैतत्पार्थकारणात् गांडीवंधनुषांश्रेष्टंवरुणायै
वदीयतां ४१ ततस्तेभ्रातरः सर्वेधनंजयमचोदयन् सजलेप्राक्षिपत्तत्तुतथाक्षय्येमहेषुधी ४२ ततोग्निर्भरतश्रेष्टतत्रैवांत
रधीयत ययुश्चपांडवावीरास्ततस्तेदक्षिणामुखाः ४३ ततस्तेतूत्तरेणैवतीरेणलवणांभसः जग्मुर्भरतशार्दूलदिशंदक्षिण
पश्चिमां ४४ ततः पुनः समावृत्ताः पश्चिमांदिशमेवते ददृशुर्द्वारकांचापिसागरेणपरिप्लुतां ४५ ॥ ॥ ४

© Dharmartha Trust J&K. Digitized by eGangotri

म॰प्र॰टी॰ २ ४६ प्रस्थानिके प्रथमः ततः दिक्षु प्रदक्षिणानंतरं योगयुक्ताः समाहितमनसः १ भ्रष्टयोगा ध्यानात्स्खलितमानसा ३ ५ पक्षेति तत्स्नेहेषु वैषम्येण स्वज्ञानकार्ये ति

उदीचीं पुनरावृत्य ययुर्भरतसत्तमाः आदित्सिणं प्रचिकीर्षतः पृथिव्या योगधर्मिणः ४६ इति महाप्रस्थानिके वैशंपायन उवाच ततस्ते नियतात्मा
न उदीचीं दिशमास्थिताः ददृशुर्योगयुक्ताश्च हिमवंतं महागिरिं १ तं चाप्यतिक्रमंतस्ते ददृशुर्वालुकार्णवं अवैक्षंत महाशैलं मेरुं शिखरिणां
वरं २ तेषां तु गच्छतां शीघ्रं सर्वेषां योगधर्मिणां याज्ञसेनी भ्रष्टयोगा निपपात महीतले ३ तां तु प्रपतितां दृष्ट्वा भीमसेनो महाबलः उवाच
धर्मराजानं याज्ञसेनीमवेक्ष्य ह ४ नाधर्मश्चरितः कश्चिद्राजपुत्र्या परंतप कारणं किं नु तद्ब्रूहि यत्कृष्णा पतिता भुवि ५ युधिष्ठिर उवाच प १८८
क्षपातो महानस्या विशेषेण धनंजये तस्यैतत्फलमद्यैषा भुंक्ते पुरुषसत्तम ६ वैशं॰ एवमुक्त्वानवेक्ष्यैनां ययौ भरतसत्तमः समाधाय मनो
धीमान्धर्मात्मा पुरुषर्षभः ७ सहदेवस्ततो विद्वान्निपपात महीतले तं चापि पतितं दृष्ट्वा भीमो राजानमब्रवीत् ८ योयमस्माकं सर्वेषां शुश्रूषु
रनहंकृतः सोयं माद्रवतीपुत्रः कस्मान्निपतितो भुवि ९ युधिष्ठि॰ आत्मनः सदृशं प्राज्ञं नैषोमन्यत कंचन तेन दोषेण पतितस्तस्मादेष
नृपात्मजः १० ॥ ॥

तिभावः ६ अनवेक्ष्य स्वर्गेतराय रूपः स्नेहो माभूदिति भावः ७ ९ आत्मन इति प्राज्ञाभिमानोपि पतनहेतुरिति भावः ॥ ॥ ॥ ॥ ॥ टी॰म॰ २

८५१

रूपेणोनिरुपमगर्वान्नकुलः पपातेत्यर्थः २६ २० एकाह्नेनिर्दहेयंवैत्यर्जुनोपि मिथ्याप्रतिज्ञत्वाद्भ्रष्टः २१ २३

वैशंपायनउवाच इत्युक्त्वातंसमुत्सृज्यसहदेवंययौतदा भ्रातृभिःसहकौंतेयःशुनाचैवयुधिष्ठिरः ११ कृष्णांनिपतितांदृष्ट्वासहदेवंचपांडवं
आर्त्तोबंधुप्रियःश्रेष्ठोनकुलोनिपपातह १२ तस्मिन्निपतितेवीरेनकुलेचारुदर्शने पुनरेवतदाभीमोराजानमिदमब्रवीत् १३ योयमक्ष
तधर्मात्माभ्रातावचनकारकः रूपेणाप्रतिमोलोकेनकुलःपतितोभुवि १४ इत्युक्तोभीमसेनेनप्रत्युवाचयुधिष्ठिरः नकुलंप्रतिधर्मात्मासर्व
बुद्धिमतांवरः १५ रूपेणमत्समोनास्तिकश्चिदितस्यदर्शनं अधिकश्चाहमेवैकइत्यस्यमनसिस्थितं १६ नकुलःपतितस्तस्मादागच्छत्वं
वृकोदर यस्ययद्विहितंवीरसोवश्यंतदुपाश्नुते १७ तांस्तुप्रपतितान्दृष्ट्वापांडवाःश्वेतवाहनः पपातशोकसंतप्तस्ततोनुपरवीरहा १८
तस्मिंस्तुपुरुषव्याघ्रेपतितेशक्रतेजसि म्रियमाणेदुराधर्षेभीमोराजानमब्रवीत् १९ अनृतंनस्मराम्यस्यस्वैरेष्वपिमहात्मनः अथ
कस्यविकारोयंयेनायंपतितोभुवि २० युधिष्ठिरउवाच एकाह्नानिर्दहेयंवैशत्रूनित्यर्जुनोब्रवीत् नचतत्कृतवानेषशूरमानीततोपतत्
२१ अवमेनेधनुर्ग्राहानेषसर्वांश्चफाल्गुनः तथाचैतन्नतुतथाकर्तव्यंभूतिमिच्छता २२ वैशं० इत्युक्त्वाप्रस्थितोराजाभीमोथनिपपातह
पतितश्चाब्रवीद्भीमोधर्मराजंयुधिष्ठिरं २३ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

म० प्र० टी० २४ अनशनाद्बलगर्वाच्च भीमसेनः पपातेत्याहातिभुक्तमिति २५ २६ द्वितीयः ततः संनादयन्नित्यस्य सबांधवभोऽस्मैवलक्ष्मीश्रेयसी न त्वमात्मभोजेति तात्पर्यं १

४ भो भो राजन्नवेक्षस्व पतितोहं प्रियस्तव किंनिमित्तं च पतनं ब्रूहि मे यदि वेत्थह २४ युधिष्ठिर उवाच अतिभुक्तं च भवता प्राणेन च विकत्थसे
अनवेक्ष्य परं पार्थ तेनासि पतितः क्षितौ २५ इत्युक्त्वा तं महाबाहुर्जगामानवलोकयन् श्वाप्येकोनुययौ यस्ते बहुशः कीर्त्तितो मया २६
इति महाप्रस्थानिके पर्वणि वैशंपा० ततः संनादयन् शक्रो दिवं भूमिं च सर्वशः रथेनोपययौ पार्थमारोहेत्यब्रवीच्च तं १ स भ्रातॄन्पतितान्
दृष्ट्वा धर्मराजो युधिष्ठिरः अब्रवीच्छोकसंतप्तः सहस्राक्षमिदं वचः २ भ्रातरः पतिता मेऽत्र गच्छेयुस्ते मया सह न विना भ्रातृभिः स्वर्ग
मिच्छे गंतुं सुरेश्वर ३ सुकुमारी सुखार्हा च राजपुत्री पुरंदर साऽस्माभिः सह गच्छेत तद्भवाननुमन्यतां ४ शक्र उवाच भ्रातॄन्द्रक्ष्यसि स्वर्गे
त्वमग्रतस्त्रिदिवं गतान् कृष्णया सहितान्सर्वान्मा शुचो भरतर्षभ ५ निक्षिप्य मानुषं देहं गतास्ते भरतर्षभ अनेन त्वं शरीरेण स्वर्गं
गन्ता न संशयः ६ युधिष्ठिर उवाच अयं श्वा भूतभव्येश भक्तो मां नित्यमेव ह स गच्छेत मया सार्धमानृशंस्या हि मे मतिः ७ शक्र उवाच
अमर्त्यत्वं मत्समत्वं च राजन् श्रियं च कृत्स्नां महतीं चैव सिद्धिं संप्राप्तोऽद्य स्वर्गसुखानि च त्वं त्यज श्वानं नात्र नृशंसमस्ति ८

६ अयं श्वेत्यादेर्नीचतरमपि संनिताश्रमं सुखविभागेन संभावयेत्पश्चात्त्वयं तद्भोक्तव्यमिति तात्पर्यं ७ नात्रेति अस्य शरणस्य संगत्यागेन नृशंसता निर्दयत्वं नास्ति ८ ॥ एम० ४

९ श्ववतामशुचित्वाद्धिष्ण्यसंस्थानं स्वर्गे नास्ति क्रोधवशानाम देवगणाः अशुचेरिष्टापूर्त्तफलं घ्नंति १० १७ अभिजातोसि कुलीनोसि पितुः पांडोः १८ १९

युधिष्ठिर उवाच अनार्यमार्येण सहस्रनेत्र शक्यं कर्तुं दुष्करमेतदार्य मामे श्रियासंगमनेन यास्तु यस्याः कृते भक्तजनं त्यजेयं ९ इंद्र उवाच
स्वर्गे लोके श्ववतां नास्ति धिष्ण्यमिष्टापूर्त्तं क्रोधवशा हरंति ततो विचार्य क्रियतां धर्मराज त्यज श्वानं नात्र नृशंसमस्ति १० युधिष्ठिर उवाच
भक्तत्यागं प्राहुरत्यंतपापं तुल्यं लोके ब्रह्मवध्याकृतेन तस्मान्नाहं जातु कथंचनाद्य त्यक्ष्याम्येनं स्वसुखार्थी महेंद्र ११ भीतं भक्तं नान्यदस्ती
ति चार्त्तं प्राप्तं क्षीणं रक्षणे प्राणलिप्सुं प्राणत्यागादप्यहं नैव मोक्तुं यतेयं वै नित्यमेतद्व्रतं मे १२ इंद्र उ० शुना दृष्टं क्रोधवशा हरंति यद्दत्तमि
ष्टं विवृतमथो हुतं च तस्मात्त्यागं कुरु शुनस्त्यागात्प्राप्स्यसे देवलोकं १३ त्यक्त्वा भ्रातॄन्दयितां चापि कृष्णां प्राप्तो लोकः कर्म
णा स्वेन वीर श्वानं चैनं न त्यजसे कथं नु त्यागं कृत्स्नं चास्थितो मुह्यसेद्य १४ युधिष्ठि० न विद्यते संधिरथापि विग्रहो मृतैर्मर्त्यैरिति लोकेषु
निष्ठा न ते मया जीवयितुं हि शक्यास्तस्मात्त्यागस्तेषु कृतो न जीवतां १५ भीतिप्रदानं शरणागतस्य स्त्रिया वधो ब्राह्मणस्वापहारः मित्रद्रोह
स्तानि चत्वारि शक्र भक्तत्यागश्चैव समो मतो मे १६ वैशं० तद्धर्मराजस्य वचो निशम्य धर्मस्वरूपी भगवानुवाच युधिष्ठिरं प्रीतियुक्तो नरेंद्रं श्ल
क्ष्णैर्वाक्यैः संस्तवसंप्रयुक्तैः १७ धर्मराज० अभिजातोसि राजेंद्र पितुर्वृत्तेन मेधया अनुक्रोशेन चानेन सर्वभूतेषु भारत १८ पुरा द्वैत
वने चासि मया पुत्र परीक्षितः पानीयार्थं पराक्रांता यत्र ते भ्रातरो हताः १९ ॥ ॥ ॥ ॥ ॥

© (C) Dharmartha Trust J&K. Digitized By eGangotri

२५ निकायस्थो निवासस्थः २६ वाक्यमेवाहयेयेति समुपस्थिताः स्मृतिविषयाः संति २७ यदेवमात्तरणांस्थानं तदेवप्राप्तुमिच्छामि २८ ३० ३३ ३२

भीमार्जुनो परित्यज्यपत्रत्वंभ्रातरावुभौ मात्रीःसाम्यमभीमत्वैनकुलंजीवमिच्छसि २० अयंश्वाभक्तः इत्येवयत्क्वोदेवरथस्त्वयातस्मात्स्व
गैनतेतल्यः कश्चिदस्तिनराधिप २१ अतस्तवाक्षयालोकाः स्वशरीरेणभारत प्राप्तोसिभरतश्रेष्ठदिव्यांगतिमनुत्तमां २२ वैशं० ततो
धर्मश्चशक्रश्चमरुतश्चाश्विनावपि देवादेवर्षयश्चैवरथमारोप्यपांडवं २३ प्रययुःस्वैर्विमानैस्तेसिद्धाःकामविहारिणः सर्वेविरजसः
पुण्याःपुण्यवाग्बुद्धिकर्मिणः २४ सतंरथंसमास्थायराजाकुरुकुलोद्वहः ऊर्ध्वमाचक्रमेशीघ्रंतेजसावृत्यरोदसी २५ ततोदेवनि
कायस्थोनारदः सर्वलोकवित् उवाचोच्चैस्तदावाक्यंबृहद्वादीबृहत्तपाः २६ येपिराजर्षयः सर्वेतेचापिसमुपस्थिताः कीर्तिंप्र
च्छाद्यतेषांवैकुरुराजोधितिष्ठति २७ लोकानावृत्ययशसातेजसावृत्तसंपदा स्वशरीरेणसंप्राप्तंनान्यंशुश्रुमपांडवात् २८ नारदस्यव
चःश्रुत्वाराजावचनमब्रवीत् देवानामंत्र्यधर्मात्मास्वपक्षांश्चैवपार्थिवान् २९ शुभंवापदिवापापंभ्रातॄणांस्थानमद्यमे तदेवप्रा
प्तुमिच्छामिलोकानन्यान्नकामये ३० राज्ञस्तुवचनंश्रुत्वादेवराजःपुरंदरः आनृशंस्यसमायुक्तंप्रत्युवाचयुधिष्ठिरं ३१ स्थानेऽस्मि
न्वसराजेंद्रकर्मभिर्निर्जितैःशुभैः किंत्वंमानुष्यकंस्नेहमद्यापिपरिकर्षसि ३२ सिद्धिंप्राप्तोसिपरमांयथानान्यःपुमान्क्वचित् नैवतेभ्रा
तरःस्थानंसंप्राप्ताःकुरुनंदन ३३ ॥ ॥ ॥ ॥ ॥ ॥

(C) Dharmartha Trust J&K. Digitized By eGangotri

३६ बृहतीश्यामाह्बृहतीपुष्पवतश्यामा श्यामावर्णावर्णेत्यर्थः सायत्रगतास्तियत्रवागमिष्यतितत्रैवाहंगमिष्यामीत्यर्थः ३७ इतिनैलकंठीयेभारतभाव

धी२

अथापिमानुषोभावः स्पृशतेत्वांनराधिप स्वर्गोयंपश्यदेवर्षीन्सिद्धांश्चत्रिदिवालयान ३४
युधिष्ठिरस्तुदेवेंद्रमेवंवादिनमीश्वरं पुनरेवाब्रवीमानिदंवचनमर्थवित ३५ तैर्विना
नोत्सहेवस्तुमिहदैत्यनिवर्हण गंतुमिच्छामितत्राहंयत्रमेभ्रातरोगताः ३६ यत्र
साबृहतीश्यामाबुद्धिसत्वगुणान्विता द्रौपदीयोषितांश्रेष्ठायत्रचैवगतामम ३७
इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांमहाप्रस्थानिकंपर्वसमाप्तमि
ति॥ ॥शुभमस्तु॥ ॥श्रीरामायनम॥ ॥श्रीरामचंद्रायनम

दीपमहाप्रस्थानिकार्थप्रकाशः तृतीयोध्यायः॥ ॥श्रीकृष्णायनमः॥ ॥श्रीरामनामतारकं॥ ॥ ७ ७

© (c) Dharmartha Trust J&K. Digitized By eGangotri

[illegible]

महाभा आश्रमनिकेपर्व

६

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

५-६

श्री प्राण प्रबोध

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

आ०
१

श्रीगनेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ जनमेजयउवाच प्राप्यराज्यंमहात्मानः पांडवामेपिताम
हाः कथमासीद्धृतैश्वर्योगांधारीचयशस्विनी २ सतराजाहतामात्योहतपुत्रोनिराश्रयः कथमासीद्धृतैश्वर्योगांधारीचयशस्विनी २ कियंतंचैवका
लंतेममपूर्वपितामहाः स्थिताराज्येमहात्मानस्तन्मेव्याख्यातुमर्हसि ३ वैशं० प्राप्यराज्यंमहात्मानः पांडवाहतशत्रवः धृतराष्ट्रंपुरस्कृत्यपृथिवींपर्यपा
लयन् ४ धृतराष्ट्रमुपातिष्ठद्विदुरः संजयस्तथा वैश्यापुत्रश्चमेधावीयुयुत्सुः कुरुसत्तम ५ पांडवाः सर्वकार्याणिसंपृच्छंतिस्मतंनृपं चक्रुस्तेनाभ्यनुज्ञा
तावर्षाणिदशपंचच ६ सदाहिगत्वातेवीराः पर्युपासंततंनृपं पादाभिवादनंकृत्वाधर्मराजमतेस्थिताः ७ तेमूर्ध्निसमुपाघ्राताः सर्वकार्याणिचाक्रिरे
कुंतिभोजसुताचैवगांधारीमन्ववर्त्तत ८ द्रौपदीचसुभद्राचयाश्चान्याः पांडवस्त्रियः समांवृत्तिमवर्त्तंततयोः श्वश्रोर्यथाविधि ९ शयनानिमहार्हाणि
वासांस्याभरणानिच राजार्हाणिचसर्वाणिभक्ष्यभोज्यान्यनेकशः १० युधिष्ठिरोमहाराजधृतराष्ट्रेभ्युपाहरत् तथैवकुंतीगांधार्यांगुरुवृत्तिमवर्त्तत ११ वि
दुरः संजयश्चैवयुयुत्सुश्चैवकौरव उपासतेस्मतंवृद्धंहतपुत्रंजनाधिपं १२ स्यालोद्रोणस्यपश्चासीत्प्रियोवैब्राह्मणोमहान् सचतस्मिन्महेष्वासः कृपः समभ
वत्तदा १३ व्यासश्चभगवान्नित्यमासांचक्रेनृपेणह कथाः कुर्वन्पुराणर्षिर्देवर्षिपितृरक्षसां १४ धर्मयुक्तानिकार्याणिव्यवहारान्वितानिच धृतराष्ट्राभ्यनुज्ञा
तोविदुरस्तान्यकारयत् १५ सामंतेभ्यः प्रियाण्यस्यकार्याणिसुबहून्यपि प्राप्यंतेर्थैः सुलघुभिः सुनयाद्विदुरस्यवै १६ अकरोद्बंधमोक्षंचवध्यानांमोक्ष
णंतथा नचधर्मसुतोराजाकदाचित्किंचिदब्रवीत् १७ विहारयात्रासुपुनः कुरुराजोयुधिष्ठिरः सर्वान्कामान्महातेजाः प्रददावंबिकासुते १८ आरा
लिकाः सूपकाराश्चरागखांडविकास्तथा उपातिष्ठंतराजानंधृतराष्ट्रंयथापुरा १९ वासांसिचमहार्हाणिमाल्यानिविविधानिच उपाजह्रुर्यथान्यायंधृतराष्ट्रस
पांडवाः २० मैरेयमत्स्यमांसानिपानकानिमधूनिच चित्रान्भक्ष्यविकारांश्चचक्रुस्तस्ययथापुरा २१ येचापिपृथिवीपालाः समाजग्मुस्ततस्ततः उपा रम०
१

नत्कुर्यथामासंधृतराष्ट्रस्यपांडवाः २० उपातिष्ठंतते सर्वेकौरवेंद्रंयथापुरा २२ कुंतीचद्रौपदीचैवसात्वतीचयशस्विनी उलूपीनागकन्याचदेवीचित्रांगदा
तथा २३ धृष्टकेतोश्चभगिनीजरासंधसुतातथा एताश्चान्याश्चबह्व्योवैयोषितःपुरुषर्षभ २४ किंकराःपर्युपातिष्ठन्सर्वाःस्वकुलजास्तथा यथापुत्र
वियुक्तोयंनकिंचिद्दुःखमाप्नुयात् २५ इतितानन्वशाद्भ्रातॄन्नित्यमेवयुधिष्ठिरः एवंतेधर्मराजस्यश्रुत्वावचनमर्थवत् २६ सविशेषमवर्तंतभीममेकं
तदाविना नहितत्तस्यवीरस्यहृदयादपसर्पति २७ धृतराष्ट्रस्यदुर्बुद्ध्यायद्वृत्तंद्यूतकारितं॥ ॥इतिश्राश्रमवासिकेपर्वणि वैशंपायनउवाच स
एवंसंपूजितोराजापांडवैरंबिकासुतः विजहारयथापूर्वमृषिभिःपर्युपासितः १ ब्रह्मदेयाग्रहारांश्चप्रददौसकुरूद्वहः तच्चकुंतीसुतोराजासर्वमेवान्वप
द्यत २ आनृशंस्यपरोराजाप्रीयमाणोयुधिष्ठिरः उवाचसतदाभ्रातॄन्समामात्यांश्चमहीपतिः ३ मयाचैवभवद्भिश्चमान्यएषनराधिपः निदेशेधृतराष्ट्रस्य
यस्तिष्ठतिसमेसुहृत् ४ विपरीतश्चमेशत्रुर्निरस्यश्चभवेन्नरः पितृवृत्तेषुचाह्नःसुपुत्राणांश्राद्धकर्मणि सुहृदांचैवसर्वेषांयांश्चिकीर्षितं ततः
सराजाकौरव्योधृतराष्ट्रोमहामनाः ६ ब्राह्मणेभ्योयथार्हेभ्योददौवित्तान्यनेकशः धर्मराजश्चभीमश्चसव्यसाचीयमावपि ७ तत्सर्वमन्ववर्तंततस्यप्रियचिकीर्ष
या कथंनुराजावृद्धःसपुत्रपौत्रवधार्दितः ८ शोकमस्मत्कृतंप्राप्यनम्रियेतेतिचिंत्यते यावद्धिकुरुवीरस्यजीवत्पुत्रस्यवैसुखं ९ बभूवतदवाप्नोतुभोगां
श्चेतिव्यवस्थिताः ततस्तेसहिताःपंचभ्रातरःपांडुनंदनाः १० तथाशीलाःसमातस्थुर्धृतराष्ट्रस्यशासने धृतराष्ट्रश्चतान्सर्वान्विनीतान्नियमेस्थितान् ११
शिष्यवृत्तिंसमापन्नान्गुरुवत्समपश्यत गांधारीचैवपुत्राणांविविधैःश्राद्धकर्मभिः १२ आनृण्यमगमत्कामान्विप्रेभ्यःप्रतिपाद्यसा एवंधर्मभृतांश्रेष्ठोधर्मराजो
युधिष्ठिरः १३ भ्रातृभिःसहितोधीमान्पूजयामासतंनृपं वैशं० सराजासुमहातेजावृद्धःकुरुकुलोद्वहः नददर्शतदाकिंचिदप्रियंपांडुनंदने १४ वर्तमाने
सुमहावृत्तिंपांडवेषुमहात्मसु प्रीतिमानभवद्राजाधृतराष्ट्रोंबिकासुतः १५ सौबलेयीचगांधारीपुत्रशोकमपास्यतं सदैवप्रीतिमत्यासीत्तनयेषुनिजेष्विव १६ प्रि

© Dharmartha Trust J&K. Digitized By eGangotri

पारोपवत्तकौरव्योनाप्रियाणिकुरूद्वह वैचित्रवीर्येनृपतौसमावर्तत्वीर्यवान् १७ यद्यद्ब्रूतेचकिंचित्सधृतराष्ट्रोजनाधिपः गुरुवालघुवाकार्यंगांधारीचतपस्वि
नी १८ तंसराजामहाराजपांडवानांधुरंधरः पूजयित्वावचस्तत्तदकार्षीत्परवीरहा १९ तेनतस्माद्धवसीतोहृत्तेनसनराधिपः अन्वतप्यच्चसंस्मृत्यपुत्रंतंमंदचेत
सं २० सदाचप्रातरुत्थायकृतजप्यःशुचिर्नृपः आशास्तेपांडुपुत्राणांसमरेष्वपराजयं २१ ब्राह्मणान्वाचयित्वाचहुत्वाचैवहुताशनं आयुःषिपांडुपुत्राणामा
शंसतनराधिपः २२ नतांप्रीतिंपरामापपुत्रेभ्यःसकुरूद्वहः यांप्रीतिंपांडुपुत्रेभ्यःसदावापतदानृपः २३ ब्राह्मणानांयथावृत्तंक्षत्रियाणांयथाविधं तथावि
ट्शूद्रसंघानामभवत्सप्रियस्तदा २४ यच्चकिंचित्तदापापंधृतराष्ट्रसुतैःकृतं अकृत्वाहृदितत्पापंतंनृपंसोन्ववर्तत २५ यश्चकश्चिन्नरःकिंचिदप्रियंचाविका
सते कुंतीतेद्वेष्यतामेतिसकौंतेयस्यधीमतः २६ नराज्ञोधृतराष्ट्रस्यनचदुर्योधनस्यवै उवाचदुष्कृतंकश्चिद्युधिष्ठिरभयान्नरः २७ धृत्यातुष्टोनरेंद्रस्यगांधारीवि
दुरस्तथा शौचेनचाजातशत्रोर्नतुभीमस्यशत्रुहन् २८ अन्ववर्तततंचापिनिभृतोधर्मजोनृपं धृतराष्ट्रंचसंप्रेक्ष्यसदाभवतिदुर्मनाः २९ राजानमनुव
र्ततेधर्मपुत्रममित्रहा अन्ववर्ततकौरव्योहृदयेनपराजितः ३० इतिआश्रमवासिकेपर्वणि वैशंपायन० युधिष्ठिरस्यनृपतेर्दुर्योधनपितुस्तथा नांतरं
ददृशूराजन्पुरुषाःप्रणयंप्रति १ यदातुकौरवोराजापुत्रंसस्मारदुर्मतिं तदाभीमंहृदाराजन्नपध्यातिसपार्थिवः २ तथैवभीमसेनोपिधृतराष्ट्रंजनाधिपं ना
मर्षयतराजेंद्रसदैवदुष्टवद्धृदा ३ अथभीमःसुहृन्मध्येवाहुशब्दंतथाकरोत् ५ संश्रवेधृतराष्ट्रस्यगांधार्याश्चाप्यमर्षणः स्मृत्वादुर्योधनंशत्रुंकर्णदुःशास
नावपि ६ प्रोवाचेदंसुसंरब्धोभीमःसपरुषंवचः अंधस्यनृपतेःपुत्रामयापरिघवाहुना ७ नीतालोकममुंसर्वेनानाशस्त्रात्तयोधिनः इमौतौपरिघप्रख्यौ
भुजौममदुरासदौ ८ ययोरंतरमासाद्यधार्तराष्ट्राःक्षयंगताः ताविमौचंदनेनाक्तौवंदनार्हौचमेभुजौ ९ याभ्यांदुर्योधनोनीतःक्षयंससुतबांधवः एताश्चा
न्याश्चविविधाःशल्यभूतानराधिपः १० वृकोदरस्यतावाचःश्रुत्वानिर्वेदमागमत् साचबुद्धिमतीदेवीकालपर्यायवेदिनी ११ गांधारीसर्वधर्मज्ञानाम् राम०

लीकानि सुसुवे ततः पंचदशे वर्षे समतीते नराधिपः १२ राजा निर्वेदमापेदे भीमवाग्बाणपीडितः नावबुध्यत तद्राजा कुंतीपुत्रो युधिष्ठिरः १३ श्वेताश्वो वाथ कुंती वा
द्रौपदी वा यशस्विनी माद्रीपुत्रौ च धर्मज्ञौ चित्तं तस्यान्ववर्ततां १४ राज्ञस्तु चित्तं रक्षंतौ नोचतुः किंचिदप्रियं ततः समानयामास धृतराष्ट्रः सुहृज्जनं बाष्पसंदिग्ध
मत्यर्थमिदमाह वचनान्भृशं १५ धृतराष्ट्र उवाच विदितं भवतामेतद्यथावृत्तः कुरुक्षयः ममापराधात्तत्सर्वमनुज्ञातं च कौरवैः १६ योहं दुष्टमतिं मंदो ज्ञातीनां भयवर्ध
नं दुर्योधनं कौरवाणामाधिपत्ये ऽभ्यषेचयं १७ यच्चाहं वासुदेवस्य नाश्रौषं वाक्यमर्थवत् वध्यतां साध्वयं पापः सामात्य इति दुर्मतिः १८ पुत्रस्नेहाभिभूतश्च
हितमुक्तो मनीषिभिः विदुरेणाथ भीष्मेण द्रोणेन च कृपेण च १९ पदे पदे भगवता व्यासेन च महात्मना संजयेनाथ गांधार्या तदिदं तप्यते ऽद्य मां २० यच्चाहं पांडु
पुत्रेषु गुणवत्सु महात्मसु न दत्तवान् श्रियं दीप्तां पितृपैतामहीमिमां २१ विनाशं पश्यमानो हि सर्वराज्ञां गदाग्रजः एतच्छ्रेयस्तु परममन्यत जनार्दनः २२ सो
हमेतान्यलीकानि निवृत्तान्यात्मनस्तदा हृदये शल्यभूतानि धारयामि सहस्रशः २३ विशेषतस्तु पश्यामि वर्षे पंचदशे ह्यहं अस्य पापस्य शुद्ध्यर्थं नियतोस्मि सुदुर्मतिः
२४ चतुर्थे नियते काले कदाचिदपि चाष्टमे तृष्णाविनयनं भुंजे गांधारी वेद तन्मम २५ करोत्याहारमिति मां सर्वः परिजनः सदा युधिष्ठिरभयाद्धेतोर्भृशं तप्यति पांडवः
२६ भूमौ शये जप्यपरो दर्भेष्वजिनसंवृतः नियमव्यपदेशेन गांधारी च यशस्विनी २७ हतं शतं तु पुत्राणां ययोर्युद्धेऽपलायिनां नानुतप्यामि तच्चाहं क्षत्रधर्मं हि तं वि
दुः २८ इत्युक्त्वा धर्मराजानमभ्यभाषत कौरवः भद्रं ते यादवीमातर्वचश्चेदं निबोध मे २९ सुखमस्म्युषितः पुत्र त्वया सुपरिपालितः महादानानि दत्तानि श्राद्धानि च
पुनः पुनः ३० प्रकृष्टं च मया पुत्र पुण्यं चीर्णमपि यथाबलं गांधारी हतपुत्रेयं धैर्येणोदीक्षते च मां ३१ द्रौपद्या ह्यपकर्तारस्तव चैश्वर्यहारिणः समतीता नृशंसास्ते स्व
धर्मेण हता युधि ३२ न तेषु प्रतिकर्तव्यं पश्यामि कुरुनंदन सर्वे शस्त्रकृतां लोकान् गतास्ते ऽभिमुखं हताः ३३ आत्मनस्तु हितं पुण्यं प्रतिकर्तव्यमद्य वै गांधार्याश्च
व राजेंद्र तदनुज्ञातुमर्हसि ३४ त्वं तु धर्मभृतां श्रेष्ठः सततं धर्मवत्सलः राजा गुरुः प्राणभृतां तस्मादेतद्ब्रवीम्यहं ३५ अनुज्ञातस्त्वया वीर संश्रयेयं वनान्यहं वीर

आ०
३

वल्कलभृद्राजन्गांधार्यासहितोनया ३६ तवाशिषःप्रयुंजानोभविष्यामिवनेचरः उचितंनःकुलेतातसर्वेषांभरतर्षभ ३७ पुत्रेष्वैश्वर्यमाधायवयसोंतेवनंनृप न
त्वाहंवायुभक्षोवानिराहारोपिवावसन् ३८ पत्न्यासहानयावीरचरिष्यामितपःपुरा त्वंचापिफलभाक्तातत्वपसःपार्थिवास्यसि ३९ फलभाजोहिराजानःकल्या
णास्येतरस्यवा युधिष्ठिरउवाच० नमांप्रीणयतेराज्यंत्वय्येवंदुःखितेनृप धिग्मामस्तुसुदुर्बुद्धिंराज्यसक्तंप्रमादिनं ४० योहंभवंतंदुःखार्तमुपवासकृशंभृशं जि
ताहारंक्षितिशयंनविंदाम्यनुजैःसह ४१ अहोस्मिवंचितोमूढोभवतागूढबुद्धिना विश्वासयित्वापूर्वंमांयदिदंदुःखमश्नुथाः ४२ किंमेराज्येनभोगैर्वाकिंयज्ञैःकिं
सुखेनवायस्यमेत्वंमहीपालदुःखान्येतान्यवाप्तवान् ४३ पीडितंचापिजानामिराज्यमात्मानमेवच अनेनवचसातेद्यदुःखितस्यजनेश्वर ४४ भवान्पिताभ
वान्माताभवान्नःपरमोगुरुः भवताविप्रहीणाहि क्वनुतिष्ठामहेवयं ४५ औरसोभवतःपुत्रोयुयुत्सुर्नृपसत्तम अस्तुराजामहाराजयमन्यंमन्यसेभवान् ४६
अहंवनंगमिष्यामिभवान्राज्यंप्रशास्तु नमामयशसादग्धंभूयस्त्वंदग्धुमर्हसि ४७ नाहंराजाभवान्राजाभवतःपरवानहं कथंगुरुंत्वांधर्मज्ञमनुज्ञातुमिहोत्स
हे ४८ नमन्युर्हृदिनःकश्चिद्दुर्योधनकृतेनघ भवितव्यंतथाविद्धिवयंचान्येचमोहिताः ४९ वयंपुत्राहिभवतोयथादुर्योधनादयः गांधारीचैवकुंतीचनि
र्विशेषामतिर्मम ५० समांत्वंयदिराजेंद्रपरित्यज्यगमिष्यसि पृष्ठतस्त्वानुयास्यामिसत्यमात्मानमालभे ५१ इयंहिवसुसंपूर्णामहीसागरमेखला भवता
विप्रहीणास्यनमेप्रीतिकरीभवेत् ५२ भवदीयमिदंसर्वंशिरसात्वांप्रसादये त्वदधीनाःस्मराजेंद्रव्येतुतेमानसोज्वरः ५३ भवितव्यमनुप्राप्तोमन्येत्वंवसुधाधिप दि
ष्ट्याशुश्रूषमाणास्त्वांमोक्षिष्येमनसोज्वरं ५४ धृतराष्ट्रउवाच तापस्येमेमनस्तातवर्ततेकुरुनंदन उचितंचकुलेस्माकमरण्यगमनंप्रभो ५५ चिरमास्म्युषितः
पुत्रचिरंशुश्रूषितस्त्वया वृद्धंमामप्यनुज्ञातुमर्हसित्वंनराधिप ५६ वैशं० इत्युक्त्वाधर्मराजानंवेपमानःकृतांजलिः उवाचवचनंराजाधृतराष्ट्रोंबिकासुतः ५७
संजयंचमहात्मानंकृपंचापिमहारथं अनुनेतुमिहेच्छामिभवद्भिर्वसुधाधिपं ५८ ग्लायतेमेमनोहीदंमुखंचपरिशुष्यति वयसाचप्रकृष्टेनवाग्व्यायामेनचैवह राम०
३

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

प०ए इत्युक्त्वा स तु धर्मात्मा वृद्धो राजा कुरूद्वहः गांधारीं शिश्रिये धीमान्सहसैव गतासुवत् ६० तं तु दृष्ट्वा समासीनं विसंज्ञमिव कौरवं आर्तिं राजागमत्तीव्रां कौंतेयः
परवीरहा ६१ सोयं नागायुतप्राणः पुरा भूत्वा महाबलः कृतवान्स्त्रियमाश्रित्य शेते राजा कुरूद्वहः गतासुवत् युधिष्ठिर उवाच यस्य नागसहस्रेण शतसंख्येन वै बलं ६२ आपत्तौ प्रतिपाद्येन भीमसेनस्य मायुरा चूर्णी
कृता बलवता सोबलामाश्रितः स्त्रियं ६३ धिगस्तु मामधर्मज्ञं धिग्बुद्धिं धिक्च मे श्रुतं यत्कृते पृथिवीपालः शेते यमतथोचितः ६४ अहमप्युपवत्स्यामि यथैव
वायं गुरुर्मम यदि राजा न भुंक्ते यं गांधारी च यशस्विनी ६५ वैशं० ततोस्य पाणिना राजन्नजलशीतेन पांडवः उरो मुखं च शनकैः पर्यमार्जत धर्मवित् ६६ तेन
रत्नौषधिमता पुण्येन च सुगंधिना पाणिस्पर्शेन राज्ञः स राजा संज्ञामवाप ह ६७ धृतराष्ट्र उवाच स्पृश मां पाणिना भूयः परिष्वज च पांडव जीवामीवातिसंस्पर्श
तव राजीवलोचन ६८ मूर्धानं च तवाघ्रातुमिच्छामि मनुजाधिप पाणिभ्यां च परिस्प्रष्टुं प्राणानां हि महन्मम ६९ अष्टमो ह्यद्य कालोयमाहारस्य कृतस्य मे॥
येनाहं कुरुशार्दूल शक्नोमि न विचेष्टितुं ७० व्यायामश्चायमत्यर्थं कृतस्त्वामभियाचता ततो ग्लानमना स्तात नष्टसंज्ञ इवाभवं ७१ तवामृतरसप्रख्यं हस्तस्पर्शमि
मं प्रभो लब्ध्वा संजीवितोस्मीति मन्ये कुरुकुलोद्वह ७२ वैशं० एवमुक्तस्तु कौंतेयः पित्रा ज्येष्ठेन भारत पस्पर्श सर्वगात्रेषु सौहार्दात्तं शनैस्तदा ७३ उपलभ्य
ततः प्राणान्धृतराष्ट्रो महीपतिः बाहुभ्यां संपरिष्वज्य मूर्ध्न्याजिघ्रत पांडवं ७४ विदुरादयश्च ते सर्वे रुरुदुर्दुःखिता भृशं अतिदुःखाच्च राजानं नोचुः किंचन पां गं६
डवं ७५ गांधारी त्वेव धर्मज्ञा मनसोद्वहती भृशं दुःखान्यधारयद्राजन्मैवमित्येव चाब्रवीत् ७६ इतरास्तु स्त्रियः सर्वाः कुंत्या सह सुदुःखिताः नेत्रैरागतविक्लेदैः प
रिवार्य स्थिता भवन् ७७ अथाब्रवीत्पुनर्वाक्यं धृतराष्ट्रो युधिष्ठिरं अनुजानीहि मां राजंस्तापसे भरतर्षभ ७८ ग्लायते मे मनस्तात भूयो भूयः प्रजल्पतः न मामि
तः परं पुत्र परिक्लेष्टुमिहार्हसि ७९ तस्मिंस्तु कौरवेंद्रे तं तथा ब्रुवति पांडवं सर्वेषामेव योधानामार्तनादो महानभूत् ८० दृष्ट्वा कृशं विवर्णं च राजानमतथो
चितं उपवासपरिश्रांतं त्वगस्थिपरिवारणं ८१ धर्मपुत्रः स पितरं परिष्वज्य महाप्रभुं शोकजं बाष्पमुत्सृज्य पुनर्वचनमब्रवीत् ८२ न कामये नरश्रेष्ठ जीवितं पृथि

फ़ुर्तो६   धा४

आ० ५ वीतथा यथातवप्रियंराजंश्चिकीर्षामिपरंतप २३ यदिवाहमनुग्राह्योभवतोदयितोपिवा क्रियतांतावदाहारस्ततोवत्स्याम्यहंपरं २४ ततोब्रवीन्महातेजाराजाधृतरा
ष्ट्रोयुधिष्ठिरं अनुज्ञातस्त्वयापुत्रभुंजीयामितिकामये २५ इतिब्रुवतिराजेंद्रेधृतराष्ट्रेयुधिष्ठिरं ऋषिः सत्यवतीपुत्रोव्यासोभ्येत्यवचोब्रवीत् २६ इतिश्र्याश्रम
वासिकेपर्वणि व्यासउवाच युधिष्ठिरमहाबाहोयथाहकुरुनंदनः धृतराष्ट्रोमहातेजास्तत्कुरुष्वविचारयन् १ अयंहिवृद्धोनृपतिर्हतपुत्रोविशेषतः नेदंकृ
च्छ्रंविचरितंसहेदिति मतिर्मम २ गांधारीचमहाभागाप्राज्ञाकरुणवेदिनी पुत्रशोकंमहाराजधैर्येणोद्वहतेभृशं ३ अहमप्येतदेवत्वांब्रवीमिकुरुमेवचः
अनुज्ञांलभतांराजामावृथेहमरिष्यति ४ राजर्षीणांपुराणानामनुयातुगतिंनृपः राजर्षीणांहिसर्वेषामंतेवनमुपाश्रयः वैशंपायनउवाच इत्युक्तः सतदा
राजाव्यासेनाद्भुतकर्मणा प्रत्युवाचमहातेजाधर्मराजोमहामुनिं ६ भगवानेवनोमान्योभगवानेवनोगुरुः भगवानस्यकुलस्यचपरायणं ७ अहंतुपुत्र
भगवन्पितारजागुरुश्चमे निदेशवर्तीचपितुः पुत्रोभवतिधर्मतः ८ वैशं० इत्युक्तः सततंप्राहव्यासोवेदविदांवरः युधिष्ठिरंमहातेजाः पुनरेवमहाकविः
९ एवमेतन्महाबाहोयथावदसिभारत राजायंवृद्धतांप्राप्तः प्रमाणेपरमेस्थितः १० सोयंमयाभ्यनुज्ञातस्त्वयाचपृथिवीपतिः करोतुस्वमभिप्रायंमास्यवि
घ्नकरोभव ११ एषएवपरोधर्मोराजर्षीणांयुधिष्ठिर समरेवाभवेन्मृत्युर्वनेवाविधिपूर्वकं १२ पित्रातुतवराजेंद्रपांडुनापृथिवीक्षिता शिष्यवृत्तेनराजा
यंगुरुवत्पर्युपासितः १३ क्रतुभिर्दक्षिणावद्भिः रत्नपर्वतशोभितैः महद्भिरिष्टंगोर्भुक्ताप्रजाश्चपरिपालिताः १४ पुत्रसंस्थंचविपुलंराज्यंविप्रोषितेत्वयि त्रयो
दशसमाभुक्तंदत्तंचविविधंवसु १५ त्वयाचापिनरव्याघ्रगुरुशुश्रूषयानघ आराधितः सभृत्येनगांधारीचयशस्विनी १६ अनुजानीहिपितरंसमयोस्यतपोवि
धौ नमन्युर्विद्यतेचास्यसम्यक्मनोपियुधिष्ठिर १७ वैशंपायनउवाच एतावदुक्त्वावचनमनुमान्यचपार्थिवं॥ तथास्त्विति च तेनोक्तः कौंतेयेनययौवनं १८
गतेभगवतिव्यासेराजापांडुसुतस्तदा प्रोवाचपितरंवृद्धंमंदंमंदमिवानतः १९ यदाहभगवान्व्यासोयच्चापिभवतोमतं यथाहचमहेष्वासः कृपोविदुरएवच २० एम० ५

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

युयुत्सुः संजयश्चैववत्सकर्तास्म्यहमंजसा सर्वेस्वहिर्मेनित्यामेकुलस्यास्यहितैषिणः २१ इदंतुयाचेनृपतेत्वामहंशिरसानतः क्रिययौस्वभवनंराजागांधार्यनुगतस्तदा
१ मंदप्राणगतिर्धीमान्कृच्छ्रादिवसमुद्वहन् पदातिसमहीपालोजीर्णोगजपतिर्यथा २ तमन्वगच्छद्विदुरोविद्वान्सूतश्चसंजयः सचापिपरमेष्वासः कृपःशारद्वतस्त
था ३ सप्रविश्यगृहंराजन्कृतपूर्वाह्णिकक्रियः तर्पयित्वाद्विजश्रेष्ठानाहारमकरोत्तदा ४ गांधारीचैवधर्मज्ञाकुंत्यासहमनस्विना वधूभिरुपचारेणपूजिताभु
क्तभारत ५ कृताहारंकृताहाराः सर्वेतेविदुरादयः पांडवाश्चकुरुश्रेष्ठमुपातिष्ठंततंनृपं ६ ततोब्रवीन्महाराजकुंतीपुत्रमुपह्वरे निषण्णंपाणिनापृष्ठेसंस्पृश
न्नंबिकासुतः ७ अप्रमादस्त्वयाकार्यः सर्वथाकुरुनंदन अष्टांगेराजशार्दूलराज्येधर्मपुरस्कृते ८ तत्तुशक्यंमहाराजरक्षितुंपांडुनंदन राज्यंधर्मेणकौंतेयविद्वा
नसिनिबोधतत् ९ विद्यावृद्धान्सदैवत्वमुपासीथायुधिष्ठिर शृणुयास्तेचयद्ब्रूयुः कुर्याश्चैवाविचारयन् १० प्रातरुत्थायतान्राजन्पूजयित्वायथाविधि कृ
त्यकालेसमुत्पन्नेपृच्छेथाः कार्यमात्मनः ११ तेतुसंमानिताराजंस्त्वयाकार्यहितार्थिना प्रवक्ष्यंतिहितंतातसर्वथातवभारत १२ इंद्रियाणिचसर्वाणि
वाजिवत्परिपालयेः हितायवैभविष्यंतिरक्षितंद्रविणंयथा १३ अमात्यानुपधातीतान्पितृपैतामहान्शुचीन् दांतान्कर्मसुपूर्णांश्चप्राप्तान्सर्वेषुयोजयेः १४
चारयेथाश्चसततंचारैरविदितैःपरैः परीक्षितै---- स्वराष्ट्रपतिवासिभिः १५ पुरंचतेसुगुप्तंस्याद्दृढप्राकारतोरणं अट्टाट्टालकसंबाधंषट्पदंसर्वतोदिशं
१६ तस्यद्वाराणिसर्वाणिपर्याप्तानिबृहंतिच सर्वतः सुविभक्तानियंत्रैरारक्षितानिच १७ पुरुषैरलमर्थैस्तैर्विदितैः कुलशीलतः आत्माचरक्ष्यः सततंभो
जनादिषुभारत १८ विहाराहारकालेषुमाल्यशय्यासनेषुच स्त्रियश्चतेसुगुप्ताःस्युर्वृद्धाभिरधिष्ठिताः १९ शीलवद्भिः कुलीनैश्चविद्वद्भिश्चयुधिष्ठिर मं
त्रिणश्चैवकुर्वीथाद्विजान्विद्याविशारदान् २० विनीतांश्चकुलीनांश्चधर्मार्थकुशलानृजून् तैः सार्धंमंत्रयेथास्त्वंनात्यर्थंबहुभिः सह २१ समस्तैरपि
चव्यस्तैर्व्यपदेशेनकेनचित् स्वसंवृतंमंत्रगृहंस्थलंचारुह्यमंत्रयेः २२ अरण्येनिःशलाकेवानचरात्रौकथंचन वानराः पक्षिणश्चैवयेमनुष्यानुसारिणः

नु१

© Dharmartha Trust J&K. Digitized by eGangotri

आ० २३ सर्वमंत्रगृहेवत्स्यायेचापिजगवंगवः मंत्रमेदहियेदोषाभवंतिपृथिवीक्षितां २४ नतेशक्याः समाधातुंकथंचिदितिमेमतिः दोषांश्चमंत्रभूयास्त्वंमंत्रम----
५ ड्ले २५ श्रुमेस्वगुणाएजन्पुनः पुनररिंदम पौरजानपदानांचशौचाशौचंयुधिष्ठिर २६ यथास्याद्विदितंराजंस्तथाकार्यंकुरुद्वह व्यवहारश्च
तेतातनित्यमाप्तैरधिष्ठितः परिमाणांविदित्वाचदंडंदंड्येषुभारत २७ प्रणयेदुर्यथान्यायंपुरुषास्तेयुधिष्ठिर आदानरुचयश्चैवपरदाराभिमर्षिणः २८ उग्रदं
डप्रधानश्चमिथ्याव्याहारिणस्तथा आक्रोष्टारश्चलुब्धाश्चहंतारः साहसप्रियाः २९ सभाविहारभेत्तारोवर्णानांचप्रदूषकाः हिरण्यदंड्यवध्याश्चकर्त
व्यादेशकालतः ३० प्रातरेवहियश्येथायेकुर्युर्व्ययकर्मते अलंकारमथोभोज्यमतऊर्ध्वंसमाचरेः ३१ पश्येथाश्चततोयोधान्सदात्वंप्रतिहर्षयन् दूतानां
चचराणांचप्रदोषस्तेसदाभवेत ३२ सदाचापरराश्रेतेभवेत्कार्यार्थनिर्णयः मध्यरात्रेविहारस्तेमध्याह्नेचसदाभवेत ३३ सर्वेत्वौपयिकाः कालाःकार्य
णांभरतर्षभ तथैवालंकृतः कालेतिष्ठेथाभूरिदक्षिणा ३४ चक्रवत्तातकार्याणांपर्यायोदृश्यतेसदा कोषस्यनिचयेयत्नंकुर्वीथान्यायतः सदा ३५
द्विविधस्तेमहाराजविपरीतंविवर्जयेः चारैर्विदित्वाशत्रूंश्चयेराज्ञामंतरैषिणः ३६ तान्नाप्तैः पुरुषैर्दूराद्घातयेथानराधिप कर्मदृष्ट्वाथभृत्यांस्त्वंवरयेथाः
कुरुद्वह ३७ कारयेथाश्चकर्माणियुक्तायुक्तैरधिष्ठितैः सेनाप्रणेताचभवेत्तवतातदृढव्रतः ३८ शूरः क्लेशसहश्चैवहितोभक्तश्चपूरुषः सर्वेजनपदाश्चैवत
वकर्माणिपांडव ३९ गोवद्नासभवच्चैवकुर्युर्येचव्यवहारिणः स्वरंध्रंपररंध्रंचस्वेषुचैवपरेषुच ४० उपलक्षयितव्यंतेनित्यमेवयुधिष्ठिर देशजाश्चैवपुरुषावि
क्रांताः स्वेषुकर्मसु ४१ यात्राभिस्तुरूपाभिस्त्वयास्वाहितास्त्वया गुणार्थिनांगुणाः कार्याविदुषावैजनाधिप ४२ अविचाल्याश्चतेतेस्युरचलाइवनित्य
शः॥ ॥आश्रमवासिकेपर्वणि॥ धृतराष्ट्रउवाच मंडलानिचबुध्येथाः परेषामात्मनस्तथा उदासीनगणानांचमध्यस्थानांचभारत १ चतुर्णांशत्रुजाता
नांसर्वेषामाततायिनां मित्रंचामित्रमित्रंचबोधव्यंतेरिकर्शन २ तथामात्याजनपदादुर्गाणिविविधानिच बलानिचकुरुश्रेष्ठभवंत्येषांयथेप्सितं ३ तेचद्वाद रा० ५
प्र १

शक्यौ कौंतेय राज्ञा वै विषयात्मकाः मंत्रिप्रधानाश्च गुणाः षड्विंशद्दश च प्रभो ४ एतन्मंडलमित्याहुराचार्या नीतिकोविदाः तत्र षाड्गुण्यमायत्तं युधिष्ठिर निबोधत
५ वृद्धिक्षयौ च विज्ञेयौ स्थानं च कुरुसत्तम द्विसप्तत्या महाबाहो ततः षाड्गुण्यजानुगाः ६ यदा स्वपक्षो बलवान्परपक्षस्तथाबलः विगृह्य शत्रून्कौंतेय जेयः
क्षितिपतिस्तदा ७ यदा परे च बलिनः स्वपक्षश्चैव दुर्बलः सार्धं विद्वांस्तथा क्षीणः परैः संधिं समाश्रयेत ८ द्रव्याणां संचयश्चैव कर्तव्यः स्यान्महांस्तथा
यदा समर्थो यानाय नचिरेणैव भारत ९ तदा सर्वं विधेयं स्यात्स्थानं न च विचारयेत् भूमिरल्प फला देया विपरीतस्य भारत १० हिरण्यं कुप्यभूयिष्ठं
मित्रं क्षीणमथो बलं विपरीतान्निगृह्णीयात्स्वयं संधिविशारदः ११ संध्यर्थं राजपुत्रं वा लिप्सेथा भरतर्षभ विपरीतं न तच्छ्रेयः पुत्र कस्यां चिदापदि १२
तस्य प्रमोक्षे यत्नं च कुर्याः सोपायमंत्रवित् प्रकृतीनां च राजेंद्र राजा दीनान्विभावयेत १३ क्रमेण युगपत्सर्वं व्यवसायं महाबलः पीडनं स्तंभनं चैव कोषभं
गस्तथैव च १४ कार्यं यत्नेन शत्रूणां स्वराज्यं रक्षता स्वयं॥ न च हिंस्योऽभ्युपगतः सामंतो वृद्धिमिच्छता १५ कौंतेय तं न हिंसेथा यो महीं विजिगीषते ग
णानां भेदने योगा मीप्सेथाः सह मंत्रिभिः १६ साधुसंग्रहणाच्चैव पापनिग्रहणात्तथा दुर्बलाश्चापि सततं नान्वेष्टव्या बलीयसा १७ तिष्ठेथा राजशार्दूल वैत
सीं वृत्तिमास्थितः यद्येनमभियायाच्च बलवान्दुर्बलं नृपः १८ सामादिभिरुपायैस्तं क्रमेण विनिवर्तयेः अशक्नुवंश्च युद्धाय निष्पतेत्सह मंत्रिभिः १९
कोषेण पौरैर्दंडेन ये चास्य प्रियकारिणः असंभवे तु सर्वस्य यथामुख्येन निष्पतेत २० क्रमेणानेन मुक्तः स्याच्छरीरमिति केवलं॥ ॥इति श्री आश्रमके पर्वणि०
धृतराष्ट्र उवाच संधिविग्रहमप्यत्र पश्येथा राजसत्तम द्वितीयो विविधोपायं बहुकल्पं युधिष्ठिर १ कौरव्य पर्युपासीथा द्विता द्वैविध्यमात्मनः तुष्टपुष्टबल
: शत्रुरात्मवानिति च स्मयेत २ पर्युपासनकाले तु विपरीतं विधीयते आमर्दकाले राजेंद्र व्यपसर्पेत्ततः परं ३ व्यसनं भेदनं चैव श त्रूणां कारयेत्ततः कर्ष
णं भीषणं चैव युद्धे चैव बलक्षयं ४ प्रयास्यमानो नृपतिस्त्रिविधं परिचिंतयेत आत्मनश्चैव शत्रोश्च शक्तिं शास्त्रविशारदः ५ उत्साहप्रभुशक्तिभ्यां मंत्रशक्त्या च भारत ६

आ० ६

त्माहमुशक्तिम्भपांमंत्रशक्त्यावभार उपपन्नोन्तयो यापाह्रियरितंवर्द्धयेत् ६ आरद्दीतवलंराजामौलंमित्रवलंतथा अटवीवलंधृतंचैवतथाश्रेणीवलंप्रभो
७ तत्रमित्रवलंराजन्मौलंचैवविशिष्यते श्रेणीवलंभृतंचैवततिविशिष्येते श्रेणीवलंधृतंचैवतुल्येएवेतिमेमतिः ८ तथाचारवलंचैवपरस्परसमंन्त्य वि
ज्ञेयंवहुकालेषुराज्ञाकालेउपस्थिते ९ आपदश्चापिवोद्धव्यावहुरूपानराधिप भवंतिराज्ञांकौरव्यपार्थतास्थगतःश्रणु १० विकल्पावहुधाराज
न्नापदांपांडुनंदन समादिभिरुपन्यस्यगणयेत्तान्स्यःसदा ११ यात्रांगच्छेद्वलैर्युक्तोराजासद्भिःपरंतप युक्तश्चकालदेशाभ्यांवलेरात्मगुणैस्तथा १२ हृष्टपुष्टव
लोगच्छेद्राजावृद्ध्युदयेरतः अकृशश्चाप्ययोपायादनृतावपिपांडव १३ तृणाश्मानंवाजिरथप्रवाहांध्वजद्रुमैः संवृतकूलरोधसं पदातिनागैर्वहुकर्दमांनदीसपत्न
नाशेन्नृपतिःप्रयोजयेत् १४ अथोपपत्त्याशकटंपद्मवज्रंचभारत उशनावेदमच्छास्त्रंतत्रैतद्विहितंविभो १५ वारयित्वापरवलंकृत्वास्ववलदर्शनं स्वभूमौयोजये
द्युद्धंपरभूमौतथैवच १६ वलंप्रसादयेद्राजानिक्षिपेद्बलिनोनरान् ज्ञात्वास्वविषयंतत्रसामादिभिरुपक्रमेत् १७ सर्वथैवमहाराजशरीरंधारयेदिह प्रेत्येवेहचक
र्त्तव्यमात्मनिःश्रेयसंपरं १८ एवमेतन्महाराजराजासम्यक्समाचरन् प्रेत्यस्वर्गमवाप्नोतिराजधर्मेणपालयन् १९ एवंत्वयाकुरुश्रेष्ठवर्तितव्यंप्रजाहितं उभयोर्लोक
लोकयोस्तातप्राप्तयेनित्यमेवहि २० भीष्मेणासर्वमुक्तोसिकश्मेनविदुरेणच मयाप्यवश्यवक्तव्यंप्रीत्यातेनृपसत्तम २१ एतत्सर्वंयथान्यायंकुर्वीथाम्भूरिदक्षिणापि
यस्तथाप्रजानांत्वंस्वर्गेसुखमवाप्स्यसि २२ अश्वमेधसहस्रेणयोजयेत्पृथिवीपतिः पालयेद्वापिधर्मेणप्रजास्तस्यफलंभवेत् २३ आश्रमवासपर्वणि युधिष्ठिरउवाच एव
मेतत्करिष्यामियथास्यपृथिवीपते भूयश्चैवानुशास्योहंभवतापार्थिवर्षभ १ भीष्मेस्वर्गमनुप्राप्तेगतेचमधुसूदने विदुरेसंजयेचैवकोन्योमांवक्तुमर्हति २ यन्मामनुशास्तास्मी
हभवाननघहितेस्थितः कर्त्तास्मितन्महीपालनिर्वृत्तोभवपार्थिव ३ एवमुक्तः सराजर्षिर्धर्मराजेनधीमता कौंतेयंसमनुज्ञातमिषेषभरतर्षभः ४ पुत्रसंशाम्यतांतावन्ममापि
वलवान्श्रमः इत्युक्त्वाप्राविशद्राजागांधार्याभवनंतदा ५ तमासनगतंदेवीगांधारीधर्मचारिणी उवाचकालेकालज्ञाप्रजापतिसमंपतिं ६ अनुज्ञातःस्वयंतेनव्यासेनत्वंम

एम० ६

© (c) Dharmartha Trust J&K Digitized By eGangotri

महर्षिणा युधिष्ठिरस्यानुमते गंतारस्त्वं वनमिष्यसि ७ धृतराष्ट्र उवाच गांधार्येहमनुज्ञातः स्वयं पित्रा महात्मना युधिष्ठिरस्यानुमते गंतास्मि नचिराद्वनं ८ अहं हि ता
वत्सर्वेषां तेषां दुर्घ्यूतदेविनां पुत्राणां दातुमिच्छामि प्रेतभावानुगं वसु सर्वप्रकृतिसांनिध्यं कारयित्वा स्ववेश्मनि ९ वैशंपायन उवाच इत्युक्त्वाथ धर्मराजाय प्रेषया
मायुयु —— ११ ततो निष्क्रम्य नृपतिस्तस्मात्कुरुः पुत्रस्तदा ददर्श तं जनं सर्वं सर्वाश्च प्रकृतीस्तथा १२ समवेतांश्च तान्सर्वान्पौरान्जानपदांस्तथा तानागतानभिप्रे
आ० ४ क्ष्य समस्तं च सुहृज्जनं १३ ब्राह्मणांश्च महीपालनानादेशसमागतान् उवाच मतिमान्राजा धृतराष्ट्रो विशांपते १४ भवंतः कुरवश्चैव चिरकालं सहोषिताः परस्परस्य सुहृदः
परस्परहिते रताः १५ यदिदानीमहं ब्रूयामस्मिन्काल उपस्थिते तथा भवद्भिः कर्तव्यमविचार्य वचो मम १६ अरण्यगमने बुद्धिर्गांधारीसहितस्य मे व्यासस्यानुमते राज्ञस्त ४६
था कुंतीसुतस्य ते १७ भवंतोप्यनुजानंतु मा वोभूद्विचारणा अस्माकं भवतां चैव येयं प्रीतिर्हि शाश्वती १८ न च सान्येषु देशेषु राज्ञामिति मतिर्मम श्रांतोस्मि वयसानेन त
था पुत्रविनाकृतः १९ उपवासकृशश्चास्मि गांधारीसहितोनघाः युधिष्ठिरगते राज्ये प्राप्तश्चास्मि सुखं महत् २० मन्ये दुर्योधनैश्वर्याद्विशिष्टमिति सत्तमाः मम वांधस्य
वृद्धस्य हतपुत्रस्य का गतिः २१ ऋते वनं महाभागास्तन्मानुज्ञातुमर्हथ तस्य तद्वचनं श्रुत्वा सर्वे ते कुरुजांगलाः २२ बाष्पसंदिग्धया वाचा रुरुदुर्भरतर्षभ तानविब्रुवतः
किंचित्सर्वान्शोकपरायणान् पुनरेव महातेजा धृतराष्ट्रोब्रवीदिदं २३ आश्रमवासिके पर्वणि धृतराष्ट्र उवाच शांतनुः पालयामास यथावद्वसुधामिमां तथावि
चित्रवीर्यश्च भीष्मेणाभिपालितः १ पालयामास नस्तात विदितार्थो न संशयः यथा च पांडुर्भ्राता मे दयितो भवतामभूत् २ स चापि पालयामास यथाशक्ति तवेत्यह म
याव भवतां सम्यक्शुश्रूषा याकृतानघाः ३ अस्मत्स्वामहाभागास्तत्क्षंतव्यमतंद्रितैः यथा दुर्योधनेनेदं भुक्तं राज्यमकंटकं ४ अपि तत्र न वो मंदो दुर्बुद्धिरपराद्धवान् त
स्यापराधाद्दुर्बुद्धेरभिमानान्महीक्षितां ५ विमर्दः सुमहानासीदनयात्मत्कृतादथ तन्मया साधु वापीदं यदि वा साधु वै कृतं ६ तद्वो हृदि न कर्त्तव्यं मया बद्धोयमंजलिः
वृद्धोयं हतपुत्रोयं दुःखितोयं नराधिपः ७ पूर्वराज्ञां च पुत्रोयमिति कृत्वानुजानथ इयं च कृपणा वृद्धा हतपुत्रा तपस्विनी ८ गांधारी पुत्रशोकार्ता युष्मान्याचति वै मया

आ० ७

हतपुत्रा विमोहं द्वौ विहत्वाडः खितौ तथा ९ अनुजानीत भद्रं वो व्रजाव शरणं व वः अयं च कौरवो राजा कुंतीपुत्रो युधिष्ठिरः १० सर्वैर्भवद्भिर्द्रष्टव्यः स
मेषु विषमेषु च न जातु विषमं चैव गमिष्यति कदाचन ११ चत्वारः सचिवा यस्य भ्रातरो विपुलौजसः लोकपालसमा ह्येते सर्वे धर्मार्थदर्शिनः १२ ब्रह्मे
व भगवानेषः सर्वभूतजगत्पतिः युधिष्ठिरो महातेजा भवतः पालयिष्यति १३ अवश्यमेव वक्तव्यमिति कृत्वा ब्रवीमि वः एष न्यासो मया दत्तः सर्वेषां वो युधि
ष्ठिरः १४ भवंतो स्य च वीरस्य न्यासभूताः कृता मया यदेव तैः कृतं किंचिद्व्यलीकं वः सुतैर्मम १५ यदन्येन च मदीयेन तदनुज्ञातुमर्हथ भवद्भिर्न हि मे मन्युः कृ
तपूर्वः कथंचन १६ अत्यंतगुरुभक्तानामेषोंजलिरिदं नमः तेषामस्थिरबुद्धीनां लुब्धानां कामचारिणां १७ कृते पावेयवः सर्वान्गांधारीसहितोनघाः इत्युक्ता
स्ते ततः सर्वे पौरजानपदा जनाः नोचुर्बाष्पकलाः किंचिद्वीक्षांचक्रुः परस्परं १८ आश्रमवासिके पर्वणि वैशंपायन उवाच एवमुक्तास्ततस्तेन पौरजानपदा
जनाः वृद्धेन राज्ञा कौरव्य नष्टसंज्ञा इवाभवन् १ तूष्णींभूतांस्ततस्तांस्तु बाष्पकंठान्महीपतिः धृतराष्ट्रो महीपालः पुनरेवाभ्यभाषत २ वृद्धं च हतपुत्रं च ध
र्मपत्न्या सहानया विलपंतं बहुविधं कृपणं चैव सत्तमाः ३ पित्रा स्वयमनुज्ञातं कृष्णद्वैपायनेन वै वनवासाय धर्मज्ञा धर्मज्ञेन नृपेण ह ४ सोहं पुनः पुनश्चै
व शिरसा वनतोनघाः गांधार्या सहितं तन्मां समनुज्ञातुमर्हथ ५ वैशं० तच्छ्रुत्वा कुरुराजस्य वाक्यानि करुणानि ते रुरुदुः सर्वशो राजन्समेताः कुरुजांग
लाः ६ उत्तरीयैः करैश्चापि संछाद्य वदनानि ते रुरुदुः शोकसंतप्ता मुहूर्तं पितृमातृवत् ७ हृदयैः शून्यभूतैस्ते धृतराष्ट्रप्रवासजं दुःखं संधारयंतो हि न
ष्टसंज्ञा इवाभवन् ८ ते विनीय तमायासं धृतराष्ट्रवियोगजं शनैः शनैस्तदान्योन्यमब्रुवन्स्वमतान्युत ९ ततः संधाय ते सर्वे वाक्यान्यथ समासतः एकस्मिन्
ब्राह्मणे राजन्निवेश्योचुर्नराधिपं १० ततः स्वाचरणो विप्रः संमतोर्थविशारदः सांबाख्यो बह्वृचो राजन्वक्तुं समुपचक्रमे ११ अनुमान्य महाराजं तत्सदः संभाव्य
च विप्रः प्रगल्भो मेधावी स राजानमुवाच ह १२ राजन्वाक्यं जनस्यास्य मयि सर्वं समर्पितं वक्ष्यामि तदहं वीर तज्जुषस्व नराधिप १३ यथा वदसि राजेंद्र सर्वमे तन्०

© Dhamanta Trust & Digitized By eGangotri

नत्वयाविभो नात्रमिथ्यावचः किंचित्त्वत्तःनःपरस्परं १४ नजात्वस्यववंशस्यराज्ञांकश्चित्कदाचन राजासीद्यः प्रजापालप्रजानामप्रियोभवेत् १५ पितृ
वद्भ्रातृवच्चैवभवंतः पालयंतिनः नचदुर्योधनः किंचिदयुक्तंकृतवान्नृपः १६ यथाब्रवीतिधर्मात्मामुनिः सत्यवतीसुतस्तथाकुरुमहाराजस हिनः परमोगुरुः १७
त्यक्तावयंतुभवतादुःखशोकपरायणाः भविष्यामश्चिरंराजन्भवद्गुणशतैर्युताः १८ यथाशांतनुनागुप्ताराज्ञाचित्रांगदेनच भीष्मवीर्योपगूढेनपित्रातवचपार्थिव १९
भवद्बुद्धियुजाचैवपांडुनापृथिवीक्षिता तथादुर्योधनेनापिराज्ञासुपरिपालिताः २० नस्वल्पमपिपुत्रस्तेव्यलीकंकृतवान्नृप पितरीवसुविश्वस्तास्तस्मिन्नपिन
राधिपे २१ वयमास्मयथासम्यग्भवतोविदितंतथा तथावर्षसहस्राणिकुंतीपुत्रेणधीमता २२ पाल्यमानाधृतिमतासुखंविंदामहेनृप राजर्षीणांपुराणा
नांभवतांपुण्यकर्मणां २३ कुरुसंवरणादीनांभरतस्यचधीमतः वृत्तंसमनुयात्येषधर्मात्माभूरिदक्षिणः २४ नात्रवाच्यंमहाराजसुसूक्ष्ममपिविद्यते उषितास्मसु
खंनित्यंभवतापरिपालिताः २५ सुसूक्ष्मंचव्यलीकंतेसपुत्रस्यनविद्यते यत्तुज्ञातिविमर्देस्मिन्नात्थदुर्योधनंप्रति २६ भवंतमनुनेष्यामितत्रापिकुरुनंदन
वाह्मणउवाच नतद्दुर्योधनकृतंनचतद्भवताकृतं नकर्णसौबलाभ्यांवाकुरवोयत्क्षयंगताः २७ दैवंतत्तुविजानीमोयन्नशक्यंप्रवाधितुं दैवंपुरुषकारेणन
शक्यमपिवाधितुं २८ अक्षौहिण्योमहाराजदशाष्टौचसमागताः अष्टादशाहेनहताःकुरुभिर्योधपुंगवैः २९ भीष्मद्रोणकृपाद्यैश्चकर्णेनचमहात्मना यु
युधानेनवीरेणधृष्टद्युम्नेनचैवह ३० चतुर्भिः पांडुपुत्रैश्चभीमार्जुनयमैस्तथा नचक्षयोयंनृपतेकृतेदैवबलादभूत् ३१ अवश्यमेवसंग्रामेक्षत्रियेणवि
शेषतः कर्तव्यंनिधनंकालेमर्तव्यंक्षत्रबंधुना ३२ तैरियंपुरुषव्याघ्रैर्विद्यावाहुबलान्वितैः पृथिवीनिहतासर्वासहयासरथद्विपा ३३ नसराज्ञांवधेसूनुः
कारणंतेमहात्मनां नभवान्नचतेभृत्यानकर्णोनचसौबलः ३४ यद्विशस्ताःकुरुश्रेष्ठाराजानश्चसहस्रशः सर्वंदैवकृतंविद्धिकोत्रकिंवक्तुमर्हति ३५
गुरुर्मतोभवानस्यकृत्स्नस्यजगतःप्रभुः धर्मात्मानमतस्तुभ्यमनुजानीमहेसुतं ३६ लभतांवीरलोकान्ससहायोनराधिपः द्विजाग्र्यैःसमनुज्ञातस्त्रिदिवेमोद

© Dharmartha Trust J&K. Digitized By eGangotri

तांसरं ३७ प्राप्स्यते च मया सुराणं धर्मं च परमां स्थितिं वेदधर्मं च कृत्स्नेन सम्यक् च भवत्सुव्रत ३८ दृष्टिप्रदानमपि ते पांडवास्मृतिनोऽन्यथा समर्थो ह्यपि दिवस्या
पिपालने किं पुनः क्षितेः ३९ अनुवत्स्यंति वा वीमसमेषु विषमेषु च प्रजाः कुरुकुल श्रेष्ठ पांडवान्शीलभूषणान् ४० ब्रह्मदेयाग्रहारांश्च परिबर्हांश्च पार्थि
वः पूर्वराजाभिपन्नांश्च पालयस्यैव पांडवः ४१ दीर्घदर्शी मृदुर्दांतस्सदा वैश्रवणो यथा अक्षुद्रसचिवश्चायं कुंतीपुत्रो महात्मना ४२ अप्यमित्रे दयावांश्च शुचि
श्च भरतर्षभः ऋजु पश्यति मेधावी पुत्रावस्मातिनं सदा ४३ विप्रियं च जनस्यास्य संसर्गाद्भवतां सवै न करिष्यंति राजर्षे तथा भीमार्जुनादयः ४४ मंदा मृदुषु
कौरव्य तीक्ष्णाश्चाशीविषोपमाः वीर्यवंतो महात्मानः पौराणां च हिते रताः ४५ न कुंती न च पांचाली न चोलूपी न सात्वती अस्मिन् जने करिष्यंति प्रति
कूलानि कर्हिचित् ४६ भवत्कृतमिमं स्नेहं युधिष्ठिरविवर्द्धितं न पृष्ठतः करिष्यंति पौरजानपदा जनाः ४७ अधर्मिष्ठानपि सतः कुंतीपुत्रो महारथाः मा
नवा मा लयिष्यंति भूत्वा धर्मपरायणाः ४८ स राजन्मानसं दुःखमपनीय युधिष्ठिरात् कुरु कार्याणि धर्म्याणि नमस्ते पुरुषर्षभ ४९ वैशंपायन उवाच तस्य तद्
वचनं धर्म्यमनुमान्य गुणोत्तरं साधु साध्विति सर्वः स जनः प्रतिगृहीतवान् ५० धृतराष्ट्रश्च तद्वाक्यमभिपूज्य पुनः पुनः विसर्जयामास तदा प्रकृतीस्तु शनैः शनैः
५१ स तैः संपूजितो राजा शिवेनावेक्षितस्तथा प्रांजलिः पूजयामास तं जनं भरतर्षभ ५२ ततो विवेश भवनं गांधार्या सहितो निजं व्युष्टायां चैव शर्वर्यां य
चकार निबोध तत् ५३ इति आश्रमवासिके पर्वणि वैशंपायन उवाच ततो रजन्यां व्युष्टायां धृतराष्ट्रोंबिकासुतः विदुरं प्रेषयामास युधिष्ठिरनिवेशनं १ स ग
त्वा राजवचनादुवाचाच्युतमीश्वरं युधिष्ठिरं महातेजाः सर्वबुद्धिमतां वरः २ धृतराष्ट्रो महाराजो वनवासाय दीक्षितः गमिष्यति वनं राजन्नागतां कार्तिकीमि
मां ३ स त्वां कुरुकुलश्रेष्ठ किंचिदर्थमभीप्सति श्राद्धमिच्छति दातुं स गांगेयस्य महात्मनः ४ द्रोणस्य सोमदत्तस्य वाल्हीकस्य च धीमतः पुत्राणां चैव सर्वे
षां ये चास्य सुहृदो हताः यदि चाप्यनुजानीषे सैंधवापसदस्य च ५ एतच्छ्रुत्वा तु वचनं विदुरस्य युधिष्ठिरः ६ हृष्टः संपूजयामास गुडाकेशश्च पांडवः न तु भीमो दृढक्रोध

© Dharmartha Trust J&K. Digitized By eGangotri

वि१

स्तद्वोजयहेतदा ७ विदुरस्समहातेजा दुर्योधनकृतंस्मरन् अभिप्रायंपरिज्ञाय भीमसेनस्यफाल्गुनः ८ किरीटीकिंचिदानम्य तमुवाचनरर्षभं भीमराजापिताव
द्धोवनवासायदीक्षितः ९ दातुमिच्छतिसर्वेषांसुहृदामौर्ध्वदेहिकं भवतानिर्जितंवित्तंदातुमिच्छतिकौरवः १० भीष्मादीनांमहाबाहोतदनुज्ञातुमर्हसि दिष्ट्या
त्वद्यमहाबाहोधृतराष्ट्रःप्रयाचते ११ यांचितोयःपुरास्माभिःपश्यकालस्यपर्ययं योसौपृथिव्याःकृत्स्नायाभर्ताभूत्वानराधिपः १२ परैर्विनिहतामात्योव
नंगंतुमभीप्सति मातेन्यत्पुरुषव्याघ्रदीनाद्भवतुदर्शनं १३ अयशस्यमतोन्यत्स्यादधर्मश्चमहाभुज राजानमुपशिक्षस्वज्येष्ठंभ्रातरमीश्वरं १४ अर्हंस्त्वमसि
दातुंवैनादातुंभरतर्षभ एवंब्रुवाणांबीभत्सुंधर्मराजोप्यपूजयत् १५ भीमसेनस्त्वसक्रोधःप्रोवाचेदंवचस्तदा वयंभीष्मस्यदास्यामःप्रेतकार्यंतुफाल्गुन १६
सोमदत्तस्यनृपतेर्भूरिश्रवसएवच वाह्लीकस्यचराजर्षेर्द्रोणस्यचमहात्मनः १७ अन्येषांचैवसर्वेषांकुंतीकर्णायदास्यति श्राद्धानिपुरुषव्याघ्रमादात्कौ
रवोनृपः १८ इतिमेवर्त्ततेबुद्धिर्मातोनंदंतशत्रवः कष्टात्कष्टतरंयांतुसर्वेदुर्योधनादयः १९ यैरियंपृथिवीकृत्स्नाघातिताकुलपांसनैः कुतस्त्वमसिविस्मृ
त्यवैरंद्वादशवार्षिकं २० अज्ञातवासंगहनंद्रौपदीशोकवर्धनं कतदाधृतराष्ट्रस्यस्नेहोस्मासुभवत्तदा कृष्णाजिनोपसंवीतोहृताभरणभूषणः सार्धंपां
चाल्यपुत्र्यात्वंराजानमुपजग्मिवान् २२ कतदाद्रोणभीष्मौतौसोमदत्तोपिवाभवत् यत्त्रयोदशसमावनेवन्येनजीवथ २३ नतदात्वांपिताज्येष्ठःपितृत्वे
नाभिवीक्षते किंतेतद्विस्मृतंपार्थयदेषकुलपांसनः २४ दुर्बुद्धिर्विदुरंप्राहद्यूतेकिंजितमित्युत तमेवंवादिनंराजाकुंतीपुत्रोयुधिष्ठिरः २५ उवावव
चनंधीमानजोषमास्वेतिभर्त्सयन् आश्रमवासिकेपर्वणि अर्जुनउवाच भीमज्येष्ठोगुरुर्मेत्वंनातोन्यद्वक्तुमुत्सहे धृतराष्ट्रस्तुराजर्षिःसर्वथामानम
र्हति १ नस्मरंत्यपराद्धानिस्मरंतिसुकृतान्यपि असंभिन्नार्यमर्यादाःसाधवःपुरुषोत्तमाः २ इतितस्यवचःश्रुत्वाफाल्गुनस्यमहात्मनः विदुरंप्राहध
र्मात्माकुंतीपुत्रोयुधिष्ठिरः ३ इदंमद्वचनात्क्षत्तःकौरवंब्रूहिपार्थिवं यावदिच्छतिपुत्राणांश्राद्धंतावद्ददाम्यहं ४ भीष्मादीनांचसर्वेषांसुहृदामासका

आ० ९

रिणां ममशोकादितिविभोमामूढ्ः सदुर्मनाः ५ वैशं० इत्युक्तोधर्मराजस्तमर्जुनंप्रत्यभाषत भीमसेनःकार्यादेशाद्वीभत्सांचक्रेधनंजयं ६ ततःसविदुरं
धीमान्वाक्यमाहयुधिष्ठिरः भीमसेनेननकोपंसन्नृपतिः कर्तुमर्हति ७ परिक्लिष्टोहिभीमोयंहिमवृष्ट्यातपादिभिः दुःखैर्बहुविधैर्धीमानरण्येविदितंतवैव ८ किंमद्वं
तद्वचनाद्ब्रूहिराजानंभरतर्षभ यद्यदिच्छसिपापत्वङ्गृहस्थतामद्याहादिति ९ यन्मात्सर्यमयंभीमः करोतिभृशदुःखितः नतन्मनसिकर्तव्यमितिवाच्यः सपार्थि
वः १० स्तदाराजाविप्रेभ्योयथेष्टंकृपतांक्रिया पुत्राणांसुहृदांचैवगच्छत्वानृणमघसः ११ इदंचापिशरीरंमेतवायत्तंजनाधिप धनानिचेतिविद्धित्वंनमेत्र
चास्तिसंशयं १२ इतिआश्रमवासिकेपर्वणि वैशंपायनउवाच एवमुक्तस्तुराज्ञासविदुरोबुद्धिसत्तमः धृतराष्ट्रमुपेत्यैवंवाक्यमाहमहार्थवत् १ उक्तोयुधि
ष्ठिरोराजाभवद्वचनमादितः सचसंश्रुत्यवाक्यंतेप्रशशंसमहाद्युतिः २ बीभत्सुश्चमहातेजानिवेदयतितेगृहान् वसतस्यगृहेतस्यप्राणानपिचकेवलान् ३
ध्व धर्मराज पुत्रस्तेराज्यंप्राणान्धनानिच अनुजानातिराजर्षेयच्चान्यदपिकिंचन ४ भीमस्तुसर्वदुःखानिसंसृज्यबहुलान्युत दुःखादिवमहाबाहुरनुजज्ञेविनिश्व
सन् ५ सराजन्धर्मशीलेनराज्ञाबीभत्सुनातथा अनुनीतोमहाबाहुः सौहृदे पितोपिच ६ नचमन्युस्त्वयाकार्यइतित्वांप्राहधर्मराट् संस्मृत्यभीमस्तद्वैरं
यदन्यायवदाचरत् ७ एवंप्रायोहिधर्मोयंक्षत्रियाणांनराधिप युद्धेक्षत्रियधर्मेचनिरतोयंवृकोदरः ८ वृकोदरकृतेचाहमर्जुनश्चपुनःपुनः प्रसीदयाचेव
पतेभवान्प्रभुरिहास्तियत् ९ तत्तदातुभवान्वित्तंयावदिच्छसिपार्थिव त्वमीश्वरोसिराज्यस्यप्राणानामपिभारत १० ब्रह्मदेयाग्रहाराश्चपुत्राणांमौर्ध्वदेहिकं
इतोरत्नानिगाश्चैवदासीदासमजाविकं ११ आनयित्वाकुरुश्रेष्ठोब्राह्मणेभ्यःप्रयच्छतु दीनांधकृपणेभ्यश्चतत्रतत्रनृपाज्ञया १२ बहुन्नरसपानाढ्याः सभा
विदुरकारय गवांनिपानान्यन्यच्चविविधंपुण्यकर्मकुरु १३ इतिमामब्रवीद्राजापार्थश्चैवधनंजयः यदत्रानंतरंकार्यंतद्भवान्वक्तुमर्हति १४ इत्युक्तोविदुरेणाथ
धृतराष्ट्रोभ्यनंदत मनश्चक्रेमहादानेकार्तिक्यांजनमेजय १५ इतिआश्रमवासिकेपर्वणि वैशंपायनउवाच विदुरेणैवमुक्तस्तुधृतराष्ट्रोजनाधिपः प्री राम०

९

© Dharmartha Trust J&K. Digitized by eGangotri

तिमानमथज्ञाजनराज्ञोजिस्मोश्वकमीमि १ ततोभिरूपान्भीष्मापब्राह्मणान्ऋषिसत्तमान पुत्रार्थेसमदद्यैवरत्नमीह्यमहस्रशः २ कारयित्वान्नपानानिया
नान्याच्छादनानिच सुवर्णमणिरत्नानिदासीदासमजाविकं ३ कंबलानिचरत्नानिग्रामानक्षेत्रानजाविकं सालंकारानगजानश्वान्कन्याश्चैववरस्त्रियः
४ उद्दिश्योद्दिश्यसर्वेभ्योददौसनृपसत्तमः द्रोणंसंकीर्त्यभीष्मंचसोमदत्तंचवाल्हिकं ५ दुर्योधनंचराजानंपुत्रांश्चैवपृथक्पृथक् जयद्रथपुरोगांश्चसुहृदश्चा
पिसर्वशः ६ सश्राद्धयज्ञोववृतेबहुशोधनदक्षिणः अनेकधनरत्नौघोयुधिष्ठिरमतेतदा ७ अनिशंयत्रपुरुषागणकालेखकास्तथा युधिष्ठिरस्यवचना
दपृच्छंतस्मतंनृपं ८ आज्ञापयकिमेतेभ्यः प्रदायंदीयतामिति तदुपस्थितमेवात्रवचनांते ददुस्तदा ९ शतदेयेशतशतंसहस्रेचायुतंतथा दीयतेव
चनाद्राज्ञः कुंतीपुत्रस्यधीमतः १० एवंसवसुधाराभिर्वर्षमाणोनृपांबुदः तर्पयामासविप्रांस्तान्वर्षनशस्यमिवांबुदः ११ ततोनंतरमेवात्रसर्ववर्णा
न्महामते अन्नपानरसौघेनप्लावयामासपार्थिवः १२ सवस्त्रधनरत्नौघोमृदंगनिनदोमहान् गवाश्वमकरावर्तोनानारत्नमहाकरः १३ ग्रामाग्रहारद्वीपा
ढ्योमणिहेमजलार्णवः जगत्संप्लावयामासधृतराष्ट्रोडुपोद्धतः १४ एवंसपुत्रपौत्राणांपितॄणामात्मनस्तथा गांधार्याश्चमहाराजप्रददावौर्ध्वदेहिकं १५
परिश्रांतोयदासीत्सददद्दानान्यनेकशः निवर्तयामासतदादानयज्ञंनराधिपः १६ एवंसराजाकौरव्यश्चक्रेदानमहाक्रतुं नटनर्तकलास्याढ्यंबह्वन्नर
सदक्षिणं १७ दशाहमेवंदानानिदत्वाराजांबिकासुतः बभूवपुत्रपौत्राणामनृणोभरतर्षभ १८ इतिश्रीआश्रमवासिकेपर्वणि वैशंपायनउवाच ततः
प्रभातेराजासधृतराष्ट्रोंबिकासुतः आहूयपांडवान्वीरान्वनवासेकृतक्षणः १ गांधारीसहितोधीमानभ्यनंदद्यथाविधि कार्तिक्यांकारयित्वेष्टिंब्राह्मणैर्वे
दपारगैः २ अग्निहोत्रंपुरस्कृत्यवल्कलाजिनसंवृतं वधूजनवृतोराजानिर्ययौभवनात्ततः ३ ततःस्त्रियःकौरवपांडवानांयाश्चापराःकौरवराजवंश्याः ता
सांनादःप्रादुरासीत्तदानींवैचित्रवीर्येनृपतौप्रयाते ४ ततोराजाप्रांजलिर्वेपमानोयुधिष्ठिरःसस्वरंबाष्पकंठः विमुच्योच्चैर्महानादंहिसाधोकयासती

© Dhamarth Trust & Digitized By eGangotri

आ॰
१०

त्यपतन्नानमस्तो ५ तथार्जुनस्तीव्रदुःखाभिसंतप्तो मुहुर्मुहुर्निःश्वसन् भारताग्र्यः युधिष्ठिरं मैवमित्येवमुक्त्वा निगृह्याथो दीनवत्तस्थौ दुर्मनाः ६ वृकोदरः फाल्गु
नश्चैव वीरो माद्रीपुत्रौ विदुरः संजयश्च वैश्यापुत्रः सहितो गौतमेन धौम्यो विप्राश्चान्वयुर्बाष्पकंठाः ७ कुंतीं गांधारीं बद्धनेत्रां व्रजंतीं स्कंधासक्तां हस्तमथोद्व
हंती राजा गांधार्याः स्कंधदेशे वसज्य पाणिं ययौ धृतराष्ट्रः प्रतीतः ८ तथा कृष्णा द्रौपदी सात्वती च बालापत्या चोत्तरा कौरवी च चित्रांगदा याश्च काश्चित्स्त्रि
योन्याः सार्धं राज्ञा प्रस्थितास्ता वधूभिः ९ तासां नादो रुदतीनां तदासीद्राजन् दुःखात् कुररीणामिवोच्चैः ततो निष्पेतुर्ब्राह्मणक्षत्रियाणां विशां शूद्राणां चै
व भार्याः समंतात् १० तन्निर्याणे दुःखितः पौरवर्गो गजाह्वये चैव बभूव राजन् यथापूर्वं गच्छतां पांडवानां द्यूते राजन् कौरवाणां सभायाः इत्याश्रमवासि
के पर्वणि। ११ [redacted] ततः प्रासादहर्म्येषु वसुधायां च पार्थिव नारीणां च नराणां च निःस्वनः सुमहानभूत् १ स राजा राजमार्गेण नृना
रीसंकुलेन च कथंचिन्निर्ययौ धीमान् वेपमानः कृतांजलिः २ स वर्धमानद्वारेण निर्ययौ गजसाह्वयात् विसर्जयामास च तं जनौघं स मुहुर्मुहुः ३ वनं गं
तुं च विदुरो राज्ञा सह कृतनिश्चयः संजयश्च महामात्रः सूतो गावल्गणिस्तथा ४ कृपं निवर्तयामास युयुत्सुं च महारथं धृतराष्ट्रो महीपालः परिदाय युधिष्ठिरे ५
निवृत्ते पौरवर्गे च राजा सांतःपुरस्तदा धृतराष्ट्राभ्यनुज्ञातो निवर्तितुमियेष ह ६ सोऽब्रवीन्मातरं कुंतीं वनं तमनुजग्मुषीं अहं राजानमन्विष्ये भवती विनिवर्ततां
७ वधूपरिवृता राज्ञि नगरं गंतुमर्हसि राजा यात्येष धर्मात्मा तापसे कृतनिश्चयः ८ इत्युक्ता धर्मराजेन बाष्पव्याकुललोचना जगामैव तदा कुंती गांधारीं परिगृह्य ह
ह ९ कुंत्युवाच सहदेवे महाराज मा प्रमादं कथाः क्वचित् एष मामनुरक्तो हि राजंस्त्वां चैव सर्वदा १० कर्णं स्मरेथाः सततं संग्रामेष्वपलायिनं अवकीर्णो हि स
मरे वीरो दुष्प्रज्ञया तदा ११ आयसं हृदयं नूनं मंदाया मम पुत्रकं पन्नसूर्यजमपश्यंत्याः शतधा यन्न दीर्यते १२ एवंगते तु किं शक्यं मया कर्तुमरिंदम ममदो
षोऽयमत्यर्थं ख्यापितो यन्न सूर्यजः तन्निमित्तं महाबाहो दानं दद्यास्त्वमुत्तम सहैव भ्रातृभिः सार्धं सूर्यजस्यारिमर्दन १४ द्रौपद्याश्च प्रिये नित्यं स्थातव्यमरिकर्शन राम॰
१०

३३

भी मसेनोर्जुनश्चैव नकुलश्च कुरूद्वह २५ ममाधेयास्त्वया राजंस्त्वय्यद्य कुलधुर्गता श्वश्रूः श्वशुरयोः पादान शुश्रूषंती वने त्वहं गांधारीसहिता वत्स्ये ताप
सी मलपंकिनी २६ वैशं० एवमुक्तः स धर्मात्मा भ्रातृभिः सहितो वशी विषादमगमद्धीमान्न च किंचिदुवाच ह २७ मुहूर्तमिव तु ध्यात्वा धर्मराजो युधिष्ठिरः उवा
च मातरं दीनश्चिंताशोकपरायणः २८ किमिदं ते व्यवसितं नैवं त्वं वक्तुमर्हसि न त्वामभ्यनुजानामि प्रसादं कर्तुमर्हसि २९ पुरोद्यतान्पुरा ह्यस्मानुत्साह्य
[illegible] प्रियदर्शने विदुलाया वचोभिस्त्वं नास्मांस्त्यक्तुमर्हसि ३० निहत्य पृथिवीपालान्राज्यं प्राप्तमिदं त्वया तव प्रज्ञामुपश्रुत्य वासुदेवान्नरर्षभात्
३१ क्व सा बुद्धिरियं चाद्य भवत्या श्रुतं मया क्षत्रधर्मे स्थितिं चोक्त्वा तस्या विचलितुमिच्छसि ३२ अस्मानुत्सृज्य राज्यं च स्नुषां चेमां यशस्विनीं कथं वत्स्यसि दु
र्गेषु वनेषु प्रसीद मे ३३ इति बाष्पकलां वाचं कुंती पुत्रस्य शृण्वती साजगामाश्रुपूर्णाक्षी भीमसेनमिदं ब्रवीत् ३४ यदा राज्यमिदं कुंति भोक्तव्यं पुत्रवर्ति
ते प्राप्तं राजधर्माश्च तदेयं ते कुतो मतिः ३५ किं वयं कारिताः पूर्वं भवत्या पृथिवीक्षयं कस्य हेतोः परित्यज्य वनं गंतुमभीप्ससि ३६ वनाच्चापि किमानी
ता भवत्या बालका वयं दुःखशोकसमाविष्टौ माद्रीपुत्राविमौ तथा ३७ प्रसीद मातर्मा गास्त्वं वनमद्य यशस्विनी श्रियं यौधिष्ठिरीं मातर्भुंक्ष्व तावद्बलार्जितां
३८ इति सा निश्चितैवाशु वनवासाय भाविनी लालप्यतां बहुविधं पुत्राणां नाकरोद्वचः ३९ द्रौपदी चान्वयाच्छ्वश्रूं विषण्णवदना तदा वनवासाय गच्छंतीं रु
दती भद्रया सह ४० सा पुत्रान्रुदतः सर्वान्मुहुर्मुहुरवेक्षती जगामैव महाप्राज्ञा वनाय कृतनिश्चया ४१ अन्वयुः पांडवास्तां तु सभृत्यांतःपुरास्तथा तत
:प्रमृज्य साश्रूणि पुत्रानवचनमब्रवीत् ४२ आश्रमवासिके पर्वणि कुंत्युवाच एवमेतन्महाबाहो यथा वदसि पांडव कृतमुद्धर्षणं पूर्वं मया वः सीदतां नृपाः
१ द्यूतापहृतराज्यानां पतितानां सुखादपि ज्ञातिभिः परिभूतानां कृतमुद्धर्षणं मया २ कथं पांडोर्न नश्येत संततिः पुरुषर्षभाः यशश्च वो न नश्येत इति चोद्धर्ष
णं कृतं ३ यूयमिंद्रसमाः सर्वे देवतुल्यपराक्रमाः मा परेषां मुखप्रेक्षाः स्थितेत्येवं तत्कृतं मया ४ कथं धर्मभृतां श्रेष्ठो राजा त्वं वासवोपमः पुनर्वने न दुःखी स्याद

६३ श्लो १

आ०
११

तिवोदूर्षरांक्रतं ५ नागायुतसमप्राणाः ख्यातविक्रमपौरुषः नायंभीमोत्ययंगच्छेदितिवोदूर्षरांक्रतं ६ भीमसेनात्ववरजस्तथायंवासवोपमः विजयो
नावसीदेतइतिचोदुर्षरांक्रतं ७ नकुलः सहदेवश्चतथेमौगुरुवर्त्तिनौ क्षुधाकथंनसीदेतामितिचोदुर्षरांक्रतं ८ इयंचबृहतीश्यामातथा त्यायतलो
चना वृथासभातलेक्लिष्टामाभूदितिचतत्क्रतं ९ प्रेक्षतामेववोभीमसेंतीकस्त्वीमिव स्त्रीधर्मिणीमरिष्टांगींतथाद्यूतपराजितां १० दुःशासनोयदामौ
र्ख्याद्दासीवत्समकर्षत तदैवविदितंमह्यंपराभूतमिदंकुलं ११ निषण्णाःकुरवश्चैवतदामेश्वसुरादयः सादैवंनाथमिच्छंतीव्यलपत्कुररीयथा १२ केशपक्षेपरा
मृष्टापापेनहतबुद्धिना यदादुःशासनेनैषातदामुह्याम्यहंनृप १३ युष्मत्तेजोविवृद्ध्यर्थंमयायुष्यदूर्षरांक्रतं तदानींविदुलावाक्येरितितद्दित्तपुत्रकाः १४
कथंनराजवंशोयंनश्येत्प्राप्यसुतान्मम पांडोरितिमयापुत्रास्तस्माद्दुर्षरांक्रतं १५ नतस्यपुत्राःपौत्रावाकृतवर्तेवपार्थिवाः लभंतेसुकृतांलोकान्यस्मादं
शः प्रणश्यति १६ भुक्तंराज्यफलंपुत्राभर्त्तुर्विपुलंपुरा महादानानिदत्तानिपीतः सोमोयथाविधि १७ नाहमात्मफलार्थंवैवासुदेवमचूचुदं विदुलायाः
प्रलापैस्तैः पालनार्थंचतत्क्रतं १८ नाहंराज्यफलंपुत्राः कामयेपुत्रवर्जितं पतिलोकानहंपुण्यान्कामयेतपसाविभो १९ श्वश्रूःश्वशुरयोः कृत्वाशु २५
श्रूषांवनवासिनोः तपसाशोषयिष्यामियुधिष्ठिरकलेवरं २० निवर्त्तस्वकुरुश्रेष्ठभीमसेनादिभिः सह धर्मेतेधीयतांबुद्धिर्मनस्तेमहदस्तुच २१ इतिमहाभा
रतेआश्रमवासिकेपर्वणि वैशं० कुंत्यास्तुवचनंश्रुत्वापांडवाराजसत्तम व्रीडिताः संन्यवर्त्ततपांचाल्यासहितानघाः १ ततः शब्दोमहानेवसर्वेषामभवत्तदा
अंतःपुराणांरुदतांदृष्ट्वाकुंतींतथागतां २ प्रदक्षिणमथावृत्यराजानंपांडवास्तदा अभिवाद्यन्यवर्त्तंतपृथांतामनिवर्त्यवै ३ ततोब्रवीन्महातेजाधृतराष्ट्रो
ंबिकासुतः गांधारींविदुरंचैवसमाभाष्यावगृह्यच ४ युधिष्ठिरस्यजननीदेवीसाधुनिवर्त्त्यतां यथायुधिष्ठिरः प्राहतत्सर्वंसत्यमेवहि ५ पुत्रैश्वर्यंमहदि
दमपास्यचमहाफलं कानुगच्छेद्वनंदुर्गंपुत्रानुत्सृज्यमूढवत् ६ राज्यस्थयापितप्तंस्यादानंव्रतंकृतंमहत् अनयाशक्यमेवाद्यश्रूयतांचवचोमम ७ गां राम
२२

© Dharmartha Trust J&K. Digitized by eGangotri

मु१ नं५ रा१

धारीपरितश्शेस्मिवधाः श्रूयशोनवै तस्मात्त्वमेनां धर्मज्ञे समनुज्ञातमर्हसि ८ इत्युक्त्वा सौवलेयात्रराज्ञां कुंतीमुवाचह ततस्तं वीरराजवचनं स्वंवाक्यं विशेषवत्‌ ९
नवसावनवासायरुवीकृतमतिंतदा शक्नोस्यपार्थवर्तं पितं कुंतीं धर्मपरांसतीं १० तस्यास्ताद्व्यवसितं ज्ञात्वा आश्रमवासायं कुरुस्त्रियः निवृत्तांश्च कुरुश्रेष्ठान्‌ दृष्ट्वा
प्ररुरुदुस्तदा ११ उपावृत्तेषु पार्थेषु सर्वास्तेव्वधू सुवर्षयोराजामहाप्राज्ञो धृतराष्ट्रोवनंतदा १२ पांडवाश्चातिदीनास्ते दुःखशोकपरायणाः यानैः स्त्रीस
हिताः सर्वेपुरंप्रविविशुस्तदा १३ तदहृष्टमनानंदंगतोत्सवमिवाभवत्‌ नगरं हास्तिनपुरं सस्त्रीवृद्धकुमारकं १४ सर्वेवासन्निरुत्साहाः पांडवाजातमन्य
वः कुंत्याहीनाः सुदुःखार्त्ता वत्साइवविनाकृताः १५ धृतराष्ट्रस्तुतेनाह्ना गत्वासमहद्दूरं ततोभागीरथीतीरे निवासमकरोत्प्रभुः १६ प्रादुःकृतायथान्या
पमग्नयोवेदपारगैः व्यराजंतद्विजश्रेष्ठैस्तत्रतत्रतपोवने १७ प्रादुःकृताग्निरभवत्सचवृद्धोनराधिपः सराजाग्नीन्पर्युपास्यहुत्वाचविधिवत्तदा १८ संध्यागतंस
कृत१ हस्रांशुमुपतिष्ठमाहतः विदुरः संजयश्चैवराज्ञः शय्यांकुशैस्ततः १९ चक्रतुः कुरुवीरस्यगांधार्याश्चाविदूरतः गांधारीसंनिकर्षेतनिषसादकुशेसरवं २० प्यां:१
युधिष्ठिरस्यजननीकुंतीसाधुव्रतेस्थिता तेषांसंश्रवसेवाप्युनिषेदुर्विदुरादयः २१ याजकाश्चयथोद्देशंद्विजायेचानुयायिनः प्राधीतद्विजमुख्यासासंप्रज्व
लितपावका २२ बभूवतेषांरजनीब्राह्मीवप्रीतिवर्द्धिनी ततोरात्र्यांव्यतीतायांकृतपूर्वाह्निकक्रियाः २३ हुत्वाग्निंविधिवत्सर्वेप्रययुस्तेयथाक्रमं उदङ्मु
खानिरीक्षंतउपवासपरायणाः २४ सतेषामतिदुःखोभून्निवासः प्रथमेहनि शोचतांशोच्यमानानांपौरजानपदैर्जनैः २५ आश्रमवासिकेपर्वणि वै
शंपायनउवाच ततोभागीरथीतीरेमेध्येपुण्यजनोचिते निवासमकरोद्राजाविदुरस्यमतेस्थितः १ तत्रैनंपर्युपातिष्ठन्‌ ब्राह्मणावनवासिनः क्षत्रविट्शू
द्रसंघाश्चबहवोभरतर्षभ २ सतैः परिवृतोराजाकथाभिः परिनंद्यतान्‌ अनुजज्ञेस शिष्यांश्चविधिवत्प्रतिपूज्यच ३ सायाह्नेसमहीपालस्ततोगंगामु
पेत्यच चकारविधिवच्छौचंगांधारीचयशस्विनी ४ तथैवान्येपृथक्सर्वेतीर्थेष्वाप्लुत्यभारत चक्रुः सर्वाः क्रियास्तत्रपुरुषाविदुरादयः ५ कृतशौचंततोवि

© Dharmartha Trust J&K. Digitized by eGangotri

आ० स्वश्वशुरं कुंतिभोजजा गांधारीं वध्वाश्च जनन्गंगातीरमुपापनयत ६ राजन्तपानकैस्तत्र कृतोवेदीयीतस्तवः न्नृहावतत्र वह्निंसन्नपतिः सत्यसंगरः ७ ततोभागीरथी
१२ तीरात्कुरुक्षेत्रंजगाम सः सानुगोनृपतिर्विद्वान्नियतः संयतेंद्रियः ८ तत्राश्रममयं धीमानभिगम्यसपार्थिवः आससादाथराजर्षिं शतयूपंमनीषिणं ९
सहिराजामहानासीत्केकयेषुपरंतप सपुत्रंमनुजैश्वर्येनिवेश्यवनमाविशत १० तेनासौसहितोराजाययौव्यासाश्रमंप्रति तत्रैनंविधिवद्राजन्प्रत्यगृह्णात्कुरू
द्वहं ११ सदीक्षांतत्रसंप्राप्यराजाकौरवनंदनः शतयूपाश्रमेतस्मिन्निवासमकरोत्तदा १२ तस्मैसर्वंविधिंराजन्राजाचख्यौमहामतिः आरण्यकंमहाराजव्यासस्या
नुमतेतदा १३ एवंसतपसाराजाधृतराष्ट्रोमहामनाः योजयामासचात्मानंतांश्चाप्यनुचरांस्तदा १४ तथैवदेवीगांधारीवल्कलाजिनधारिणी कुंत्यासहमहारा
जसमानव्रतचारिणी १५ कर्मणामनसावाचाचक्षुषाचैवतेनृप सन्नियम्येंद्रियग्राममास्थितेपरमंतपः १६ त्वगस्थिभूतः परिशुष्कमांसोजटाजिनीवल्क ७६
लसंवृतांगः सपार्थिवस्तत्रतपश्चचारमहर्षिवत्तीव्रमपेतमोहः १७ क्षत्ताचधर्मार्थविदग्र्यबुद्धिः ससंजयस्तंनृपतिंसदारं उपाचरद्घोरतपोजितात्मातदाकृ
शोवल्कलचीरवासाः १८ आश्रमवासिकेपर्वणि वैशंपायनउवाच ततस्तत्रविनिश्रेष्ठाराजानंद्रष्टुमभ्ययुः नारदःपर्वतश्चैवदेवलश्चमहातपाः १ द्वैपाय
आ ५ नः सशिष्यश्चसिद्धाश्चमनीषिणः शतयूपश्चराजर्षिर्वृद्धः परमधार्मिकः २ तेषांकुंतीमहाराज पूजांचक्रेयथाविधि तेचापितुतुषुस्तस्यास्तापसाः परिचर्यया ३ ७५
तत्रधर्म्याः कथास्तातचक्रुस्तेपरमर्षयः रमयंतोमहात्मानंधृतराष्ट्रंजनाधिपं ४ कथांतरेतुकस्मिंश्चिद्देवर्षिर्नारदस्ततः कथामिमामकथयत्सर्वप्रत्यक्षदर्शि
वान ५ नारदउवाच केकयाधिपतिः श्रीमान्राजासीदकुतोभयः सहस्रचित्यइत्युक्तःशतयूपपितामहः ६ सपुत्रेराज्यमासज्यज्येष्ठेपरमधार्मिके सहस्रचित्यो
धर्मात्माप्रविवेशवनंनृपः ७ सगत्वातपसःपारंदीप्तस्यसनराधिपः पुरंदरस्यसंस्थानंप्रतिपेदेमहामनाः ततोवलेनैवरयोमहेंद्रसदनंगतः १० तथापृ
षध्रोराजासीद्राजन्वज्रधरोपमः सचापितपसायातोनाकपृष्ठमितोनृपः ११ अस्मिन्नरण्येनृपतिः स्तपस्तप्त्वादिवंगतः १३ शैलालयोमावराजासीद्राजन राम०
१२

रमधार्मिकः सम्यगस्मिंश्चनेत्रप्रातनोरिवममासवान् १४ द्वैपायनप्रसादाच्चत्वमपीदंतपोवने राजन्नवाप्यदुःप्रापांगतिमग्र्यांगमिष्यसि १५ त्वंचापिराजशार्दूल
तपसोंते श्रियायुतः गांधारीसहितोगंतागतिंतेषांमहात्मनां १६ पांडुःस्मरतिनित्यंत्वांबलहंतुःसमीपगः त्वांसदैवमहाराजश्रेयसासयोक्ष्यति १७ तवसुश्रूष
याचैवगांधार्याश्चयशस्विनी भर्तुः सलोकतामेषागमिष्यतिवधूस्तव १८ युधिष्ठिरस्यजननीसहिधर्मः सनातनः वयमेतत्प्रपश्यामोनेत्यतेदिव्यचक्षुषा
१९ प्रवेक्ष्यतिमहात्मानंविदुरश्चयुधिष्ठिरं संजयस्तदनुध्यानादितः स्वर्गमवाप्स्यति २० वैशं० एतच्छ्रुत्वाकौरवेंद्रोमहात्मासार्द्धंपत्न्याप्रीतिमान्संबभू
व विद्वान्वाक्यंनारदस्यप्रशस्यचक्रेपूजांचातुलांनारदाय २१ ततः सर्वेनारदंविप्रसंघाः संपूजयामासुरतीवराजन् राज्ञः प्रीत्याधृतराष्ट्रस्यतेवैपुनःपुनः
संप्रहृष्टास्तदानीं २२ वैशं० नारदस्यतुतद्वाक्यंप्रशशंसुर्द्विजसत्तमाः शतयूपस्तुराजर्षिर्नारदंवाक्यमब्रवीत् २३ अहोभगवतासृद्धाकुरुराजस्यवर्धिता
सर्वस्यचजनस्यास्यममचैवमहाद्युते २४ आश्रिकाविद्धिवक्तातंतांमेनिगदतः शृणु धृतराष्ट्रंप्रतिनृपंदेवर्षेलोकपूजितः २५ सर्वंवृत्तांततत्त्वज्ञोभवान्हिदिव्येन
चक्षुषा युक्तः पश्यसिविप्रर्षेगतीर्याविविधानरां २६ उक्तवान्नृपतीनांत्वंमहेंद्रस्यसलोकतां नत्वस्यनृपतेर्लोकाः कथितास्तेमहामुने २७ स्थानमस्य
नृपतेः श्रोतुमिच्छाम्यहंविभो त्वत्तः कीदृक्कदाचेतितन्ममाख्याहितत्वतः २८ इत्युक्तोनारदस्तेनवाक्यंसर्वमनोनुगं व्याजहारसभामध्येदिव्यदर्शीमहा
तपाः २९ नारदउवाच यदृच्छयाशक्रसदोगत्वाशक्रंशचीपतिं दृष्टवानस्मिराजर्षेतत्रपांडुंनराधिपं ३० तत्रेयंधृतराष्ट्रस्यकथासमभवन्नृपतपसोदुः
कारस्यास्ययदयंतप्यतेनृपः ३१ तत्राहमिदमश्रौषंशक्रस्यवदतः स्वयं वर्षाणित्रीणिशिष्टानिराज्ञोस्यपरमायुषः ३२ ततः कुबेरभवनंगांधारीसहितो
नृपः प्रयातोधृतराष्ट्रोयंराजराजाभिसत्कृतः ३३ कामगेनविमानेनदिव्याभरणभूषितः ऋषिपुत्रोमहाभागस्तपसादग्धकिल्बिषः ३४ संचरिष्यतिलो
कांश्चदेवगंधर्वरक्षसां स्वच्छंदेनेतिधर्मात्मायन्मांत्वमनुपृच्छसि ३५ देवगुह्यमिदंप्रीत्यामयावः कथितंमहत् भवंतोहिश्रुतधनास्तपसादग्धकिल्बिषाः ३६

वै १

आ० वैशंपायनउवाच इतितस्यवचःश्रुत्वादेवर्षेर्मधुरंवचः सर्वेसुमनसःप्रीताबभूवुःसचपार्थिवः ३२ एवंकथाभिरन्वास्यधृतराष्ट्रंमनीषिणः विप्रजग्मुर्यथाकामं
९३ तेसिद्धिंगतिमास्थिताः ३८ आश्रमवासिकेपर्वणि वैशंपायनउवाच वनंगतेकौरवेंद्रे दुःखशोकसमन्विताः बभूवुःपांडवाराजन्मातृशोकेनचान्विताः
:१ तथापौरजनःसर्वःशोचन्नास्तेजनाधिपं कुर्वाणाश्चकथास्तत्रब्राह्मणान्नृपतिंप्रति २ कथंनुराजावृद्धःसवनेवसतिनिर्जने गांधारीचमहाभागा
साचकुंतीपृथाकथं ३ सुखार्हःसहिराजर्षिरसुखीतद्वनंमहत्किमवस्थःसमासाद्यप्रज्ञाचक्षुर्हतात्मजः ४ सुदुःकरंकृतवतीकुंतीपुत्रानपश्यती
राजश्रियंपरित्यज्यवनंसासमरोचयत् ५ विदुरःकिमवस्थश्चभ्रातुःशुश्रूषुरात्मवान् सचगावल्गणिर्धीमान्भर्तृपिंडानुपालकः ६ आकुमारंचपौरा
स्तेचिंताशोकसमाहताः तत्रतत्रकथाश्चक्रुःसमासाद्यपरस्परं ७ पांडवाश्चैवतेसर्वेभृशंशोकपरायणाः शोचंतोमातरंवृद्धामूषुर्नातिचिरंपुरे ८ तथैववृ
द्धंपितरंहतपुत्रंजनेश्वरं गांधारींचमहाभागांविदुरंचमहामतिं ९ नैषांबभूवसंप्रीतिस्तान्विचिंतयतांतदा नराज्येनचनारीषुनवेदाध्ययनेषुच १० परं
निर्वेदमगमं[illegible]श्चिंतयंतोनराधिपं तच्चज्ञातिवधंघोरंसंस्मरंतःपुनःपुनः ११ अभिमन्योश्चबालस्यविनाशंरणमूर्धनि कर्णस्यचमहाबाहोःसंग्रामे
ष्वपलायिनः १२ तथैवद्रौपदेयानामन्येषांसुहृदामपि वधंसंस्मृत्यतेवीरानातिप्रमनसोभवन् १३ हतप्रवीरांपृथिवींहतरत्नांमप्रहृष्टवत् १५ वैराट्या
स्तनयंदृष्ट्वापितरंतेपरीक्षितं धारयंतिस्मतेप्राणांस्तवपूर्वपितामहाः १६ आश्रमवासिकेपर्वणि॥ ॥वैशंपायनउवाच एवंतेपुरुषव्याघ्राःपांड
वामातृनंदनाः स्मरंतोमातरंवीराबभूवुर्भृशदुःखिताः १ येराजकार्येषुपुराव्यासक्तानित्यशोभवन् तेराजकार्याणितदानाकार्षुःसर्वतःपुरे २ प्रविष्टा
इवशोकेननाभ्यनंदंतकिंचन संभाष्यमाणाअपितेनकिंचित्प्रत्यपूजयन् ३ तेस्मवीरादुराधर्षागांभीर्येसागरोपमाः शोकोपहतविज्ञानानष्टसंज्ञाइवा राम०

प ४ | चभारत सदैवचिंतयंतस्तेनसमंचोपलेभिरे १४ द्रौपदीहतपुत्रा सुभद्राचैवभामिनी नातिप्रीतियुतेदेव्यौतदास्तां ९३ × ४

© Dharmartha Trust J&K. Digitized By eGangotri

भवत ४ अचिंतयंश्च जननीं ततस्ते पांडुनंदनाः कथं नु वृद्धमिथुनं वहत्यति कृशा पृथा ५ कथं च स महीपालो हतपुत्रो निराश्रयः पत्न्या सह वसत्येको वने श्वा
पदसेविते ६ सा च देवी महाभागा गांधारी हतबांधवा पतिमंधं कथं वृद्धमन्वेति विजने वने ७ एवं तेषां कथयतामौत्सुक्यमभवत्तदा गमने चाभवद्बुद्धिर्धृतराष्ट्रदिदृ
क्षया ८ सहदेवस्तु राजानं प्रणिपत्येदमब्रवीत् अहो मे भवतो दृष्टं हृदयं गमनं प्रति ९ न हि त्वां गौरवेणाहमशकं वक्तुमंजसा गमनं प्रति राजेंद्र तदिदं समु
पस्थितं १० दिष्ट्या द्रक्ष्यामि तां कुंतीं वर्तयंतीं तपस्विनीं जटिलां तापसीं वृद्धां कुशकाशशयानां ११ प्रासादहर्म्यसंवृद्धामत्यंतं सुखभागि
नीं कदा नु जननीं श्रांतां द्रक्ष्यामि भृशदुःखितां १२ अनित्याः खलु मर्त्यानां गतयो भरतर्षभ कुंती राजसुता यत्र वसत्यसुखिता वने १३ सहदेववचः श्रुत्वा द्रौ
पदी योषितां वरा उवाच देवी राजानमभिपूज्याभिनंद्य च १४ कदा द्रक्ष्यामि तां देवीं यदि जीवति सा पृथा जीवंत्या ह्यद्य मे प्रीतिर्भविष्यति जनाधिप १५ एषा ते
स्तु मतिर्नित्यं धर्मे ते रमतां मनः यो ध त्वमस्मान्राजेंद्र श्रेयसा योजयिष्यसि १६ अग्रपादस्थितं चेमं विद्धि राजन्वधू भरतर्षभ सेनाध्यक्षान्समानाय्य सर्वा
निदमुवाच ह १८ निर्यापयत मे सेनां प्रभूतरथकुंजरां द्रक्ष्यामि वनसंस्थं च धृतराष्ट्रं महीपतिं १९ स्त्र्यध्यक्षांश्चाब्रवीद्राजा यानानि विविधानि मे सज्जी
क्रियंतां सर्वाणि शिबिकाश्च सहस्रशः २० शकटापणवेशाश्च कोषः शिल्पिन एव च निर्यांतु कोषपालाश्च कुरुक्षेत्राश्रमं प्रति २१ यश्च पौरजनः कश्चि
द्द्रष्टुमिच्छति पार्थिवं अनावृतः सुविहितः स च यातु सुरक्षितः २२ सूदाः पौरोगवाश्चैव सर्वं चैव महानसं विविधं भक्ष्यभोज्यं च शकटैरुह्यतां मम २३
प्रयाणं घुष्यतां चैव श्वोभूत इति मा चिरं क्रियंतां पथि चाप्यद्य वेश्मानि विविधानि च २४ एवमाज्ञाप्य राजा स भ्रातृभिः सह पांडवः श्वोभूते निर्ययौ राजन्स
स्त्रीवृद्धपुरःसरः २५ स बहिर्दिवसानेव जनौघं परिपालयन् न्यवसन्नृपतिः पंच ततो गच्छद्वनं प्रति २६ आश्रमवासिके पर्वणि वैशंपायन उवाच आज्ञा
पयामास ततः सेनां भरतसत्तमः अर्जुनप्रमुखैर्गुप्तां लोकपालोपमैर्नरैः १ योगो योग इति प्रीत्या ततः शब्दो महानभूत् क्रोशतां सादिनां तत्र युज्यतामिति भा

अनम कांक्षंतं दर्शनं कुंत्या गांधार्याः श्वशुरस्य च १७ इत्युक्तः स नृपो देव्या द्रौपद्या ९x

आ०
१५

रत २ केचिद्यानैर्नरा जग्मुः केचि[illegible]दश्वैर्महाजवैः कांचनैश्च रथैः केचिज्ज्वलितज्वलनोपमैः ३ गजेंद्रैश्च तथैवान्ये केचिदुष्ट्रैर्नराधिप पदातिनस्तथैवान्ये
नखरप्रासयोधिनः ४ पौरजानपदाश्चैव यानैर्बहुविधैस्तथा अन्वयुः कुरुराजानं धृतराष्ट्रदिदृक्षवः ५ संस्तूयमानो बहुभिः सूतमागधबंदिभिः पांडुरेणा
तपत्रेण ध्रियमाणेन मूर्धनि रथानीकेन महता निर्जगाम कुरूद्वहः ६ गजेंद्रैश्चाचलसंकाशैर्भीमकर्मा वृकोदरः सजयंत्रायुधोपेतैः प्रययौ पवनात्मजः
९ माद्रीपुत्रावपि तथा हयारोहौ सुसंवृतौ जग्मतुः शीघ्रगमनौ सन्नद्धकवचध्वजौ १० अर्जुनश्च महातेजा रथेनादित्यवर्चसा वशी श्वेतैर्हयैर्युक्तो दि
व्येनान्वगमन्नृपं ११ द्रौपदीप्रमुखाश्चापि स्त्रीसंघाः शिबिकायुताः स्त्र्यध्यक्षगुप्ताः प्रययौ विसृजंतोऽमितं वसु १२ समृद्धरथहस्त्यश्वं वेणुवीणानुनादि
तं शुशुभे पांडवं सैन्यं तत्तदा भरतर्षभ १३ नदीतीरेषु रम्येषु सरःसु च विशांपते वासान्कृत्वा क्रमेणाथ जग्मुस्ते कुरुपुंगवाः १४ युयुत्सुश्च महातेजा धौम्यश्चै
व पुरोहितः युधिष्ठिरस्य वचनात्पुरगुप्तिं प्रचक्रतुः १५ ततो युधिष्ठिरो राजा कुरुक्षेत्रमवातरत् क्रमेणोत्तीर्य यमुनां नदीं परमपावनीं १६ स ददर्शाश्रमं दूरा
द्राजर्षेस्तस्य धीमतः शतयूपस्य कौरव्य धृतराष्ट्रस्य चैव ह १७ ततः प्रमुदितः सर्वो जनस्तद्वनमंजसा विवेश सुमहानादैरापूर्य भरतर्षभ १८ आश्रमवा
सिके पर्वणि ॥ वैशंपायन उवाच ततस्ते पांडवा दूरादवतीर्य पदातयः अभिजग्मुर्नरपतेराश्रमं विनयानताः १ स च योधजनः सर्वो ये च राष्ट्रनिवासिनः स्त्रिय
श्च कुरुमुख्यानां पद्भिरेवान्वयुस्तदा २ आश्रमं ते ततो जग्मुर्धृतराष्ट्रस्य पांडवाः शून्यं मृगगणाकीर्णं कदलीवनशोभितं ३ ततस्तत्र समाजग्मुस्तापसा नि
यतव्रताः पांडवानागतान्द्रष्टुं कौतूहलसमन्विताः ४ तानपृच्छत्ततो राजा क्वासौ कौरववंशभृत् पिता ज्येष्ठो गतोऽस्माकमिति बाष्पपरिप्लुतः ५ ततमूचुस्त
तो वाक्यं यमुनामवगाहितुं पुष्पाणामुदकुंभस्य चार्थे गत इति प्रभो ६ तैराख्यातेन मार्गेण ततस्ते जग्मुरंजसा ददृशुश्चाविदूरे तान्सर्वानथ पदातयः ७
ततस्ते सत्वरा जग्मुः पितुर्दर्शनकांक्षिणः सहदेवस्तु वेगेन प्राधावद्यत्र सा पृथा ८ सस्वरं रुरुदे धीमान्मातुः पादावुपस्पृशन् सा च बाष्पाकुलमुखी
ददर्श दयितं सुतं ९ बाहुभ्यां संपरिष्वज्य समुन्नाम्य च पुत्रकं गांधार्याः कथयामास सहदेवमुपस्थितं १० अनंतरं च राजानं भीमसेनमथार्जुनं एम०
२५

© (c) Dhaamantar Trust & KD Digitized By eGangotri

नकुलंचपृथादृष्ट्वात्वरमाणोपचक्रमे ११ सा वेगेनागच्छती तयोर्दीर्यतो हेतपुत्रयोः कर्षंती तौ ततस्तेयां दृष्ट्वा सन्यपतद्भुवि १२ राजा तान्स्वरयोगेन स्पर्शेनाव
महामना प्रत्यभिज्ञाय मेधावी समाश्वासयत प्रभुः १३ ततस्ते वाष्पमुत्सृज्य गांधारीसहितं नृपं उपतस्थुर्महात्मानो मातरं च यथाविधि १४ सर्वेषां तो
यकलशान्वजगृहुस्ते स्वयं तदा पांडवा लब्धसंज्ञास्ते मात्राश्वा श्वासिताः पुनः १५ तथानार्यान्सिहानां सोवरोधजनस्तदा पौरजानपदाश्चैव
ददृशुस्तं जनाधिपं १६ निवेदयामास तदा जनं तं नामगोत्रतः युधिष्ठिरो नरपतिः स चैनं प्रत्यपूजयत् १७ स तैः परिवृतो मेने हर्षवाष्पाविलेक्षणः
राजात्मानं गृहगतं पुरेव गजसाह्वये १८ अभिवादितो वधूभिश्च कृष्णाद्याभिः स पार्थिवः गांधार्या सहितो धीमान्कुंत्या च प्रमनंदत १९ ततश्चाश्र
ममागच्छत्सिद्धचारणसेवितं दिदृक्षुभिः समाकीर्णं नभस्तारागणैरिव २० आश्रमवासिके पर्वणि वैशंपायन उवाच स तैः सह नरव्याघ्रैर्भ्रातृभि
र्भरतर्षभ राजा रुचिरपद्माक्षैरासांचक्रे तदाश्रमे १ तापसैश्च महाभागैर्नानादेशसमागतैः द्रष्टुं कुरुपतेः पुत्रान्पांडवान्पृथुवक्षसः २ तेऽब्रुवन्ज्ञातुमि
च्छामः कतमोऽत्र युधिष्ठिरः भीमार्जुनौ यमौ चैव द्रौपदी च यशस्विनी ३ तानाचख्यौ तदा सूतः सर्वांस्तानभिनामतः संजयो द्रौपदीं चैव सर्वाश्चा ७८
न्याः कुरुस्त्रियः ४ संजय उवाच य एष जांबूनदशुद्धगौरस्तनुर्महासिंह इव प्रवृद्धः प्रचंडघोणः पृथुदीर्घनेत्रस्ताम्रायताक्षः कुरुराज एषः ५ अयं
पुनर्मत्तगजेंद्रगामी प्रतप्तचामीकरशुद्धगौरः पृथ्वायतांसः पृथुदीर्घबाहुर्वृकोदरः पश्यत पश्यतेमं ६ यस्त्वेष पार्श्वेऽस्य महाधनुष्मान्श्यामो युवा वा
रणः पृथुयाम्भः सिंहोन्नतांसो गजखेलगामी पद्मायताक्षोऽर्जुन एष वीरः ७ कुंतीसमीपे पुरुषोत्तमौ तु यमाविमौ विष्णुमहेंद्रकल्पौ मनुष्यलोके सक
ले समोऽस्ति ययोर्न रूपेन बलेन शीले ८ इयं पुनः पद्मदलायताक्षी मध्यं वयः किंचिदिव स्पृशंती नीलोत्पलाभा सुरदेवतेव कृष्णा स्थिता मूर्तिमतीव
लक्ष्मीः ९ अस्यास्तु पार्श्वे कनकोत्तमाभा यैषा प्रभा मूर्तिमतीव सोमी मध्ये स्थिता सा भगिनी द्विजाग्र्या चक्रायुधस्याप्रतिमस्य तस्य १० [illegible]

श्री २

आ० ३५

[redacted] इयं वज्रांबूनस्यसुहृद्गौरी याप्यस्य भार्या
भुजगेंद्रकन्या चित्रांगदा वैव नरेंद्रकन्या येयासवर्णाग्र मधूकपुष्पैः ११ इयं स्वसाराजचमूपतेश्च प्रवृद्धनीलोत्पलदामवर्णा पस्पर्ध कृष्णेन सदा नृपो यो वृकोदरस्यैष परिग्रहाग्र्यः १२ इयं च राज्ञो मगधाधिपस्य सुता जरासंध इति श्रुतस्य यवीयसो माद्रवतीसुतस्य भार्या मता चंपकदामगौरी १३ इयं तु निष्टप्त
सवर्णगौरी [illegible] पेयायसान्य महीतलेवं भार्या मता माद्रवतीसुतस्य ज्येष्ठस्य सेयं कमलायताक्षी १४ इयं तु निष्टप्तसवर्णगौरी राज्ञो वि
राटस्य सुता सपुत्रा भार्याभिमन्योर्निहतो रणे यो द्रोणादिभिस्तैर्विरथो रथस्थैः १५ एतास्तु सीमंतशिरोरुहा याः शुक्लोत्तरीया नरराजपत्न्यः राज्ञोस्य वृद्धस्य प
रंशतास्याः स्नुषा न्वीरा हतपुत्रनाथाः १६ एतायथामुख्यमुदाहृता ब्राह्मण्यभावादृजुबुद्धिसत्वाः सर्वा भवद्भिः परिपृच्छतोयानरेंद्रपत्न्यः सुविशुद्धस
त्वाः १७ वैशं एवं स राजा कुरुवृद्धवर्यसमागतस्तैर्नरदेवपुत्रैः पप्रच्छ सर्वं कुशलं तदानीं गतेषु सर्वेष्वथ तापसेषु १८ योधेषु वाप्याश्रममंडलं तं मुक्त्वा निवि
ष्टेषु विमुच्य पत्नीः स्त्रीवृद्धबाले च समं निविष्टे यथार्हतस्तान्कुशलान्यपृच्छत् १९ आश्रमवासिके पर्वणि धृतराष्ट्र उवाच युधिष्ठिर महाबाहो कच्चित्त्वं कु
शली ह्यसि सहितो भ्रातृभिः सर्वैः पौरजानपदैस्तथा १ ये च त्वामनुजीवंति कच्चित्तेपि निरामयाः सचिवा भृत्यवर्गाश्च गुरवश्चैव ते नृप २ कच्चित्ते पि नि
राजंकावसंति विषये तव कच्चिद्वर्तसि पौराणीं वृत्तिं राजर्षिसेवितां ३ कच्चिन्न्यायाननुच्छिद्य कोशस्तेभिप्रपूर्यते अरिमध्यस्थमित्रेषु वर्तसे चानुरूपतः ४ ब्रा नर्४
ह्मणानग्रहारैर्वा यथावत्तनुपश्यसि कच्चित्ते परितुष्यंति शीलेन भरतर्षभ ५ शत्रवोपि कुतः पौरा भृत्या वा स्वजनोपि वा कच्चिद्यजसि राजेंद्र श्रद्धावान्पितृदेवताः
पी२ ६ अतिथींश्चान्नपानेन कच्चिदर्चसि भारत कच्चिन्नयपथे विप्राः स्वकर्मनिरतास्तव ७ क्षत्रिया वैश्यवर्गा वा शूद्रा वापि कुटुंबिनः कच्चित्स्त्रीबालवृद्धं ते न शो
चति तथा चते ८ जामयः पूजिताः कच्चित्तव गेहे नरर्षभ कच्चिद्राजर्षिवंशोयं त्वामासाद्य महीपतिं ९ यथोचितं महाराज यशसा नावसीदति वैशं० ॥ एग्प्र० १५

वित:२

© (Oh)Dhaanta Trust, J&K Digitized By eGangotri

रन्येवं वादिनं तं स समाय विस्तरमापत कुशलप्रश्नसंयुक्तं कुशलो वाक्यकर्मणि १० युधिष्ठिर उवाच कच्चित्ते वर्धते राजंस्तपो भूमिशयस्य ते अपि मे जननी चेयं शु-
श्रूषुर्विगतक्लमा ११ अथास्याः सफलो राजन्वनवासो भविष्यति इयं च माता ज्येष्ठा मे शीतवाताध्वकर्शिता १२ घोरेण तपसा युक्ता दे-
वी कच्चिन्न शोचति हतान्पुत्रान्महावीर्यान्क्षत्रधर्मपरायणान् १३ नापध्यायति वा कच्चिदस्मानपकृतः सदा क्व चासौ विदुरो राजन्नैनं पश्याम-
हे वयं १४ संजयः कुशली चायं कच्चिन्नु तपसि स्थितः वै० इत्युक्तः प्रत्युवाचेदं धृतराष्ट्रो जनाधिपं कुशली विदुरः पुत्र तपो घोरं समाश्रितः १५ वायु-
भक्षो निराहारः कृशो धमनिसंततः कदाचिद्दृश्यते विप्रैः शून्येऽस्मिन्कानने क्वचित् इत्येवं ब्रुवतस्तस्य जटी वीटामुखः कृशः दिग्वासा मलदिग्धाङ्गो
वनरेणुसमुक्षितः १७ दूरादालक्षितः क्षत्ता तत्राख्यातो महीपतेः निवर्तमानः सहसा राजन्दृष्ट्वाश्रमं प्रति १८ तमन्वधावन्नृपतिरेक एव युधिष्ठिरः
प्रविशन्तं वनं घोरं लक्ष्यालक्ष्यं क्वचित्क्वचित् १९ भो भो विदुर राजाहं दयितस्ते युधिष्ठिरः इति ब्रुवन्नरपतिस्तं यत्नादभ्यधावत २० ततो विविक्त
एकान्ते तस्थौ बुद्धिमतां वरः विदुरो वृक्षमाश्रित्य कंचित्तत्र वनान्तरे २१ तं राजा क्षीणभूयिष्ठमाकृतीमात्रसूचितं अभिजज्ञे महाबुद्धिं महाबुद्धि-
र्युधिष्ठिरः २२ युधिष्ठिरोऽहमस्मीति वाक्यमुक्त्वाग्रतः स्थितः विदुरस्याश्रवे राजा तं च प्रत्यभिपूजयत् २३ ततः सोऽनिमिषो भूत्वा राजानं तमुदैक्षत सं-
योज्य विदुरस्तस्मिन्दृष्टिं दृष्ट्या समाहितः २४ विवेश विदुरो धीमान्गात्रैर्गात्राणि चैव ह प्राणान्प्राणेषु च दधदिंद्रियेषु च [illegible] २४ स योगबलमा-
स्थाय विवेश नृपतेस्तनुं विदुरो धर्मराजस्य तेजसा प्रज्वलन्निव २५ विदुरस्य शरीरं तत्तथैव स्तब्धलोचनं वृक्षाश्रितं तदा राजा ददर्श गतचेतनं २६ चेतन
बलवन्तं तथात्मानं मेने बहुगुणं तदा धर्मराजो महातेजास्तच्च सस्मार पाण्डवः २७ पौराणमात्मनः सर्वं विद्यावान्स विशां पते योगधर्मं महा-
तेजा व्यासेन कथितं यथा २८ धर्मराजश्च तत्रैनं संचस्कारयिषुस्तदा दग्धुकामोऽभवद्विद्वानथ वागभ्यभाषत २९ भो भो राजन्न दग्धव्यमेतद्वि-

मो १

© Dharmartha Trust J&K. Digitized By eGangotri

आश्रा० १२६

डरसंज्ञकं कलेवरमिहैवतैर्धर्मरूपःसनातनः ३० लोकाःसंतानकाः ३० लोकाःसनातनाभविष्यंत्यस्यभारत पतिधर्ममवाप्तोसौनैषशोच्यःपरंतप
३१ इत्युक्तोधर्मराजःसविनिवृत्यततःपुनः राज्ञोवैचित्रवीर्यस्यतत् सर्वंन्यवेदयत् ३२ ततःसराजाद्युतिमान्सचसर्वोजनस्तदा भीमसेनादय
श्चैवपरंविस्मयमागताः ३३ तच्छ्रुत्वाप्रीतिमान्राजापुत्रंधर्मजमब्रवीत् आपोमूलंफलंचैवममेदंप्रतिगृह्यतां ३४ यद्वृत्तोहिनरोराजंस्तद्वृत्तोस्यातिथिःस्मृ
तः इत्युक्तः सतथेत्येवंप्राहधर्मात्मजोनृप ३५ फलंचमूलंचबुभुजेराज्ञादत्तंसहानुजः ततस्तेवृक्षमूलेषुकृतवासपरिग्रहा ३६ तांरात्रिमवस
न्सर्वेफलमूलजलाशनाः ॥ ॥आश्रमवासिकेपर्वणि वैशंपायनउवाच ततस्तुराजन्नेतेषामाश्रमेपुण्यकर्मणां शिवानक्षत्रसंपन्नासा
व्यतीयायशर्वरी १ ततस्तत्रकथास्त्वासंस्तेषांधर्मार्थलक्षणाः विचित्रपदसंचारानानाश्रुतिभिरन्विताः २ पांडवास्त्वभितोमातुर्धरण्यांसु
षुपुस्तदा उत्सृज्यसुमहार्हाणिशयनानिनराधिप ३ यदाहारोभवद्राजाधृतराष्ट्रोमहामनाः तदाहारानृवीरास्तेन्यवसंस्तांनिशांतदा ४ व्यती
तायांतुशर्वर्यांकृतपूर्वाह्णिकक्रियः भ्रातृभिःसहितोराजाददर्शाश्रममंडलं ५ सांतःपुरपरीवारःसभृत्यःसपुरोहितः यथासुखंयथोद्देशंधृत
राष्ट्राभ्यनुज्ञया ६ ददर्शतत्रवेदीश्चसंप्रज्वलितपावकाः कृताभिषेकैर्मुनिभिर्हुताग्निभिरुपस्थिताः ७ वानेयपुष्पनिकरैराज्यधूमोद्गमैरपि
ब्राह्मेणवपुषायुक्तायुक्तामुनिगणास्पदाः ८ मृगयूथैरनुद्विग्नैस्तत्र तत्रसमाश्रितैः आशंकितैःपक्षिगणैःप्रगीतैरिवचप्रभो ९ केकाभिर्नील
कंठानांदात्यूहानांचकूजितैः कोकिलानांचकुहरैःसुखैःश्रुतिमनोहरैः १० प्राधीतद्विजघोषैश्चक्वचित्क्वचिदलंकृतं फलमूलसमाहारैर्महद्भिश्चो
पशोभितं ११ ततःसराजाप्रददौतापसार्थमुपाहृतान् कलशान्कांचनांस्ताम्रांस्तथैवौदुंबरानपि १२ अजिनानिप्रवेणीश्चस्रुक्स्रुवं
चमहीपतिः कमंडलूंश्चस्थालीश्चपिठराणिचभारत १३ भाजनानिचलौहानिपात्रीश्चविविधानृप यद्यदिच्छतियावच्चयच्चान्यदपिभाजनं राम०

क्वि३ ९६

१ एवंसराजाधर्मात्मायरीत्वाश्रममंडलं वहुविश्राणपतत्सर्वंपुनरायान्महीपतिः १५ कृताह्निकंचराजानंधृतराष्ट्रंमहीपतिं। ददर्शासीनमव्यग्रंगांधा
रीसहितंतदा १६ मातरंचाविदूरस्थां शिष्यवत्प्रणतांस्थितां कुंतींददर्शधर्मात्माशिष्ठाचारसमन्वितां १७ सतमभ्यर्च्यराजानंनामसंश्राव्यचात्म
नः निषीदेत्यभ्यनुज्ञातोवृष्यामुपनिवेशह १८ भीमसेनादयश्चैवपांडवाभरतर्षभः अभिवाद्योपसंगत्यनिषेदुः पार्थिवाज्ञया १९ सतैः
परिवृतोराजाशुशुभेतीवकौरवः विभ्रद्ब्राह्मींश्रियंदीप्तांदेवैरिवबृहस्पतिः २० तथातेषूपविष्टेषुसमाजग्मुर्महर्षयः शतयूपप्रभृतयः कुरुक्षेत्र
निवासिनः २१ व्यासश्चभगवान्विप्रोदेवर्षिगणसेवितः वृतः शिष्यैर्महातेजादर्शयामासपांडव २२ ततः सराजाकौरव्यः कुंतीपुत्रश्चवीर्यवान्
भीमसेनादयश्चैवप्रत्युत्थायाभ्यवादयन् २३ समागतस्ततोव्यासः शतयूपादिभिर्वृतः धृतराष्ट्रंमहीपालमास्यतामित्यभाषत २४ वरंतुवि
ष्टरंकौश्यंकृष्णाजिनकुशोत्तरं प्रतिपेदेतदाव्यासस्तदर्थमुपकल्पितं २५ तेचसर्वेद्विजश्रेष्ठाविष्टरेषुसमंततः द्वैपायनाभ्यनुज्ञातानिषेदुर्विपुलौ
जसः २६ आश्रमवासिकेपर्वणि वैशंपायनउवाच ततः समुपविष्टेषुपांडवेषुमहात्मसु व्यासः सत्यवतीपुत्रइदंवचनमब्रवीत् १ धृतरा
ष्ट्रमहाबाहोकच्चित्तेवर्द्धतेतपः कच्चिन्मनस्तेप्रीणाति वनवासेनराधिप २ कच्चिद्धृदितेशोकोराजन्पुत्रविनाशजः कच्चिज्ज्ञानानिसर्वा
४ णिप्रसन्नानितेनघ ३ कच्चिद्बुद्धिंदृढांकृत्वाचरस्यारण्यकंविधिं कच्चिद्वधूश्चगांधारीनशोकेनाभिभूयते ४ महाप्राज्ञाबुद्धिमतीदेवीधर्मार्थ
दर्शिनी आगमापायतत्वज्ञाकच्चिदेषानशोचति ५ कच्चित्कुंतीचराजंस्त्वांशुश्रूषत्यनहंकृता यापरित्यज्यस्वंपुत्रंगुरुशुश्रूषणेरता ६ कच्चिद्धर्मसु
तोराजामहात्मास्त्वमहामनाः भीमार्जुनयमाश्चैवकच्चिदेतेपिसांत्विताः ७ कच्चिन्नंदसिदृष्ट्वैतान्कच्चित्तेनिर्मलंमनः कच्चिच्चशुद्धभावोसिसंजा
तज्ञानोनराधिप ८ एतद्धित्रितयंश्रेष्ठंसर्वभूतेषुभारत निर्वैरतामहाराजसत्यमक्रोधएवच ९ कच्चित्तेनचमोहोस्तिवनवासेनभारत स्व

नं ३ कृ ३

CC-0. Bhaarata Trust, J&K. Digitized by eGangotri

डपवा १ ना १

वशेवन्पमन्नंवोसोवाभवेत् १० विनिर्गतेचापिराजेंद्रविदुरस्यमहात्मनः गमनंविधिनेनधर्मस्यस्यमहात्मनः ११ मांडव्यशापाद्धिसवैधर्मोविदुरतांगतः महा
बुद्धिर्महायोगीमहात्मासुमहामनाः १२ बृहस्पतिर्वादेवेषुशुक्रोवाप्यसुरेषुच नतथाबुद्धिसंपन्नोयथासपुरुषर्षभः १३ तपोबलव्ययंकृत्वासुचिरा
त्संभृतंतदा मांडव्येनर्षिणाधर्मोह्यभिभूतः सनातनः १४ नियोगाद्ब्रह्मणःपूर्वमयास्वेनबलेनच वैचित्रवीर्यकेक्षेत्रेजातःसमहा
मतिः १५ भ्राताततवमहाराजदेवदेवः सनातनः धारणान्मनसाध्यानाद्यंधर्मंकवयोविदुः १६ सत्येनसंवर्धयतियोदमेनेनचा अहिंसयाचदा रामेन ४
नेनतप्यमानःसनातनः १७ येनयोगबलाज्जातः कुरुराजोयुधिष्ठिरः धर्मइत्येषनृपतेप्राज्ञेनामितबुद्धिना १८ यथावह्निर्यथावायुर्यथापःपृ
थिवीयथा यथाकाशंतथाधर्मइहचामुत्रचस्थितः १९ सर्वगश्चैवराजेंद्रसर्वेव्याप्यचराचरं दृश्यतेदेवदेवैः ससिद्धैर्निर्मुक्तकल्मषैः २०
योहिधर्मः सविदुरोयःसपांडवएवसः सएषराजन्दृश्यस्तेपांडवःप्रेष्यवस्थितः २१ प्रविष्टः समहात्मानंभ्राताते बुद्धिसत्तमः दृष्ट्वामहात्माकौंतेयंमहायो
गबलान्वितः २२ त्वांचापिश्रेयसायोक्ष्यत्येनचिराद्भरतर्षभ संशयच्छेदनार्थायप्राप्तंमांविद्धिपुत्रक २३ नकृतंयैःपुराकैश्चित्कर्मलोकेमहर्षिभिः आश्चर्यभूतं
तपसः फलंतद्दर्शयामिवः २४ किमिच्छसिमहीपालमत्तःप्राप्तुंमनीषितं द्रष्टुंस्प्रष्टुमथश्रोतुंतत्कर्तास्मितवानघ २५ आश्रमवासिकेपर्वणि ज
नमेजयउवाच वानवासंगतेविप्रधृतराष्ट्रेमहीपतौ सभार्येनृपशार्दूलेवध्वाकुंत्यासमन्विते १ विदुरेचापिसंसिद्धेधर्मराजंव्यपाश्रिते वसत्सुपांडुपुत्रेषु
सर्वेष्वाश्रममंडले २ यत्तदाश्चर्यमितिवैकरिष्यामीत्युवाचह व्यासः परमतेजस्वीमहर्षिस्तद्वदस्वमे ३ वनवासेचकौरव्यःकियंतंकालमच्युतः युधि
ष्ठिरोनरपतिर्न्यवसत्सजनस्तदा ४ किमाहाराश्चतेतत्रसैन्यामव[illegible]सन्प्रभोः सांतःपुरामहात्मानइतितद्ब्रूहिमेनघ ५ वैशं० तेनुज्ञातास्तदाराज
न्कुरुराजेनपांडवाः विविधान्यन्नपानानिविश्राम्यानुभवंतिते ६ मासमेकंविजह्रुस्तेससैन्यांतःपुरावने अथतत्रागमद्व्यासोयथोक्तंतेमयानघ ७ एम० ९७

त४ स२ म४ ना२

© Dharmartha Trust J&K. Digitized By eGangotri

स्थित ६

पांडूनां १ ना: सर्वे १

तथा चैते कथाभिर्नृपसंनिधौ व्यासमभ्यासतां राजन्नाजमुनिनयोपरे ८ नारदः पर्वतश्चैव [..] देवलश्च महातपाः । विश्वावसुस्तुम्बुरुश्च चित्रसेनश्च भारत
९ तेषामपि यथायोग्यं पूजां चक्रे महातपाः । धृतराष्ट्राभ्यनुज्ञातः कुरुराजो युधिष्ठिरः १० निषेदुस्ते ततः पूजां प्राप्य युधिष्ठिरात् आसनेष्वथ पुण्येषु बर्हिणेषु वरेषु च ११ वर
उ३ तेषु तत्रोपविष्टेषु स राजा महामतिः पांडुपुत्रैः परिवृतो निषसाद कुरूद्वहः १२ गांधारी चैव कुंती च द्रौपदी सात्वती तथा । स्त्रियश्चान्यास्तथा [..] साभिः सहो
पविष्टास्ततः १३ तेषां तत्र कथा दिव्या धर्मिष्ठाश्चाभवन्नृप ऋषीणां च पुराणानां देवासुरविमिश्रिताः १४ ततः कथांते व्यासस्तं प्रज्ञाचक्षुषमीश्वरं प्रोवा
न५ च वदतां श्रेष्ठः पुनरेव स तद्वचः १५ प्रीयमाणो महातेजाः सर्ववेदविदां वरः । विदितं मम राजेन्द्र यत्ते हृदि विवक्षितं १६ दह्यमानस्य शोकेन तव पुत्रकृतेन वै गां
धार्याश्चैव यद्दुःखं हृदि तिष्ठति नित्यदा १७ कुंत्याश्च यन्महाराज द्रौपद्याश्च हृदि स्थितं धारयत्यतितीव्रं दुःखं पुत्रविनाशजं १८ सुभद्रा कृष्णभगिनी तच्चापि विदि
तं मम श्रुत्वा समागममिदं सर्वैर्यावत्तेनान्वय १९ संशयच्छेदनार्थाय प्राप्तं कौरवनंदन इमे च देवगंधर्वाः सर्वे चेमे महर्षयः २० पश्यंतु तपसो वीर्य
मद्य मे चिरसंभृतं तदुच्यतां महाराज कं [..] कामं प्रददामि ते २१ प्रवणोस्मि वरं दातुं पश्य मे तपसः फलं एवमुक्तः स राजेन्द्रो व्यासेनामितबुद्धिना २२
मुहूर्त्तमिव संचिंत्य वचनायोपचक्रमे धन्योस्म्यनुगृहीतश्च सफलं जीवितं च मे २३ यन्मे समागमोद्येह भवद्भिः सह साधुभिः अद्य चाप्य[..]वगच्छामि ग
तिमिष्टामिहात्मनः २४ ब्रह्मकल्पैर्भवद्भिर्यत्समे[..]तोहं तपो[..]धनाः दर्शनादेव भवतां पूतोहं नात्र संशयः २५ विद्यते न भयं चापि परलोकान्ममा
नघाः किं तु तस्य दुर्बुद्धेर्मंदस्यापनयैर्भृशं २६ दूयते मे मनो नित्यं स्मरतः पुत्रगृद्धिनः अपापाः पांडवा येन निकृताः पापबुद्धिना २७ यैर्जिता पृथिवी
येन सह पार्थिवा नरद्विपाः राजानश्च महात्मानो नानाजनपदेश्वराः २८ आगम्य मम पुत्रार्थे सर्वे मृत्युवशं गताः येते पितॄंश्च दारांश्च प्राणांश्च मनसः प्रियान्
२९ परित्यज्य गताः शूराः प्रेतराजनिवेशनं कथितास्ते गतिं ब्रह्मन्मित्रार्थे ये हतास्तथा ३० तथैव पुत्रपौत्राणां ये मे निहता युधि दूयते मे मनो भीरहो

ना२ म३

घातयिष्यामहाबलं ३१ भीष्मं शांतनवं वृद्धं द्रोणं चाद्विजसत्तमं ममपुत्रेणक्षुद्रेणपापेनसुहृद्द्विषा ३२ क्षयंनीतंकुलं दीप्तं पृथिवीराज्यमिच्छ-
ता एतत्सर्वमनुस्मृत्यदह्यमानोदिवानिशं ३३ नशांतिमधिगच्छामिदुःखशोकसमाहत इतिमेचिंतयानस्यपितः शांतिर्नविद्यते ३४ वैशं-
पायनउवाच तच्छ्रुत्वाविविधं तस्यराजर्षेः परिदेवितं पुनर्नवीकृतः शोकोगांधार्याजनमेजय ३५ कुंत्याद्रुपदपुत्र्याश्चसुभद्रायास्तथैवच
ताः शांतनरनारीणां वधूनां कौरव्यह ३६ पुत्रशोकसमाविष्टा गांधारी त्विदमब्रवीत श्वशुरंबद्धनयनादेवीप्रांजलिरुत्थिता ३७ षोडशेमानि
वर्षाणिगतानिमुनिपुंगव अस्यराज्ञोहतान्पुत्रान्शोचतोनशमोविभो ३८ पुत्रशोकसमाविष्टोनिःश्वसन्ह्येषभूमिपः नशेतेवसतीः सर्वाधृतरा-
ष्ट्रोमहामुने ३९ लोकानन्यान्समर्थोसितृष्टुंसर्वांस्तपोबलात् किमुलोकांतरगतान्राज्ञोदर्शयितुंसुतान ४० इयंचद्रौपदीकृष्णाहतज्ञातिसु-
ताभृशं शोचत्यतीवसर्वासांस्नुषाणांदयितातव ४१ तथाकृष्णस्यभगिनीसुभद्राभद्रभाषिणी सौभद्रवधसंतप्ताभृशंशोचतिभाविनी ४२
इयंचभूरिश्रवसोभार्यापरमसंमता भर्तृव्यसनशोकार्ताभृशंशोचतिभाविनी ४३ यस्यास्तुश्वशुरोधीमान्बाह्लीकःसकुरूद्वहः निहतःसोमदत्त-
श्चपित्रासहमहारणे ४४ श्रीमतोस्यमहाबुद्धेःसंग्रामेष्वपलायिनः पुत्रस्यतेपुत्रशतंनिहतंयद्रणाजिरे ४५ तस्यभार्याःशतमिदंदुःखशोकसमा-
हतं पुनःपुनःवर्धयानंशोकंराज्ञोममैवच ४६ तेनारंभेणमहतामामुपास्तेमहामुने येचशूरामहात्मानःश्वशुरामेमहारथाः ४७ सोमदत्तप्रभृ-
तयःकानुतेषांगतिःप्रभो तवप्रसादाद्भगवन्विशोकोयंमहीपतिः ४८ यथास्याद्भविताचाहंकुंतीचेयंवधूस्तव इत्युक्तवत्यांगांधार्यांकुंतीव्रतकृशानना
४९ प्रच्छन्नजातंपुत्रंतंसस्माराद्दित्यसंनिभं तमृषिर्वरदोव्यासोदूरश्रवणदर्शनः ५० अपश्यद्दुःखितांदेवींमातरंसव्यसाचिनः तामुवाचततोव्यासो
यत्तेकार्यंविवक्षितं ५१ तद्ब्रूहित्वंमहाभागेयत्तेमनसिवर्तते श्वशुरायततः कुंतीप्रणम्यशिरसातदा ५२ उवाचवाक्यंसव्रीडंविवृण्वानापुरातनं ५३
आश्रमवासिकेपर्वणि कुंत्युवाच भगवन्श्वशुरोमेसिदैवतस्यापिदैवतं समेदेवातिदेवस्त्वंशृणुसत्यांगिरंमम १ तपस्वीकोपनोविप्रोदुर्वासानाम

© Dharmartha Trust J&K. Digitized By eGangotri

मेपितुः भिक्षामुपागतोभोक्तुंतमहंपर्यतोषयं २ शौचेनत्वागसस्त्यागैःशुद्धेनमनसातथा कोपस्थानेष्वपिमहत्स्वकुप्यंनकदाचन ३ सप्रीतोवरदोमे
भूत्कृतकृत्योमहामुनिः अवश्यंतेगृहीतव्यमितिमांसोब्रवीद्वचः ४ ततःशापभयाद्विप्रमवोचंपुनरेवतं एवमस्त्वितिचप्राहपुनरेवसमेद्विजः ५ धर्मस्य
जननीभद्रेभवित्रीत्वंशुभानने वशेस्थास्यंतिदेवायांस्त्वमावाहयिष्यसि ६ इत्युक्त्वांतर्हितोविप्रस्ततोहंविस्मिताभवं नचसर्वास्ववस्थासुस्मृतिर्मेवि
प्रणश्यति ७ अथहर्म्यतलस्थाहंरविमुद्यंतमीक्षती संस्मृत्यतदृषेर्वाक्यंस्पृहयंतीदिवाकरं ८ स्थिताहंबालभावेनतत्रदोषमबुध्यती अथदेवः
सहस्रांशुर्मत्समीपगतोभवत् ९ द्विधाकृत्वात्मनोदेहंभूमौचगगनेपिच ततापलोकानेकेनद्वितीयेनागमत्तुमां १० समामुवाचवेपंतींवरं
मत्तोवृणीष्वह गम्यतामितितंचाहंप्रणम्यशिरसावदं ११ समामुवाचतिग्मांशुर्वृथाह्वानंनमेक्षमं धक्ष्यामित्वांचविप्रंचयेनदत्तोवरस्तव १२ त
महंरक्षतीविप्रंशापादनपकारिणं पुत्रोमेत्वत्समोदेवभवेदितिततोब्रुवं १३ ततोमांतेजसाविश्यमोहयित्वाचभानुमान् उवाचभवितापुत्रस्त
वेत्यभ्यगमद्दिवं १५ ततोहमंतर्भवनेपितुर्वृत्तांतरक्षिणी गूढोत्पन्नंसुतंबालंजलेकर्णमवासृजं १५ नूनंतस्यैवदेवस्यप्रसादात्पुनरेवतु कन्याहमभवं
विप्रयथाप्राहसमामृषिः १६ समयामूढयापुत्रोज्ञायमानोप्युपेक्षितः तन्मांदहतिविप्रर्षेयथासुविदितंतव १७ यदिपापमपापंवातदेतद्विवृतंमया तं
द्रष्टुमिच्छामिभगवन्व्यपनेतुंत्वमर्हसि १८ यच्चास्यराज्ञोविदितंहृदिस्थंभवतोनघ तंचाप्यलभतांकाममद्यैवमुनिसत्तम १९ इत्युक्तःप्रत्युवाचेदंव्यासो
वेदविदांवरः साधुसर्वमिदंभाव्यमेवमेतद्यथात्थमां २० अपराधश्चतेनास्तिकन्याभावंगताह्यसि देवाश्चैश्वर्यवंतोवैशरीराण्याविशंतिवै २१
संतिदेवनिकायाश्चसंकल्पाज्जनयंतिवै वाचादृष्ट्यातथास्पर्शात्संहर्षेणेतिपंचधा २२ मनुष्यधर्मैर्वृजिनत्वात्तवमोहोनविद्यते इतिकुंतिविजा
नीहिव्येतुतेमानसोज्वरः २३ सर्वंबलवतांपथ्यंसर्वंबलवतांशुचि सर्वंबलवतांधर्मःसर्वंबलवतांस्वकं २४ इतिश्रीआश्रमवासिकेपर्वणि व्यास

© (c) Dharmartha Trust J&K. Digitized By eGangotri

आ०
१९

उवाच भद्रे द्रक्ष्यसि गांधारि पुत्रान्भ्रातॄन्सखींस्तथा वधूश्च पतिभिः सार्धं निशि सुप्तोत्थिता इव कर्णं द्रक्ष्यति कुंती च सौभद्रं चापि यादवी द्रौप
दी पंच पुत्रांश्च पितॄन्भ्रातॄंस्तथैव च २ पूर्वमेवैष हृदये व्यवसायोऽभवन्मम यदास्मि चोदितो राज्ञा भवत्या पृथयैव च ३ न ते शोच्या महात्मानः सर्व
एव नरर्षभाः क्षत्रधर्मपराः संतस्तथा हि निधनं गताः ४ भवितव्यमवश्यं तत्सुरकार्यमनिंदिते अवतेरुस्ततः सर्वे देवभागा महीतलं ५ गं
धर्वाप्सरसश्चैव पिशाचा गुह्यराक्षसाः तथा पुण्यजनाश्चैव सिद्धा देवर्षयोपि च ६ देवाश्च दानवाश्चैव तथा देवर्षयोऽमलाः त एते निधनं प्राप्ताः
कुरुक्षेत्रे रणाजिरे ७ गंधर्वराजो यो धीमान्धृतराष्ट्र इति श्रुतः स एव मानुषे लोके धृतराष्ट्रः पतिस्तव ८ पांडुं मरुद्गणाद्विद्धि विशिष्टतममच्युतं
धर्मस्यांशोऽभवत्क्षत्ता राजा चैव युधिष्ठिरः ९ कलिं दुर्योधनं विद्धि शकुनिं द्वापरं तथा दुःशासनादीन्विद्धि त्वं राक्षसान्शुभदर्शने १० मरुद्गणाद्भी
मसेनं बलवंतमरिंदमं विद्धि च नरमृषिमिमं पार्थं धनंजयं ११ नारायणं हृषीकेशमश्विनौ यमजौ तथा द्विधा कृत्वात्मनो देहमादित्यं तपतां
वरं १२ लोकांश्च तापयानं वै विद्धि कर्णं च शोभने यः सर्वैः पार्थैरुद्भूतः संहर्षजननस्तथा १३ पश्च पांडवदायादो हतः षड्भिर्महारथैः स सो
मस्य वर्चसो भद्रे सौभद्रोऽभवद्द्विधा १४ द्रौपद्या सह संभूतं धृष्टद्युम्नं च पावकात् अग्नेर्भागं शुभं विद्धि राक्षसं तु शिखंडिनं १५ द्रोणं बृहस्पतेर्भागं वि
द्धि द्रौणिं च रुद्रजं भीष्मं च विद्धि गांगेयं वसुं मानुषतां गतं १६ एवमेते महाप्राज्ञे देवा मानुष्यमेत्य हि ततः पुनर्गताः स्वर्गं कृते कर्मणि शोभने १७ य
च्च वै हृदि सर्वेषां दुःखमेतच्चिरं स्थितं तदद्य व्यपनेष्यामि परलोककृताद्भयात् १८ सर्वे भवंतो गच्छंतु नदीं भागीरथीं प्रति तत्र द्रक्ष्यथ तान्सर्वान्ये ह
तास्मिन्रणाजिरे १९ वैशंपायन उवाच इति व्यासस्य वचनं श्रुत्वा सर्वो जनस्तदा महता सिंहनादेन गंगामभिमुखो ययौ २० धृतराष्ट्रश्च सामात्यः प्र
ययौ सह पांडवैः सहितो मुनिशार्दूलैर्गंधर्वैश्च समागतैः २१ ततो गंगां समासाद्य क्रमेण स जनार्णवः निवासमकरोत्सर्वो यथाप्रीति यथासुखं २२

आम०
१९

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

३१
राज्ञा पांडवैः सार्धं मिष्टे देशे महानुगः निवासमकरोद्धीमान्गांधारीसहपुरःसरः २३ जगाम न रहश्चापि तेषां वर्षशतं यथा निशां प्रतीक्षमाणानां दिदृक्ष
णां गतान्नृपान् २४ अथ पुण्यं गिरिवरमस्तमभ्यगमद्रविः ततः कृताभिषेकास्ते नैशं कर्म समाचरन् २५ आश्रमवासिके पर्वणि वैशंपायन उवाच ततो नि
आ॰ मा॰ यां अ॰ त॰ क्षमा ३ शायां प्राप्तायां कृतसायाह्निकक्रियाः व्यासमभ्यगमन्सर्वे ये च तत्र समागताः १ धृतराष्ट्रस्तु धर्मात्मा पांडवैः सहितस्तदा शुचिरेकमनाः सार्धमृषिभिस्तैरुपाविशत
२ गांधार्या सह नार्यस्तु सहिताः समुपाविशन् पौरजानपदश्चापि जनः सर्वो यथावयः ३ ततो व्यासो महातेजाः पुण्यं भागीरथीजलं अवगाह्याजुहावा
थ सर्वान्लोकान्महामुनिः ४ पांडवानां च ये योधाः कौरवाणां च सर्वशः राजानश्च महाभागा नानादेशनिवासिनः ५ ततः सुतुमुलः शब्दो जलांते
जनमेजय प्रादुरासीद्यथा पूर्वं कुरुपांडवसेनयोः ६ ततस्ते पार्थिवाः सर्वे भीष्मद्रोणपुरोगमाः ससैन्याः सलिलात्तस्मात्समुत्तस्थुः सहस्रशः ७ विराट
द्रुपदौ चैव सहपुत्रौ ससैनिकौ द्रौपदेयाश्च सौभद्रो राक्षसश्च घटोत्कचः कर्णदुर्योधनौ चैव शकुनिश्च महारथः दुःशासनादयश्चैव धार्तराष्ट्रा महाबलाः
९ जरासंधिर्भगदत्तो जलसंधश्च वीर्यवान् भूरिश्रवाः शलः शल्यो वृषसेनश्च सानुजः १० लक्ष्मणो राजपुत्रश्च धृष्टद्युम्नस्य चात्मजः शिखंडिपुत्राः स ५६
र्वे च धृष्टकेतुश्च सानुजः ११ अचलो वृषकश्चैव राक्षसश्चाप्यलायुधः बाल्हिकः सोमदत्तश्च चेकितानश्च पार्थिवः १२ एते चान्ये च बहवो बहु
त्वाद्ये न कीर्तिताः सर्वे भास्वरदेहास्ते समुत्तस्थुर्जलात्ततः १३ यस्य वीरस्य यो वेशो यो ध्वजो यच्च वाहनं तेन तेन व्यदृश्यंत समुपेता नराधिपाः १४
प्यां ३ दिव्यांबरधराः सर्वे सर्वे भ्राजिष्णुकुंडलाः निर्वैरा निरहंकारा विगतक्रोधमत्सराः १५ गंधर्वैरुपगीयंतः स्तूयमानाश्च बंदिभिः दिव्यमाल्यांबरधरा वृत्ताश्चा
प्सरसां गणैः १६ धृतराष्ट्रस्य च तदा दिव्यं चक्षुर्नराधिप मुनिः सत्यवतीपुत्रः प्रीतः प्रादात्तपोबलात् १७ दिव्यज्ञानबलोपेता गांधारी च यशस्विनी
ददर्श पुत्रांस्तान्सर्वान्ये चान्येपि मृधे हताः १८ तदद्भुतमचिंत्यं च सुमहल्लोमहर्षणं विस्मितः स जनः सर्वो ददर्शानिमिषेक्षणः १९ तदुत्त

© Dharmartha Trust J&K. Digitized by eGangotri

आश्रा०
२०

वमहोदर्यंतदृष्टनारीनराकुलं आश्चर्यभूतंददृशेचित्रेपटगतंयथा २० धृतराष्ट्रस्तुतान्सर्वान्पश्यन्दिव्येनचक्षुषा मुमुदेभरतश्रेष्ठप्रसादात्तस्यवैमु
नेः २१ आश्रमवासिकेपर्वणि वैशंपायनउवाच ततस्तेपुरुषश्रेष्ठाः समाजग्मुः परस्परं विगतक्रोधमात्सर्याः सर्वेविगतकल्मषाः १ विधिंप
रममास्थायब्रह्मर्षिविहितंशुभं संहृष्टमनसःसर्वेदेवलोकइवामराः २ पुत्रः पित्राचमात्राचभार्याश्चपतिभिः सह भ्राताभ्रातासखाचैवस
ख्याराजन्समागताः ३ पांडवास्तुमहेष्वासंकर्णंसौभद्रमेवच संप्रहर्षात्समाजग्मुर्द्रौपदेयाश्चसर्वशः ४ ततस्तेप्रीयमाणावैकर्णेनसह
पांडवाः समेत्यपृथिवीपालसौहृदेचव्यवस्थिताभवन् ५ परस्परंसमागम्ययोधास्तेभरतर्षभ मुनेः प्रसादात्तेत्वेवंक्षत्रियानष्टमन्यवः ६ असौ
हृदंपरित्यज्यसौहृदेधैर्यव्यवस्थिताः एवंसमागताः सर्वेकुरुभिर्बांधवैः सह ७ पुत्रैश्चपुरुषव्याघ्राः कुरवोऽन्येचपार्थिव तांरात्रिमविलोमेव
विहृत्यप्रीतमानसाः ८ मेनिरेपरितोषेणनृपाः स्वर्गसदोयथा नात्रशोकोभयंत्रासोनारतिर्नायशोभवत् ९ परस्परंसमागम्ययोधानांभर
तर्षभ समागतास्ताः पितृभिर्भ्रातृभिः पतिभिः सुतैः १० मुदंपरमिकांप्राप्यनार्योदुःखमथात्यजन् एकांरात्रिंविहृत्यैवंतेवीरास्ताश्चयोषि
ताः ११ आमंत्र्यान्योन्यमाश्लिष्यततोजग्मुर्यथागतं ततोविसर्जयामासलोकांस्तान्मुनिपुंगवः १२ क्षणेनांतर्हिताश्चैवप्रेक्षतामेवतेभव
न् अवगाह्यमहात्मानः पुण्यांभागीरथींनदीं १३ सरथाः सध्वजाश्चैवस्वानिवेश्मानिभेजिरे देवलोकंययुः केचित्केचिद्ब्रह्मसदस्तथा १४ के
चिच्चवारुणंलोकंकेचित्कौबेरमाप्नुवन् ततोवैवस्वतंलोकंकेचिच्चैवाप्नुवंनृपाः १५ राक्षसानांपिशाचानांकेचिच्चाप्युत्तरान्कुरून् विचित्रग
तयश्चान्येयानवाप्यामरैः सह १६ आजग्मुस्तेमहात्मानः सवाहाः सपदानुगाः गतेषुतेषुसर्वेषुसलिलस्थोमहामुनिः १७ धर्मशीलोमहा
तेजाः कुरूणांहितकृत्तथा ततः प्रोवाचताः सर्वाः क्षत्रियानिहतेश्वराः १८ यायाः पतिकृतांल्लोकानिच्छंतिपरमस्त्रियः ताजाह्नवीजलं क्षि एम०
२०

प्रमवगाहंत्वक्तंदिताः १९ ततस्तस्य वचः श्रुत्वा श्रद्दधाना वरांगनाः श्वशुरं समनुज्ञाप्य विविशुर्जाह्नवीजलं २० विमुक्ता मानुषैर्देहैस्ततस्ता भर्तृभि
:सह समाजग्मुस्तदा साध्व्यः सर्वा एव विशांपते २१ एवं क्रमेण सर्वास्ताः शीलवत्यः पतिव्रताः प्रविश्य क्षत्रिया मुक्ता जग्मुर्भर्तृसलोकतां
२२ दिव्यरूपसमायुक्ता दिव्याभरणभूषिताः दिव्यमाल्यांबरधरा यथासां पतयस्तथा २३ ताः शीलगुणसंपन्ना विमानस्था गतक्लमाः सर्वाः स
र्वगुणोपेताः स्वस्थानं प्रतिपेदिरे २४ यस्य यस्य तु यः कामस्तस्मिन्काले बभूव ह तं तं विसृष्टवान्व्यासो वरदो धर्मवत्सलः २५ तच्छ्रुत्वा नरदे
वानां पुनरागमनं नराः जहृषुर्मुदिताश्चासन्नानादेशगता अपि २६ प्रियैः समागमं तेषां यः सम्यक् शृणुयान्नरः प्रियाणि लभते नित्यमि
ह प्रेत्य चैव ह २७ इष्टबांधवसंयोगमनायासमनामयं यश्चैतच्छ्रावयेद्विद्वान्विदुषो धर्मवित्तमः २८ स यशः प्राप्नुयाल्लोके परत्र च शुभां गतिं
स्वाध्याययुक्ता मनुजास्तपोयुक्ताश्च भारत २९ साध्वाचारा दमोपेता दाननिर्धूतकल्मषाः ऋजवः शुचयः शांता हिंसानृतविवर्जिताः ३०
आस्तिकाः श्रद्दधानाश्च धृतिमंतश्च मानवाः श्रुत्वाश्चर्यमिदं पर्व ह्यवाप्स्यंति परां गतिं ३१ इति आश्रमवासिके पर्वणि सौतिरुवाच एतच्छ्रुत्वा
नृपो विद्वान्हृष्टोऽभूज्जनमेजयः पितामहानां सर्वेषां गमनागमनं तदा १ अब्रवीच्च मुदा युक्तः पुनरागमनं प्रति कथं नु त्यक्तदेहानां पुनस्तद्रू
पदर्शनं २ इत्युक्तः स द्विजश्रेष्ठो व्यासशिष्यः प्रतापवान् प्रोवाच वदतां श्रेष्ठस्तं नृपं जनमेजयं ३ वैशंपायन उवाच अविप्रणाशः सर्वेषां
कर्मणामिति निश्चयः कर्मजानि शरीराणि तथैवाकृतयो नृप ४ महाभूतानि नित्यानि भूताधिपतिसंश्रयात् तेषां चानित्यसंवासो
न विनाशो वियुज्यतां ५ अनायासकृतं कर्म सत्यश्रेष्ठः फलागमः आत्मा चैभिः समायुक्तः सुखदुःखमुपाश्नुते ६ अविनाशी तथा युक्तः क्षे
त्रज्ञ इति निश्चयः भूतानामात्मको भावो यथासौ न वियुज्यतां ७ यावन्न क्षीयते कर्म तावत्तस्य स्वरूपता क्षीणकर्मा नरो लोके रूपान्यत्वं नि

पश्यति ८ नानाभावास्तथैकत्वं शरीरं प्राप्य संहताः भवंति ते न तथा नित्याः पृथग्भावं विजानतां ९ अश्वमेधे श्रुतिश्चेयमश्वसंज्ञपनं प्रति लो
कांतरगता नित्यं प्राणा नित्यं शरीरिणां १० अहं हितं वदाम्येतत्प्रियं चेत्तव पार्थिव देवयाना हि पंथानः श्रुतास्ते यज्ञसंस्तरे ११ आहृतो यज्ञ
उस्तेन तत्र देवा हितं तव यदा समन्विता देवाः पशूनां गमनेश्वराः १२ गतिमंतश्च तेनेष्टा नान्ये नित्या भवंत्युत नित्येऽस्मिन्पंचके वर्गे नित्ये चात्मनि
पूरुषः १३ अस्य नानासमायोगं यः पश्यति वृथामतिः वियोगे शोचते नित्यं स बाल इति मे मतिः १४ वियोगे दोषदर्शी यः संयोगं स विसर्जयेत् अ
संगे संगमो नास्ति दुःखं भुवि वियोगजं १५ परापरज्ञस्तु परो नाभिमानादुदीरितः अपरज्ञः परां बुद्धिं ज्ञात्वा मोहाद्विमुच्यते १६ दर्शनादापतितः पु
नश्चादर्शनं गतः नाहं तं वेद्मि नासौ मां न च मेऽस्ति विरागता १७ येन येन शरीरेण करोत्ययमनीश्वरः तेन तेन शरीरेण तदवश्यमुपाश्नुते १८ मान
सं मनसाप्नोति शरीरं च शरीरवान् १९ आश्रमवासिके पर्वणि वैशंपायन उवाच अदृष्ट्वा तु नृपः पुत्रान्दर्शनं प्रतिलब्धवान् ऋषेः प्रसादा
त्पुत्राणां स्वरूपाणां कुरूद्वह १ स राजा राजधर्मांश्च ब्रह्मोपनिषदं तथा अवाप्तवान्नरश्रेष्ठो बुद्धिनिश्चयमेव च २ विदुरश्च महाप्राज्ञो ययौ सिद्धिं तपो
बलात् धृतराष्ट्रः समासाद्य व्यासं चैव तपस्विनं ३ जनमेजय उवाच ममापि वरदो व्यासो दर्शयेत्पितरं यदि तद्रूपवेशवयसं श्रद्दध्यां सर्वमेव ते ४
प्रियं मे स्यात्कृतार्थश्च स्यामहं कृतनिश्चयः प्रसादादृषिमुख्यस्य मम कामः समृध्यतां ५ सौतिरुवाच इत्युक्तवचने तस्मिन्नृपे व्यासः प्रतापवान्
प्रसादमकरोद्धीमानयच्च परिक्षितं ६ ततस्तद्रूपवयसमागतं नृपतिं दिवः श्रीमंतं पितरं राजा ददर्श जनमेजयः ७ पितरं स्नापयामास स्वयं स
स्नोचया पार्थिवः स्नात्वा सन्नृपतिर्विप्रमास्तीकमिदमब्रवीत् ८ यायावरकुलोत्पन्नं जरत्कारुसुतं तदा आस्तीक विविधाश्चर्यो पपत्रो प्रमितिर्मे
मतिः ९ यद्द्यायं पिता प्राप्तो मम शोकप्रणाशनः आस्तीक उवाच ऋषिर्द्वैपायनो यत्र पुराणस्तपसो निधिः यस्ते कुरुकुल श्रेष्ठ तस्य लोका राम० २१

लो३

© Dharmartha Trust J&K. Digitized by eGangotri

नि२ पि१

५३ बुभौजितो १० श्रुतंविचित्रमाख्यानंत्वयापांडवनंदन सर्याश्रमस्य सान्नोनागताश्चयदीतः ११ कथंचितक्रकोमुक्तःसत्पत्नामवयापार्थिव ऋ
षयःपूजिताःसर्वेगतिर्दिष्टामहात्मनः १२ प्राप्तःसविपुलोधर्मः श्रुत्वायायविनाशनं विमुक्तोऽहंत्वयंथ्यिदहास जनदर्शनैत १३ येचपक्षधराधर्मेसहृत्नरूच
यश्चये यौद्दृष्ट्वाहीयतेयायंतेभ्यः कार्यानमस्क्रिया १४ सौतिरुवाच एतच्छुत्वाद्विजश्रेष्ठात्सराजाजनमेजयः पूजयामासतमृषिमनुमान्यपुनःपुनः
१५ पप्रच्छतमृषिंचापिवैशंपायनमच्युतं कथावशेषंधर्मज्ञोवनवासस्यसत्तम आश्रमवासिकेपर्वणि जनमे० दृष्ट्वापुत्रांस्तथापौत्रान्सपुत्रान् ५४
जनाधिप धृतराष्ट्रः।किमकरोद्राजाचैवयुधिष्ठिरः १ वैशंपा० तद्दृष्ट्वामहदाश्चर्यंपुत्राणांदर्शनंनृप वीतशोकःसराजर्षिः पुनराश्रममागमत्
२ इतरस्तुजनःसर्वस्तेचैवपरमर्षयः प्रतिजग्मुर्यथाकामंधृतराष्ट्राभ्यनुज्ञया ३ पांडवास्तुमहात्मानोलघुभूयिष्ठसैनिकाः पुनर्जग्मुर्महात्मानंसदा स
रास्तंमहीपतिं ४ तमाश्रमपदंधीमानब्रह्मर्षिर्लोकपूजितः मुनिःसत्यवतीपुत्रोधृतराष्ट्रमभाषत ५ धृतराष्ट्रमहाबाहोशृणुकौरवनंदन श्रुतंतेज्ञा
नवृद्धानामृषीणांपुण्यकर्मणां ६ ऋद्धाभिजनवृद्धानांवेदवेदांगवेदिनां धर्मज्ञानांपुराणानांवदतांविविधाःकथाः ७ मास्मशोकेमनःकार्षी
र्दिष्टेनव्यथतेबुधः श्रुतंदेवरहस्यंतेनारदाद्देवदर्शनात् ८ गतास्तेक्षत्रधर्मेणशस्त्रपूतांगतिंशुभां यथादृष्टास्त्वयापुत्रास्तथाकामविहारिणः ९
युधिष्ठिरस्त्वयंधीमान्भवंतमनुरुध्यते सहितोभ्रातृभिःसर्वैःसदारःससुहृज्जनः १० विसर्जयैनंयात्वेषःस्वराज्यमनुशासतां मासःसमधिकोह्ये
षांमतीतोवसतांमुने ११ एतद्धिनित्यंयत्नेनपदंरक्ष्यंनराधिप बहुप्रत्यर्थिकंह्येतद्राज्यंनामकुरूद्वह इत्युक्तःकौरवोराजाव्यासेनामिततेज
सा युधिष्ठिरमाहूयवाग्मीवचनमब्रवीत् १३ अजातशत्रोभद्रंतेशृणुमेभ्रातृभिःसह त्वत्प्रसादान्महीपालशोकोनास्मान्प्रबाधते १४ रमे
चाहंत्वयापुत्रपुरेवगजसाह्वये नाथेनानुगतोविद्वान्प्रियेषुपरिवर्तिना १५ प्राप्तंपुत्रफलंत्वत्तः प्रीतिर्मेपरमात्वयि नमेमन्युर्महाबाहोगम्यतां

© (C) Dharmartha Trust J&K. Digitized By eGangotri

आश्रा० पुत्रमाचिरं १६ भवंतंचेहसंप्रेक्ष्यतपोमेपरिहीयते तपोयुक्तंशरीरंचत्वांदृष्ट्वाधारितंमया १७ मातरौतेतथैवेमेशीर्णपर्णकृताशने ममतुल्यव्रते
२२ पुत्र — नचिरंवर्त्तयिष्यतः १८ दुर्योधनप्रभृतयोदृष्टालोकांतरंगताः व्यासस्यतपसोवीर्याद्भवतश्चसमागमात् १९ प्रयोजनंचनिर्वृत्तंजीवित
सममानघ उग्रं तपःसमास्थास्येत्वमनुज्ञातुमर्हसि २० त्वय्यद्यपिंडःकीर्तिश्चकुलंचेदंप्रतिष्ठितं श्वोवाद्यवामहाबाहोगम्यतां पुत्रमाचिरं २१
राजनीतिःसुबहुशःश्रुतातेभरतर्षभ संदेष्टव्यंनपश्यामिकृतंमेभवताप्रभो २२ वैशं० इत्युक्तवचनंतंतुनृपोराजानमब्रवीत् नमामर्हसि
धर्मज्ञपरित्यक्तुमनागसं २३ कामंगच्छंतुमेसर्वेभ्रातरोऽनुचरास्तथा भवंतमहमन्विष्येमातरौचयतव्रतः २४ तमुवाचाथगांधारीमैवंपुत्रशृणुष्वचत्व
अ० ५ य्यधीनंकुरुकुलंपिंडश्चश्वशुरस्यमे २५ गम्यतांपुत्रपर्याप्तमेतावत्पूजितावयं राजायदाहतत्कार्यंत्वयापुत्रपितुर्वचः २६ वैशं० इत्युक्तःसतुगांधा
रींकुंतीमिदमभाषत स्नेहबाष्पाकुलेनेत्रेप्रमृज्यरुदतींवचः २७ विसर्जयतिमांराजागांधारीचयशस्विनी भवत्यांबद्धचित्तस्तुकथंयास्यामिदु
ःखितः २८ नचोत्सहेतपोविघ्नंकर्तुंतेधर्मचारिणि तपसोहिपरंनास्तितपसाविंदतेमहत् २९ ममापिनतथाराज्ञिराज्येबुद्धिर्यथापुरा तपस्येव वर्त्तते
पुरुष्यामेघगंगातीरनिवासिनः धृतराष्ट्रंमहात्मानमास्थितंपरमंतपः ६ परिदृष्टस्त्वयातत्रकुशलीसकुरूद्वहः गांधारीचपृथाचैवसूतपुत्रश्चसंजयः ७
कथंवर्त्ततेवाद्यपितामममसपार्थिवः श्रोतुमिच्छामिभगवन्यदिदृष्टस्त्वयानघ ८ नारदउवाच स्थिरीभूयमहाराजशृणुवृत्तंयथातथं यथाश्रुतंचदृष्टंच
मयातस्मिंस्तपोवने ९ वनवासनिवृत्तेषुभवत्सुकुरुनंदन कुरुक्षेत्रात्पितातुभ्यंगंगाद्वारंययौनृप १० गांधार्यासहितोधीमान्वध्वाकुंत्यासमन् ५३
वितःसंजयेनचसूतेनसाग्निहोत्रःसयाजकः ११ आतस्थेसतपस्तीव्रंपितातवतपोधनः वीटांमुखेसमादायवायुभक्षोऽभवन्मुनिः १२ वनेस
मुनिभिःसर्वैःपूज्यमानोमहातपाः त्वगस्थिमात्रशेषःसषण्मासानभवन्नृप १३ गांधारीतुजलाहाराकुंतीमासोपवासिनी संजयःषष्ठभक्तेनच राम०

२२

© Dharmartha Trust J&K. Digitized by eGangotri

स्यैवानुरक्तं मेमनः सर्वात्मनातथा ३० भूमेपंचमहीक्षन्स्त्वानमेप्रीतिकरीशुभे बांधवानः परीक्षीणांबलंनोनयथापुरा ३१ पांचालाः
समशंक्षीणाः कथामात्रावशेषिताः नतेषांकुलकर्तारंकिंचित्पश्याम्यहंशुभे ३२ सर्वेहिभस्मसान्नीतास्तेद्रोणेनरणाजिरे अवशि
ष्टाश्चनिहताद्रोणपुत्रेणवैनिशि ३३ चेदयश्चैवमत्स्याश्चदृष्टपूर्वास्तथैवनो केवलंवृष्णिचक्रंचवासुदेवपरिग्रहात् ३४ यद्दृष्ट्वास्थातुमि
नार्थ४ च्छामिधर्मार्थंहेतुनः शिवेनपश्यनः सर्वानिष्टुल्यमेतदवदर्शनं ३५ अविषह्यंचराजाहितीव्रंवाक्यमतेनयः एतच्छ्रुत्वामहाबाहुः सहदेवो
युधांपतिः ३६ युधिष्ठिरमुवाचेदंबाष्पव्याकुललोचनः नोत्सहेहंपरित्यक्तुंमातरंभरतर्षभ ३७ प्रतियातुभवान्क्षिप्रंतपस्स्याम्यहंवि
भो इहैवशोषयिष्यामितपसेदंकलेवरं ३८ पादशुश्रूषणेरक्तोराज्ञोमात्रोस्तथानयोः तमुवाचततःकुंतीपरिष्वज्यमहाभुजं ३९
गम्यतांपुत्रमैवंत्वंवोचः कुरुवचोमम आगमावः शिवाः संतुस्वस्थाभवतपुत्रकाः ४० उपरोधोभवेदेवमस्माकंतपसः कृते
त्वत्स्नेहपाशबद्धाचहीयेयंतपसः परात् ४१ तस्मात्पुत्रकगच्छत्वंशिष्टमल्पंचनः प्रभो एवंसंस्तंभितंवाक्यैः कुंत्याबहुविधैर्मनः ४२
सहदेवस्यराजेंद्रराजश्चैवविशेषतः तेमात्रासमनुज्ञाताराज्ञाचकुरुपुंगवाः ४३ अभिवाद्यकुरुश्रेष्ठमामंत्रयितुमारभन् युधिष्ठिरउवाच

© Dharmartha Trust J&K. Digitized by eGangotri

पत्र: ४

आ० २३ राज्यंप्रतिगमिष्यामः शिवेनप्रतिनंदिताः अनुज्ञातास्त्वयाराजन्गमिष्यामोविकल्मषाः ४४ एवमुक्तः सराजर्षिर्धर्मराज्ञामहात्मना अनुजज्ञे
सकौरव्यमभिनंद्ययुधिष्ठिरं ४५ भीमंचबलिनांश्रेष्ठंसांत्वयामाससपार्थिवः संवाससमसंमेधावीप्रत्ययघनवीर्यवान् ४६ अर्जुनंचसमाश्लि
ष्ययमौचपुरुषर्षभौ अनुजज्ञेसकौरव्यः परिष्वज्याभिनंद्यच ४७ गांधार्याचाभ्यनुज्ञाताकृतपादाभिवादनाः जननमासमुपाघ्रातपरिमु
क्ताश्चैनृपं ४८ चक्रुःप्रदक्षिणांसर्वेवत्साइवनिवारणे पुनर्निरीक्षंतःप्रचक्रुस्तेप्रदक्षिणां ४९ द्रौपदीप्रमुखाश्चैवसर्वाःकौरवयोषितः न्या
यतः श्वशुरेवृत्तिंप्रयुज्यप्रययुस्ततः ५० श्वश्रूभ्यांसमनुज्ञाताः परिष्वज्याभिनंदिताः संदिष्टाश्चेतिकर्तव्यंप्रययुर्भर्तृभिः सह ५१ ततः प्र
जज्ञेनिनदः सूतानांयुज्यतामिति उष्ट्राणांक्रोशतांचापिहयानांहेषतामपि ५२ ततोयुधिष्ठिरोराजासदारः सहसैनिकः नगरंहा
स्तिनपुरंपुनरायात्सबांधवः ५३ आश्रमवासिकेपर्वणि वैशं० द्विवर्षोपनिवृत्तेषुपांडवेषुयदृच्छया देवर्षिर्नारदोराजन्नाज
गामयुधिष्ठिरं १ तमभ्यर्च्यमहाबाहुः कुरुराजोयुधिष्ठिरः आसीनंपरिविश्वस्तंप्रोवाचवदतांवरः २ चिरात्तुनानुपश्यामिभगवं
तमुपस्थितं कच्चित्तेकुशलंविप्रशुभंवाप्रत्युपस्थितं ३ केदेशाः परिदृष्टास्तेकिंचकार्यंकरोमिते तद्ब्रूहिद्विजमुख्यस्त्वंत्वंह्य
स्माकंपरागतिः ४ नारदउवाच चिरदृष्टोसिमेत्वेवमागतोहंतपोवनात् परिदृष्टानितीर्थानिगंगाचैवमयानृप ५ युधिष्ठिरउ ॥ राम० २३

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

हूयप.न१

नैयामासभारत १४ अग्नींस्तुयाजकास्तत्र तत्यजुर्विजनेविभो हूयमानेष्वैववनेतस्मिन्नृपसत्तमे १५ अनिकेतोथराजासबभूववनगोचरः तेचापिसहिते
देव्यौसंजयश्चतमन्वयुः १६ संजयोनृपतेर्नेतासमेषुविषमेषुच गांधार्यास्तुपृथाराजन्चक्षुरासीदनिंदिता १७ ततःकदाचिद्गंगायाः कछेसनृपसत्तमः
गंगायामाप्लुतोधीमानाश्रमाभिमुखोभवत् अथवायुःसमुद्भूतोदावाग्निरभवन्महान् ददाहतद्वनंसर्वंपरिगृह्यसमंततः १८ दह्यत्सुमृगयूथेषुद्विजि
ह्वेषुसमंततः वाराहाणांचयूथेषुसंश्रयत्सुजलाशयान् २० समाविद्धेवनेतस्मिन्प्राप्तेव्यसनउत्तमे निराहारतयाराजामंदप्राणोविचेष्टितः २१ असमर्थोपस
रणेसुकृशौमातरौचते ततःसनृपतिर्दृष्ट्वावह्निमायांतमंतिकात् २२ इदमाहततःसूतंसंजयंजयतांवरः गच्छसंजययत्राग्निर्नत्वांदहतिकर्हिचित् २३
वयमत्राग्निनायुक्तागमिष्यामःपरांगतिं तमुवाचकिलोद्विग्नःसंजयोवदतांवरः ४ राजन्मृत्युरनिष्टोयंभवितातेवृथाग्निना नचोपायंप्रपश्यामिमोक्षणे
जातवेदसः २५ यदत्रानंतरंकार्यंतद्भवान्वक्तुमर्हति इत्युक्तःसंजयेनेदंपुनराहसपार्थिवः २६ नैषमृत्युरनिष्टोनोनिःसृतानांगृहात्स्वयं जलमग्नि
स्तथावायुरथवापिविकर्षणं २७ तापसानांप्रशस्यंतेगच्छसंजयमाचिरं इत्युक्त्वासंजयंराजासमाधायमनस्तथा २८ प्राङ्मुखःसहगांधार्याकुंत्याचो
पाविशत्तदा संजयस्तंतथादृष्ट्वाप्रदक्षिणमथाकरोत् २९ उवाचचैनंमेधावीयुंक्ष्वात्मानमितिप्रभो ऋषिपुत्रोमनीषीसराजाचक्रेस्यतद्वचः ३० संनि
रुध्येंद्रियग्राममासीत्काष्ठोपमस्तदा गांधारीचमहाभागाजननीचपृथातव ३१ दावाग्निनासमायुक्तेसचराजापितातव संजयस्तुमहामात्रस्तस्माद्दा
वादमुच्यत ३२ गंगाकूलेमयादृष्टस्तापसैःपरिवारितः सतानामंत्र्यतेजस्वीवेद्यैतच्चसर्वशः ३३ प्रययौसंजयोधीमान्हिमवंतंमहीधरं एवंसनिध
नंप्राप्तःकुरुराजोमहामनाः ३४ गांधारीचपृथाचैवजनन्यौतेविशांपते यदृच्छयानुव्रजतामयाराज्ञःकलेवरं ३५ तयोश्चदेव्योरुभयोर्दृष्टानिभारत
ततस्तपोवनेतस्मिन्समाजग्मुस्तपोधनाः ३६ श्रुत्वाराज्ञस्तथानिष्ठांनत्वशोचन्गतींश्चते ३ तत्राश्रौषम सत्तम ३७ यथाचनृपतिर्दग्धोदेव्यौतेचेति

गमु

नि ३

हंसर्वमेतत्पुरुष १

पोर्म २

१२

आ०
२४

पांडव नशोचितव्यं राजेंद्र स्वतः स पृथिवीपतिः ३८ प्राप्तवानग्निसंयोगं गांधारी जननी च ते वै शं० एतच्छ्रुत्वा च सर्वेषां पांडवानां महात्मनां । निर्या
णं धृतराष्ट्रस्य शोकः समभवन्महान् अंतःपुराणां च तदा महानार्त्तस्वरोऽभवत् ४० पौराणां च महाराज श्रुत्वा राज्ञस्तथा गतिं अहो धिगिति राजेंद्र विक्रुश्य
भृशदुःखितः ४१ ऊर्ध्ववाहुस्वनन्मातः प्ररुरोद युधिष्ठिरः भीमसेनपुरोगाश्च भ्रातरः सर्व एव ते अंतःपुरेषु च तदा सुमहान्रुदितस्वनः प्रादुरासी
न्महाराज पृथां श्रुत्वा तथागतां ४३ तं च वृद्धं तथा दग्धं हतपुत्रं नराधिपं अन्वशोचंत ते सर्वे गांधारीं च तपस्विनीं ४४ तस्मिंस्तु परते शब्दे मुहूर्त्तादिव भा
रत निगृह्य वाष्पं धैर्येण धर्मराजोऽब्रवीदिदं ४५ आश्रमवासिके पर्वणि युधिष्ठिर उवाच तथा महात्मनस्तस्य तपस्युग्रे च वर्त्ततः अनाथस्येव वने
तिष्ठत्स्वस्मासु बंधुषु १ दुर्विज्ञेया गतिर्ब्रह्मन्पुरुषाणां मतिर्मम यत्र वैचित्रवीर्योऽसौ दग्ध एवं वनाग्निना २ यस्य पुत्रशतं श्रीमदभवद्बाहुशालिनः ना
गायुतबलो राजा स दग्धो हि दवाग्निना ३ यं पुरा पर्यवीजंत तालवृंतैर्वरस्त्रियः तं गृध्राः पर्यवीजंत दावाग्निपरिकालितं ४ सूतमागधसंघैश्च शयानो यः
प्रवोध्यते धरण्यां स नृपः शेते पापस्य मम कर्मभिः ५ न च शोचामि गांधारीं हतपुत्रां यशस्विनीं पतिलोकमनुप्राप्तां तथा भर्तृव्रते स्थितां ६ पृथामेव तु
शोचामि या पुत्रैश्वर्यमृद्धिमत् उत्सृज्य सुमहद्दीप्तं वनवासमरोचयत् ७ धिग्राज्यमिदमस्माकं धिग्बलं धिक्पराक्रमं क्षत्रधर्मं च धिग्यस्मान्मृता जीवामहे
वयं ८ सूक्ष्मा किल कालस्य गतिर्द्विजवरोत्तम यत्समुत्सृज्य राज्यं सा वनवासमरोचयत ९ युधिष्ठिरस्य जननी भीमस्य विजयस्य च अनाथवत्कथं दग्धा
इति मुह्यामि चिंतयन् १० वृथा संतर्पितो वह्निः खांडवे सव्यसाचिना उपकारमजानंतो कृतघ्न इति मे मतिः ११ यत्रादहत्स भगवन्मातरं सव्यसाचिनः
कृत्वा यो ब्राह्मणच्छद्म भिक्षार्थी समुपागतः १२ धिगग्निं धिक्च पार्थस्य विश्रुतां सत्यसंधता इदं कष्टतरं चान्यद्भगवन्प्रतिभाति मे १३ वृथाग्निना समा
योगो यदभूत्पृथिवीपते तथा तपस्विनस्तस्य राजर्षेः कौरवस्य ह १४ कथमेवंविधो मृत्युः प्रशास्य पृथिवीमिमां तिष्ठत्सु मंत्रपूतेषु तस्याग्निषु महावने एन०
२४

वा१ सं २

CC-0. Dhanvantari Trust & Digitized By eGangotri

१५ वृथाग्निना समायुक्तो निष्ठां प्राप्तः पिता मम मन्ये हि यथा वेपमाना कृशा धमनिसंतता १६ हा तात धर्मराजेति समाक्रंदन्महाभये भीम पर्याप्नुहि भया
दिति वैवाभिवाशती १७ समंततः परिक्षिप्ता माता मे स दवाग्निना सहदेवः प्रियस्तस्याः पुत्रेभ्योऽधिक एव तु १८ नैवैनां मोक्षयामास वीरो माद्रवती
सुतः तच्छ्रुत्वा रुरुदुः सर्वे समालिंग्य परस्परं १९ पांडवाः पंच दुःखार्ता भूतानीव युगक्षये तेषां तु पुरुषेंद्राणां रुदतां रुदितस्वनः २० प्रासादाभो
गसंरुद्धो ह्यत्वरो तस्थौ स रोदसी २१ आश्रमवासिके पर्वणि नारद उवाच नासौ वृथाग्निना दग्धो यथा तत्र श्रुतं मया वैचित्रवीर्यो नृपतिस्तत्ते वक्ष्या
मि भारत १ वनं प्रविशता तेन वायुभक्षेण धीमता अग्नयः कारयित्वेष्टिमुत्सृष्टा इति नः श्रुतं २ याजकास्तु ततस्तस्य तानग्नीन्निर्जने वने समुत्सृ
ज्य यथाकामं जग्मुर्भरतसत्तम ३ स विवृद्धस्तदा वह्निर्वने तस्मिन्नभूत्किल तेन तद्वनमादीप्तमिति मे तापसाब्रुवन् ४ स राजा जाह्नवीकच्छे १६
यथा ते कथितं मया तेनाग्निना समायुक्तः स्वेनैव भरतर्षभ ५ एवमावेदयामासुर्मुनयस्ते ममानघ ये ते भागीरथीतीरे मया दृष्टा युधिष्ठिर ६ भी ८
एवं स्वेनाग्निना राजा समायुक्तो महीपते मा शोचिथास्त्वं नृपतिं गतः स परमां गतिं ७ गुरुशुश्रूषया चैव जननी तव जनाधिप प्राप्ता सुमहतीं सि
द्धिमिति मे नात्र संशयः ८ कर्तुमर्हसि राजेंद्र तेषां त्वमुदकक्रियां भ्रातृभिः सहितः सर्वैरेतदत्र विधीयतां ९ वैशं० ततः स पृथिवीपालः पांड
वानां धुरंधरः निर्ययौ सह सोदर्यैः सदारश्च नरर्षभः १० पौरजानपदाश्चैव राजभक्तिपुरस्कृताः गंगां प्रजग्मुरभितो वाससैकेन संवृताः ११ ततो
वगाह्य सलिलं सर्वे ते नरपुंगवाः युयुत्सुमग्रतः कृत्वा ददुस्तोयं महात्मने १२ गांधार्याश्च पृथायाश्च विधिवन्नामगोत्रतः शौचं निवर्त्तयंतस्ते तत्रोषु
र्नगराद्बहिः प्रेषयामास स नरान्विधिज्ञानाप्तकारिणः गंगाद्वारं नरश्रेष्ठो यत्र दग्धो भवन्नृपः १४ तत्रैव तेषां कुल्यानि गंगाद्वारे विशांपते कर्तव्या
नीति पुरुषान्दत्तदेयान्महीपतिः १५ द्वादशेऽहनि तेभ्यः स कृतशौचो नराधिपः ददौ श्राद्धानि विधिवद्दक्षिणावंति पांडवः १६ धृतराष्ट्रं समुद्दिश्य

आ १   ७   २४

© Dharmartha Trust J&K. Digitized by eGangotri

या१

श्रा० रौमसपृथिवीपतिः सवर्णीरजतंगाश्चशय्याश्चरुमहाधनाः १७ गांधार्यास्त्रीवतेजस्वीपृथ्वीश्वरपृथक्पृथक् संकीर्त्यनामनीराजाददौदानमनुत्त

२५ मं १८ योयदिच्छतियावच्चतावत्सलभतेनरः शयनंभोजनंपानंमणिरत्नमथोधनं १९ यानमाच्छादनंभोगानन्यसीश्चममलंकृताः ददौराजा

मुद्दिश्यतेयोमर्त्योर्महीपतिः २० ततःसपृथिवीपालोदत्वाश्राद्धान्यनेकशः प्रविवेशपुरंराजानगरंवारसाह्वयं २१ तेचापिराजवचनात्पुरुषा

येगताभवन् संकल्पतेषांकुल्यानिपुनः प्रत्यागमंस्ततः २२ माल्यैर्गंधैश्च विविधैरर्चयित्वायथाविधि कुल्यानितेषांसंयोज्यतदाचख्यु

र्महीपतेः २३ समाश्वास्यततोराजानंधर्मात्मानंयुधिष्ठिरं नारदोप्यगमद्राजन्परमर्षिर्यथेप्सितं २४ एवंवर्षाण्यतीतानिधृतराष्ट्रस्यधीम

तः वनवासेतथात्रीणिनगरेदशपंचच २५ हतपुत्रस्संग्रामे दानानिददतः सदा ज्ञातिसंबंधिमित्राणांभ्रातॄणांस्वजनस्य च २६ युधिष्ठिर

बं१

राम०

२५ ॥

आ० ततन्नृपतिर्नीतिश्रीतमनाहात्मा धारयामासतद्राज्यंनिहतज्ञातिबांधवः २७ तथाश्रमवासिकेपर्वणिपितसमाहितःगंधमाल्यादिवस्त्रंबहुविधंभोजयेद्दि
२५ द्विजान् २८ इतिश्रीमहाभारतेआश्रमवासिकपर्वसमाप्तमिति॥ ॥श्रीमार्त्तंडभैरवायनमः॥ ॥श्रीरामायनम॥ ॥राम

राम०

२५

ऽपाश्रमपर्व
२६

© Dharmartha Trust J&K. Digitized By eGangotri

मस्यपेध ष्ठाप्रम

© Dharmartha Trust J&K. Digitized By eGangotri

आ० १

श्रीगणेशाय नमः श्रीगोपालं भजे श्रीमद्गोपालमानम्य प्राचीनाचार्यवर्त्मना आम्नायेऽधिकभावार्थैः श्रीकृष्णेन प्रकाश्यते १ अस्मत्कृतसूक्ष्मपापानाशावकीय
पुनरुक्तिं सानन्तुज्ञानेविवृतं गीतायां विपुलीकृतं २ मोक्षधर्मेषु च पुनर्नानाख्यानोपबृंहणैः अतीव व्याकृतं धर्मगात्मतत्त्वमनाकुलं ३ यज्ञिणामोक्षपायैव
जपध्यानादयः स्मृताः अनुशासनिके सम्यक्चित्तदोषविनाशकाः ४ यत्र प्रावणपलाभायवैराग्यादयमिति हृपकुतष्टपादिकोलीकयन्नां तत्रपवर्णितः ५ तदेतस्य न
श्मतोपसंहाराय्यपरिदर्शनः आत्मतत्त्वं विहग्गुनेभुनिराख्यानकैस्त्रिभिः ६ आख्यानत्रयं च संवर्तमरुत्तीयं कृष्णधर्मसंवादः कृष्णार्जुनसंवादश्च तत्राधिका
रसंपत्त्यसमुक्तिर्लिंगेनेवप्रहृत्वपितामहस्वर्गारोहणधर्मास्त्राधर्मैर्गोवधनं तस्यात्मसुहृदेयपरपमितुकं द्वितीयेपशास्त्रार्थत्तत्रयाणांतमोयेतन्हिश्वरणं चेति तदृश्वे ग

नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १

नकोक्षंमायायाख्यानेनैनोपयोगिगुरुस्तुस्वरूपामाहात्म्यंहिंसात्मकपत्तिलिंगादिचयथायथं नामयेविषयतपाक्तेपं तत्रायमाद्यः श्लोकः नारायणमिति आंशा
नारायणः इति योक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः इति स्मृतेरपः शुक्रपवचमश्रुतिस्मृतेः स्वामिः प्रधानं भूतपंचकं नरेणांतपोभिराणात्सृष्टं ना
रं तत्त्वं स्वानदेवाज्ञप्तविशदात्मकृतेः स्वसृष्टावेष्टावनारायणाईश्वरः स एव च भविश्वोपाधिधर्मानभिमन्यमानोनरो जीवः नाम्यांतत्त्वमोनरोत्तमः कार्यकारणोपाधि
द्वयानिर्मुक्तः परमात्मा एतत्त्रयंतत्स्वरूपप्रकाशिकांसरस्वतीं देवीं च प्रणम्य जयं महाभारताख्यमितिहासं सर्वे कुर्वीत स्मातिमा भूतमुदीरयेदिति तस्यार्थः एतेन नरत्व
मस्यादिवाक्यार्थो जीवब्रह्माभेदोऽयं ग्रन्थस्य प्रतिपाद्य इति दर्शितः १

स्म० १

वैशंपायन उवाच कृतोदकं तु राजानमिति उत्तीर्य गंगातटमिति शोभृः १३ १४

वैशंपायन उवाच कृतोदकं तु राजानं धृतराष्ट्रं युधिष्ठिरः पुरस्कृत्य महाबाहुरुत्ततारा कुलेंद्रियः २ उत्तीर्य च महाबाहुर्बाष्पव्याकुललोचनः पपा
त तीरे गंगाया व्याधविद्ध इव द्विपः ३ तं सीदमानं जग्राह भीमः कृष्णेन चोदितः मैवमित्यब्रवीच्चैनं कृष्णः परबलार्दनः ४ तमार्तं पतितं भूमौ श्वसंतं च
पुनः पुनः ददृशुः पार्थिवा राजन् धर्मपुत्रं युधिष्ठिरं ५ तं दृष्ट्वा दीनमनसं गतसत्वं नरेश्वरं भूयः शोकसमाविष्टाः पांडवाः समुपाविशन् ६ राजा तु ध
तराष्ट्रस्तु पुत्रशोकाभिपीडितः वाक्यमाह महाबुद्धिः प्रज्ञाचक्षुर्नरेश्वरं ७ उत्तिष्ठ कुरुशार्दूल कुरु कार्यमनंतरं क्षत्रधर्मेण कौंतेय जितेयमवनी
त्वया ८ भुंक्ष्व भोगान् भ्रातृभिश्च सुहृद्भिश्च मनोनुगान् शोचितव्यं न पश्यामि त्वया धर्मभृतां वर ९ शोचितव्यं मया चैव गांधार्या च महीपते य
योः पुत्रशतं नष्टं स्वप्नलब्धं यथा धनं १० अश्रुत्वा हितकामस्य विदुरस्य महात्मनः वाक्यानि सुमहार्थानि परितप्यामि दुर्मतिः ११ उक्तवा
न्विदुरो यन्मां धर्मात्मा दिव्यदर्शनः दुर्योधनापराधेन कुलं ते विनशिष्यति १२ स्वस्ति चेदिच्छसे राजन् कुलस्य क्रियतां वचः वध्यतामेष दुष्टा
त्मा मंदो राजा सुयोधनः १३ कर्णश्च शकुनिश्चैव नैनं पश्यतु कर्हिचित् द्यूतसंपातमप्येषामप्रमादेन वारय १४

© Dharmartha Trust J&K Digitized By eGangotri

इतिश्राश्वमेधिकेप्रथमोध्यायः एवंशोकाकुलंतौतोविरागमिच्छतीतिसङ्कथयति एवमुक्तस्तिनध्यायेन १ २ ३

अभिषेचयराजानंधर्मात्मानंयुधिष्ठिरं सपालयिष्यतिवशीधर्मेणपृथिवीमिमां १५ अथैनमब्रवीद्राजानंकुंतीपुत्रंयुधिष्ठिरं मेढीभूतःस्वयं
राज्यंप्रतिगृह्णीष्वपार्थिव १६ समंतस्वेषुभूतेषुवर्तमानंनराधिप अनुजीवंतुसर्वेत्वांजातयोमातृभिःसह १७ एवंब्रुवतिकौंतेयविदुरे
दीर्घदर्शिनि दुर्योधनमहंपापमवधीत्त्वंयथामतिः १८ अकृत्वातातसधीरस्यवाक्यानिमधुराणिह फलंप्राप्यमहत्तद्दुःखंनिमग्नःशो
कसागरे १९ दृष्ट्वाहितेप्रपितरोपस्पर्णतोदुःखितोनृप नशोचितव्यंभवतापश्यामीहजनाधिप २० इतिमहाभारतेआश्वमेधि
कपर्वणि १ वैशंपायनउवाच एवमुक्तस्तुराजासधृतराष्ट्रेणधीमता तूष्णींबभूवमेधावीतमुवाचाथकेशवः १ अतीवमनसा
शोकःक्रियमाणोजनाधिप संतापयतिचैतस्यपूर्वप्रेतान्पितामहान् २ यजस्वविविधैर्यज्ञैर्बहुभिःस्वाप्तदक्षिणैः देवांस्तर्पयसोमे
नस्वधयाचपितॄन्नृप ३ अतिथीनन्नपानेनकामैरन्यैरकिंचनान् विदितंवेदितव्यंतेकर्तव्यमपितेकृतं ४ श्रुताश्चराजधर्मास्ते
भीष्माद्भागीरथीसुतात कृष्णद्वैपायनाच्चैवनारदाद्विदुरात्तथा ५ नेमामर्हसिमूढानांवृत्तिंत्वमनुवर्तितुं पितृपैतामहंवृत्त
मास्थायधुरमुद्वह ६ युक्तंहियशसाक्षात्रंस्वर्गंप्राप्तुमसंशयं नहिकश्चिद्धिशूराणांनिहतोत्रपराङ्मुखः ७

© (c) Dharmartha Trust J&K. Digitized by eGangotri

मोक्षश्च पुनःकांहैरण्याहात्तीयकर्माचरणमेवश्रेयइत्युक्तं २० अध्यायः

मजशोकंमहाराजभवितव्यंहितत्तथा नशक्यास्तेपुनर्द्रष्टुंत्वयायेस्मिन्रणेहताः ८ एतावदुक्त्वागोविंदोधर्मराजंयुधिष्ठिरं विरराममु
हातेजास्तमुवाचयुधिष्ठिरः ९ युधिष्ठिरउवाच गोविंदमयियाप्रीतिस्तवसाविदितामम सौहृदेनतथाप्रेम्णासदामामनुकंपसे १०
प्रियंतुमेस्यात्सुमहत्कृतंचक्रगदाधर श्रीमन्प्रीतेनमनसासर्वंयादवनंदन ११ यदिमामनुजानीयाद्भवान्गंतुंतपोवनं नहिशांतिंप्र
पश्यामिघातयित्वापितामहं १२ कर्णंचपुरुषव्याघ्रंसंग्रामेष्वपलायिनं कर्मणायेनमुच्येयमस्मात्क्रूरादरिंदम १३ कर्मणस्त
द्विधत्स्वेहयेनशुध्यतिमेमनः तमेवंवादिनंपार्थंव्यासः प्रोवाचधर्मवित् १४ सांत्वयन्सुमहातेजाः शुभंवचनमब्रवीत् अकृताते
मतिस्तातपुनर्बाल्येनमुह्यसे १५ किमाकाशेवयंतातप्रलपामोमुहुर्मुहुः विदिताःक्षत्रधर्मास्तेयेषांयुद्धेनजीविका १६ यथा
प्रवृत्तोनृपतिर्नाधिबंधेनयुज्यते मोक्षधर्माश्चनिखिलायाथातथ्येनतेश्रुताः १७ असकृच्चापिसंदेहाश्छिन्नास्तेकामजामया अ
श्रद्दधानोदुर्मेधालुप्तस्मृतिरसिध्रुवं १८ मैवंभवनतेयुक्तमिदमज्ञानमीदृशं प्रायश्चित्तानिसर्वाणिविदितानिचतेनघ १९
राजधर्माश्चतेसर्वेदानधर्माश्चतेश्रुताः सकथंसर्वधर्मज्ञः सर्वागमविशारदः परिमुह्यसिभूयस्त्वमज्ञानादिवभारत २० इत्या

मी ३ श्वमेधिकेपर्वणिद्वितीयोध्यायः॥

© Dharmartha Trust J&K. Digitized By eGangotri

अ० ३

युधिष्ठिरतवप्रज्ञेत्यादिना १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

व्यासउवाच युधिष्ठिरतवप्रज्ञानसम्यगितिमेमनः नहिकश्चित्स्वयंमर्त्यःस्ववशःकुरुतेक्रियां १ ईश्वरेणचयुक्तोयंसाध्वसाधुचमानवः क
रोतिपुरुषःकर्मतत्रकापरिदेवना २ आत्मानंमन्यसेचाथपापकर्माणमंततः शृणुतत्रयथापापमपकृष्येतभारत ३ तपोभिः
क्रतुभिश्चैवदानेनचयुधिष्ठिर तरंतिनित्यंपुरुषायेस्मपापानिकुर्वते ४ यज्ञेनतपसाचैवदानेनचनराधिप पूयंतेनरशार्दूलनरादुष्कृ
तकारिणः ५ असुराश्चसुराश्चैवपुण्यहेतोर्मखक्रियां प्रयतंतेमहात्मानस्तस्माद्यज्ञाःपरायणं ६ यज्ञैरेवमहात्मानोबभूवुरधिका
ःसुराः ततोदेवाःक्रियावंतोदानवानभ्यधर्षयन् ७ राजसूयाश्वमेधौचसर्वमेधंचभारत नरमेधंचनृपतेत्वमाहरयुधिष्ठिर ८ यज
स्ववाजिमेधेनविधिवद्दक्षिणावता बहुकामान्नवित्तेनरामोदाशरथिर्यथा ९ यथाचभरतोराजादौष्यंतिःपृथिवीपतिः शाकुंत
लोमहावीर्यस्तवपूर्वपितामहः १० युधिष्ठिरउवाच असंशयंवाजिमेधःपावयेत्पृथिवीमपि अभिप्रायस्तुमेकश्चित्तंत्वंश्रोतुमि
हार्हसि ११ इमंज्ञातिवधंकृत्वासुमहांतंद्विजोत्तम दानमल्पंनशक्ष्यामिदातुंवित्तंचनास्तिमे १२ नचबालानिमान्दीनानुत्स
हेवसुयाचितुं तथैवार्द्रव्रणान्कृच्छ्रेवर्तमानान्नृपात्मजान् १३

रम० ३

© Dharmartha Trust J&K. Digitized by eGangotri

प्रीतिविधिमनुकल्पं २२ ततोयोध्यायः शुश्रूषेइति १ मरुत्तयज्ञप्रशंसाप्रसंगात्तद्वंश्यान्स्तौति व्यासोल्कृतयुगेइत्यादिनाध्यायद्वयेनस्वसंतंमहांतोपि

क्षयंविनाश्यपृथिवींयज्ञार्थेद्विजसत्तम करमाहारयिष्यामिकथंशोकपरायणः २४ दुर्योधनापराधेनवसुधावसुधाधिपाः प्रनष्टायोज
यित्वास्मानकीर्त्यामुनिसत्तम २५ दुर्योधनेनपृथिवीक्षयितावित्तकारणात् कोशश्चापिविशीर्णोसौधार्तराष्ट्रस्यदुर्मतेः २६ पृथिवीद
क्षिणाचात्रविधिःप्रथमकल्पितः विद्वद्भिःपरिदृष्टोयंशिष्टोविधिविपर्ययः २७ नचप्रतिनिधिंकर्तुंचिकीर्षामितपोधन अत्रमेभगव
न्सम्यक्साचिव्यंकर्तुमर्हसि २८ एवमुक्तस्तुपार्थेनकृष्णद्वैपायनस्तदा मुहूर्तमनुसंचिंत्यधर्मराजानमब्रवीत् २९ कोशश्चापिवि
शीर्णोयंपरिपूर्णोभविष्यति विद्यतेद्रविणंपार्थगिरौहिमवतिस्थितं ३० उत्सृष्टंब्राह्मणैर्यज्ञेमरुत्तस्यमहात्मनः तदानयस्वकौं
तेयपर्याप्तंतद्भविष्यति ३१ युधिष्ठिरउवाच कथंयज्ञेमरुत्तस्यद्रविणंतत्समाचितं कस्मिंश्चकालेसनृपोबभूववदतांवर ३२ व्या
सउवाच यदिशुश्रूषसेपार्थशृणुकारंधमंनृपं यस्मिन्कालेमहावीर्यःसराजासीन्महाधनः ३३ इत्याश्वमेधिकेपर्वणिसंवर्त्तमरुत्ती
ये युधिष्ठिरउवाच शुश्रूषेतस्यधर्मज्ञराजर्षेःपरिकीर्त्तनं द्वैपायनमरुत्तस्यकथांप्रब्रूहिमेनघ १ व्यासउवाच आसीत्कृतयुगे
तातमनुर्दंडधरःप्रभुः तस्यपुत्रोमहाबाहुःप्रसंधिरितिविश्रुतः २

कर्मैवानुतिष्ठंतीतिकर्ममाहात्म्यख्यापनार्थं १ २ २ २ २

श्व०
४

पूर्वं क्षुतेऽभवत्तस्य क्षुप इत्यभिविश्रुतः क्षुपस्य पुत्र इक्ष्वाकुर्महीपालोऽभवत्प्रभुः ३ तस्य पुत्रशतं राजन्नासीत्परमधार्मिकं तांस्तु सर्वान्मही
पालानिक्ष्वाकुरकरोत्प्रभुः ४ तेषां ज्येष्ठस्तु विंशोऽभूत्प्रतिमानं धनुष्मतां विंशस्य पुत्रः कल्याणो विविंशो नाम भारत ५ विविंशस्य सुता रा
जन्बभूवुर्दश पंच च सर्वे धनुषि विक्रांता ब्रह्मण्याः सत्यवादिनः ६ दानधर्मरताः शांताः सततं प्रियवादिनः तेषां ज्येष्ठः खनीनेत्रः स तान्स
र्वानपोथयत् ७ खनीनेत्रस्तु विक्रांतो जित्वा राज्यमकंटकं नाशक्नोद्रक्षितुं राज्यं नान्वरज्यंत तं प्रजाः ८ तमपास्य च तद्राष्ट्रं तस्य पुत्रं सुव
र्चसं अभ्यषिंचत राजेंद्र मुदितं ह्यभवत्तदा ९ स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तथा नियतो वर्तयामास प्रजाहितचिकीर्षया १० ब्रह्म
ण्यः सत्यवादी च शुचिः शमदमान्वितः प्रजास्तं चान्वरज्यंत धर्मनित्यं मनस्विनं ११ तस्य धर्मप्रवृत्तस्य व्यशीर्यत्कोषवाहनं तं क्षीणकोषं सामंता
स्समंतात्पर्यपीडयन् १२ स पीड्यमानो बहुभिः क्षीणकोशाश्ववाहनः आर्तिमार्छत्परां राजा सह भृत्यैः पुरेण च १३ न चैनमभिहंतुं ते शक्नु
वंति बलक्षये सम्यग्वृत्तो हि राजा स धर्मनित्यो युधिष्ठिर १४ यदा तु परमामार्तिं गतोऽसौ सपुरो नृपः ततः प्रदध्मौ स करं प्रादुरासीत्ततो बलं
१५ ततस्तानजयत्सर्वान्प्रातिसीमान्नराधिपान् एतस्मात्कारणाद्राजन्विश्रुतः स करंधमः १६ तस्य कारंधमः पुत्रस्त्रेतायुगमुखे
भवत् इंद्रादनवरः श्रीमान्देवैरपि सुदुर्जयः १७ तस्य सर्वे महीपाला वर्त्तंते स्म वशे तदा स हि सम्राडभूत्तेषां वृत्तेन च बलेन च १८
अविक्षिन्नाम धर्मात्मा शौर्येणेंद्रसमोऽभवत् यज्ञशीलो धर्मरतिर्धृतिमान्संयतेंद्रियः १९ तेजसादित्यसदृशः क्षमया पृथिवीसमः
बृहस्पतिसमो बुद्ध्या हिमवानिव सुस्थिरः २० कर्मणा मनसा वाचा दमेन प्रशमेन च मनांस्याराधयामास प्रजानां स महीपतिः २१

एम०
४

© Dharmarth Trust J&K. Digitized by eGangotri

पर्इजेहयमेधानांशतेनेष्टविधिवत्प्रभुः याजयामासयंविद्वान्स्वयमेवांगिराःप्रभुः २२ तस्यपुत्रोतिचक्रामपितरंगुणवत्तया मरुत्तोनामध
र्मज्ञश्चक्रवर्त्तीमहायशाः २३ नागायुतसमप्राणःसाक्षाद्विष्णुरिवापरः सयक्ष्यमाणोधर्मात्माशातकुंभमयान्युत २४ कारयामाससुभ्रा
णिभाजनानिसहस्रशः मेरुंपर्वतमासाद्यहिमवत्पार्श्वउत्तरे २५ कांचनःसुमहान्पादस्तत्रकर्मचकारसः ततःकुंडानिपात्रीश्चपिठराण्या
सनानिच २६ चक्रुःसुवर्णकर्त्तारोयेषांसंख्यानविद्यते तस्यैवचसमीपेतुयज्ञवाटोबभूवह २७ ईजेतत्रसधर्मात्माविधिवत्पृथिवीपतिः
मरुत्तःसहितैःसर्वैःप्रजापालैर्नराधिपः २८ इत्याश्वमेधिकेसंवर्त्तमरुत्तीयेतृतीयोध्यायः युधिष्ठिरउवाच कथंवीर्यःसमभवत्सराजावद
तांवर कथंचजातरूपेणसमयुज्यतसद्विज १ क्वचतत्सांप्रतंद्रव्यंभगवन्नवतिष्ठते कथंचशक्यमस्माभिस्तद्वाप्तुंतपोधन २ व्यासउ
वाच असुराश्चसुराश्चैवदक्षस्यासन्प्रजापतेः अपत्यंबहुलंतातसंस्पर्द्धंतपरस्परं ३ तथैवांगिरसःपुत्रौव्रततुल्यौबभूवतुः बृहस्पतिर्बृ
हत्तेजाःसंवर्त्तश्चतपोधन ४ तावतिस्पर्द्धिनौराजन्पृथगास्तांपरस्परं बृहस्पतिःससंवर्त्तंबाधतेस्मपुनःपुनः ५ सबाध्यमानःसततं
भ्रात्राज्येष्ठेनभारत अर्थानुत्सृज्यदिग्वासावनवासमरोचयत् ६ वासवोप्यसुरान्सर्वान्विजित्यचनिपात्यच इंद्रत्वंप्राप्यलोकेषुततोव
व्रेपुरोहितं ७ पुत्रमंगिरसोज्येष्ठंविप्रश्रेष्ठंबृहस्पतिं याज्यस्त्वंगिरसःपूर्वमासीद्राजाकरंधमः ८ वीर्येणाप्रतिमोलोकेवृत्तेनचबलेनच

CC-0. Dharmarth Trust J&K. Digitized by eGangotri

शनक्रतुरिवौजस्वीधर्मात्मासंशितव्रतः ९ वाहनं यस्य योधाश्चमित्राणिविविधानिच शयनानिचमुख्यानिमहार्हाणिचसर्वशः १०
ध्यानादेवाभवन्राजन्मुखवातेन सर्वशः सगुणैः पार्थिवान्सर्वान्वशेचक्रेनराधिपः ११ संजीयकालमिष्टंचसशरीरोदिवंगतः बभू
वतस्यपुत्रस्तुययातिरिवधर्मवित् १२ चक्रवर्तीत्वामशत्रुजित्सवशेकृतवान्महीं विक्रमेणगुणैश्चैवपितेवासीत्सपार्थिवः १३
तस्यवासवतुल्योभून्मरुत्तोनामवीर्यवान् पुत्रस्तमनुरक्ताभूत्पृथिवीसागराम्बरा १४ स्पर्धतेस्मसततंदेवराजेननित्यदा वासवो
पिमरुत्तेनस्पर्धतेपांडुनंदन १५

© (c) Dharmartha Trust J&K. Digitized By eGangotri

शुचिःसगुणवानासीन्मरुत्तःपृथिवीपतिः यतमानोपियंशक्रोनविशेषयतिस्मह १६ सोशक्नुवन्विशेषायसमाहूयबृहस्पतिं उवाचे
दंवचोदेवैःसहितोहरिवाहनः १७ बृहस्पतेमरुत्तस्यमास्मकार्षीःकथंचन दैवंकर्माथपित्र्यंवाकर्तासिममचेत्प्रियं १८ अहंहित्रि
षुलोकेषुसुराणांचबृहस्पते इंद्रत्वंप्राप्तवानेकोमरुत्तस्तुमहीपतिः १९ कथंह्यमर्त्यंब्रह्मंस्त्वंयाजयित्वासुराधिपं याजयेर्मृत्युसंयुक्तंम
रुत्तमविशंकया २० मांवावृणीष्वभद्रंतेमरुत्तंवामहीपतिं परित्यज्यमरुत्तंवायथाजोषंभजस्वमां २१ एवमुक्तःसकौरव्यदेवरा
ज्ञाबृहस्पतिः मुहूर्त्तमिवसंचिंत्यदेवराजानमब्रवीत् त्वंभूतानामधिपतिस्त्वयिलोकाःप्रतिष्ठिताः नमुचेर्विश्वरूपस्यनिहंतात्वंब
लस्यच २३ त्वमाजहर्थदेवानामेकोवीरःश्रियंपरां त्वंबिभर्षिभुवंद्यांचसदैवबलसूदन २४ पौरोहित्यंकथंकृत्वातवदेवगणेश्व
र याजयेयमहंमर्त्यंमरुत्तंपाकशासन २५ समाश्वसिहिदेवेंद्रनाहंमर्त्यस्यकर्हिचित् ग्रहीष्यामिस्रुवंयज्ञेशृणुचेदंवचोमम २६
हिरण्यरेतानोष्णःस्यात्परिवर्त्तेतमेदिनी भासंतुनरविःकुर्यान्नतुसत्यंचलेन्मपि २७ वैशंपायनउवाच बृहस्पतिवचःश्रुत्वाश
क्रोविगतमत्सरः प्रशस्यैनंनिवेशाथस्वमेवभवनंतदा २८ इत्याश्वमेधिकेपर्वणिमरुत्तोपे ५

अ०
६

संवर्तमरुत्तयोः संयोगं कथयन्नारदमुखेन वाराणसीमाहात्म्यं संवर्णयति व्यास उवाच अत्राप्युदाहरंतीममित्यादिना १ २ १२ ११ १३

व्यास उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं बृहस्पतेश्च संवादं मरुत्तस्य च धीमतः १ देवराजस्य समयं कृतमांगिरसेन
ह श्रुत्वा मरुत्तो नृपतिर्यज्ञमाहारयत्परं २ संकल्प्य मनसा यज्ञं करंधमसुतात्मजः बृहस्पतिमुपागम्य वाग्मी वचनमब्र
वीत् ३ भगवन्यन्मया पूर्वमभिगम्य तपोधन कृतोभिसंधिर्यज्ञस्य भवतो वचनाद्गुरो ४ तमहं यष्टुमिच्छामि संभाराः संभृता
श्च मे याज्योस्मि भवतः साधो तत्प्राप्नुहि विधत्स्व च ५ बृहस्पतिरुवाच न कामये याजयितुं त्वामहं पृथिवीपते वृतोस्मि
देवराजेन प्रतिज्ञातं च तस्य मे ६ मरुत्त उवाच पित्र्यमस्मि भवतः क्षेत्रं बहुमन्ये च ते भृशं न चास्म्ययाज्यतां प्राप्तो भजमानं भ
जस्व मां ७ बृहस्पतिरुवाच अमर्त्यं याजयित्वाहं याजयिष्ये कथं नरं मरुत्त गच्छ वा मा वा निवृत्तोस्म्यद्य याजनात् ८
न त्वां याजयितास्म्यद्य वृणु यं त्वमिहेच्छसि उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति ९ व्यास उवाच एवमुक्तस्तु नृपतिर्म
रुत्तो व्रीडितोभवत् प्रत्यागच्छंश्च संविग्नो ददर्श पथि नारदं १० देवर्षिणा समागम्य नारदेन स पार्थिवः विधिवत्प्रांज
लिस्तस्थावथैनं नारदोब्रवीत् ११ राजर्षे नातिहृष्टोसि कच्चित्क्षेमं तवानघ क्व गतोसि कुतश्चेदमप्रीतिस्थानमागतं
श्रोतव्यं चेन्मया राजन्ब्रूहि मे पार्थिवर्षभ अपनेष्यामि ते मन्युं सर्वयत्नैर्नराधिप १३

ए०
८

© Dharmartha Trust J&K. Digitized by eGangotri

उन्मत्तवेषमिति नग्नत्वं कुणपदर्शनेन महेश्वरदर्शनसिद्धिं दर्शयता कुणपस्य महेश्वरत्वमितिमात्रत्वं सूचितं तथा चाविमुक्ते प्रकृतस्य ब्रह्मविज्जंतोः प्राणेषूत्क्रममाणे

एवमुक्तो मरुत्तः स नारदेन महर्षिणा विप्रलंभमुपाध्यायात्सर्वमेव न्यवेदयत् १४ मरुत्तउवाच गतोस्म्यंगिरसः पुत्रं देवाचार्यं
बृहस्पतिं यज्ञार्थमृत्विजं द्रष्टुं स च मां नाभ्यनंदत १५ प्रत्याख्यातश्च तेनाहं जीवितुं नाद्य कामये परित्यक्तश्च गुरुणा दूषितश्चा
स्मि नारद व्यासउवाच एवमुक्तस्तु राज्ञा स नारदः प्रत्युवाच ह आविक्षितं महाराज वाचा संजीवयन्निव १७ नारदउवाच रा
जन्नंगिरसः पुत्रः संवर्त्तो नाम धार्मिकः चंक्रमीति दिशः सर्वा दिग्वासा मोहयन्प्रजाः १८ तं गच्छ यदि याज्यं त्वां न वांछति बृह
स्पतिः प्रसन्नस्त्वां महातेजाः संवर्त्तो याजयिष्यति १९ मरुत्तउवाच संजीवितोहं भवता वाक्येनानेन नारद पश्येयं क्व नु संव
र्त्तं शंस मे वदतां वर २० कथं च तस्मै वर्त्तेयं कथं मां न परित्यजेत् प्रत्याख्यातश्च तेनापि नाहं जीवितुमुत्सहे २१ नारदउवाच उ
न्मत्तवेषं बिभ्रत्स चंक्रमीति यथासुखं वाराणस्यां महाराज दर्शनेप्सुर्महेश्वरं २२ तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्व
चित् तं दृष्ट्वा यो निवर्त्तेत स संवर्त्तः महीपते २३

षु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीति श्रुतिसिद्धः कुणपाभिमानिनो जीवस्य ब्रह्मभावोऽपूर्वो ज्ञापितः एवं चोपरिधारणाविधि
वद्भिर्द्धिरेवायमित्युपपादितं भवत्येपाते २२ २३

© (c) Dharmartha Trust J&K. Digitized by eGangotri

मा०
८

नंपृष्ठतोनुगच्छेयापत्रगच्छेत्ततोयथेषान् नमेकान्तेसमासाद्यप्राञ्जलिःशरणंव्रजेः २४ पृच्छेत्तांयदिकेनाहंतवाख्यातइतिस्मद् ब्रूया
त्वंनारदेनेतिसंघर्त्तकथयिष्यतिसिमे २५ सचेत्वामनुयुंजीतममानुगमनेसया शंसेथावह्निमारूढंमामपित्वमशंकया २६ व्यास
उवाच सतथेतितंप्रतिश्रुत्यसंपूज्यपितावनारदं अभ्यनुज्ञायराजर्षिर्ययौवाराणसींपुरीं २७ तत्रगत्वापथोक्तंतंपुर्याद्वारेमहाय
शाः कुणपंस्थापयामासनारदस्यवचःस्मरन् २८ योगपद्येनविप्रस्तुपुरीद्वारमथाविशत् ततःसकुणपंदृष्ट्वासहसा
सन्न्यवर्त्तत २९ सतंनिवृत्तमालक्ष्यप्राञ्जलिःपृष्ठतोन्वगात् अविक्षितोमहीपालःसंवर्त्तमुपशिक्षितुं ३० सतंनोविज
नेदृष्ट्वापांसुभिःकर्दमेनच श्लेष्मणाचैवराजानंष्ठीवनेश्चसमाकिरत् ३१ सतथावध्यमानोवैसंवर्त्तेनमहीपतिः अनुयातेव
तमृषिंप्राञ्जलिःसंप्रसादयन् ३२ ततोनिवर्त्तसंवर्तःपरिश्रान्तउपाविशत् शीतसच्छायमासाद्यन्यग्रोधंबहुशाखिनं ३३
इत्यार्षमेधिकेसंवर्त्तमरुत्तीयेषष्ठोध्यायः संवर्त्तउवाच कथमस्मित्वयाज्ञातःकेनवाकथितोस्मिते एतदाचक्ष्वमेतत्त्वमिच्छ
सेचेन्ममप्रियं १ सत्यंतेब्रुवतःसर्वंसंपत्स्यंमेमनोरथाः मिथ्याचब्रुवतोमूर्धाशतधातेस्फुरिष्यति २ मरुत्तउवाच ना
रदेनभवान्मह्यमाख्यातोभ्रमतापथि गुरुपुत्रोममेतित्वंततोमेप्रीतिरुत्तमा ३

रुम०
८

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

सवित्रणांकपद्वेषछचं ४ ५ ६ ७ ८ १० १२ १५ १६

संवर्त्तउवाच तस्मैतद्दुचानाहूत मांजानातिसवित्रणं कथयस्वतदेतन्मेकनुसंवर्त्तिनारदः ४ मरुत्तउवाच भवंतंकथयित्वातुमम देवर्षिस्ततःनः ततोमामभ्यनुज्ञायप्रविवेशाहव्यवाहनं ५ व्यासउवाच श्रुत्वातुपार्थिवस्येतत्संवर्त्तः परमुदंगतः एतावदहमप्येवंश क्रुयामितिसोब्रवीत् ६ ततोमरुत्तमुन्मत्तोवाचानिर्भर्त्सयन्निव रूक्षयावाह्मणोराजन्पुनः पुनरथाब्रवीत् ७ वातप्रधाने कोशानि सेवनं नमयास्वविच्चवशवर्त्तिना एवंविकृतरूपेणकथंयाजितुमिच्छसि ८ भ्राताममसमर्थश्चवासवेन च संगतः व
ते२५ र्त्तयाजनेचैवतेनकर्माणिकारय ९ गार्हस्थ्यंचैवयाज्याश्चसर्वागृह्याश्चदेवताः पूर्वजेनममाक्षिप्तंशरीरंचर्जितंत्विदं १० नाहं तेनाननुज्ञातस्त्वामाविषिक्षितकर्हिचित् याजयेयंकथंविद्वंस्सहिपूज्यतमोमम ११ सत्वंबृहस्पतिंगच्छतमनुज्ञाप्यचाव्रज ततो हंयाजयिष्येत्वांयदियष्टुमिहेच्छसि १२ मरुत्तउवाच बृहस्पतिंगतःपूर्वमहंसंवर्त्ततच्छृणु नमांकामयतेयाज्यमसौवासवका म्यया १३ अमरंयाज्यमासाद्ययाजयिष्येनमानुषं शक्रेणप्रतिषिद्धोहंमरुत्तंमास्मयाजये १४ स्पर्द्धतेहिमयाविप्रसदाहिसतु पार्थिवः एवमस्त्वितिचाप्युक्तोभ्रात्रावानेवलसूदनः १५ समामभिगतंप्रेम्णायाज्यत्वेनविभूषति देवराजंसमाश्रित्यतन्नदिहि मुनिपुंगव १६

अ०
८

१७ अध्यायः गिरेर्हिमवतः इत्यष्टमे तस्मै भगवते कृत्वा नमः इत्यादिना सुवर्णमवाप्स्यसीत्यनेन सुवर्णकामस्य जप्यं स्तोत्रं तस्य संवर्त्त ऋषिः हिरण्यबाहु

सोऽहमिच्छामि भवता सर्वस्वेनापि याजितुं कामये समतिक्रान्तुं वासवं त्वत्कृते गुरोः १७ नहि मे वर्त्तते बुद्धिर्गन्तुं ब्रह्मन्बृहस्पतिं प्रत्या
ख्यातो हि तेनास्मि तथानपकृते सति १८ संवर्त उवाच चिकीर्षसि यथाकामं सर्वमेतत्त्वयि ध्रुवं यदि सर्वानभिप्रायान्कर्त्तासि
मम पार्थिव १९ याज्यमानं मया हि त्वां बृहस्पतिपुरंदरौ द्विषेतां समभिक्रुद्धावेतदेकं समर्थय २० स्थैर्यमत्र कथं मे स्यात्त्वं निःसं
शयं कुरु कुपितस्त्वां न हीदानीं भस्म कुर्यां सबान्धवं २१ मरुत्त उवाच यावत्तपेत्सहस्रांशुस्तिष्ठेरंश्चापि पर्वताः तावल्लोकान्न
लभेयं त्यजेयं संगतं यदि मा चापि शुभबुद्धित्वं लभेयमिह कर्हिचित् विषयैः संगतं चास्तु त्यजेयं संगतं यदि २३ संवर्त्त उवाच
आविक्षित शुभा बुद्धिर्वर्त्ततां तव कर्मसु याजनं हि ममाप्येवं वर्त्तते हृदि पार्थिव २४ अभिधास्ये च ते राजन्नक्षयं द्रव्यमुत्तमं ये
न देवान्सगंधर्वान्शक्रं चाभिभविष्यसि २५ न तु मे वर्त्तते बुद्धिर्धने याज्येषु वा पुनः विप्रियं तु करिष्यामि भ्रातुश्चेंद्रस्य चो
भयोः २६ गमयिष्यामि शक्रेण समतामपि ते ध्रुवं प्रियं च ते करिष्यामि सत्यमेतद्ब्रवीमि ते २७ इत्याश्वमेधिके
पर्वणि संवर्त्तमरुत्तीये सप्तमोऽध्यायः संवर्त्त उवाच गिरेर्हिमवतः पृष्ठे मुंजवान्नाम पर्वतः तप्यते यत्र भगवांस्तपो नित्य
मुमापतिः १

लगो देवतानुष्टुप्छन्दः अन्त्यपातं नामानि चतुर्थ्यन्तानि ११

वनस्पतीनांमूलेतुशृंगेषुविषमेषुच गुहासुशैलकाननस्ययथाकामंयथासुखं २ उमासहायोभगवानत्रवसितंमहेश्वरः आस्तेशूलीमहाते
जानानाभूतगणावृतः ३ नंदरुद्राश्चसाध्याश्चविश्वेथवसवस्तथा यमश्चवरुणश्चैवकुबेरश्चमहानुगः ४ भूतानिचपिशाचाश्चनास
त्यावपिचाश्विनौ गंधर्वाप्सरसश्चैवयक्षादेवर्षयस्तथा ५ आदित्यामरुतश्चैवयातुधानाश्चसर्वशः उपासंतेमहात्मानंबहुरूपमुमाप
ति ६ रमतेभगवांस्तत्रकुबेरानुचरैः सह विकृतैर्विकृताकारैः क्रीडद्भिः पृथिवीपते ७ प्रियाज्वलनहृष्यस्तैर्बालादित्यसमद्युतिः
नरूपेशक्यतेतस्यसंस्थानंवाकदाचन ८ निर्देष्टुंप्राणिभिः कैश्चित्प्राकृतैर्मांसलोचनैः नोष्णंनशिशिरंतत्रनवायुर्नचभास्करः ९
नजराक्षुत्पिपासेवानमृत्युर्नभयंनच तस्यशैलस्यपार्श्वेषुसर्वेषुजयतांवर १० धातवोजातरूपस्यरश्मयः सवितुर्यथा रक्ष्यंतेकुबेरस्य ते ५
सहायैरुद्यतायुधैः ११ चिकीर्षद्भिः प्रियंराजन्कुबेरस्यमहात्मनः तस्मैभगवतेकृत्वानमः शर्वायवेधसे १२ रुद्रायशितिकंठायसु
रूपायसुवर्चसे कपर्दिनेकरालायहर्यक्ष्णेवरदायच १३ अक्ष्णोस्त्वोस्त्वोदंतभिदेवामनायशिवायचयाम्यायाव्यक्तरूपायसद्वृत्तेशंकरा
यच १४ क्षेम्यायहरिकेशायस्थाणवेपुरुषायच हरिकेशायमुंडायकृशायोत्तारणायच भास्करायसुतीर्थायदेवदेवायरंहसे उष्णीषिणे
सुवक्त्रायसहस्राक्षायमीढुषे १५ गिरीशायप्रशांतायपतयेचीरवाससे बिल्वदंडायसिद्धायसर्वदंडधरायच १६ मृगव्याधायमहतेधन्वि

(c) Dharmartha Trust J&K. Digitized By eGangotri

श्री०
९

नेयमवायच वरुणायसोमवक्त्रायसिद्धमंत्रायचक्षुषे १८ हिरण्यबाहवेराजन्नुग्रायपतयेदिशां लेलिहानायगोष्ठायसिद्धमंत्रायवृष्णये १९
पशूनांपतयेचैवभूतानांपतयेनमः वृषायमातृभक्तायसेनान्येमध्यमायच २० स्रुवहस्तायपतयेधन्विनेभार्गवायच अजायकृष्णनेत्राय
विरूपाक्षायचैवह २१ तीक्ष्णदंष्ट्रायतीक्ष्णायवैश्वानरमुखायच महाद्युतयेऽनंगायशर्वायपतयेदिशां २२ विलोहितायदीप्तायदी
प्ताक्षायमहौजसे वसुरेतःसुवपुषेपृथवेकृत्तिवाससे कपालमालिनेचैवसुवर्णमुकुटायच महाद्युतेरनंगायत्र्यंबकायानघायच २४
क्रोधनायानृशंसायमृदवेबाहुशालिने दंडिनेतप्ततपसेतथैवाक्रूरकर्मणे २५ सहस्रशिरसेचैवसहस्रचरणायच नमःस्वधास्वरू
पायबहुरूपायदंष्ट्रिणे २६ पिनाकिनंमहादेवंमहायोगिनमव्ययं त्रिशूलहस्तंवरदंत्र्यंबकंभुवनेश्वरं २७ त्रिपुरघ्नंत्रिनयनंत्रिलोकेशं
महौजसं प्रभवंसर्वभूतानांधारणंधरणीधरं २८ ईशानंशंकरंसर्वंशिवंविश्वेश्वरंभवं उमापतिंपशुपतिंविश्वरूपंमहेश्वरं २९

राम०
९

© Dharmartha Trust J&K. Digitized By eGangotri

३१ ब्रह्मविद्यांमाहात्म्यंतदनुग्रहेणदेवान्त्रिपिष्टपाभवंतीतिनवमदशमयोरुक्तं ३८ अध्यायःकश्चित्सुखेइति १ २ ३

विरूपाक्षंदशभुजंदिव्यगोवृषभध्वजं उग्रंस्थाणुंशिवंरौद्रंशर्वंगौरीशमीश्वरं ३० शितिकंठमजंशुक्रंपृथुंपृथुहरंवरं विश्वरूपंविरूपा
क्षंबहुरूपमुमापतिं ३१ प्रणम्यशिरसादेवमनंगांगहरंहरं शरण्यंशरणंयाहिमहादेवंचतुर्मुखं ३२ एवंकृत्वानमस्तस्मैमहादेवाय
रंहसे महात्मनेक्षितिपतेतत्सुवर्णमवाप्स्यसि ३३ सुवर्णमाहरिष्यंतस्तत्रगच्छंतुतेनराः इत्युक्तःसवचस्तेनचक्रेकारंधमात्मजः
३४ ततोतिमानुषंसर्वंचक्रेपत्नस्ततंविधिं सौवर्णानिचभांडानिसंचकुस्तत्रशिल्पिनः ३५ बृहस्पतिस्तुतांश्रुत्वामरुत्तस्यम
हीपतेः समृद्धिमतिदेवेभ्यःसंतापमकरोद्भृशं ३६ तप्यमानोविवर्णत्वंकृशत्वंचागमत्परं भविष्यतिहिमेशत्रुःसंवर्तोव
सुमानिति ३७ तंश्रुत्वाभृशसंतप्तंदेवराजोबृहस्पतिं अभिगम्यामरवृतःप्रोवाचेदंवचस्तदा ३८ इत्याश्वमेधिकेपर्वणि
अष्टमोध्यायः इंद्रउवाच कच्चित्सुखंस्वपिषित्वंबृहस्पतेकच्चिन्मनोज्ञाःपरिचारकास्ते कच्चिद्देवानांसुखकामोसिविप्रकच्चिद्देवा
स्त्वांपरिपालयंति १ बृहस्पतिरुवाच सुखंशयेशयनेदेवराजतथामनोज्ञाःपरिचारकामे तथादेवानांसुखकामोस्मिनित्यंदेवा
श्चमांसुभृशंपालयंति २ इंद्रउवाच कुतोदुःखंमानसंदेहजंवापांडुर्विवर्णश्चकुतस्त्वमद्य आचक्ष्वमेब्राह्मणयावदेता
न्निहन्मिसर्वांस्तवदुःखकर्तॄन् ३

अ०
१०

वृहस्पतिरुवाच मरुत्तमादौ मघवन्नपश्यमाणंमहायज्ञेनोत्तमदक्षिणेन संवर्त्तोयाजयतीतिमेश्रुतंतदिच्छामिनसतंयाजयेत ४ इंद्र
उवाच सर्वान्कामाननुयातोसिविप्रयस्त्वंदेवानांमंत्रवित्सुपुरोधाः उभौचतेजरामृत्यूव्यतीतौकिंसंवर्त्तस्तवकर्त्ताद्यविप्र ५ वृहस्पतिरु
वाच देवैःसहत्वमसुरान्प्रणुद्यजिघांससेचाप्युतसानुबंधान् यंयंसमृद्धंपश्यसितत्रतत्रदुःखंसपत्नेषुसमृद्धिभावः ६ अतोस्मिदे
वेंद्रविवर्णरूपः सपत्नोमेवर्द्धतेतन्निशम्य सर्वोपायैर्मघवन्संनियच्छसंवर्त्तंवापार्थिवंवामरुत्तं ७ इंद्रउवाच एहिगच्छप्रहितोजातवेदो
वृहस्पतिंपरिदातुंमरुत्ते अयंवैत्वांयाजयितावृहस्पतिस्तथामरंचैवकरिष्यतीति ८ अग्निरुवाच अहंगच्छामिभगवन्दूतोद्यवृह श्री
स्पतिं परिदातुंमरुत्तेवाचंसत्यांपुरुहूतस्यकर्त्तुंवृहस्पतेश्चापचितिंचिकीर्षुः ९ व्यासउवाच ततःप्रायाद्धूमकेतुर्महात्मावनानिसर्वा
णिवीरुधश्चावमृद्नन् अकामाद्धिमांतेपरिवर्त्तमानःकाष्ठातिगोमातरिश्वेवनर्दन् १० मरुत्तउवाच आश्चर्यमद्यपश्यामिरूपिणंव
ह्निमागतं आसनंसलिलंपाद्यंगांचोपानयवैमुने ११ अग्निरुवाच आसनंसलिलंपाद्यंप्रतिनंदामितेनघ इंद्रेणतुसमादिष्टंविद्धि
मांदूतमागतं १२ मरुत्तउवाच कच्चिच्छ्रीमान्देवराजःसुखीचकच्चिच्चास्मान्प्रीयतेधूमकेतो कच्चिद्देवास्तस्यवशेयथावद्ब्रू
हित्वंममकार्त्स्न्येनदेव १३ अग्निरुवाच शक्रोभृशंसुसुखीपार्थिवेंद्रप्रीतिंचेच्छत्यजरांवैत्वयासः देवाश्चसर्वेवशगास्तस्यराज राम०
न्संदेशंत्वंशृणुमेदेवराज्ञः १४ यदर्थंमांप्राहि १०

© Dharmartha Trust J&K. Digitized by eGangotri

णोत्वत्सकाशंबृहस्पतिंपरिदातुंमरुत्ते अयंगुरुर्याजयतांनृपत्वांमर्त्यंसंतममरंत्वांकरोतु १५ मरुत्तउवाच संवर्त्तोयंयाजयिता
द्विजोमांबृहस्पतेरंजलिरेषतस्य नचैवासौयाजयितामहेंद्रंमर्त्यंसंतंयाजयन्नद्यशोभेत् १६ अग्निरुवाच येवैलोकादिवलोकेमहां
न्तः संप्राप्स्यसेतान्देवराजप्रसादात् त्वांचेदसौयाजयेद्वैबृहस्पतिर्नूनंस्वर्गंत्वंजयेःकीर्तियुक्तः १७ तथालोकामानुषायेचदिव्याः
प्रजापतेश्चापियेवैमहान्तः तेतेजितादेवराज्यंचकृत्स्नंबृहस्पतिर्याजयेच्चेन्नरेंद्र १८ संवर्त्तउवाच मास्मैवंत्वंपुनरागाःकथंचित्
बृहस्पतिंपरिदातुंमरुत्ते मात्वांधक्ष्येचक्षुषादारुणेनसंक्रुद्धोहंपावकतन्निबोध १९ व्यासउवाच ततोदेवानगमद्धूमकेतुर्दाहाद्भी
तोव्यथितोश्वत्थपर्णवत् तंवैदृष्ट्वाप्राहशक्रोमहात्माबृहस्पतेःसंनिधौहव्यवाहं २० यत्त्वंगतःप्रहितोजातवेदोबृहस्पतिंपरिदा
तुंमरुत्ते तत्किंप्राहसनृपोयक्ष्यमाणःकच्चिद्वचःप्रतिगृह्णातितच्च २१ अग्निरुवाच नतेवाचंरोचयतेमरुत्तोबृहस्पतेरंजलिंप्रा
हिणोत्सः संवर्त्तोमांयाजयितेप्रत्युवाचपुनःपुनः समयायाच्यमानः २२ उवाचेदंमानुषायेचदिव्याःप्रजापतेर्येचलोकामहा
न्तः तांश्चेल्लभेयंसंविदंतेनकृत्वातथापिनेच्छेयमितिप्रतीतः २३ इंद्रउवाच पुनर्गत्वापार्थिवंत्वंसमेत्यवाक्यंमदीयंप्राप

© (O) Dharmartha Trust J&K. Digitized By eGangotri

आ०
११

यत्नार्थयुक्तं पुनर्यद्युक्तो न कारिष्यनेव वत्स त्वं तो वन्नं संप्रहर्त्तास्मि तस्मै २४ अग्निरुवाच गंधर्वराड्वालयंत वहंते विभेम्यहं वा
सवनत्रगंतुं सं ख्येमामत्रवीत्तीश्चाराणं संवर्त्तो वाक्यं वीतमहत्तवर्यः २५ यद्यागच्छेः पुनरेवं कथंचिद्दहस्मतिं परिदातुं मरुत्ते
रहेयं त्वां चक्षुषा दारुणेन संक्रुद्ध इत्येतदवेहि शक्र २६ शक्र उवाच त्वमेवान्यान्दहसे जातवेदा न हि त्वदन्यो विद्यते भस्मकर्त्ता
त्वत्संस्पर्शात्सर्वलोको बिभेति अश्रद्धेयं वदसे हव्यवाह २७ अग्निरुवाच दिवं देवेन्द्र पृथिवीं चैव सर्वां संवेष्टयेः स्वबलेनैव
शक्र एवंविधस्येह सतस्तवासौ कथं वृत्रस्त्रिदिवं प्राग्जहार २८

लम०
११

© (c) Dharmartha Trust J&K. Digitized By eGangotri

नचनवमेनाहंदौर्वैर्माहेन्द्रेणाजितइतिवक्तुंस्वसामर्थ्यमिंद्रोवह्निंप्रतिवदति नगंडिकाकारयोगंकरेणुं नगंपर्वतंडीयतेविहायसागच्छतीतिडीः
पक्षीअस्योडीःडिकाम॰शिकामशकादिः तस्याआकारेणयोगोस्यास्तीत्येवंरूपंअणुसूक्ष्मकरेकुर्वे कृत्स्नमब्धिंदंसंभोवादिकतं करेणेतिपाठेकरेणमी
तथाहारः पाथोधिंकरेकर्तुमगस्त्यइवाहंपर्वतमपिमशकाकर्तुंसमर्थोस्मीत्यर्थः कुतस्तर्हिप्रयत्नस्त्वांनाराधितवानित्यतआह नचारिसोमंप्रपिबामि

इंद्रउवाच नगंडिकाकारयोगंकरेणुनचारिसोमंप्रपिबामिवक्रे नदुर्बलेचैवप्रहराणिवज्रं कोमेसुखायप्रहरेतमर्त्यः २९ ब्र
ब्राजपेयंकालकेयानृशंस्यिआमपाकर्षंदानवानंतरिक्षात दिवःप्रह्लादमवसानमानयं कोमेसुखायप्रहरेतमानवः
३० अग्निरुवाच यत्रशर्यातिश्च्यवनोयाजयिष्यन्सहाश्विभ्यांसोममगृह्णदेकः तंतंक्रुद्धःप्रत्यषेधीःपुरस्ताच्छर्यातिय
ज्ञंस्मरतंमहेंद्र ३१ वज्रंगृहीत्वाचपुरंदरत्वंसंप्रहार्षीश्च्यवनस्यातिघोरं सतेनविप्रःसहवज्रेणबाहुमपागृह्णात्तपसाजातमन्युः ३२

वक्रेअरिसोमंशत्रुदत्तंसोमंतयेवमुकुनोननिर्जितइत्यतआह नप्रीणाशक्तोप्रहराणिवज्रमित्यादिनानगंडिकाजंगमोनोकरेणुरितिपाठेनुकरेणु
हस्तीममएरावतः गंडिकाबुद्बुदवत्पिंडभाषाप्रसिद्धेः तांप्रतिजंगमोगतिशीलोनभवतीतिनोअस्ति एरावतवाहनस्यमेशत्रुजयईश्वत्करइत्यर्थः गं
डिकाशब्दस्तालव्यादिरिहज्ञेयः इंद्रोहंतिन्नृपमशंडिकानामितिमंत्रवर्णात ३० ३१ ३२

अ०
१२

दशमस्तत्कृतात्पर्यःशेषमतिरोहितार्थं ३७ अध्यायः एवमेइति १ २ ३ ४ ५

ततोरोषात्सर्वतोघोररूपंसमुत्पन्नंतेजजनयामासभूपः भक्तेनामासुरविस्मरूपंतंहस्वावस्तुपीतस्तेनिमीलः ३३ हतेर्वकोनगतोस्त्वा
नर्थेकारिवंगतामहतोसानवस्य सहस्रदंतानांशतयोजनानांसुतीक्ष्णानांघोररूपंबभूव ३४ वृत्ताःस्थूलाःरजतस्तंभवर्णाद्
शृम्भतस्तोहृदशनयोजनानां सलोदंतास्त्विदृशंनम्मधावक्रिघोसयामूलमसुघम्मघोरं ३५ अपश्यत्तंतन्नदाघोररूपंसर्वैर्वेलांद्
दृष्टुर्दृशिनोयं यस्माद्दीनःप्राजंलिस्त्वंमहर्षिर्मागच्छेथाःशरणंदानवघ्न ३६ श्रावाहलाद्बलवलंगरीयोन्नवलतःकिंचि
दस्मद्धरेयः सोहंजानवन्नवलतेजोपयावन्नसंवर्तेततुमिच्छामिशक्र ३७ इत्याश्वमेधिकेपर्वणिसंवर्तमरुत्तीये इंद्रउवाच
एवमेतद्बलवलंगरीयोनवासरणत्किंचिदस्मद्धरीयः आविक्षितस्यतुवलंनमृष्येवज्रमस्मैप्रहरिष्यामिघोरं १ धृतराष्ट्रप्रहि
तोगच्छमरुत्तंसंवर्तेनसंगतंतंवदस्व बृहस्पतिंत्वमुपशिक्षस्वराजन्वज्रंवातेप्रहरिष्यामिघोरं २ व्यासउवाच ततोगत्वा
धृतराष्ट्रोनरेंद्रंप्रोवाचेदंवचनंवासवस्य ३ धृतराष्ट्रउवाच गंधर्वंमांधृतराष्ट्रंनिबोधत्वामागतंवक्तुकामंनरेंद्र ऐंद्रंवाक्यंशृणु
मेराजसिंहयत्प्राहलोकाधिपतिर्महात्मा ४ बृहस्पतिंयाजकंत्वंवृणीष्ववज्रंवातेप्रहरिष्यामिघोरंवचश्चेदेतन्नकरिष्यसेमे
प्राहेतदेतावदचिंत्यकर्मा ५

श्री·
१२

© Dharmartha Trust J&K. Digitized by eGangotri

मरुत्तउवाच त्वंचैवैतद्ब्रूहिपुरंदरस्य विश्वेदेवान्वसवश्चाश्विनौच मित्रद्रोहेनिष्कृतिर्नास्तिलोके महत्पापंब्रह्महत्यासमंतत् ६ बृहस्पति
यीजयतांमहेंद्रंदेवश्रेष्ठंवज्रभृतांवरिष्ठं संवर्त्तोमांयाजयिताद्यराजन्नतेवाक्यंतस्यवारोचयामि ७ गंधर्वउवाचघोरोनादःश्रूयतांवास
वस्यनभस्तलेगर्जतोराजसिंह व्यक्तंवज्रंमोक्ष्यतेतेमहेंद्रः क्षेमंराजंश्चिंत्यतामेषकालः ८ व्यासउ० इत्येवमुक्तोधृतराष्ट्रेणराजन्
श्रुत्वानादंनदतोवासवस्य तपोनित्यंधर्मविदांवरिष्ठंसंवर्त्तंतंज्ञापयामासकार्यं ९ मरुत्तउवाच इममात्मानंप्लवमानमाराद्
ध्वाक्षंतेननदृश्यतेद्य प्रपद्येहंशर्मविप्रेंद्रत्वत्तः प्रयच्छतस्मादभयंविप्रमुख्य १० अयमायातिवज्रभृद्दिशोविद्योतयंदश अमानु
षेणाघोरेणसदस्यास्त्रासिताहिनः ११ संवर्त्तउवाच भयंशक्राद्व्येतुतेराजसिंहप्रणोत्स्येहंभयमेतत्सुघोरं संस्तंभिन्याविद्ययाक्षिप्र
मेवमाभैस्त्वमस्माद्भिभवाप्यतीतः १२ अहंसंस्तंभयिष्यामिमाभैस्त्वंशक्रतोनृप सर्वेषामेवदेवानांक्षपितान्यायुधानिमे १३
दिशोवज्रंव्रजतांवायुरेतुवर्षंभूत्वावर्षतांकाननेषु आपःप्लवंत्वंतरिक्षेवृथाचसौदामिनीदृश्यतेमाबिभेस्त्वं १४ वह्निर्देवस्त्रातुवास
र्वतस्तेकामान्सर्वान्वर्षतुवासवोवा वज्रंतथास्थापयतांवधायमहाघोरंप्लवमानंजलौघैः १५ मरुत्तउवाच घोरःशब्दःश्रूयते
वैमहास्वनोवज्रस्यैषःसहितोमारुतेन आत्माहिमेप्रव्यथतेमुहुर्मुहुर्नमेस्वास्थ्यंजायतेचाद्यविप्र १६ संवर्त्तउवाच वज्रादु
ग्राद्व्येतुका भयंतेवातोभूत्वाहन्मिनरेंद्रवज्रं भयंत्यक्त्वावरमन्यंवृणीष्वकंतेकामंमनसासाधयामि १७ मरुत्तउवाच

© Dharmarth Trust J&K Digitized By eGangotri

श्व॰ १३

इंद्रः साक्षात्सहसाभ्येतुविप्रहविर्यज्ञेप्रतिगृह्णातुचैव स्वंस्वंधिष्ण्यंचैवजुषंतुदेवाःकुतंसोमंप्रतिगृह्णंतुचैव १८ संवर्त्तउवाच अय
मिंद्रोहरिभिरायातिराजन्देवैःसर्वैःस्त्वरितैःस्तूयमानः मंत्राहूतोयज्ञमिमंमयाद्यपश्यस्वैनंमंत्रविस्रस्तकायं १९ ततोदेवैःसहि
तोदेवराजोरथेयुक्त्वातान्हरीन्वाजिमुख्यान् आयाद्यज्ञमथराज्ञःपिपासुराविक्षितस्याप्रमेयस्यसोमं २० तमायांतंसहितंदेवसंघैः
प्रत्युद्ययौसपुरोधामरुत्तः चक्रेपूजांदेवराजायचाग्र्यांयथाशास्त्रंविधिवत्प्रीयमाणः २१ संवर्त्तउवाच स्वागतंतेपुरुहूतेहविद्वन्यज्ञो
प्ययंसंनिहितेत्वयींद्र शोशुभ्यतेवलवृत्रघ्नभूयः पिबस्वसोमंसुतमुद्यतंमया २२ मरुत्तउवाच शिवेनमांपश्यनमश्चतेस्तुप्राप्तो
यज्ञः सफलंजीवितंमे अयंयज्ञंकुरुतेमेसुरेंद्रबृहस्पतेरवरजोविप्रमुख्यः २३ इंद्रउवाच जानामितेगुरुमेनंतपोधनंबृहस्प
तेरनुजंतिग्मतेजसं यस्याह्वानादागतोहंनरेंद्रप्रीतिर्मेद्यत्वयिमन्युःप्रनष्टः २४ संवर्त्तउवाच यदिप्रीतस्त्वमसिवैदेवराजतस्मा
हाणां च मलनत्वात् एवं देहदृढरूपो भूतसमुच्चय इति पंचभूतानां समस्याख्या भूतानां लयेन निर्विशेषचिन्मात्रेणैव रूपेणावतिष्ठत इत्यर्थः सार्द्धश्लोकः

वेराति

लोकेस्मिन् यानि सत्वानि त्रसानि स्थावराणि च तान्येवाग्रे प्रलीयन्ते पश्चाद्भूतकृता गुणाः गुणेभ्यः पंचभू
तानि एष भूतसमुच्चयः १० देवा मनुष्या गन्धर्वाः पिशाचासुरराक्षसाः सर्वे स्वभावतः सृष्टा न क्रियाभ्यो न कार
णात् ११ एते विश्वसृजो विप्रा जायन्तीह पुनः पुनः तेभ्यः प्रसूतास्तेष्वेव महाभूतेषु पंचसु १२ प्रलीय
न्ते यथाकालमूर्मयः सागरे यथा विश्वसृग्भ्यो महाभूतेभ्यो महाभूतात्मकः सर्वशः भूतेभ्यश्चापि पंचभ्यो मुक्तो
गच्छेत् परां गतिं १३ प्रजापतिरिदं सर्वं मनसैवासृजत् प्रभुः तथैव देवानृषयस्तपसा प्रतिपेदिरे १४

देवादयः स्वात्रदेवादिवत्स्वभावत एव उत्पन्नाः न यज्ञादिना नापि ब्रह्मादिनेत्याह देवा इति ११ विश्वसृजो मरीच्यादयोऽपि भौतिकत्वाद्भूतलये लीयन्त इत्याह एत इति
सार्द्धेन १२ विश्वसृग्भ्यः स्थूलभूतेभ्यः परे महाभूताः सूक्ष्मभूतानि तेभ्योऽपि परां गतिं मुक्तो गच्छेत् पाठान्तरे भूतानां यो विश्वकृद्विराट् सः स्वोपादानभूतानि
भूतानि प्रतिगच्छतीति स एवार्थः १३ मनसश्चेन्द्रियाणां च एकाग्र्यं परमं तप इत्युक्तलक्षणात्तपोबलेन सर्वं मनसैव सृजतीत्याह प्रजापतिरित्यादिना १४ राम॰

तृ२

८८

© Dharmartha Trust J&K. Digitized by eGangotri

तपसः संकल्पस्यास्यानुपूर्व्येणाक्रमेण समाहिताः समाधियुक्ताः १४ दुर्गपं दुष्पदादि दुराम्नायं वेदादि दुराधर्षं वह्न्यादि दुरत्ययं असमाधेयं महाप्रलयादि २१
सर्वोपचयं लौकिकानां सुखानां उपचयो वृद्धिर्यस्मात्तं सर्वोपचयं अखंडमानंदं एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतिप्रसिद्धं उपागम

सा०

तपसश्चानुपूर्वेण फलमूलाशिनस्तथा त्रैलोक्यं तपसा सिद्धाः पश्यंतीह समाहिताः १५ औषधान्य-
गदादीनि नानाविद्याश्च सर्वशः तपसैव प्रसिध्यंते तपोमूलं हि साधनं १६ यद्दुरापं दुराम्नायं दुराधर्षं दुरत्य-
यं तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमं १७ सुरापो ब्रह्महा स्तेयी भ्रूणहा गुरुतल्पगः तपसैव सुतप्तेन मु-
च्यते किल्बिषात्ततः १८ मनुष्याः पितरो देवाः पशवो मृगपक्षिणः यानि चान्यानि भूतानि त्रसानि स्था-
वराणि च १९ तपःपरायणा नित्यं सिध्यंते तपसा सदा तथैव तपसा देवा महाभागा दिवं गताः २० आ-
शीर्युक्तानि कर्माणि कुर्वंते ये त्वलंकृताः अहंकारसमायुक्तास्ते सकाशे प्रजापतेः २१ ध्यानयोगेन शुद्धे-
न निर्ममा निरहंकृताः आप्नुवंति महात्मानो महांतं लोकमुत्तमं २२ ध्यानयोगमुपागम्य प्रसन्नमतयः
सदा सुखोपचयमव्यक्तं प्रविशंत्यात्मवित्तमाः २३ ध्यानयोगादुपागम्य निर्ममा निरहंकृताः अव्यक्तं प्र-
विशंतीह महतो लोकमुत्तमं २४ अव्यक्तादेव संभूतः समसंज्ञां गतः पुनः तमोरजोभ्यां निर्मुक्तः सत्वमास्था-
य केवलं २५

पादस्वरूपं ध्यानयोगमप्राप्य ये क्रियंते ते प्रकृतिलीना भवंति २४ स्वप्नसंज्ञां गतः स्वपमव्यक्तं प्राप्नुयादित्यर्थः २५ ॥ श्रीराम ॥ श्रीकृष्ण

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰ २९ यः कारणात्स्वंप्राप्तः सर्वसृजतितमेवनिष्कलंह्रेतत्त्वंदृष्ट्वामितिविद्यात् २६ चित्तैःसम्यक्ज्ञानंचित्तिसंज्ञानरत्सम्मादपवेनिष्ठा चित्तात्मनमोहेनुनाउपागम्य
प्यसंयतःमनेनसमासीत ततश्चपच्चित्ततन्मयोभवतिकीटभृंगन्यायेनपतेद्रूपभावपतितत्देवापभवतीत्यर्थः मनइतिपाठेयच्चित्तंतदेववश्यात्मात्मप्रदर्शनंहातंस
मर्थोइत्यर्थः २७ तत्रहानार्थमाह विद्याहेति यत्किंचिन्महीयस्तेनकल्पितेनतंत्सर्वमविद्याऽतोनिष्कलमात्मानमेवध्यायेदित्यर्थः ३० षोडशात्मकःपं

विमुक्तः सर्वपापेभ्यः सर्वसृजतिनिष्कलं सेवन्नरइनितंविद्याद्यस्तंवेदसवेदवित् २६ चित्तैश्चित्तादुपागम्यमुनि
रासीतसंयतः यच्चित्तंतन्मनोवश्यंगुह्यमेतत्सनातनं २७ अव्यक्तादिविशेषान्तमविद्यालक्षणंस्मृतं निबो
धततथाहीदंगुणैर्लक्षणमित्युत २८ द्व्यक्षरस्तुभवेन्मृत्युस्त्र्यक्षरंब्रह्मशाश्वतं ममेतिचभवेन्मृत्युर्नम
मेतिचशाश्वतं २९ कर्मकेचित्प्रशंसंतिमंदबुद्धिरतानराः येतुवृद्धामहात्मानोनप्रशंसंतिकर्मते ३०
कर्मणाजायतेजंतुर्मूर्तिमान्षोडशात्मकः पुरुषंग्रसतेविद्यातद्ग्राह्यममृताशिनां ३१ तस्मात्कर्मसुनि
स्नेहायेकेचित्पारदर्शिनः विद्यामयोयंपुरुषोनतुकर्ममयःस्मृतः ३२ यएवममृतंनित्यमग्राह्यंशश्व
दक्षरं वश्यात्मानमसंश्लिष्टंयोवेदनमृतोभवेत् ३३

वमहाभूतानिएकादशविकाराश्चेतदात्मकः तमेवषोडशात्मकंपुरुषंविद्याग्रसते तदेवचग्राह्यंउपादेयं अमृतंदेवतादिशेषंअश्नंतितेऽमृताशिनस्तेषां॥ गम॰
अशिताशिनमितिपाठेतत्स्थानामपितत्स्थिकं ३२ शश्वदक्षरंसर्वदाअपचयहीनं वश्यात्माजित ॥ ॥ श्रीराम ॥ श्रीकृष्ण ॥ २९

अ॰ ५॰ वेमानां तान नवागतं अकृतं अकृत्रिमं अविचारिणां कूटस्थं पाठान्तरे स्थैर्यः अमतनाशनं ईश्वराख्यामलक्षणीयतुरीयरतिस्कृते: इत्थमाप्यापि संदृष्टाणि भिवद्विमाणोः साद्धः
३४ चेतसः संस्कारमैश्चादपत्वान् आपोऽमृद्ध स्थानकृत्वात्मात्मानं चित्तं आत्मनि रुद्धपञ्चभूतिकै संयम्य निरुध्य ३५ प्रमादेनैमेसेप्रमादं शान्तिं चित्तप्रसादस्यलक्षणानु

अपूर्वमकृतं नित्यं परमम पराजितं परब्रह्मविदेहात्मानम आत्यमम नाशनं अयात्योमृतोभवति सएभिः कारणैर्ध्रुवैः ३६
आपोऽमसर्वं संस्कारान्संयम्यात्मानमात्मनि सततं स्वस्थ भवेतिय स्मान्मृत्योन विद्यते ३५ प्रसादे चैव सत्वस्य प्रसादं समवाप्नु
यात लक्षणं हि प्रसादस्य यथास्यात्स्वप्न दर्शने ३६ गतिरेषा समुक्तानां ये ज्ञानपरिनिष्ठिताः प्रवृत्तयश्च याः सर्वाः पश्यति
परिमाणजाः ३७ एषा गतिर्विरक्तानामेष धर्मः सनातनः एषा ज्ञानवतां प्राप्तिरेतद्वृत्तमनिन्दितं ३८ समेन सर्वभूतेषु निः
स्पृहेणनिराशिषा शक्यागतिरियं गन्तुं सर्वत्र समदर्शिना ३९ एतद्दः सर्वमाख्यातं मया विप्रर्षिसत्तमाः एवमाचरत क्षि
प्रं ततः सिद्धिमवाप्स्यथ ४० गुरुरुवाच इत्युक्तास्ते तु मुनयो गुरुणा ब्रह्मणा तथा कृतवन्तो महात्मानस्ततो लोकमवाप्नु
वन् ४१

पथ्यावप्रे देहासंगेनावाछ्यानमालिनत्यायद्यायोगयुक्तश्चित्तं वहिः संज्ञाशून्यं स्वतः प्रचारिमवनितदेनं प्रसादचिह्नं ४६ एषा प्रसादरूपा गतिर्मार्गः प्रवर्त्तते ताः प्रवृत्तयः त्रै
कालिकाः पदार्थाः तारूप परिणामजात अतीतानागतांश्चात्र पश्यन्ति योगिनः ४१ ॥०॥

© Dharmartha Trust J&K. Digitized by eGangotri

अ० ९० अहमिति अहं हे तत्र सो गुरुः मनो मदीयं मया बोधनीयं एतेनात्मनो गुरुत्वं शिष्यत्वं चोक्तं भवति ४६ सम्यगाचर यमनियमादिनिष्ठो भव ४७ केवलमिति क्रममुक्ति

त्वमप्येतन्महाभाग मयोक्तं ब्रह्मणो वचः सम्यगाचर शुद्धात्मंस्ततः सिद्धिमवाप्स्यसि ४२ वासुदेव उवाच इत्युक्तः स
तदा शिष्यो गुरुणा धर्ममुत्तमम् चकार सर्वं कौन्तेय ततो मोक्षमवाप्तवान् ४३ कृतकृत्यश्च स तदा शिष्यः कुरुकुलोद्वह
तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति ४४ अर्जुन उवाच को न्वसौ ब्राह्मणः कृष्ण कश्च शिष्यो जनार्दन श्रोत
व्यं चेन्मयैतद्धि तत्त्वमाचक्ष्व मे विभो ४५ वासुदेव उवाच अहं गुरुर्महाबाहो मनः शिष्यं च विद्धि मे त्वत्प्रीत्या
गुह्यमेतच्च कथितं तव धनंजय ४६ मयि चेदस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह अध्यात्ममेतच्छ्रुत्वा त्वं सम्यगाचर सुव्र
त ४७ ततस्त्वं सम्यगाचीर्णे धर्मेऽस्मिन्नरिकर्षण सर्वपापविनिर्मुक्तो मोक्षं प्राप्स्यसि केवलं ४८ पूर्वमप्येतदेवोक्तं
युद्धकाल उपस्थिते मया तव महाबाहो तस्मादत्र मनः कुरु ४९ मया तु भरतश्रेष्ठ चिरदृष्टः पिता प्रभुः तमहं द्रष्टुमिच्छामि
संमते तव फाल्गुन ५० वैशंपायन उवाच इत्युक्तवचनं कृष्णं प्रत्युवाच धनंजयः गच्छावो नगरं कृष्ण गजसाह्वयमद्य वै ५१

व्यावृत्तिः ४८ प्रागुक्तं स्मारयति अस्य च तस्य च एकवाक्यताकारयितुं पूर्वमिति ४९ । कथामनुसंधत्ते मया त्वित्यादिना ५० ५१ राम राम एम० ९०

© Dharmartha Trust J&K. Digitized By eGangotri

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्यकृतौभारतभावदीपेआश्वमेधिकेपर्वणिउत्तरगीतासूपनिषत्सुहरि

समेत्यतत्रराजानंधर्मात्मानंयुधिष्ठिरं समनुज्ञाप्यराजानंस्वांपुरींयातुमर्हसि ५२ इतिश्रीमहाभारतेआ
श्वमेधिकेपर्वणिगुरुशिष्यसंवादः समाप्तः वैशंपायनउवाच ततोऽभिनोदयन्कृष्णोयुज्यतामितिदारुकं मु
हूर्तादिवचाचष्टयुक्तमित्येवदारुकः १ तथैवचानुयात्राणिचोदयामासपांडवः सज्जयध्वंप्रयास्यामोनगरंगजसा
ह्वयं २ इत्युक्ताः सैनिकास्तेतुसज्जीभूताविशांपते आचख्युःसज्जमित्येवपार्थायामिततेजसे ३ ततस्तौरथमा
स्थायप्रयातौकृष्णपांडवौ विकुर्वाणौकथाश्चित्राःप्रीयमाणौविशांपते ४ रथस्थंतुमहातेजावासुदेवंध
नंजयः पुनरेवाब्रवीद्वाक्यमिदंभरतसत्तम ५ त्वत्प्रसादाज्जयःप्राप्तोराज्ञावृष्णिकुलोद्वह ६ निहताःशत्रवश्चा
पिप्राप्तंराज्यमकंटकं ६ नाथवंतश्चभवतापांडवामधुसूदन भवंतंप्लवमासाद्यतीर्णाःस्मकुरुसागरं ७ विश्व
कर्मन्नमस्तेस्तुविश्वात्मन्विश्वसत्तम तथात्वामभिजानामियथाचाहंभवान्मतः त्वत्तेजःसंभवोनित्यंभूतात्मा
मधुसूदन रतिः क्रीडामयीतुभ्यंमायायातेरोदसीविभो ९ ॥

अस्मंगादांतर्ग्रथार्थप्रकाशः समाप्तिमगमत् ततोभ्यरयामिसर्वंहृदयेपिशोध्यः १७ विश्वकर्मन्नमस्त्यादिनास्तबोधमाविष्करोति १८ रतिः रमणं क्रीडामयीमार्गीहि
संततलीलारूपाते तुभ्यंतव रोदसीद्यावापृथिवीतेतवमाया ९

© Dharmartha Trust J&K. Digitized by eGangotri

अ०
८१

अनुग्रहः एतत्सम्यगाचेत्संज्ञाहपः १६ दृष्टोपकारमप्यभिनंदंति इदंचेति १७ शेषंस्पष्टं २० २१

त्वपिसर्वमिदंविश्वंयदिदंस्थाणुजंगमं त्वंहिमेवैविकुरुषेमंतत्यामंचतुर्विधं १० इथिवींचांतरिक्षंचद्यौ
र्देवमधुसूदन हृमितंतेमलाज्ञोत्मायानतवस्त्रैद्विपाणिच ११ प्राणोवायुः मनजगः क्रोधोमृत्युः सनात
नः प्रसादेचापिपद्माश्रीर्नरस्त्वपिमहामते १२ रतिस्तुष्टिर्धृतिःक्षांतिर्मतिःकांतिश्चराचरं त्वमेवे
हयुगांतेषुनिधनंप्रोच्यसेनघ १३ सुदीर्घेणापिकालेननतेशक्यागुणामया आत्माचपरमात्माच
नमस्तेनलिनेक्षण १४ विदितोमेसुरश्रेष्ठनारदादेवलात्तथा कृष्णद्वैपायनाच्चैवतथाकुरुपिता
महात् १५ त्वयिसर्वंसमासक्तंत्वमेवैकोजनेश्वरः यच्चानुग्रहसंयुक्तमेतदुक्तंत्वयानघ १६
एतत्सर्वमहंसम्यगाचरिष्येजनार्दन इदंचाद्भुतमत्यंतंकृतमस्मात्प्रियेप्सया १७ यत्पापोनिह
तः संख्येकौरव्योधृतराष्ट्रजः त्वयादग्धंहितत्सैन्यंमयाविजितमाहवे १८ भवतातत्कृतंकर्म
येनावाप्तोजयोमया दुर्योधनस्यसंग्रामेतवबुद्धिपराक्रमैः १९ कर्णस्यचवधोपायोयथावत्सं
प्रदर्शितः सैंधवस्यचपापस्यभूरिश्रवसएवच २० अहंचप्रीयमाणेनत्वयादेवकिनंदन य
दुक्तस्तत्करिष्यामिनहिमेत्रविचारणा २१ राजानंचसमासाद्यधर्मात्मानंयुधिष्ठिरं चोदयिष्यामि
धर्मज्ञगमनार्थंतवानघ २२

राम०
८१

नचिरेहिममैतन्नेहाकागमनंप्रभो अचिरादेवद्रष्टासिमातुलंतेजनार्दन २३ बलदेवंचदुर्द्धर्षंतथान्यान्सर्वपुंगवान् एवंसंभाषमाणौतौतत्रा
श्रेवाराममाद्भुतं २४ तथाविविशतुस्तौतौसंप्रहृष्टजनाकुलं तौगत्वाथधृतराष्ट्रस्यगृहंशक्रगृहोपमं २५ ददृशातेमहाराजधृतराष्ट्रंजनेश्वरं
विदुरंचमहाबुद्धिंराजानंचयुधिष्ठिरं २६ भीमसेनंचदुर्द्धर्षंमाद्रीपुत्रौचपांडवौ धृतराष्ट्रमुपासीनंयुयुत्सुंचापराजितं २७ गांधारींचमहाप्रज्ञा
पृथांकृष्णांचभामिनीं सुभद्राद्याश्चताः सर्वाभरतानांस्त्रियस्तथा २८ ददृशातेस्त्रियःसर्वाःगांधारीपरिचारिकाः ततःसमेत्यराजानंधृत
राष्ट्रमरिंदमौ २९ निवेद्यनामधेयेस्वेतस्यपादावगृह्णतां गांधार्याश्चपृथायाश्चधर्मराजस्यचैवहि ३० भीमस्यचमहात्मानौतथापादाव
गृह्णतां क्षत्तारंचापिसंश्लिष्यपृष्ट्वाकुशलमव्ययं ३१ तैःसार्द्धंनृपतिंवृद्धंततस्तौपर्युपासतां ततोनिशिमहाराजोधृतराष्ट्रःकुरूद्वहान्
३२ जनार्दनंचमेधावीव्यसर्जयतवैगृहान् तेनुज्ञातानृपतिनाययुःस्वंस्वंनिवेशनं ३३ धनंजयगृहानेवययौकृष्णस्त्वमितवीर्यवान् त
त्रार्चितोयथान्यायंसर्वकामैरुपस्थितः ३४ कृष्णःसुष्वापमेधावीधनंजयसहायवान् प्रभातायांतुशर्वर्यांकृत्वापौर्वाह्णिकींक्रियां ३५
धर्मराजस्यभवनंजग्मतुःपरमार्चितौ यत्रास्तेससहामात्योधर्मराजोमहाबलः ३६ तौप्रविश्यमहात्मानौतद्गृहंपरमार्चितं धर्मराजंददृ
शातुर्देवराजमिवाश्विनौ ३७ समासाद्यतुराजानंवार्ष्णेयकुरुपुंगवौ निषेदतुरनुज्ञातौप्रीयमाणेनतेनतौ ३८ ततःसराजामेधावीविव
क्षूनुपलक्ष्यतावुभौ प्रोवाचवदतांश्रेष्ठोवचनंराजसत्तमः ३९ युधिष्ठिरउवाच विवक्षूहिपुवांमन्येवीरौयदुकुरूद्वहौ ब्रूतकर्त्तास्मिसर्वंवांनचिरा

अ० ९२

त्माविचार्यतां ४० इत्युक्तः फाल्गुनस्तत्र धर्मराजानमब्रवीत् विनीतवदुपागम्य वाक्यविशारदः ४१ अयंचिरोषितोराजन्वासुदेवः प्रता
पवान् भवंतंसमनुज्ञाप्य पितरं द्रष्टुमिच्छति ४२ सगच्छेदभ्यनुज्ञातोभवतायदिमन्यसे आनर्त्तनगरींवीरतदनुज्ञातुमर्हसि ४३
युधिष्ठिरउवाच पुंडरीकाक्षभद्रंतेगच्छत्वंमधुसूदन पुरींद्वारवतीमद्यद्रष्टुंशूरसुतंप्रभो ४४ रोचतेमेमहाबाहोगमनंतवकेशव मा
तुलश्चिरदृष्टोमेत्वयादेवीचदेवकी ४५ समेत्यमातुलंगत्वाबलदेवंचमानद पूजयेथामहाप्राज्ञमद्वाक्येनयथार्हतः ४६ स्मरेथाश्चा
पिमांनित्यंभीमंचबलिनांवर फाल्गुनंसहदेवंचनकुलंचैवमानद ४७ आनर्त्तानवलोक्यत्वंपितरंचमहाभुज वृष्णींश्चपुनरागच्छेः
हयमेधेमयानघ ४८ सगच्छरत्नान्यादायविविधानिवसूनिच यच्चाप्यन्यन्मनोज्ञंतेतदप्यादत्स्वसात्वत ४९ इयंचवसुधाकृत्स्ना
प्रसादात्तवकेशव अस्मानुपगतावीरनिहताश्चापिशत्रवः ५० एवंब्रुवतिकौरव्येधर्मराजेयुधिष्ठिरे वासुदेवोवरः पुंसामिदंवचन
मब्रवीत् ५१ तवैवरत्नानिधनंचकेवलंधरातुकृत्स्नातुमहाभुजाद्यवै यदस्तिचान्यद्द्रविणंगृहेममत्वमेवतस्येश्वरनित्यमीश्वरः ५२
तथेत्यथोक्तः प्रतिपूजितस्तदागदाग्रजोधर्मसुतेनवीर्यवान् पितृष्वसारंत्ववदद्यथाविधिसंपूजितश्चाप्यगमत्प्रदक्षिणं ५३ तया
ससम्यक्प्रतिनंदितस्ततस्तथैवसर्वैर्विदुरादिभिस्तथा विनिर्ययौनागपुराद्गदाग्रजो

राम० ९२

© Dharmarth Trust J&K. Digitized By eGangotri

रथेनदिव्येनचतुर्भुजः स्वयं ५४ रथैवमुद्दामधियोप्यभाविनींयुधिष्ठिरस्यानुमतेजनार्दनः वितत्यस
स्थापितयामहाभुजोविनिर्ययौराजजनाभिसंवृतः ५५ तमन्वयाद्वानरवर्यकेतनः समाप्तकिर्मा
द्रवतीसुतावपि अगाधबुद्धिर्विदुरश्चमाधवंबलंचपंचभीमोगजराजविक्रमः ५६ निवर्त्यपितांकुरु
राष्ट्रवर्द्धनोस्ततः ससर्वविदुरंचवीर्यवान् जनार्दनोदारुकगामात्रमत्वाः प्रचोदयाश्वानितिसात्यकिं
स्वयं ५७ ततोपयौशत्रुगणप्रमर्दनः शिविप्रवीरानुगतोजनार्दनः यथानिहत्यारिगणांशतक्रतु
र्दिवंतथानर्त्तपुरींप्रतापवान् ५८ इत्याश्वमेधिकेपर्वणि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तथाप्रयांतंवार्ष्णेयमित्यादिर्ग्रंथः पूर्वोक्तामुपनिषद्विद्याफलंविश्वरूपदर्शनंविद्यासाधनंगुरोराधनंचेतिद्वयमिहोक्तंविपरीतंउत्तंकोपाख्यानआर्जनप्र

आ० ८३

वैशंपायनउवाच तथाप्रयान्तंवार्ष्णेयंद्वारकांभरतर्षभाः परिष्वज्यन्यवर्तन्तसानुयात्राः परंतपाः १ पुनः
पुनश्चवार्ष्णेयंपर्यष्वजतफाल्गुनः आचक्षुर्विषयाच्चैनंसददर्शपुनः पुनः २ कृच्छ्रेणैवचतांपार्थोगोविं
देविनिवेशितां संजहारततोदृष्टिंकृष्णश्चाप्यपराजितः ३ तस्यप्रयाणेयान्यासन्निमित्तानिमहात्म
नः बहून्यद्भुतरूपाणितानिमेगदतःशृणु ४ वायुर्वेगेनमहतारथस्यपुरतोववौ कुर्वन्निःशर्करंमा
र्गंविरजस्कमकंटकं ५ ववर्षवासवश्चैवतोयंशुचिसुगंधिच दिव्यानिचैवपुष्पाणिपुरतःशार्ङ्गधन्व
नः ६ सप्रयातोमहाबाहुःसमेषुमरुधन्वसु ददर्शाथमुनिश्रेष्ठमुत्तंकममितौजसं ७ सतंसंपूज्यते
जस्वीमुनिंपृथुललोचनः पूजितस्तेनचतदापर्यपृच्छदनामयं ८ सपृष्टःकुशलंतेनसंपूज्यमधुसूद
नं उत्तंकोब्राह्मणश्रेष्ठस्ततःपप्रच्छमाधवं ९ कच्चिच्छौरेत्वयागत्वाकुरुपांडवसद्मतत् कृतंसौभ्रात्रम
चलंतन्मेआख्यातुमर्हसि १० अपिसंधायतान्वीरानुपावृत्तोसिकेशवे संबंधिनःस्वदयितान्सततंवृष्णि
पुंगव ११ कच्चित्पांडुसुताःपंचधृतराष्ट्रस्यचात्मजाः लोकेषुविहरिष्यंतित्वयासहपरंतप १२

प्रवर्तितंततउपरिष्टादश्वमेधआर्जनकर्मणामप्याराद्उपकारकत्वंविद्यायामुच्यतइतिसंगतिः ८ १० ११ राम राम राम

राम० ८३

सौशाम्येसौशाम्ये २१ मिथ्याचारेणाकपटपूर्वकम्अविरोधच्छलेनविरोधंद्रष्टयता परीताःपरितः प्राप्ताः २२ अनुनयंशिक्षां २३ मेमतः २४

म्वाष्ट्रेनांचराजानः कच्चिन्प्राप्यंनिविषमलं कौरवेषुप्रशांतेषुत्वमानाथेनकेशव १३ यामेसंभावनातात
त्वयिनित्यमवर्त्तत अपिसासफलातातकृत्वातेभरतान्प्रति १४ श्रीभगवानुवाच कृतोमयापूर्वंसौशा
म्यंकौरवान्प्रति नाशक्यंतयदासाम्येस्थापयितुमंजसा १५ ततस्तेनिधनंप्राप्ताः सर्वेससुतबांध
वाः नदिष्टमप्यतिक्रांतुंशक्यंबुध्याबलेनवा १६ महर्षेविदितंभूयः सर्वमेतत्तवानघ त्यक्रामन्मतिमय
भीष्मस्यविदुरस्यच १७ ततोयमक्षयंजग्मुःसमासाद्येतरेतरं पंचैवपांडवाः शिष्टाहतामित्राहतात्मजाः १८
धार्त्तराष्ट्राश्चनिहताः सर्वेससुतबांधवाः इत्युक्तवचनेकृष्णेभृशंक्रोधसमन्वितः १९ उत्तंकउवाचैनंरोषा
दुत्फुल्ललोचनः १९ उत्तंकउवाच यस्माच्छक्तेनतेकृष्णनत्राताः कुरुपुंगवाः संबंधिनः प्रियास्तस्माच्छ
प्स्येऽहंत्वामसंशयं २० नचतेप्रसभंयस्मात्तेनिगृह्यनिवारिताः तस्मान्मन्युपरीतस्त्वांशप्स्यामिमधुसूदन
२१ त्वयाशक्तेनहिसतामिथ्याचारेणमाधव उपचीर्णाः कुरुश्रेष्ठाः नश्यंतःसमुपेक्षिताः २२ वा
सुदेवउवाच शृणुमेविस्तरेणेदंयद्वक्ष्येभृगुनंदन गृहाणानुनयंचापितपस्वीह्यसिभार्गव २३
श्रुत्वाचमेतदध्यात्मंमुंचेथाःशापमद्यवै नचमांतपसाल्पेनशक्तोभिभवितुंपुमान् २४

© (i) Dharmartha Trust J&K Digitized By eGangotri

२६ अध्यायः ब्रूहि ६ असत्शशशृंगादि सदसत्घटादि सदसत्सांख्यकं एतत्तत्त्वमपि ततः सन्नः परंनास्तीत्यर्थः ८ ।। ।। ७ ।। ।।

अ० ६४

नचैतेनपसोनाशमिच्छामितपतांवर तपांसिसमहद्दीप्तंगुरवश्चापितोषिताः २५ कौमारंब्रह्मचर्यंते
ज्ञानामिद्विजसत्तमदुःखार्जितस्यतपसस्तस्मान्नेच्छामितेवधं २६ इत्याश्वमेधिकेउत्तंकोपाख्याने उत्तंक
उवाच ब्रूहिकेशवतत्त्वेनत्वमध्यात्ममनिंदितं श्रुत्वाश्रेयोभिधास्यामिशापंवातेजनार्दन १ वासुदेवउ
वाच तमोरजश्चसत्त्वंचविद्धिभावान्मदाश्रयान् तथारुद्रान्वसूंश्चापिविद्धिमत्प्रभवान्द्विज २ मयिसर्वाणि
भूतानिसर्वभूतेषुचाप्यहं स्थितइत्यभिजानीहिमातेभूत्संशयः ३ तस्मादैत्यगणान्सर्वान्यक्षगंधर्व
राक्षसान् नागानप्सरसश्चैवविद्धिमत्प्रभवान्द्विज ४ सदसच्चैवयत्प्राहुरव्यक्तंव्यक्तमेवच अक्षरंचक्ष
रंचैवसर्वमेतन्मदात्मकं ५ येचाश्रमेषुवैधर्माश्चतुर्धाविहितामुने वैदिकानिचसर्वाणिविद्धिसर्वंमदा
त्मकं ६ असच्चसदसच्चैवयद्विश्वंसदसत्परं मत्तःपरतरंनास्तिदेवदेवात्सनातनात् ७ ॐकारप्रमु
खान्वेदान्विद्धिमांत्वंभृगूद्वह यूपंसोमंचरुंहोमंत्रिदशाप्यायनंमखे ८ होतारमपिहव्यंचविद्धिमांभृ
गुनंदन अध्वर्युःकल्पकश्चापिहविःपरमसंस्कृतं ९ उद्गाताचापिमांस्तौतिगीतघोषैर्महाध्व
रे प्रायश्चित्तेषुमांब्रह्मन्शांतिमंगलवाचकाः १०

एम० ६४

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

॥ अधर्मणोतिछेदः २० २१ २२ २३ अध्यायः ० ६२ ॥ ॥

त्कवंतिविश्वकर्माणांसत्तनंद्विजसत्तम ममविद्धिसुतंधर्ममग्रजंद्विजसत्तम ११ मानसंदयितंविप्रसर्वभू
तदयात्मकं तत्राहंवर्तमानैश्चनिवृत्तैश्चैवमानवैः १२ बह्वीःसंसरमाणोवैयोनीर्वर्त्तामिसत्तम धर्मसंरक्ष
णार्थायधर्मसंस्थापनायच १३ तैस्तैर्वेषैश्चरूपैश्चत्रिषुलोकेषुभार्गव अहंविष्णुरहंब्रह्माशक्रोथप्रभ
वाप्ययः १४ भूतग्रामस्यसर्वस्यस्रष्टासंहारएवच अधर्मेवर्तमानानांसर्वेषामहमच्युतः १५ धर्मस्यसे
तुंबध्नामिचलितेचलितेयुगे तास्ताःयोनीःप्रविश्याहंप्रजानांहितकाम्यया १६ यदात्वहंदेवयोनौव
र्त्तामिभृगुनंदन तदाहंदेववत्सर्वमाचरामिनसंशयः १७ यदागंधर्वयोनौवावर्त्तामिभृगुनंदन तदा
गंधर्ववत्सर्वमाचरामिनसंशयः १८ नागयोनौयदाचैवतदावर्त्तामिनागवत् यक्षराक्षसयोन्योस्तुय
थावद्विचराम्यहं १९ मानुष्येवर्तमानेतुकृपणंयाचितामया नचतेजातसंमोहावचोगृह्णंतमोहि
ताः २० भयंचमहदुद्दिश्यत्रासिताःकुरवोमया क्रुद्धेनभूत्वाचपुनर्यथावदनुदर्शिताः २१ तेत्वधर्मे
णसंयुक्ताःपरीताःकालधर्मणा धर्मेणनिहतायुद्धेगताःस्वर्गंनसंशयः २२ लोकेषुपांडवाश्चैवग
ताःख्यातिंद्विजोत्तम एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि २३ इत्याश्वमेधिकेउत्तंकोपाख्याने

© Dharmartha Trust J&K Digitized By eGangotri

यम्भगवतास्तस्यविश्वरूपत्वमुक्तं तदेवद्रष्टुमिच्छन्नुत्तंक उवाच अभिजानामीत्यादिना ११ १२ ॥ ॥ ॥ ७ ॥ ॥

अ०
६५

उत्तंक उवाच अभिजानामिजगतः कर्तारंत्वांजनार्दन नूनंभवत्प्रसादोयमितिमेनास्तिसंशयः १ चि
त्तंचसुप्रसन्नंमेत्वद्भावगतमच्युत विनिवृत्तश्चमेकोपइतिविद्धिपरंतप २ यदित्वनुग्रहंकंचित्त्वत्तोर्होहमि
जनार्दन द्रष्टुमिच्छामितेरूपमैश्वरंतन्निदर्शय ३ वैशंपायनउवाच ततःसतस्मैप्रीतात्मादर्शयामा
सतद्वपुः शाश्वतंवैष्णवंधीमान्ददृशेयद्धनंजयः ४ सददर्शमहात्मानंविश्वरूपंमहाभुजं सहस्रसू
र्यप्रतिमंदीप्तिमत्पावकोपमं ५ सर्वमाकाशमावृत्यतिष्ठंतंसर्वतोमुखं तंदृष्ट्वापरमंरूपंविष्णोर्वैष्णव
मद्भुतं ६ विस्मयंचययौविप्रस्तंदृष्ट्वापरमेश्वरं उत्तंक उवाच विश्वकर्मन्नमस्तेस्तुविश्वात्मन्विश्व
संभव यस्यातेपृथिवीव्याप्ताशिरसाचावृतंनभः ७ द्यावापृथिव्योर्यन्मध्यंजठरेणतवावृतं भुज
भ्यामावृताश्चाशास्त्वमिदंसर्वमच्युत ८ संहरस्वपुनर्देवरूपमक्षय्यमुत्तमं पुनस्त्वांस्वेनरूपेणद्रष्टुमिच्छा
मिशाश्वतं ९ वैशंपायनउवाच तमुवाचप्रसन्नात्मागोविंदोजनमेजय वरंवृणीष्वेतितदातमु
त्तंकोब्रवीदिदं १० पर्याप्तएषएवाद्यवरस्त्वत्तोमहाद्युते यत्तेरूपमिदंकृष्णपश्यामिप्रभवाप्ययम् ११
तमब्रवीत्पुनःकृष्णोमात्वमत्रविचारय अवश्यमेतत्कर्तव्यममोघंदर्शनंमम १२

राम०
६५

स्पृष्ट्वेजलेःपेक्षितमति १५ मातंगांबरांजविशेषं १६ अथःपादप्रदेशेषोदनेःवाऐतिसंबंधः तस्यसमीपेअथःस्नातसोभोगवसाडतिवा १९ चिहेपनिर्दिनवान

पुनकंउवाच अवध्यकारणोपंचपधेतन्मममेविभो नोयमिच्छामिपत्रेषंमहद्युतद्धिदुर्लभं १३ ततः
सल्लसनतेजः प्रोवाचोत्रेकमीश्वरः पृष्टश्चमतिविंसोदृमित्युक्तात्मद्वाकोपयो १४ ततः कदाचिम्रगवानु
नेकुलोपकोलृपा [illegible] तृषितः पचिवक्तामममेसम्मोयाश्रुतं १५ ततोदिव्यासनंधीमानस्नातगमल
र्दिकिनं अपश्यत्तमयातस्मिवृक्षस्थप्रपीयायात १६ भीषणांबद्धनिर्स्त्रिंशवाणकार्मुकधारिणा तस्याधः
स्नातसोपस्यपहृष्टाभिर्षिदिज्ञोत्तमः १७ सान्त्वेयवचनंप्राहमातंगःप्रहसन्निव महाप्रुत्रकंप्रतीच्छस्वमत्तोवारि
भ्रगूद्वह १८ कृपाहिमेमहतीत्वांदृष्ट्वात्तृमसमाश्रितं उत्तंकोस्लेनमुनिस्तत्रोपनाम्नंदन १९
चिहेपवसनंधीमानवाम्भिहृत्यामिरच्युतं पुनःपुनश्चमातंगःपिवस्वेतितमब्रवीत् २० नचापिवत्
समक्रोधःक्षुभितेनांतरात्मना सतथानिश्चयात्तेनप्रत्याख्यातोमहात्मना २१ श्वभिःसहमहाराज
नत्रैवांतरधीयत उत्तंकस्तंतथादृष्ट्वाततोव्रीडितमानसः २२ मेनेप्रलब्धमात्मानंकृष्णेनामित्र
घातिना अथतेनैवमार्गेणशंखचक्रगदाधरः २३ आजगाममहाबुद्धिरुत्तंकश्चैनमब्रवीत नयु
क्तंतादृशंदातुंत्वयापुरुषसत्तम २४

स्वमुतंवाप्रस्कुसं २२ प्रलब्धंवंचितं २४ ॥ छ ॥ छ ॥ छ ॥ छ॥ छ॥ श्रीराम ॥

अश्व०
९६

सलिलं विप्रमुख्येभ्यो मातंगात्स ततो विभो इत्युक्तवचनं तं तु महाबुद्धिर्जनार्दनः २५ उत्तंकं श्लक्ष्णया वा
चा सांत्वयन्निदमब्रवीत् यादृशेनेह रूपेण योग्यं दातुं धनेन वै २६ तादृशे खलु मे दत्तं त्वं तु तं नावबुध्यथाः
मया त्वदर्थमुक्तो वै वज्रपाणिः पुरंदरः २७ उत्तंकायामृतं देहि तोयरूपमिति प्रभुः स मामुवाच देवेंद्रो न
मर्त्यो मर्त्यतां व्रजेत् अन्यमस्मै वरं देहीत्यसकृद्भृगुनंदन अमृतं देयमित्येवं मयोक्तः शचीपतिः २९
स मां प्रसाद्य देवेंद्रः पुनरेवेदमब्रवीत् यदि देयमवश्यं वै मातंगोऽहं महामते ३० भूत्वामृतं प्रदास्यामि भा
र्गवाय महात्मने यद्येवं प्रतिगृह्णाति भार्गवोऽमृतमद्य वै ३१ प्रदातुमेष गच्छामि भार्गवस्यामृतं विभो
प्रत्याख्यातस्त्वहं तेन न दास्यामि न कथंचन ३२ स तथा समयं कृत्वा तेन रूपेण वासवः उपस्थितस्त्वया
चापि प्रत्याख्यातोऽमृतं ददत् ३३ चांडालरूपी भगवान्सुमहांस्ते व्यतिक्रमः यत्तु शक्यं मया कर्तुं भूय
एव तवेप्सितं ३४ तोयेप्सां तव दुर्धर्षां करिष्ये सफलामहं येष्वहःसु च ते ब्रह्मन्सलिलेच्छा भविष्यति
३५ तदा मरौ भविष्यंति जलपूर्णाः पयोधराः रसवच्च प्रदास्यंति ते तोयं भृगुनंदन ३६ उत्तंकमेघा इत्यु
क्ताः ख्यातिं यास्यंति चापि ते इत्युक्तः प्रीतिमान्विप्रः कृष्णेन स बभूव ह ३७ अद्याप्युत्तंकमेघाश्च मरौ
वर्षंति भारत ॥ ॥ इत्याश्वमेधिके पर्वणि उत्तंकोपाख्याने ॥ ॥

राम०
९६

© Dharmartha Trust J&K. Digitized by eGangotri

उत्तंकः ९ निचित्तेष्वेपेल्यत्रनिक्षिप्येषेनिपाद्रेपिमस्तवार्थः ? विनिनिष्पिष्टः च्युणिमतप्तव १३ ॥ ॥

कृहओ ५४

जनमेजय उवाच उत्तंकः केन तपसा संयुक्तो वै महामनाः यः शापं दातुकामोभूद्विष्णवे प्रभविष्णवे १ वैशंपाय
न उवाच उत्तंको महता युक्तस्तपसा जनमेजय गुरुभक्तः स तेजस्वी नान्यत्किंचिदपूजयत् २ सर्वेषामृषिपुत्राणामेष
चासीन्मनोरथः औत्तंकीं गुरुवृत्तिं वै प्राप्नुयामेति भारत ३ गौतमस्य तु शिष्याणां बहूनां जनमेजय उत्तंकेभ्यधिका प्री
तिः स्नेहश्चैवाभवत्तदा स तस्य दमशौचाभ्यां विक्रान्तेन च कर्मणा ४ सम्य[illegible]पचारेण गौतमः प्रीतिमानभूत् ॥
अथ शिष्यसहस्राणि समनुज्ञातवानृषिः ५ उत्तंकं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत तं क्रमेण जरा तात प्रतिपेदे महा आ ६
मुनिं ६ न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः ततः कदाचिद्राजेन्द्र काष्ठान्यानयितुं ययौ ७ उत्तंकः काष्ठभारं च म
हान्तं समुपानयत् स तभाराभिभूतात्मा काष्ठभारमरिंदम ८ निष्पिपेष क्षितौ राजन् परिश्रान्तो बुभुक्षितः तस्य
काष्ठे विलग्नाभूज्जटा रूप्यसमप्रभा ९ ततः काष्ठैः सह तदा पपात धरणीतले ततः स भारनिष्पिष्टः क्षुधाविष्टश्च
भारत १० दृष्ट्वा तां वयसोवस्थां रुरोदार्त्तस्वरस्तदा ततो गुरुसुता तस्य पद्मपत्रनिभानना ११ जग्राहाश्रूणि सु
श्रोणी करेण पृथुलोचना पितुर्नियोगाद्धर्मज्ञा शिरसावनतानना १२

© Dharmartha Trust J&K. Digitized by eGangotri

अ० ५६

अभ्यनुजानिथाः अभ्यनुजानीथाः अभ्यनुज्ञातवानसि अउभावोदुःसलंवार्षं २१ २२ २४ ॥ ॥ ॥ ॥ ॥

तस्मान्निपेतनदंग्धोकगौते ऽश्रुबिंदुभिः नहितानश्रुयानांसःशक्ताधारयितुंमही १३ गौतमस्त्वब्रवीद्विप्रमुत्तंकं
प्रीतमानसः कस्मात्तात तवाद्येदं शोकोत्तरमिदं मनः स्वैरं ब्रूहि विप्रर्षे श्रोतुमिच्छामि ते वचः १४ उत्तंक उवाच
भवद्गतेन मनसा भवत् प्रियचिकीर्षया भवद्भक्तिगतेनेह भवद्भावानुगेन च १५ जरेयं नावबुद्धा मे नाभिज्ञा
तं सुखं च मे शतवर्षोषितं मां हि न त्वमभ्यनुजानिथाः १६ भवता ह्यभ्यनुज्ञाताः शिष्याः प्रत्यवरा मम उपपन्ना
द्विजश्रेष्ठ शतशोऽथ सहस्रशः १७ गौतम उवाच त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव व्यतिक्रामन्महा
न्कालो नावबुद्धो द्विजर्षभ १८ किं त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव अनुज्ञां प्रतिगृह्य त्वं स्वगृहान् गच्छ मा
चिरं १९ उत्तंक उवाच गुर्वर्थं कं प्रयच्छामि ब्रूहि त्वं द्विजसत्तम तमुपाहृत्य गच्छेयमनुज्ञातस्त्वया विभो २०
गौतम उवाच दक्षिणा परितोषो वै गुरूणां सद्भिरुच्यते तव ह्याचरतो ब्रह्मन् तुष्टोऽहं वै न संशयः २१ इत्थं च प
रितुष्टं मां विजानीहि भृगूद्वह युवा षोडशवर्षो हि यदद्य भविता भवान् २२ ददामि पत्नीं कन्यां च स्वां ते दुहितरं
द्विज एतामृते हि नान्या वै त्वत्तेजोऽर्हति सेवितुं २३ ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीं गुरुणा चाभ्यनु
ज्ञातो गुरुपत्नीमथाब्रवीत् २४

अ० ५६

© Dharmartha Trust J&K. Digitized by eGangotri

चकार नमस्यां विप्रो राजा तेन मया ब्रवीत् प्रत्युत्थाय महातेजा भयकर्त्ता यमोपमः २ दिष्ट्या त्वमसि कल्याण षष्ठे
काले ममान्तिकं भक्ष्यं मृगयमाणस्य संप्राप्तो द्विजसत्तम ३ उत्तंक उवाच राजन् गुर्वर्थिनं विद्धि चरन्तं मामिहागतं
न च गुर्वर्थमुद्युक्तं हिंस्यमाहुर्मनीषिणः ४ राजोवाच षष्ठे काले ममाहारो विहितो द्विजसत्तम न शक्यस्त्वं समु
त्स्रष्टुं क्षुधितेन मयाद्य वै ५ उत्तंक उवाच एवमस्तु महाराज समयः क्रियतां तु मे। गुर्वर्थमभिनिर्वर्त्य पुनरेष्या
मि ते वशं ६ संश्रुतश्च मया यमतेः क्षितावि ह योर्थो गुरवे राजसत्तम त्वदधीनः स राजेन्द्र तं त्वां भिक्षे नरेश्वर ७
ददासि विप्रमुख्येभ्यस्त्वं हि रत्नानि नित्यदा दाता च त्वं नरव्याघ्र पात्रभूतः क्षिताविह ८ पात्रं प्रतिग्रहे चापि वि
द्धि मां नृपसत्तम उपाकृत्य गुरोरर्थं त्वदायत्तमरिंदम समयेनेह राजेन्द्र पुनरेष्यामि ते वशं ९ सत्यं ते प्रतिजाना
मि नात्र मिथ्या कथंचन अनृतं नोक्तपूर्वं मे स्वैरेष्वपि कुतोन्यथा १० सौदास उवाच यदि मत्तस्त्वयापन्नो गुर्वर्थः
कृत एव सः यदि चास्मि प्रतिग्राह्यः सांप्रतं तद्ब्रवीहि मे ११ उत्तंक उवाच प्रतिग्राह्यो मतो मे त्वं सदैव पुरुषर्ष
भ सोहं त्वामनुसंप्राप्तो भिक्षितुं मणिकुंडले १२ सौदास उवाच पत्न्यास्ते मम विप्रर्षे उचिते मणिकुंडले
वरयार्थं त्वमन्यं वै तं ते दास्यामि सुव्रत १३

© (C) Dharmartha Trust J&K. Digitized By eGangotri

छिद्रेष्वेतेष्विमेरत्निपर्वावपि २३ नागानानागैःक्रियतइतिसंबंधः २४ २५ ॥

श्रु०
९८

उत्तंकउवाच श्रुतंतेअपदेशेनप्रमाणायद्दितेवयं प्रपच्छकुंडलेमह्यंमत्त्वायाभजपार्थिव १४ वैशंपायनउवाच
इत्युक्तस्त्वब्रवीद्राजातमुत्तंकंपुनर्वचः गच्छमद्वचनाद्देवींब्रूहिदेहीतिसत्तम १५ सैवमुक्तस्तदापौष्येणमहात्मनाप्रवि
श्ता प्रराम्येतिद्विजश्रेष्ठकुंडलेतेनसंशयः १६ उत्तंककउवाच कथंन्नोभवतः श्राद्धामयादृष्टुंनतेस्त्र्या त्वयंचापि
भवाननृतंनोकिमर्थंनोपसर्पति १७ सौदासउवाच तांद्रक्ष्यतिभवानघकस्मिंश्चिद्दृतनिर्झरे षष्ठेकालेनहिमया
आहारोदृष्टुमघवे १८ वैशंपायनउवाच उत्तंकस्तुतयोक्तः सजगामभरतर्षभ मदयंतीचदृष्ट्वाससत्तापयत्तस्त्र
योजनं १९ सौदासवचनंश्रुत्वाततः सापृथुलोचना प्रत्युवाचमहाबुद्धि मुत्तंकंजनमेजय २० एवमेतद्दृद्
ह्मनानृतंवदसेनघ अभिज्ञानंचकिंचित्त्वंसमानयितुमर्हसि २१ इमेहिदिव्येमणिकुंडलेमेदेवाश्चयक्षाश्चमह
र्षयश्च तैस्तैरुपायैरपहर्तुकामाश्छिद्रेषुनित्यंपरितर्कयंति २२ निक्षिप्तमेतत्भुविपन्नगास्तुरत्नंसमासाद्यप
रामृषेयुः यक्षास्तथोच्छिष्टधृतंसुराश्चनिद्रावशाद्वापरिधर्षयेयुः २३ छिद्रेष्वेतेष्विमेनित्यंह्रियेतेद्विजसत्तम
देवराक्षसनागानामप्रमत्तेनधार्यते २४ स्यंदेतेहिदिवारुक्मंरात्रौचद्विजसत्तम नक्तंनक्षत्रताराणांप्रभामाक्षि
प्यवर्तते २५

त्रुटिपत्रमिदमेकोनशततपत्रनिरकुपृष्ठाधस्स्यपदेः X

गम०
९७

२५ कंभवत्यैप्रयच्छामिगुर्वर्थंविनिपुङ्गमं प्रियंहितंचकांताम्निप्राणैरपिधनैरपि २५ यदुर्लभंहिलोकेस्मि
न्तन्मत्यद्भुतंमहत् तदानयंतपमानह्निमेत्रात्तिमंशपः २६ अहल्योवाच पार्थोनष्ठोस्मितेविप्रनि
त्यंमन्नानवानघ पर्याप्तमेतन्मद्दत्तेगच्छतातयथेप्सितं २७ वैशंपायनउवाच उत्तंकस्तुमहाराजपुन
रेवाब्रवीद्वचः आज्ञापयस्वमांमातःकर्तव्यंचतवप्रियं २८ अहल्योवाच सौदासपत्नीविधृतेदिव्ये
मणिकुंडले तेसमानयभद्रंतेगुर्वर्थःसुकृतोभवेत् २९ सतथेतिप्रतिश्रुत्यजगामजनमेजय गुरुप
त्नीप्रियार्थंवैतेसमानयितुंतदा ३० सजगामततःशीघ्रमुत्तंकोब्राह्मणर्षभः सौदासंपुरुषादंवैभिक्षि
तुंमणिकुंडले ३१ गौतमस्त्वब्रवीत्पत्नीमुत्तंकोनाद्यदृश्यते इतिदृष्ट्वातमाचष्टकुंडलार्थंगतंचसा ३२
ततःप्रोवाचपत्नींसनतेसम्यगिदंकृतं शप्तःसपार्थिवोनूनंब्राह्मणंतंवधिष्यति ३३ अहल्योवाच अ
जानंत्यानियुक्तःसभगवन्ब्राह्मणोमया भवत्प्रसादान्नभयंकिंचित्तस्यभविष्यति ३४ इत्युक्तःप्राहतां
पत्नीमेवमस्त्वितिगौतमः उत्तंकोपिवनेशून्येराजानंतंददर्शह ३५ इत्याश्वमेधिकेउत्तंकोपाख्या
ने वैशंपायनउवाच सतंदृष्ट्वातथाभूतंराजानंघोरदर्शनं दीर्घश्मश्रुधरंनृणांशोणितेनसमुक्षितं ५

अतः परं त्रुटिपत्रमेकम्

© Dharmartha Trust J&K. Digitized By eGangotri

अ० ९९

२८ अध्यायः समित्र अभिज्ञानं श्लोकत्रयं ज्ञापकं १ तदेवाहृतवेति एषारत्नेयोनिरूपा अस्य इतोमुक्तिरूपा अतोमम इतोगतैर्मुक्तार्थे प्रपच्छ देहिमणिमये

एतस्यामुख्यमगावनत्नासिपामामपंकुतः विपाग्निमपदेभ्यश्चमपंजातुनविद्यते २६ इहवेनचैतेस्यामुक्तेमव
नोद्रुमकेतदा अनुरूपेणाचामुक्तेज्ञापतेतस्यमाणाके २७ एवंविधेममेतेवैकुंडलेपरमार्चिते त्रिषुलो
केषुविज्ञातेतदभिज्ञानमातय २८ इत्याश्वमेधिकेपर्वणि उत्तंकोपाख्याने वैशंपायनउवाच समित्र
सहमामाप्य अभिज्ञातमयाचत तस्मैददावभिज्ञानंसचेक्ष्वाकुर्विलक्षदा १ सौदासउवाच नचैवेषागतिः
क्षेम्यानचान्याविद्यतेगतिः एतन्मेमतमाज्ञायप्रयच्छमणिकुंडले २ इत्युक्तस्तामुत्तंकस्तत्र भर्तुर्वाक्यमथा
ब्रवीत् श्रुत्वाचमातरावाराजन्नतस्तेमणिकुंडले ३ प्रवाप्यकुंडलेतेतुराजानंपुनरब्रवीत् किमेतद्गुह्य
वचनंश्रोतुमिच्छामिपार्थिव ४ सौदासउवाच प्रजानिसर्गाद्विप्रान्वैक्षत्रियाः प्रजयंतिहि विप्रेभ्यश्चापि
बहवोदोषाः प्रादुर्भवंतिवै ५ सोहंद्विजेभ्यः प्रणतोविप्राद्दोषमवाप्तवान् गतिमन्यानपश्यामिमदयंती
सहायवान् ६ नचान्यामपिपश्यामिगतिंगतिमतांवर स्वर्गद्वारस्यगमनेस्थानेचेहद्विजोत्तम ७ न
हिराज्ञाविशेषेणविरुद्धेनद्विजातिभिः शक्यंहिलोकेस्थातुंवैप्रेत्यवासुखमेधितुं ८ तदिष्टेतेमयाद
त्तेएतेस्वेमणिकुंडले यः कृतस्तेद्यसमयः सफलंतंकुरुष्वमे

कुंडले २ ३ ४ ५ ६ ७ ८ ९ ९ ७ ७ ॥

राम० ९९

© Dharmartha Trust J&K. Digitized By eGangotri

उत्तंकउवाच राजंस्तथेहकर्त्तास्मिपुनरेष्यामितेवशं प्रश्नंचवंकचित्तथंस्तुंत्वांतिहन्तोस्मिपरंतप १० सौदासउवाच ब्रूहिविप्रयथाकामंप्रतिव
क्तास्मितेवचः छेत्तास्मिसंशयंतेद्यनमेत्रास्तिविचारणा ११ उत्तंकउवाच प्राहुर्वाक्संयतंविप्रंधर्मनैपुणदर्शिनः मित्रेषुयश्चविषमःस्ते
नइत्येवतंविदुः १२ सभवान्मित्रतामद्यसंप्राप्तोममपार्थिव समेबुद्धिंप्रयच्छस्वसंमतांपुरुषर्षभ १३ अवाप्तार्थोहमद्येहभवां
श्चपुरुषादकः भवत्सकाशमागंतुंक्षमंममनवेतिवै १४ सौदासउवाच क्षमंचेदिहवक्तव्यंतवद्विजवरोत्तम मत्समीपंद्विज
श्रेष्ठनागंतव्यंकथंचन १५ एवंतवप्रपश्यामिश्रेयोभृगुकुलोद्वह आगच्छतोहितेविप्रभवेन्मृत्युर्नसंशयः १६ वैशंपा
यनउवाच इत्युक्तःसतदाराज्ञाक्षमंबुद्धिमताहितं अनुज्ञाप्यसराजानमहल्यांप्रतिजग्मिवान् १७ गृहीत्वाकुंडलेदिव्येगु
रुपत्न्याःप्रियंकरः जवेनमहतापायाद्गौतमस्याश्रमंप्रति यथातयोरक्षणंचमदयंत्याभिभाषितं तथातेकुंडलेबध्वातदाकृ
ष्णाजिनेनयत् १९ सकस्मिंश्चित्क्षुधाविष्टःफलभारसमन्वितं बिल्वंददर्शविप्रर्षिरारुरोहचतंततः २० शाखामासज्यतस्यै
वकृष्णाजिनमरिंदम पातयामासबिल्वानितदासद्विजपुंगवः २१ अथपातयमानस्यबिल्वापहृतचक्षुषः न्यपतंस्तानिबि
ल्वानितस्मिन्नेवाजिनेविभो २२

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

आस्येनकुंडलेविस्रप्यधत्वावल्मीकंविवेशेतिसंबंधः २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४

द्रुतःश्विार

आः
१००

यस्मिंस्तेकुंडलेन्यस्तेतदाद्विजलशेणावे बिल्वमहारेतस्याप्यस्यशीर्षंग्रहणंततः २३ सकुंडलंतम्राजिनंपपातसहसातरोः विशीर्णं
यंधनेतस्मिन्गतेतस्माजिनेमही २४ अपश्यन्भुजगःकश्चिन्तेतत्रमणिकुंडले ऐरावतकुलोद्भूतात्वरदाहिसः २५ विदश्यास्येन
वल्मीकंविवेशाथसकुंडले ह्रियमाणेतुदृष्ट्वासकुंडलेभुजगेनह २६ पपातवृक्षात्सोद्वेगोदुःखापरमकोपनः सदंड
काष्ठमादायवल्मीकमखनत्तदा २७ अहानित्रिंशदव्यग्रःपंचचान्यानिभारत क्रोधामर्षाभिसंतप्तस्तदाब्राह्मणसत्त
मः २८ तस्यवेगमसह्यंतमसहंतीवसुंधरा दंडकाष्ठाभिनुन्नांगीचचालभृशमाकुला २९ ततःखनतएवाथविप्र
र्षेर्धरणीतलं नागलोकस्यपंथानंकर्तुकामस्यनिश्चयात् ३० रथेनहरियुक्तेनतंदेशमुपजग्मिवान् वज्रपाणि
र्महातेजास्तंददर्शद्विजोत्तमं वैशंपायनउवाच सतुतंब्राह्मणोभूत्वातस्यदुःखेनदुःखितः उत्तंकमब्रवीद्वाक्यंनैतच्छ
क्यंत्वयेतिवै ३१ इतोहिनागलोकोवैयोजनानिसहस्रशः नदंडकाष्ठसाध्यंचमन्येकार्यमिदंतव ३२ उत्तंकउवाच
नागलोकेयदिब्रह्मन्नशक्येकुंडलेमया प्राप्तुंप्राणान्विमोक्ष्यामिपश्यतस्तेद्विजोत्तम ३३ वैशंपायनउवाच य
दासनाशकत्तस्यनिश्चयंकर्तुमन्यथा वज्रपाणिस्तदादंडंवज्रास्त्रेणायुयोजह ३४

रामः
१००

© (c) Dharmartha Trust J&K Digitized By eGangotri

ततोवज्रप्रहारैस्तैर्दार्यमाणावसुंधरा नागलोकस्यपंथानमकरोज्जनमेजय ३५ सतेनमार्गेणतदानागलोकंविवेशह ददर्शनागलोकंच
योजनानिसहस्रशः ३६ प्राकारनिचयैर्दिव्यैर्मणिमुक्तास्वलंकृतैः उपपन्नंमहाभागशातकुंभमयैस्तथा ३७ वापीस्फटिकसोपानान
दीश्चविमलोदकाः ददर्शवृक्षांश्चबहून्नानाद्विजगणायुतान् ३८ तस्यलोकस्यचद्वारंसददर्शभृगूद्वहः पंचयोजनवि
स्तारमायतंशतयोजनं ३९ नागलोकमुत्तंकस्तुप्रेक्ष्यदीनोभवत्तदा निराशश्चाभवत्तत्रकुंडलाहरणेपुनः ४० तत्रप्रोवाच
तुरगस्तंकृष्णश्वेतवालधिः ताम्रास्यनेत्रःकौरव्यप्रज्वलन्निवतेजसा धर्मस्वापानमेतन्मेततस्तंविमलप्स्यसे ४१
ऐरावतसुतेनेहतवानीतेहिकुंडले माजुगुप्सांकृथाःपुत्रत्वमत्रार्थेकथंचन त्वयैतद्धिसमाचीर्णंगौतमस्याश्रमेतदा
४३ उत्तंकउवाच कथंभवंतंजानीयामुपाध्यायाश्रमंप्रति यन्मयाचीर्णपूर्वंहिश्रोतुमिच्छामितद्ध्यहं ४४ अश्व
उवाच गुरोर्गुरुंमांजानीहिज्वलनंजातवेदसं त्वयाह्यहंसदाविप्रगुरोरर्थेभिपूजितः ४५ विधिवत्सततंविप्र
शुचिनाकुरुनंदन तस्माच्छ्रेयोविधास्यामितवैवंकुरुमाचिरं ४६ इत्युक्तस्तुतथाकार्षीदुत्तंकश्चित्रभानुना घृ
तार्चिःप्रीतिमांश्चापिप्रजज्वालदिधक्षया ४७

© Dharmartha Trust J&K Digitized By eGangotri

अः १०२

धमतः धममानस्य ६० एवमितिगुरुपत्नेषु देवाश्चाप्यनुग्रहं कुर्वंतीतिभावः ६१ इत्याश्वमेधिके उत्तंकोपाख्याने ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

ततोस्यरोमकूपेभ्योध्मातस्तत्रभारत घनःप्रादुरभूद्धूमोनागलोकभयावहः ४८ तेनधूमेनमहतावर्द्धमानेनभारत नागलोके
महाराजनप्रज्ञायतकिंचन ४९ हाहाकृतमभूत्सर्वमैरावतनिवेशनं वासुकिप्रमुखानांचनागानांजनमेजय ५० नप्रका
शंतवेश्मानिधूमरुद्धानिभारत नीहारसंवृतानीववनानिगिरयस्तथा ५१ तेधूमरक्तनयनावह्नितेजोभितापिताः
आजग्मुर्निश्चयंज्ञातुंभार्गवस्यमहात्मनः ५२ श्रुत्वाचनिश्चयंतस्यमहर्षेरतितेजसः संभ्रांतनयनाःसर्वेपूजांचक्रु
र्यथाविधि ५३ सर्वेप्रांजलयोनागावृद्धबालपुरोगमाः शिरोभिःप्रणिपत्योचुःप्रसीदभगवन्निति ५४ प्रसाद्य
ब्राह्मणंतेतुपाद्यमर्घ्यंनिवेद्यच प्रायच्छन्कुंडलेदिव्येपन्नगाःपरमार्चिते ततःसंपूजितोनागैस्तत्रोत्तंकःप्रतापवान्
अग्निंप्रदक्षिणंकृत्वाजगामगुरुसद्मतत् ५६ सगत्वात्वरितोराजन्गौतमस्यनिवेशनं प्रायच्छत्कुंडलेदिव्येगुरु
पत्न्यास्तदानघ ५७ वासुकिप्रमुखानांचनागानांजनमेजय सर्वंशशंसगुरवेयथावद्द्विजसत्तमः ५८ एवंमहात्मना
तेनत्रीन्लोकान्जनमेजय परिक्रम्याहृतेदिव्येततस्तेमणिकुंडले ६० एवंप्रभावःसमुनिरुत्तंकोभरतर्षभ परेणतपसा
युक्तोयन्मांत्वंपरिपृच्छसि ६१ इत्याश्वमेधिकेउत्तंकोपाख्यानंसमाप्तं

राम: १०१

© Dharmartha Trust J&K. Digitized by eGangotri

उत्तंकस्य ३ महेउत्सवे ६ दिवाभूतः दिवसवत्प्रकाशबहुलः दिवाकरतुल्य इति पाठः ८ प्रमत्ताः क्रीडायासक्ताः नवहितोः मत्ताः अघायिता संमत्ताः हृष्टाः

जनमेजय उवाच उत्तंकस्य वरं दत्वा गोविंदो द्विजसत्तम अत ऊर्ध्वं महाबाहुः किं चकार महायशाः १ वैशंपायन उवाच दत्वा
वरमुत्तंकाय प्रायात्सात्यकिना सह द्वारकामेव गोविंदः शीघ्रवेगैर्महाहयैः २ सरांसि सरितश्चैव वनानि च गिरीस्तथा अतिक्र
म्यससादाथ रम्यां द्वारवतीं पुरीं ३ वर्तमाने महाराज महे रैवतकस्य च उपायात्पुंडरीकाक्षो युयुधानानुगस्तदा ४ अ
लंकृतस्तु स गिरिर्नानारूपैर्विचित्रितैः बभौ रत्नमयैः कोशैः संवृतः पुरुषर्षभ कांचनस्रग्भिरग्र्याभिः सुमनोभिस्तथै
व च वासोभिश्च महाशैलः कल्पवृक्षैस्तथैव च ६ दीपवृक्षैश्च सौवर्णैरभीक्ष्णमुपशोभितः गुहानिर्झरदेशेषु
दिवाभूतो बभूव ह ७ पताकाभिर्विचित्राभिः सघंटाभिः समंततः पुंभिः स्त्रीभिश्च संघुष्टः प्रगीत इव चाभवत् ८
अतीव प्रेक्षणीयोभून्मेरुर्मुनिगणैरिव मत्तानां हृष्टरूपाणां स्त्रीणां पुंसां च भारत ९ गायतां पर्वतेंद्रस्य दिव
स्पृगिव निस्वनः प्रमत्तमत्तसंमत्तक्ष्वेडितोत्कृष्टसंकुला तत्रोत्कृष्टसंकुलः (?) ...मात्सोत्करयुतो वीणावेणुमृदंगवान् सुरामैरेयमिश्रेण भ
क्ष्यभोज्येन चैव ह १२

स्वेडितोत्कृष्टेनं उत्कृष्टं च त्रासोत्पमाकर्षणोतैः संकुलः तत्र छंदेरा कुलः स्वनः १० ११ १२ ५५५ १२ ५५ १२ ५ १२

रसंकुलः पाठः १

मृ ३

शितांधकृपणादिभ्यो दीयमानेन चानिशं बभौ परमकल्याणो महस्तस्य महागिरेः १३ पुराणावसथवान्वीरपुत्राः षण्मुखश्रिनि
वेवितः विहारो हि वृष्णिवीराणां महेरैवतकस्य ह १४ स नगो वेश्मसंकीर्णो देवलोक इवाबभौ ततश्च कृष्णसान्निध्यमासाद्य भर
तर्षभ १५ शक्रसद्मप्रतीकाशो बभूव स शैलराट् ततः संपूज्यमानः स विवेश भवनं शुभं १६ गोविंदः सात्यकिश्चैव जगाम
भवनं स्वकं विवेश च प्रहृष्टात्मा चिरकालप्रवासतः १७ कृत्वा नसुकरं कर्म दानवेष्विव वासवः उपयातं तु वार्ष्णे
यं भोजवृष्ण्यंधकास्तथा १८ अभ्यगच्छन्महात्मानं देवा इव शतक्रतुं स तानभ्यर्च्य मेधावी पृष्ट्वा च कुशलं तदा अ
भ्यवादयत प्रीतः पितरं मातरं तदा १९ ताभ्यां स संपरिष्वक्तः सांत्वितश्च महाभुजः उपोपविष्टः सर्वैस्तैर्वृष्णिभिः परी
तः २० स विश्रांतो महातेजाः कृतपादावनेजनः कथयामास तत्सर्वं पृष्टः पित्रा महाहवे २१ इत्याश्वमेधिके पर्वणि
वसुदेव उवाच श्रुतवानस्मि वार्ष्णेय संग्रामं परमाद्भुतं नराणां वदतां तत्र कथ्यं वा तेषु नित्यशः १ त्वं तु प्रत्यक्षदर्शी च
तत्त्वं च महाभुजः तस्मात्प्रब्रूहि संग्रामं याथातथ्येन मेनघ २ यथा तदभवद्युद्धं पांडवानां महात्मनां भीष्मकर्णकृपद्रो
णशल्यादिभिरनुत्तमं ३

वारि

© Dhaananta Trust & K Digitized By eGangotri

अन्येषांक्षत्रियाणांचकृतास्त्राणामनेकशः नानादेशाकृतिमतांनानादेशनिवासिनां ४ वैशंपायनउवाच इत्युक्तःपुंडरीकाक्षःपित्रामातुस्स
दंतिके शशंसकुरुवीराणांसंग्रामेनिधनंयथा ५ वासुदेवउवाच अत्यद्भुतानिकर्माणिक्षत्रियाणांमहात्मनां बहुलत्वान्नसंख्यातुंश
क्यान्यब्दशतैरपि ६ प्राधान्यतस्तुगदतःसमासेनैवमेशृणु कर्माणिपृथिवीशानांयथावदमरप्रभ ७ भीष्मःसेनापतिरभूदेकाद
शचमूपतिः कौरव्यःकौरवेंद्राणांदेवानामिववासवः ८ शिखंडीपांडुपुत्राणांनेतासप्तचमूपतिः बभूवरक्षितोधीमान्श्री
मतासव्यसाचिना ९ तेषांतदभवद्युद्धंदशाहानिमहात्मनां कुरूणांपांडवानांचसुमहल्लोमहर्षणं १० ततःशिखंडीगांगे
यंयुध्यमानंमहाहवे जघानबहुभिर्बाणैः सहगांडीवधन्वना ११ अकरोत्सततःकालंशरतल्पगतोमुनिः अयनं
दक्षिणंहित्वासंप्राप्तेचोत्तरायणे १२ ततःसेनापतिरभूद्द्रोणोस्त्रविदुषांवरः प्रवीरःकौरवेंद्रस्यकाव्योदैत्यपतेरिव १३
अक्षौहिणीभिःशिष्टाभिःशिष्टाभिर्नवभिर्द्विजसत्तमः संवृतःसमरश्लाघीगुप्तःकृपवृषादिभिः १४ धृष्टद्युम्नस्त्वभून्ने
तापांडवानांमहास्त्रवित् गुप्तोभीमेनमेधावीमित्रेणवरुणोयथा १५ सचसेनापरिवृतोद्रोणप्रेप्सुर्महामनाः पितु
र्निकारान्संस्मृत्यरणेकर्माकरोन्महत् १६ तस्मिंस्तेपृथिवीपालाद्रोणपार्षतसंगरे नानादिगागतावीराःप्रायशोनि
धनंगताः १७

अः
१०३

दिनानिपंचतद्युद्धमभूत्सरमदारुणं ततोद्रोणःपरिश्रांतोधृष्टद्युम्नवशंगतः १८ ततःसेनापतिरभूत्कर्णोद्रौणिर्योधयत्तेबले अक्षौ
हिणीभिःशिष्टाभिर्दिनैःपंचभिराहवे १९ निरस्तस्तुपांडुपुत्राणांचम्वाबीभत्सुपालिताः हतप्रवीरमपिष्टावमभवुःसमवस्थिताः २०
ततःपार्थसमासाद्यपतंगइवपावकं पंचत्वमगमत्सौतिर्द्वितीयेहनिदारुणाः २१ हतेकर्णेतुकौरव्या निरुत्साहाहतौजसः
अक्षौहिणीभिस्तिसृभिर्मद्रेशंपर्यवारयन् २२ हतवाहनभूयिष्ठाःपांडवापियुधिष्ठिरं अक्षौहिण्यानिरुत्साहाः
शिष्टयापर्यवारयन् २३ अवधीन्मद्रराजानंकुरुराजोयुधिष्ठिरः तस्मिंस्तथार्धदिवसेकृत्वाकर्मसुदुःकरं २४
हतेशल्येतुशकुनिंसहदेवोमहामनाः आहर्तारंकलेस्तस्यजघानामितविक्रमः २५ निहतेशकुनौराजाधा
र्तराष्ट्रःसुदुर्मनाः अपाक्रामद्गदापाणिर्हतभूयिष्ठसैनिकः २६ तमन्वधावत्संक्रुद्धोभीमसेनःप्रतापवान्
ह्रदेद्वैपायनेचापिसलिलस्थंददर्शतं २७ हतशिष्टेनसैन्येनसमंतात्पर्यवारितं अथोपविविशुर्हृष्टा
ह्रदस्थंपंचपांडवाः २८

रामः
१०३

© (c) Dharmartha Trust J&K. Digitized By eGangotri

विगाह्यसलिलंत्वाशुवाग्वारोमर्शविसृतः अपायसगादपारोर्णियुद्धायसमुपस्थितः २९ ततःस
निहतोराजाधार्त्तराष्ट्रोमहारणे भीमसेनेनविक्रम्यपश्यतांपृथिवीक्षितां ३० ततस्तत्पांडवंसैन्यंप्र
सुप्तंशिबिरेनिशि निहतंद्रोणपुत्रेणपितुर्वधममृष्यता ३१ हतपुत्राहतबलाहतमित्राममपास
ह युयुधानसहायेनपंचशिष्टास्तुपांडवाः ३२ सहैवकृपभोजाभ्यांद्रोणिर्युद्धात्समुच्यत युयुत्सु
श्चापिकौरव्योयुक्तःपांडवसंश्रयात् ३३ निहतेकौरवेंद्रेतुसानुबंधेसुयोधने विदुरःसंजयश्चैवधर्म
राजमुपस्थितौ ३४ एवंतदभवद्युद्धमहान्यष्टादशप्रभो यत्रतेपृथिवीपालानिहताःस्वर्गमावसन् ३५
वैशंपायनउवाच श्रावतांतुमहाराजकथांतांलोमहर्षणां दुःखशोकपरिक्लेशाद्दृष्टीनामभवंस्तदा ३६ इ
त्याश्वमेधिकेपर्वणिवासुदेववाक्यं वैशंपायनउवाच कथयंनेवतुतदावासुदेवःप्रतापवान् महाभारतयुद्धं
तत्कथांतेपितुस्ततः १ अभिमन्योर्वधंवीरःसोत्यक्रामन्महामतिः सुभद्रायाःतुमुक्तांतमात्मजस्यवधंरणे ४ आचस्वक्षमे
सौभद्रवधमित्यपतद्भुवि तामप्यशंसनियतितांवसुदेवःसितोतदा ५

© Dharmartha Trust J&K. Digitized by eGangotri

सा१

अ० १०४ दृष्ट्वैव च पपातोर्व्यां सोपि दुःखेन मूर्छितः ततः स रौहित्रवधदुःखशोकसमाहतः ६ वसुदेवो महाराज कृष्णं वाक्यमथाब्रवीत् न
नु त्वं पुंडरीकाक्ष सत्यवाग्भुवि विश्रुतः ७ यद्रौहित्रवधं मे घ न ख्यापयसि शत्रुहन् तत्सीनपनिधनं तत्त्वेनाचक्ष्व मे प्रभो ८ सद्
शास्त्रस्तव कथं शत्रुभिर्निहतो रणे दुर्मते वृष्णिवीराणामल्पकाले प्राप्तेन भिः सह ९ यत्र मे हृदयं दुःखाच्छतधा न विदीर्यते किमब्रवीत्त्वां
संग्रामे सुभद्रामातरं प्रति १० मां चापि पुंडरीकाक्ष चपलाक्षः प्रियो मम आहवं प्यघतः कृत्वा कच्चिन्न निहतः परैः ११ क
च्चिन्मुखं न गोविंद तेनाजौ विकृतं कृतं स हि कृष्ण महातेजाः श्लाघन्निव ममाग्रजः १२ बालभावेन विनयमात्मनोकथयत्प
प्रभुः कच्चिन्न निकृतो बालो द्रोणकर्णकृपादिभिः १३ धरण्यां निहतः शेते तन्ममाचक्ष्व केशव स हि द्रोणं च भीष्मं च कर्णं
च बलिनां वरं १४ स्पर्द्धते समरे नित्यं दुहितुः पुत्रको मम एवंविधं बहु तदा विलपंतं सुदुःखितं १५ पितरं दुःखिततर
रो गोविंदो वाक्यमब्रवीत् न तेन विकृतं वक्त्रं कृतं संग्राममूर्धनि १६ न पृष्ठतः कृतश्चापि संग्रामस्तेन दुस्तरः निहत्य पृथि
वीपालान्सहस्रशतसंघशः १७ खेदितो द्रोणकर्णाभ्यां दौःशासनिवशं गतः एको ह्येकेन सततं युध्यमानो यदि स२
प्रभो न स शक्योत संग्रामे निहंतुमपि वज्रिणा समाहूते च संग्रामात् पार्थे संसप्तकैस्तदा १९ पर्यवारित संक्रुद्धैर्द्रो
णादिभिराहवे ततः शत्रुवधं कृत्वा सुमहांतं रणे पितः २० रौहित्रस्तव वार्ष्णेय दौःशासनिवशं गतः न नूनं च स गतः
संत्यजेहि शोकं महामते न हि व्यसनमाधत्ते सीदंति कृतबुद्धयः द्रोणकर्णप्रभृतयो येन प्र राम: १०४

सा८

© Dharmartha Trust J&K Digitized By eGangotri

तिसम्मासिताः २२ रणेमहेंद्रप्रतिमास्सकथंगामुपाहृिवे सशोकंजहिदुर्धर्षमावममुवर्शगामः २३ शास्त्रयज्ञोहिमगतिंगतः
परपुरंजयःतस्मिंस्मानिहतेवीरेसुभद्रेयंस्वस्राामम २४ दुःखार्त्तांयोसुतंप्राप्यकुरीवननादह द्रौपदीचसमासाघप
येयच्छतिदुःखिता २५ आर्येक्षदारकाःसर्वेद्रष्टुमिच्छामितानहं अस्मास्तुवचनंश्रुत्वासर्वास्ताःकुरुयोषितः २६ भु
जाभ्यांपरिगृह्यैनांचुक्रुशुःपरमार्त्तवत् उत्तरांचाब्रवीभद्रेभर्त्तासक्कनुतेगतः क्षिप्रमागमनंमह्यंतस्यत्वंवेदय
स्वह २८ ननुनामास्यवैराटिश्रुत्वाममगिरंसदा भवनान्निःपतत्याशुकस्मान्नाभ्येतितेपतिः २९ अभिम
न्योकुशलिनोमातुलास्तेमहारथाः कुशलंचाब्रुवन्सर्वेत्वांयुयुत्सुमिहागतं ३० आचक्ष्वमेयसेग्रामंयु
थायद्वमरिंदम कस्मादेवंविलपतींनाद्यहमतिमावसे ३१ एवमादिंतुवार्ष्णेयंतस्यास्तत्परिदेवितं
श्रुत्वापृथासुदुःखार्त्ताशनैर्वाक्यमथाब्रवीत् ३२ सुभद्रेवासुदेवेनतथासात्यकिनारणे पित्राच
लालितोबालः सहतःकालधर्मणा ३३

© Dharmartha Trust J&K. Digitized by eGangotri

४२ अध्यायः एतच्छ्रुत्वातुपुत्रस्यपतिचाध्यायत्रयंस्वर्गार्थं १ २ ३ ४ ॥ ॥ ॥

ईदृशोमत्पेधर्मोयंमाम्नुचोयदुतंदिनि पुत्रोहितवदुर्दर्षः संग्रामःपरमांगतिं ३४ कुलेमहतिजाता नासीत्क्षत्रियाणांमहात्म
नांमाम्नुचस्वपत्नाहितवप न्न्ययत्रनिमेदरो ३५ उत्तरांतमवेक्षस्वगुर्विणीमाम्नुचःशुभे पुत्रमेवाहितस्या नुजनयिष्य
तिभाविनि ३६ एवमाश्वास्यपितुवैनांकुंतीयदुकुलोद्वह विहायशोकंदुर्दर्षश्राद्धमस्यह्यकल्पयत् ३७ समनुज्ञाप्य
धर्मज्ञाराजानंभीममेवच यमौयमोपमौचैवददौरत्नान्यनेकशः ३८ ततःप्रदायवहूर्गाश्रोब्राह्मणायपदूद्वह समाहृ
ष्यतुवार्ष्णेयीवै राटीमब्रवीदिद ३९ वैराटिनेहसंतापस्त्वयाकार्योह्यनिंदिते भर्तारंप्रतिसुश्रोणिगर्भस्थंरक्षवै
शिशुं ४० एवमुक्त्वाततःकुंतीविरराममहाद्युते तामनुज्ञाप्यचैवेमांसुभद्रांसमुपानयं ४१ एवंसनिधनंप्रा
प्तोदौहित्रस्तवमानद संतापंत्यजदुर्दर्षमाचशोकेमनःकृथाः ४२ इत्याश्वमेधिकेपर्वणि वैशंपायनउवाचः
एतच्छ्रुत्वातुपुत्रस्यवचःशूरात्मजस्त दा विहायशोकंधर्मात्मादद्दौश्राद्धमनुत्तमं १ तथैववासुदेवस्यस्वस्त्रीयप
स्यमहात्मनः दयितस्यपितुर्नित्यमकरोदौर्ध्वदैहिकं २ षष्टिंशतसहस्राणिब्राह्मणानांमहौजसां विधिवद्भोजया
मासभोज्यंसर्वगुणान्वितं ३ आच्छाद्यचमहावाहुर्धनतृष्णामपानुदत् ब्राह्मणानां

© Dharmartha Trust J&K. Digitized By eGangotri

सुवर्णांचैव गाश्चैवशयनाच्छादनानिच दीप्यमानंतदाविप्रावर्द्धतामितिचाब्रुवन् ५ वासुदेवोथदाशार्हो बलदेवः
ससात्यकिः अभिमन्योस्तदाश्राद्धमकुर्वन्सत्क्रियांसदा ६ अतीवदुःखसंतप्तानशर्मचोपलेभिरे तथैवपांडवावी
रानगरेनागसाह्वये ७ नोपागच्छंतवैशांतिमभिमन्युविनाकृताः सुबहूनिचराजेंद्रदिवसानिविराटजा ८ ना
भुंक्तपतिदुःखार्त्तातदभूत्करुणंमहत् कुक्षिस्थएववतस्यायगर्भोवैसंप्रलीयत ९ आजगामततोव्यासोज्ञात्वा
दिव्येनचक्षुषा समागम्याब्रवीद्धीमान्पृथांपृथुललोचनां १० उत्तरांचमहातेजाःशोकःसंत्यज्यतामयं
भविष्यतिमहातेजाःपुत्रस्तवयशस्विनि ११ प्रभावाद्वासुदेवस्यममव्याहरणादपि पांडवानामयंचांते
पालयिष्यतिमेदिनीं १२ धनंजयंचसंप्रेक्ष्यधर्मराजस्यशृण्वतः व्यासोवाक्यमुवाचेदंहर्षयन्निवभारत १३
पौत्रस्तवमहाभागोजनिष्यतिमहामनाः पृथ्वींसागरपर्यंतांपालयिष्यतिधर्मतः १४ तस्माच्छोकंकुरुश्रेष्ठ
जहितंमरिकर्शन विचार्यमत्रनहितेसत्यमेतद्भविष्यति १५ यच्चापिवृष्णिवीरेणकृष्णेनकुरुनंदनः पुरोक्तं
तत्तथाभाविमातेत्रास्तुविचारणा १६ विबुधानांगतोलोकानक्षयानात्मनिर्जितान् नसशोच्यस्त्वया
वीरेनचान्यैःकुरुभिस्तथा १७

२१ अध्यायः ॥ संगिकीं कथां समाप्य परमप्रहृतमश्वमेधमनुवर्त्तपतिजनमेजयप्रश्नमुखेनमुक्त्वेत ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

एवं पितामहेनोक्तो धर्मात्मा स धनंजयः तत्काशोकं महाराज हृष्टरूपोभवन्नृप १८ पितापितवधर्मज्ञ गार्भेतास्मिन्महामते अ
वर्द्धतयथाकामं मुल्लूपक्षेयथाशशी १९ ततः संचोदयामास व्यासो धर्मात्मजं नृपं अश्वमेधं प्रतितदा ततः सोंतर्हितोभवत्
२० धर्मराजोपि मेधावी श्रुत्वा व्यासस्य तद्वचः वित्तस्यानयने तात चकार मनसा मतिं २१ इत्याश्वमेधिके पर्वणि जनमेज
यउवाच श्रुत्वैतद्वचनं ब्रह्मन् व्यासेनोक्तं महात्मना अश्वमेधं प्रति तदा किं भूयः प्रचकार ह १ रत्नं च यन्मरुत्तेन निहि
तं वसुधातले तदवाप कथं चेति तन्मे ब्रूहि द्विजोत्तम २ वैशंपायन उवाच श्रुत्वा द्वैपायनवचो धर्मराजो युधिष्ठिरः
भ्रातॄन्सर्वान्समानाय्य काले वचनमब्रवीत् ३ अर्जुनं भीमसेनं च माद्रीपुत्रौ यमावपि श्रुतं वो वचनं वीराः सौहृदा
घन्महात्मना ४ कुरूणां हितकामेन प्रोक्तं कृष्णेन धीमता तपोवृद्धेन महता सुहृदां भूतिमिच्छता ५ गुरुणा ध
र्मशीलेन व्यासेनाद्भुतकर्मणा भीष्मेण च महाप्राज्ञ गोविंदेन च धीमता ६ संस्मरन्तदहं सम्यक् कर्तुमिच्छामि पाण्डवाः आ
पत्यां च तदात्वे च सर्वेषां तद्धि नो हितं ७ अनुबंधे च कल्याणं यद्वचो ब्रह्मवादिनः इयं हि वसुधा सर्वा क्षीणरत्ना कुरूद्व
हाः ८ तच्चाचष्ट तदा व्यासो मरुत्तस्य धनं नृपाः यद्येतद्वो बहुमतं मन्यध्वं वा क्षमं यदि ९

© Dharmartha Trust J&K. Digitized By eGangotri

अविहितं त्वविहितः पुत्रास्त्वविहितो महात्मनः तस्येनदमाविहितं १७ कथं न हत्वा गोहिंसापापुनः पश्यपेव अद्य निवारं कृष्णे विवादं त्वं नारकेऽस्मन्निमिद्धिपाने प्रार्थ्यः

कृ६१

तथायथाहं धर्मेणाकथं वा भीममन्यसे इत्युक्तवाक्येन प्रतीतं दां कुलोद्वह १० भीमसेनो नृपश्रेष्ठं प्राञ्ज
लिर्वाक्यमब्रवीत् रोचते मे महाबाहो यदिदं भाषितं त्वया ११ आमात्यो तस्य वित्तस्य समुपानयनं प्रति
परितत प्राप्नुयामेह धनमाविहितं त्वया १२ कृतमेव महाराज भवेदिति मतिर्मम तेवपं प्राणिपातेन
१ गिरीशस्य महात्मनः १३ तदानयाम भद्रं ते समभ्यर्च्य कपर्दिनं तद्धितं देववरेवेशं तस्य वानुचरांस्तथान
१४ प्रासादर्थमवाप्स्यामो नूनं वाक्बुद्धिकर्मभिः रक्षंते येच तत्तद्द्रव्यं किंनरा रौद्रदर्शनाः १५ तेच व
ग्रपाम विष्यन्ति प्रसन्ने वृषभध्वजे श्रुत्वैवं वदतस्तस्य वाक्यं भीमस्य भारत १६ प्रीतो धर्मात्मजो राजाव
भवानीव भावति अर्जुनप्रमुखाश्चापि तथेत्येवाब्रुवन्वचः १७ कृत्वा तु पाण्डवाः सर्वे रत्नाहरणनिश्चयं
सेनामाज्ञापयामासुर्नक्षत्रे हनि च ध्रुवे १८ ततो ययुः पाण्डुसुता ब्राह्मणान्स्वस्ति वाच्य च अर्चयित्वा
महेश्वरं पूर्वमेव महेश्वरं १९ मोदकैः पायसेनाथ मांसापूपैस्तथैव च आशास्य च महात्मानं प्रययु
र्मुदिता भृशं २० तेषां प्रयास्यतां तत्र मंगलानि शुभान्यथ प्राहुः प्रहृष्टमनसो द्विजाग्र्या नागरास्तथाते
२१ ततः प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च ब्राह्मणानग्निसहितान्प्रययुः पाण्डुनन्दनाः २२

© (c) Dharmartha Trust J&K. Digitized By eGangotri

रा०
१०७

मलेवंशमस्याघे कुंतीधृतराष्ट्रसमीपेदृत्सर्गः २४ अध्यायः ततस्ते ७ आग्निवेश्यंधौम्यं ८

ममनुज्ञाप्यराजानंपुत्रशोकसमाहृत धृतराष्ट्रंसभार्यंवैपृथांचपृथुलोचनां २३ मलेनिर्हितप्यकौरव्य
पुपुत्त्रंधृतराष्ट्रजं सपुत्रमानापौरैश्चब्राह्मणैश्चमनीषिभिः २४ इत्याश्रमेधिकेपर्वणि वैशंपाय
नउवाच ततस्तेप्रययुर्हृष्टाः प्रहृष्टनरवाहनाः रथघोषेणमहतापूरयन्तोवसुंधरां १ संस्तूयमा
नास्तुतिभिः सूतमागधवंदिभिः स्वेनसैन्येनसंवीतायथादित्याःस्वरश्मिभिः २ पांडुरेणातपत्रे
णाध्रियमाणेनमूर्द्धनि बभौयुधिष्ठिरस्तत्रपौर्णमास्यामिवोडुराट् ३ जयाशिषःप्रहृष्टानांनराणां
पथिपांडवः प्रत्यगृह्णाद्यथान्यायंयथावत्पुरुषर्षभः ४ तथैवसैनिकाराजनराजानमनुयांतिये
तेषांहलहलाशब्दोदिवंस्तब्ध्वान्यतिष्ठत ५ सरांसिसरितश्चैववनान्युपवनानिच अत्यक्रामन्महा
राजोगिरींश्चाप्यनुपद्यत ६ तस्मिन्देशेचराजेन्द्रपवित्रतरद्रुमसुत्तमं चक्रेनिवेशनंराजापांडवःसहसै
निकैः ७ शिवेदेशेसमेचैवनदीमारुतसत्तम अग्रतोब्राह्मणाननकृत्वातपोविद्यादमान्वितान् ८
पुरोहितंचकौरव्यवेदवेदांगपारगं आग्निवेश्यंचराजानोब्राह्मणाः सपुरोधसः ९ कृत्वाशांतिं
पर्याप्ययंसर्वशः पर्यवारयन् कृत्वातमध्येराजानममात्यांश्चयथाविधि १० ॥

रा०
१०७

© (Dharmartha Trust J&K. Digitized By eGangotri

षट्पदानिपट्टनीयानिराजमार्गाः षट् एकोदक्षिणोत्तरः तस्यामध्यतोद्वौ तादृशावेव एवंपूर्वपश्चिमेणैकः तस्यामध्यतोपिद्वावेवेतिषट्राजमार्गाः संख्या

षट्पदंनवसंख्यानंनिवेशंचक्रिरेद्विजाः मन्त्राणांवारणोद्वाराणांनिवेशंचयथाविधि १० कारयित्वातु
गेहंब्राह्मणास्तानिदमब्रुवीत् अस्मिन्कार्येद्विजश्रेष्ठानक्षत्रेशिवमेशुभे ११ यथाभवंतोमन्यन्तेकर्तुम
र्हन्तितन्मया ततःकालासयोवेशूणादिहैवपारिलब्धतो १२ इतिनिश्चित्यविप्रेन्द्राःक्रियतांपद्यन्तां
कृत्वैतद्ब्रुवनंराज्ञोब्राह्मणाःसपुरोधसः इदंसर्वंवचोत्तश्चाधर्मराजप्रियेप्सवः १३ आयेचनक्षत्रम
हस्त्रपुण्यमनामहेश्रेष्ठतमकियासु अंभोभिर्घेहवसामराजन्तद्रयोप्यनोचापिमवाप्सिय १४
कृत्वातुतेषांद्विजसत्तमानांकृतोपवासाराजतोनरेन्द्राः ऊषुःप्रतीताःकुशसंस्तरेषुयथाध्वरेषु
ऋता४ ज्वलितोंऽग्नयः १५ ततोनिशासाव्यगमन्महात्मनांसंस्तूयतांविप्रसमीरितागिरः ततःप्रभातेवि
पलेद्विजर्षभावचोब्रुवन्धर्मसतंनराधिपं १६ इत्याश्वमेधिकेपर्वणि ब्राह्मणाऊचुः क्रियता
मुपहारोस्यत्र्यंबकस्यमहात्मनः श्लोपहारंन्यथैततः स्वार्थंयतामहे १ कृत्वातुवचनंतेषांब्रा
ह्मणानांयुधिष्ठिरः गिरिशस्ययथान्यायमुपहारमुपाहरत् २ आज्येनतर्पयित्वाग्निंविधिवत्सं
स्कृतेनच मंत्रसिद्धंचरुंकृत्वापुरोधाः सययौतदा ३

नानिसंख्यानांनिवासस्थानानिनवखंडानीतियावत् पद्येष्टंनवसंख्यानेइतिप्राचीनपाठः स्पष्टार्थः १६ अध्यायःक्रियतां १ २ ३ ॥ ४ ५

स्व० १०२

आसाद्यचमहातेजामेघसंधिर्धनंजयं बालभावान्महाराजप्रोवाचेदंनकौशलात ५ किमयंचार्यतेवाजीस्त्रीमध्यद
वभारत हयमेनंहरिष्यामिप्रयतस्वविमोक्षणे ६ अदत्तानुनयोयुद्धेयदित्वंपितृभिर्मम करिष्यामितवातिथ्यंप्र
हरप्रहरामिच ७ इत्युक्तःप्रत्युवाचेनंप्रहसन्निवपांडवः विघ्नकर्त्तामयावार्यइतिमेव्रतमाहितं ८ भ्रात्राज्येष्ठेननृप
तेनवापिविदितंभवेत् प्रहरस्वयथाशक्तिनमन्युर्विद्यतेमम ९ इत्युक्तःप्राहरत्पूर्वंपांडवंमगधेश्वरः किरनशरस
हस्राणिवर्षाणीवसहस्रदृक १० ततोगांडीवभृच्छूरोगांडीवप्रहितैःशरैः चकारमोघांस्तान्वाणानसयत्नान्भ
रतर्षभ ११ समोघंतस्यवाणौघंकृत्वावानरकेतनः शरानमुंचोज्ज्वलितानदीप्तास्यानिवपंनगान १२

एम·
१२८

© Dharmartha Trust J&K. Digitized by eGangotri

१९ गृध्रवाजितैः गृध्रपक्षयुतैः २० २१ २२ २३ २४ २५

ध्वजे पताकादंडेषु रथयंत्रे हयेषु च अन्येषु चाथांगेषु न शरीरे न सारथौ १३ संरक्ष्यमाणः पार्थेन शरीरे सव्यसाचिना म
न्यमानः स्ववीर्यं तन्मागधः प्राहिणोच्छरान् १४ ततो गांडीवधन्वा तु मागधेन भृशाहतः वभौ वसंतसमये पलाशः पुष्पितो
यथा १५ अवध्यमानः सोऽभ्यघ्नन्मागधः पांडवर्षभं तेन तस्थौ स कौरव्य लोकवीरस्य दर्शने १६ सव्यसाची तु संक्रुद्धो विकृ
ष्य वलवद्धनुः हयांश्चकार निर्जीवान् सारथेश्च शिरोहरत् १७ धनुश्चास्य महच्चित्रं क्षुरेण प्रचकर्त ह हस्तावापं पताकां च ध्व
जं चास्य न्यपातयत् १८ स राजा व्यथितो व्यश्वो विधनुर्हतसारथिः गदामादाय कौंतेयमभिदुद्राव वेगवान् १९ तस्यापत
त एवाशु गदां हेमपरिष्कृतां शरैश्चकर्त वहुधा वहुभिर्गृध्रवाजितैः २० सा गदा शकलीभूता विशीर्णमणिवंधना व्या
ली विमुच्यमानेव पपात धरणीतले २१ विरथं विधनुष्कं च गदया परिवर्जितं सांत्वपूर्वमिदं वाक्यमब्रवीत् कपिकेत
नः २२ पर्याप्तः क्षत्रधर्मोयं दर्शितः पुत्र गम्यतां वह्वेतत्समरे कर्म तव वालस्य पार्थिव २३ युधिष्ठिरस्य संदेशो न हंत
व्या नृपा इति तेन जीवसि राजंस्त्वमपराधोपि मे रणे २४ इति मत्वा तदात्मानं प्रत्यादिष्टं स मागधः तथ्यमित्यभिग
म्यैनं प्रांजलिः प्रत्यपूजयत् २५

पराजितोस्मिभद्रंतेनाहंयोद्धुमिहोत्सहे यद्यत्कृत्यंमयातेद्यतत्त्वंब्रूहिकृतमेवतत् २६ तमर्जुनःसमाश्वास्यपुनरेवेदमब्रवीत्
आगंतव्यंपराचैत्रीमश्वमेधेनृपस्यनः २७ इत्युक्तःसतथेत्युक्त्वापूजयामासतंहयं फाल्गुनंचयुधिश्रेष्ठंविधिवत्सहदे
वजः २८ ततोयथेष्टमगमत्पुनरेवसकेसरी ततःसमुद्रतीरेणवंगान्पुंड्रान्सकोशलान् २९ तत्रतत्रचभूरीणि
म्लेच्छसैन्यान्यनेकशः विजिग्येधनुषाराजन्गांडीवेनधनंजयः ३० इत्याश्वमेधिकेपर्वणिअश्वानुसारे वैशंपायनउ
वाच मागधेनार्चितोराजन्पांडवःश्वेतवाहनः दक्षिणांदिशिमास्थायचारयामासतंहयं १ ततःसपुनरावर्त्यहयःका
मचारोबली आससादपुरीरम्यांचेदीनांशुक्तिसाह्वयां २ शरभेणार्चितस्तत्रशिशुपालसुतेनसः युद्धपूर्वेणमानेनपूज
याचमहाबलः ३ ततोर्चितोययौयोधोराजंस्तुरगसत्तमः काशीनंगान्कोशलांश्चकिरातानथतंगणान् ४
पूजांतत्रयथान्यायंप्रतिगृह्यधनंजयः पुनरावृत्यकौंतेयोदशार्णानगमत्तदा ५ तत्रचित्रांगदोनामबलवानरिमर्द
नः तेनयुद्धमभूत्तस्यविजयस्यातिभैरवं ६ तंचापिवशमानीयकिरीटीपुरुषर्षभः निषादराज्ञोविषयमेकल
व्यसुतंजग्मिवान् ७ सकलव्यसुतश्चैनंयुद्धेनजगृहेतदा ततश्चक्रेनिषादैःससंग्रामंलोमहर्षणम् ८ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

ततस्तमपि कौन्तेयः समरेषु पराजितः जिगाय युद्दुर्धर्षो पितनिषार्थमानतं ९ सतं जित्वा महाराजे नैषादिं पाकशासनिः
अर्चितः प्रययौ भूयो दक्षिणं सलिलार्णवं १० तत्रापि द्रविडैरान्ध्रै रौद्रैर्माहिषकैरपि तथा कोल्लगिरेयैश्च युद्धमासीत्किरी
टिनः ११ तांश्चापि विजयो जित्वा नातितीव्रेण कर्मणा तुरंगमवशेनाथ सुराष्ट्रानभितो ययौ १२ गोकर्णमथ चासा
द्य प्रभासमपि जग्मिवान् ततो द्वारवतीं रम्यां वृष्णिवीराभिपालितां १३ आससाद हयः श्रीमान् कुरुराजस्य यज्ञियः
तमुन्मथ्य हयश्रेष्ठं यादवानां कुमारकाः १४ प्रययुस्तांस्तदा राजन्नुग्रसेनो न्यवारयत् ततः पुराद्विनिष्क्रम्य वृष्ण्यन्धकपति
स्तदा १५ सहितो वसुदेवेन मातुलेन किरीटिनः तौ समेत्य कुरुश्रेष्ठं विधिवत्प्रीतिपूर्वकं १६ परया भरतश्रेष्ठं पूजयास
मवस्थितौ ततस्ताभ्यामनुज्ञातो ययौ येन हयो गतः १७ ततः स पश्चिमं देशं समुद्रस्य तदा हयः क्रमेण व्यचरत्स्फीतं ततः
३ पंचनदं ययौ १८ तस्मादपि स कौरव्य गान्धारविषयं हयः विचचार यथाकामं कौन्तेयानुगतस्तदा १९ ततो गान्धाररा
जेन युद्धमासीत्किरीटिनः घोरं शकुनिपुत्रेण पूर्ववैरानुसारिणा २० इत्याश्वमेधिके पर्वणि वैशंपायन उवाच
शकुनेस्तनयो वीरो गान्धाराणां महारथः प्रत्युद्ययौ गुडाकेशं सैन्येन महता वृतः १ ॥

© Dharmartha Trust J&K. Digitized By eGangotri

हस्यम्वरथयुक्तेनपताकाध्वजमालिना अमृष्यमाणास्तेयोधान्नपस्यशकुनेर्वधं २ अभ्ययुःसहिताःपार्थंप्रगृहीतशरासना
स्तानुवाचधर्मात्माबीभत्सुरपराजितः ३ युधिष्ठिरस्यवचनंनचतेजगृहुर्हितं वार्यमाणाअपिपार्थेनसांत्वपूर्वममर्षिताः ४ पी
वार्यहयंजग्मुस्ततश्चुक्रोधपांडवः ततःशिरांसिदीप्ताग्रैस्तेषांचिच्छेदपांडवः ५ क्षुरैर्गांडीवनिर्मुक्तैर्नातियत्नादिवार्जुनः ते
वध्यमानाःपार्थेनहयमुत्सृज्यसंभ्रमात ६ न्यवर्तंतमहाराजशरवर्षार्दिताभृशं निरुध्यमानस्तेजस्वापिगांधारैःपांडुनंद
नः ७ आदिश्यादिश्यतेजस्वीशिरांस्येषांन्यपातयत वध्यमानेषुतेष्वाजौगांधारेषुसमंततः ८ सराजाशकुनेःपुत्रः
पांडवंप्रत्यवारयत तंयुध्यमानंराजानंक्षत्रधर्मेव्यवस्थितं ९ पार्थोऽब्रवीन्नमेवध्याराजानोराजशासनात अलंयुद्धेनतेवी
रनतेस्त्वद्यपराजयः १० इत्युक्तस्तदनादृत्यवाक्यमज्ञानमोहितः सशक्रसमकर्माणंसमवाकिरदाशुगैः ११ तस्यपार्थः
शिरस्त्राणमर्द्धचंद्रेणपत्रिणा अपाहरदसंभ्रांतोजयद्रथशिरोयथा १२ तंदृष्ट्वाविस्मयंजग्मुर्गांधाराःसर्वएवते इच्छताते
ननहतोराजेत्यपिचतेविदुः १३ गांधारराजपुत्रस्तुपलायनकृतक्षणः वभौतैरेवसहितस्त्रस्तैःक्षुद्रमृगैरिव १४

© (c) Dharmartha Trust J&K. Digitized By eGangotri

२४ अध्याय: इत्युक्त्वा १ २ ३ वि ४

तेषांततःसपार्थस्तत्रैवपरिधावतां प्रजहारोत्तमांगानिभल्लैःसन्नतपर्वभिः १५ उच्छ्रितांस्तुभुजानकेचिन्नावबुध्यंतशो
हृतान शरैर्गांडीवनिर्मुक्तैःपृथुभिःपार्थचोदितैः १६ संभ्रांतनरनागाश्वमपतद्विद्रुतंबलं हतविध्वस्तभूयिष्ठमावर्त
तमुहुर्मुहुः १७ नाभ्यदृश्यंतवीरस्यकेचिदग्र्येग्र्यकर्मणः रिपवःपात्यमानावैयेसहेयुर्धनंजय १८ ततोगांधारराज
स्यमंत्रिवृद्धपुरःसरा जननीनिर्ययौभीतापुरस्कृत्यार्घमुत्तमं सान्यवारयदव्यग्रातंपुत्रंयुद्धदुर्मदं प्रसादयामासचतंजिष्णु
मक्लिष्टकारिणं १९ तांपूजयित्वाबीभत्सुःप्रसादमकरोत्प्रभुः शकुनेश्चापितनयंसांत्वयन्निदमब्रवीत २१ नमे
प्रियंमहाबाहोयत्तेबुद्धिरियंकृता प्रतियोद्धुममित्रघ्नभ्रातैवत्वंममानघ २२ गांधारींमातरंस्मृत्वाधृतराष्ट्रकृतेनच
तेनजीवसिराजंस्त्वंनिहतास्त्वनुगास्तव २३ मैवंभूःशाम्यतांवैरंमातेभूद्बुद्धिरीदृशी गच्छेथास्त्वंपरांचैत्रीमश्वमेधे
नृपस्यन २४ इत्याश्वमेधिकेपर्वणि वैशंपायनउवाच इत्युक्त्वानुपयौपार्थोहयंकामविहारिणं न्यवर्ततत
तोवाजीयेननागाह्वयंपुरं १ तंनिवृत्तंतुशुश्रावचारेणैवयुधिष्ठिरः श्रुत्वार्जुनंकुशलिनंसचहृष्टमनाभवत २
विजयस्यचतत्कर्मगांधारविषयेतदा श्रुत्वाचान्येषुदेशेषुससुप्रीतोभवत्तदा ३ ॥ ॥

© (C) Dharmartha Trust J&K. Digitized By eGangotri

दृष्ट्वा नक्षत्रपुष्यं ८ प्रस्थाप्य तं प्रस्थापयं तत्रार्थे तानि च प्रतिविंशल्लिखिष्यथः ९ १० ११ १२ १३ १४ १५ १६

एतस्मिन्नेव काले तु ह्यादृशी माघ यात्रिकी दृष्ट्वा गृहीत्वा नक्षत्रं धर्मराजो युधिष्ठिरः ४ समानीय महातेजास्सर्वान्भ्रातॄन्म
हीपतिः भीमं च नकुलं चैव सहदेवं च कौरव ५ प्रोवाचेदं वचः काले तत्र धर्मभृतां वरः आमंत्र्य वदतां श्रेष्ठो भीमं प्रहरतां
वरं ६ आयाति भीमसेनासौ सहाश्वेन तवानुजः यथा मे पुरुषाः प्राहुर्ये धनंजयसारिणः ७ उपस्थितश्च कालोय
मभितो वर्तते ह्ययः माघी च पौर्णमासीयं मासः शेषो वृकोदरः ८ तत्प्रस्थाप्यंतु विद्वांसो ब्राह्मणा वेदपारगाः वाजि
मेधार्थसिद्ध्यर्थं देशं पश्यंतु यज्ञियं ९ इत्युक्तः स तु तच्चक्रे भीमो नृपतिशासनं हृष्टः श्रुत्वा गुडाकेशमायांतं पुरुषर्षभं
१० ततो ययौ भीमसेनः प्राज्ञैः स्थपतिभिः सह ब्राह्मणानग्रतः कृत्वा कुशलान्यज्ञकर्मणि ११ तं सशालचयं श्रीम
त्संप्रतोलीसुघट्टितं मापयामास कौरव्यो यज्ञवाटं यथाविधि १२ प्रासादशतसंबाधं मणिप्रवरकुट्टिमं कारया
मास विविधं हेमरत्नविभूषितं १३ स्तंभान्कनकचित्रांश्च तोरणानि बृहंति च यज्ञायतनदेशेषु दत्वा शुद्धं च कांचनं
१४ अंतःपुराणि राज्ञां च नानादेशसमीयुषां कारयामास धर्मात्मा तत्र तत्र यथाविधि १५ ब्राह्मणानां च वेश्मा
नि नानादेशसमीयुषां कारयामास कौंतेयो विविधान्यप्यनेकशः १६

© (c) Dharmartha Trust J&K. Digitized By eGangotri

तथा संप्रेषयामास दूतान्नृपतिशासनात् भीमसेनो महाबाहो ग्राह्मत्रितष्टकर्मणां १७ ते प्रियार्थं कुरुपतेर्येयपुर्नृपस
त्तमाः ह्नात्मनेकान्याहाय विषिपोष्वानायुधानि च १८ तेषां निविशतां तेषु शिबिरेषु महात्मनां नर्दतः सागरस्येव शब्दस्य
गमवत्स्वनः १९ तेषामभ्यागतानां च स राजा कुरुवर्द्धनः व्यादिदेशान्नपानानि शय्यास्त्वाप्यतिमानुषाः २० वाहनानां च वि
विधाः शालाः शालीक्षुगोरसैः उपेता भरतश्रेष्ठो व्यादिदेश स धर्मराट् २१ तथा तस्मिन् महायज्ञे धर्मराजस्य धीमतः
समाजग्मुर्मुनिगणा बहवो ब्रह्मवादिनः २२ ये च द्विजातिप्रवरास्तत्रासन् पृथिवीपते समाजग्मुः सशिष्यांस्तान् प्रतिजग्रा
ह कौरवः २३ सर्वांश्चतानन्वयपौ यावदावसथानपति स्वयमेव महातेजा दंभं त्यक्त्वा युधिष्ठिरः २४ ततः कृत्वा स्थप
तयः शिल्पिनोऽन्ये च ये तदा कृत्स्नं यज्ञविधिं राजन् धर्मराज्ञोन्यवेदयन् २५ तच्छ्रुत्वा धर्मराजस्तु कृतं सर्वमतन्द्रितः हृष्टरूपो
जा 3 ऽभवद्राजा सह भ्रातृभिरव्ययः २६ दृष्ट्वा तस्मिन् नृपते यज्ञे प्रविविधमुत्तमं देवेन्द्रस्येव विहितं भीमसेनेन भारत २७ ददृशुस्तो
रणान्यत्र शातकुम्भमयानि ते शय्यासनविहारांश्च सुबहून् जनसञ्चयान् २८ घटान् पात्रीः कटाहानि कलशान् वर्द्धमान
कान् न हि किंचिदसौवर्णमपश्यन् वसुधाधिपाः ३० यूपांश्च शास्त्रपठितान् दारवान् हेमभूषितान् उपक्लृप्तान् यथाका

स्थलजाजलजायेचपशवःकेचनप्रभो सर्वानेवसमानेतानपश्यंस्तत्रतेनृपाः ३२ गाश्चैवमहिषीश्चैवतथावृद्धस्त्रियोऽपि
च औरभ्रकाणिचसत्त्वानिग्राम्यारण्यानियानिच ३३ जरायुजाण्डजातानिस्वेदजान्युद्भिज्जानिच पर्वतानूपजातानिभूतानि
ददृशुस्तत्रते ३४ एवंप्रमुदितेसर्वेपशुगोधनधान्यतः यज्ञवाटंनृपादृष्ट्वापरंविस्मयमागताः ३५ ब्राह्मणानांविशांचैवच
शूद्राणांचमहीपते पूर्णोत्सवसहस्रेषुविप्राणांतत्रभुंजतां ३६ दुंदुभिर्मेघनिर्घोषोमृदुमंद्रस्तदाऽभवत् विननादासकृच्चापि
दिवसेदिवसेगते ३७ एवंसयज्ञेपतौधर्मराजस्यधीमतः अ[illegible]स्यबहून्राजन्नुत्सर्गान्पर्वतोपमान् ३८ दधिकु
ल्याश्चददृशुःसर्पिषश्चह्रदान्जनाः जंबूद्वीपोहिसकलोनानाजनपदायुतः ३९ राजन्नदृश्यतैकस्थोराजंस्तस्मिन्महामखे
तत्रजातीःसहस्राणिपुरुषाणांततस्ततः ४० गृहीत्वाभाजनान्जग्मुर्बहूनिभरतर्षभ स्रग्विणश्चापितेसर्वेसुमृष्टमणिकुं
डलाः ४१ पर्यवेषन्द्विजातींस्तान्शतशोऽथसहस्रशः विविधान्यन्नपानानिपुरुषायेऽनुयायिनः तेवैनृपोपभोज्यानि
ब्राह्मणानांददुश्चह ४२ इत्याश्वमेधिकेपर्वण्यध्यायः

© (c) Dharmartha Trust J&K. Digitized by eGangotri

समागतान् १ सर्वार्थे २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४

पूजा २

वैशंपायनउवाच समागतान्वेदविदोराज्ञस्तुपृथिवीश्वरान् दृष्ट्वायुधिष्ठिरोराजाभीमसेनमभाषत १ उपयातान
रव्याघ्राएतेपृथिवीश्वराः एतेषांक्रियतांपूजांपूज्याहिनराधिपाः २ इत्युक्तःसतथाचक्रेनरेंद्रेणयशस्विना भीमसेनोमहा
तेजायमाभ्यांसहपांडवः ३ अथाभ्यगच्छद्गोविंदोवृष्णिभिःसहधर्मजं बलदेवंपुरस्कृत्यसर्वप्राणभृतांवरः ४ युयुधाने
नसहितःप्रद्युम्नेनगदेनच निशठेनाथसांबेनतथैवकृतवर्मणा ५ तेषामपिपरांपूजांचक्रेभीमोमहारथः विविशुस्ते
चवेश्मानिरत्नवंतिचसर्वशः ६ युधिष्ठिरसमीपेतुकथांतेमधुसूदनः अर्जुनंकथयामासबहुसंग्रामकर्षितं ७
सतंपप्रच्छकौंतेयःपुनःपुनररिंदमं धर्मजःशक्रजंजिष्णुंसमाचष्टजगत्पतिः ८ आगमद्द्वारकावासीममाप्तः
पुरुषोनृप सोऽद्राक्षीत्पांडवश्रेष्ठंबहुसंग्रामकर्षितं ९ समीपेचमहाबाहुमाचष्टचममप्रभो कुरुकार्याणिकौंते
यहयमेधार्थसिद्धये १० इत्युक्तःप्रत्युवाचेनंधर्मराजोयुधिष्ठिरः दिष्ट्यासकुशलीजिष्णुरुपायातिचमाधव ११
यदिदंसंदिदेशास्मिन्पांडवानांबलाग्रणीः तदाज्ञातुमिहेच्छामिभवतायदुनंदन १२ इत्युक्तोधर्मराजेनवृष्ण्यंधक
पतिस्तदा प्रोवाचेदंवचोवाग्मीधर्मात्मानंयुधिष्ठिरं १३ इदमाहमहाराजपार्थवाक्यंस्मरन्नरः वाच्योयुधिष्ठिरःकृष्ण

श्री

© Dharmartha Trust J&K. Digitized by eGangotri

श्रागमिष्यन्तिराजानः सर्वेवैकौरवर्षभाः प्राप्तानांमहतांपूजाकार्याह्येतत्क्षमंहिनः इत्येतद्वचनाद्राजाविज्ञा
प्यामममानद यथाचाल्पयिकंनस्यात्‌तथ्यहरोभवत् १६ कर्तुमर्हतितद्राजाभवांश्चाप्यनुमन्यतां राजद्वेषानप
श्येयुरिमाराजन्पुनः प्रजाइदंमन्यच्चकौन्तेयवचःसपुरुषोब्रवीत् धनंजयस्यनृपतेतन्मेनिगदतःशृणु १८ उपया
स्यतियज्ञंनोमणिपूरपतिर्नृपः पुत्रोममममहातेजादयितोबभ्रुवाहनः १९ तंभवान्मदपेक्षार्थंविधिवत्प्रतिपू
जयेत् भक्तोनुरक्तश्चममनित्यमितिप्रभो २० इत्येतद्वचनंश्रुत्वाधर्मराजोयुधिष्ठिरः अभिनन्द्यास्यतद्वाक्य
मिदंवचनमब्रवीत् २१ इत्याश्वमेधिकेपर्वणि युधिष्ठिरउवाच श्रुतंप्रियमिदंकृष्णयत्त्वमर्हसिभाषितुं तन्मे
मृतरसंपुण्यंमनोह्लादयतिप्रभो १ बहूनिकिलयुद्धानिविजयस्यनराधिपैः पुनरासन्हृषीकेशतत्रतत्रच
मेश्रुतं २ किंनिमित्तंसनित्यंहिपार्थःसुखविवर्जितः अतीवविजयोधीमन्नितिमेदूयतेमनः ३ संचि
न्तयामिकौन्तेयंरहोजिष्णुंजनार्दन अतीवदुःखभागीससततंपांडुनंदनः ४ किंनुतस्यशरीरेस्तिसर्वलक्षण
पूजिते अनिष्टलक्षणंकृष्णयेनदुःखान्युपाश्नुते ५ अतीवासुखभोगीससततंकुंतिनंदनः नहिपश्यामिबी रम०
भत्सोनिंद्यंगात्रेषुकिंचन श्रोतव्यंचेन्मयैतद्वैतन्मेव्याख्यातुमर्हसि ६ १३२

© Dharmartha Trust J&K. Digitized By eGangotri

भोजराजात्मजानंदवर्द्धनः ७ संप्रियेंसुविविक्ते संदृश्यमितिपाठेपि सुप्रसन्नत्वादित्वात्लोभादृविविक्तत्वं भवतीति तद्ध्दितेपिंडिकोज्जानुनोरधस्थपश्चाद्भागो यो मांसलः प्रदेशः पिंडिका ति

इत्युक्तः स हृषीकेशो ध्यात्वा सुमहद्‌भुतं राज्ञानं भोजराजस्य वर्द्धनो विस्मयाब्रवीत ७ न त्वस्य स्म नृपते किंचित्संलक्ष्यमुपल
क्ष्ये ऋते पुरुषसिंहस्य पिंडिके स्वातिकायतः ८ एताभ्यां पुरुषव्याघ्रो नित्यमध्वसु वर्तते न चास्य हनुपश्यामि येनासौरु:
खभाजनं ९ इत्युक्तः पुरुषश्रेष्ठस्तदा कृष्णेन धीमता प्रोवाच हृष्टमिश्शार्दूलमेवमेतदिति प्रभो १० कस्मात्तद्ग्रोपदिष्टं कृष्णेति
यत्कृसात्सप्यैक्षत प्रतिजग्राह तस्यात्तप्रणामं चापि केशिहा ११ साध्युः स खो हृषीकेशः साक्षादिव धनंजयः तत्र भीमार
यस्तेन कुरवो याजकाश्चये १२ रेमुः स्मकृत्वा विचित्रां तां धनंजयकथां शुभां तेषां कथयतामेव पुरुषोऽर्जुनसंकथां १३
उपायाद्वचनात्तद्‌तो विजयस्य महात्मनः सोभिगम्य कुरुश्रेष्ठं नमस्कृत्य च बुद्धिमान १४ उपायातं नरव्याघ्रं फाल्गुनं प्रति
वेदयत तच्छ्रुत्वा नृपतिस्तस्य हर्षबाष्पाकुलेक्षणः १५ प्रियाख्यानं निमित्तं वै ददौ बहु धनं तदा ततो द्वितीये दिवसे महान
शब्दो व्यवर्द्धत १६ आगच्छति नरव्याघ्रे कौरवाणां धुरंधरे ततो रेणुः समुद्भूतो विबभौ तस्य वाजिनः १७ अभितो वर्धमा
नस्य यथोच्चैःश्रवसस्तथा तत्र हर्षकरी वाचो नराणां शुश्रुवेऽर्जुनिः १८

उभे अस्य धिके स्वदेशाद्योभाग पर्यंतं वृत्तत्वं स्थूलत्वं चमाने पाठांतरोकापतः शरीरात अतिप्रमाणे १५ १६ १७ १८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अ॰ प
१३४

२७ अध्यायः समाप्तिश्च १ २ ३

दिष्ट्यासिपार्थकुशलीधन्योराजायुधिष्ठिरः कोन्योहिपृथिवींकृत्स्नांजित्वाहियुधिपार्थिवान् १८ चारयित्वाहयश्रेष्ठमुपा
गच्छेदृतेर्जुनात् येप्यतीतामहात्मानोराजानःसगरादयः १९ तेषामपीदृशंकर्मनकिंचनसुश्रुमः नैतदन्येकरिष्यं
तिभविष्यावसुधाधिपाः २० यत्त्वंकुरुकुलश्रेष्ठदुष्करंकृतवानसि इत्येवंवदतांतेषांपुंसांकर्णसुखागिरः २१ शृ
ण्वन्विवेशधर्मात्माफाल्गुनोयज्ञसंस्तरं ततोराजासहामात्यःकृष्णश्चयदुनंदनः २२ धृतराष्ट्रंपुरस्कृत्यसम्प्रत्युपययुस्त
दा सोभिवाद्यपितुःपादौधर्मराजस्यधीमतः २३ भीमादींश्चापिसंपूज्यपर्यष्वजतकेशवं तेनसमेत्यार्चितस्तांश्च
प्रत्यर्च्ययथाविधि २४ विशश्राममहाबाहुस्तीरंलब्ध्वेवपारगः एतस्मिन्नेवकालेतुसराजाबभ्रुवाहनः २५
मातृभ्यांसहितोधीमान्कुरूनेवजगाममह तत्रवृद्धान्यथावत्सकुरूनन्यांश्चपार्थिवान् २६ अभिवाद्यमहाबाहुस्तै
श्चापिप्रतिनंदितः प्रविवेशपितामह्याःकुंत्याभवनमुत्तमं २७ इत्याश्वमेधिकेपर्वणि वैशंपायनउवाच प
थोःकृष्णांचसहितेविनयेनोपजग्मतुः २ सुभद्रांचयथान्यायंयाश्चान्याःकुरुयोषितः ददौकुंतीततस्ताभ्यांरत्नानि
विविधानिच ३

एम
१३४

१२ अहीनः अहर्गणसोमयागानां बहूनां समूहे अहीनः नहीनः इत्यादिना इति वा   १४   १५   ॥   ७   ॥

द्रौपदीचसुभद्राचयाश्चाप्यन्याःकुरुस्त्रियः कृष्णस्तत्रनरेशोमहार्हेशयनासने ४ सुपूजितेस्वयंकुन्त्यापार्थसहित
कामया सचराजामहातेजाःपूजितोबभ्रुवाहनः ५ धृतराष्ट्रंमहीपालमुपतस्थेयथाविधि युधिष्ठिरंचराजानंभीमा
दींश्चापिपांडवान् ६ उपगम्यमहातेजाविनयेनाभ्यवादयत् सतैःप्रेम्णापरिष्वक्तःपूजितश्चयथाविधि ७ धनं
चास्मैददुर्भूरिप्रीयमाणामहारथाः तथैवचमहीपालःकृष्णंचक्रगदाधरं ८ प्रद्युम्नप्रभृतीन्वृष्णीन्विनयेनोपतस्थिवा
न् तस्मैकृष्णोददौराजन्महार्हमतिपूजितं ९ रथंहेमपरिष्कारंदिव्याश्वयुजमुत्तमं धर्मराजश्चभीमश्चफाल्गुनश्च
यमौतथा १० पृथक्पृथक्चतेचैनंमानार्थाभ्यामयोजयन् ततस्तृतीयदिवसेसत्यवत्याःसुतोमुनिः ११
युधिष्ठिरंसमभ्येत्यवाग्मीवचनमब्रवीत् अद्यप्रभृतिकौन्तेययजस्वसमयोहिते मुहूर्तोयज्ञियःप्राप्तश्चोदयन्तीहया
जकाः १२ अहीनोनामराजेन्द्रक्रतुस्तेपंचकल्पतां बहुत्वात्कांचनाख्यस्यख्यातोबहुसुवर्णकः १३ एवमत्रम
हाराजदक्षिणांत्रिगुणांकुरु त्रित्वंव्रजतुतेराजन्ब्राह्मणाह्यत्रकारणं १४ त्रीनश्वमेधानत्रत्वंसंप्राप्यबहुदक्षि
णान् ज्ञातिवध्याकृतंपापंप्रहास्यसिनराधिप १५

© (c) Dharmartha Trust J&K. Digitized By eGangotri

अ० ९०
१३५

अभिषवंसोमवल्ल्याः कृतवंते २१ सोमंसोमवल्लीरसंसवनानिप्रातःसवनादीनि २४ संस्तरे ॥ ॥

पवित्रंपरमंचैतत्पावनंचैतदुत्तमं यदश्वमेधावभृथंप्राप्स्यसेकुरुनंदन १६ इत्युक्तःसतुतेजस्वीव्यासेनामितबुद्धिना दीक्षां
विवेशधर्मात्मावाजिमेधाप्तयेततः १७ ततोयज्ञंमहाबाहुर्वाजिमेधंमहाक्रतुं बह्वन्नदक्षिणंराजासर्वकामगुणान्विता
१८ तत्रवेदविदोराजंश्चक्रुःकर्माणियाजकाः परिक्रमंतःसर्वज्ञाविधिवत्साधुशिक्षितं १९ नतेषांस्खलितंकिंचिदासी
२८ न्नाप्यंतंत[illegible]था क्रममुक्तंचयुक्तंचचक्रुस्तत्रद्विजर्षभाः २० कृत्वाप्रवर्ग्यंधर्माख्यंयथावद्द्विजसत्तमाः चक्रुस्तेविधि
वद्राजंस्तथैवाभिषवंद्विजाः २१ अभिषूयततोराजन्सोमंसोमपसत्तमाः सवनान्यानुपूर्व्येणचक्रुःशास्त्रानुसारिणः
२२ नतत्रकृपणःकश्चिन्नदरिद्रोबभूवह क्षुधितोदुःखितोवापिप्राकृतोवापिमानवः २३ भोजनंभोजनार्थिभ्योदा
पयामासशत्रुहा भीमसेनोमहातेजाःसततंराजशासनात् २४ संस्तरेकुशलाश्चापिसर्वकार्याणियाजकाः दि
वसेदिवसेचक्रुर्यथाशास्त्रानुदर्शनात् २५ नाषडंगविदत्रासीत्सदस्यस्तस्यधीमतः नाव्रतोनानुपाध्यायोनचापा
हाविचक्षणः २६ ततोयूपोच्छ्रयेप्राप्तेषड्बैल्वान्भरतर्षभ खादिरान्बिल्वसमितांस्तावतःसर्ववर्णिनः २७ दे
वदारुमयौद्वौतुयूपौकुरुपतेर्मखे श्लेष्मातकमयंचैकंयाजकाःसमकल्पयन् २८

एम· १३५

शोभार्थं चापि तान्यूपान्कांचनान्भरतर्षभ सभीमः कारयामास धर्मराजस्य शासनात् २९ ते भ्राजंत राजेंद्र वस्त्रैर्माल्यैश्च शोभि
रूपशोभिताः महेंद्रानुगता देवा यथा सप्तर्षिभिर्दिवि ३० इष्टिकाः कांचनीश्चात्र चयनार्थं कृता भवन् शुशुभे चयनं तत
द्दक्षस्येव प्रजापतेः ३१ चतुश्चित्यस्य तस्यासीदष्टादशकरात्मकः सरुक्मपक्षो निचितस्त्रिकोणो गरुडाकृतिः ३२
ततो नियुक्ताः पशवो यथाशास्त्रं मनीषिभिः ३३ तं तं देवं समुद्दिश्य पक्षिणः पशवश्च ये ऋषभाः शास्त्रपठितास्तथा ज
लचराश्च ये सर्वांस्तानभ्ययुंजंस्ते तत्राग्निचयकर्मणि ३४ यूपेषु नियता चासीत्पशूनां त्रिशती तथा अश्वरत्नोत्तरा य
ज्ञे कौंतेयस्य महात्मनः ३५ स यज्ञः शुशुभे तस्य साक्षाद्देवर्षिसंकुलः गंधर्वगणसंगीतः प्रनृत्ताप्सरोगणः ३६
स किंपुरुषसंकीर्णः किन्नरैश्चोपशोभितः सिद्धविप्रनिवासैश्च समंतादभिसंवृतः ३७ तस्मिन्सदसि नित्यास्तु व्यासशि
ष्या द्विजर्षभाः सर्वशास्त्रप्रणेतारः कुशला यज्ञसंस्तरे ३८ नारदश्च बभूवात्र तुंबुरुश्च महाद्युतिः विश्वावसुश्चित्रसे
नस्तथान्ये गीतकोविदाः रमयंति स्म तान्विप्रान्यज्ञकर्मांतरेषु वै ३९ ॥ इत्याश्वमेधिके पर्वणि वैशंपाय
न उवाच श्रपयित्वा पशूनन्यान्विधिवद्द्विजसत्तमाः तं तुरंगं यथाशास्त्रमालभंत द्विजातयः १

© (c) Dharmartha Trust J&K. Digitized By eGangotri

अ.प १३६

संज्ञप्येति पावैर्हुत्वा तागंतस्समीपे कलाभिः कलमाभिः मंत्रद्रव्यश्रद्धाख्याभिरुपेतोऽग्नौ परी उपसंवेशयन समाईश्लोकः २ अंगानि हृदयजिह्वावक्षः आदीनि ५

ततः संस्नाप्य तं राजा विधिवद्याजकास्तदा उपसंवेशयन् राजंस्ततस्तां द्रुपदात्मजां कलाभिस्तिसृभी राजन्यथाविधि मनस्वि-
नीं २ उद्धृत्य तु वपां तस्य यथाशास्त्रं द्विजातयः श्रपयामासुरव्यग्रा विधिवद्भरतर्षभ ३ तं वपाधूमगंधं तु धर्मराजः सहानुजैः
४ उपाजिघ्रद्यथाशास्त्रं सर्वपापहरं तदा शिष्टान्यंगानि यान्यासंस्तस्याश्वस्य नराधिप ५ तान्यग्नौ जुहुवुर्धीराः स-
मस्ताः षोडशर्त्विजः संस्थाप्यैवं तस्य राज्ञस्तं यज्ञं शक्रतेजसः ६ व्यासः सशिष्यो भगवान्वर्द्धयामास तं नृपं ततो यु-
धिष्ठिरः प्रादाद्ब्राह्मणेभ्यो यथाविधि ७ कोटीसहस्रं निष्काणां व्यासाय तु वसुंधरां प्रतिगृह्य धरां राजन्व्यासः सत्य-
वतीसुतः ८ अब्रवीद्भरतश्रेष्ठं धर्मराजं युधिष्ठिरं वसुधा भवतस्त्वेषा समस्ता राजसत्तम ९ निष्क्रयो दीयतां म-
ह्यं ब्राह्मणा हि धनार्थिनः युधिष्ठिरस्तु तान्विप्रान्प्रत्युवाच महामनाः १० भ्रातृभिः सहितो धीमान्मध्ये राज्ञां म-
हात्मनां अश्वमेधे महायज्ञे पृथिवी दक्षिणा स्मृता ११ अर्जुनेन जिता चेयं ऋत्विग्भ्यः प्रापिता मया वनं प्रवेक्ष्ये
विप्राग्र्या विभजध्वं महीमिमां १२ चतुर्धा पृथिवीं कृत्वा चातुर्होत्रप्रमाणतः नाहमादातुमिच्छामि ब्रह्मस्वं द्विजस-
त्तमाः १३ इदं नित्यं मनो विप्रा भ्रातॄणां चैव मे सदा इत्युक्तवति तस्मिंस्तु भ्रातरो द्रौपदी च सा १४

संस्थाप्य समाप्य ६ ७ ८ ९ १० ११ १२ १३ १४ ॥ ॥ ॥

रूप: १३६

अनंतांद्विजातिभ्यः क्षिप्रेषु गत्वीला निःशेषेषु शिष्यान् स्वत्रियाः स्थोगत्वीनवेतनः २७

एवमेतदितिप्राहुस्तत्रसल्लोमहर्षणं ततोंतरिक्षे वागासीत्साधुसाध्विति भारत १५ तथैव द्विजसंघानां शंसतां विबभौ स्वनः
द्वैपायनस्तथा कृष्णः पुनरेव युधिष्ठिरं १६ प्रोवाच मध्ये विप्राणामिदं संपूजयन्मुनिः दत्तैषा भवता मह्यं तां ते प्रतिददाम्यहं
१७ हिरण्यं दीयतामेभ्यो ब्राह्मणेभ्यो धरास्तु ते ततोऽब्रवीद्वासुदेवो धर्मराजं युधिष्ठिरं १८ यथाह भगवान्व्यासस्तथा त्वं कर्तुम
र्हसि इत्युक्तः स कुरुश्रेष्ठः प्रीतात्मा भ्रातृभिः सह १९ कोटिकोटीकृतां प्रादाद्दक्षिणां त्रिगुणां क्रतोः न करिष्यति तल्लोके
कश्चिदन्यो नराधिपः २० यत्कृतं कुरुराजेन मरुत्तस्यानुकुर्वता प्रतिगृह्य तु तद्रत्नं कृष्णद्वैपायनो मुनिः २१ ऋत्विग्भ्यः
प्रददौ विद्वांश्चतुर्धा व्यभजंश्च ते धरण्या निष्क्रयं दत्वा तद्धिरण्यं युधिष्ठिरः २२ धूतपाप्मा जितः स्वर्गो मुमुदे भ्रातृभिः सह
ऋत्विजस्तमपर्यंतं सुवर्णनिचयं तथा २३ व्यभजंत द्विजातिभ्यो यथोत्साहं यथाबलं यज्ञवाटे च यत्किंचिद्धिरण्यं सवि
भूषणं २४ तोरणानि च यूपांश्च घटाः पात्रीस्तथेष्टकाः युधिष्ठिराभ्यनुज्ञाताः सर्वं तद्व्यभजन्द्विजाः २५ अनंतरं द्वि
जातिभ्यः क्षत्रिया जह्रिरे वसु तथा विट्शूद्रसंघाश्च तथान्ये म्लेच्छजातयः २६ ततस्ते ब्राह्मणाः सर्वे मुदिता जग्मुरालयान्
तर्पिता वसुना तेन धर्मराजेन धीमता २७

समंशंभगवान्व्यासः कुंतेयाहृष्टिमानतः प्रहृष्टेनतस्यमहतोहिरण्यस्यमहाद्युतिः २८ ज्ञातुराज्ञमीतिहायानंप्राप्यसाधींतमा
नसा वकारपुण्यकंतेनतस्यमहत्स्वयशः पृथा २९ गत्वार्तमथोराजाविपाप्माभ्रातृभिःसह समाज्ञमानःशुशुभेमहेंद्रस्त्रि
दशेष्विव ३० पांडवांश्चमहीपालैःसमेतैरभिसंवृताः अशोभंतमहाराजग्रहास्तारागणैरिव ३१ राजभ्योपिततःप्राहाद्र
त्नानिविविधानिच गजानश्वानलंकारान्स्त्रियोवासांसिकांचनं ३२ तद्धनौघमपर्यंतंपार्थःपार्थिवमंडले विसृज
न्शुशुभेराजन्यथावैश्रवणस्तथा आनीयचततोवीरंराजानंबभ्रुवाहनं प्राद्यायविपुलंवित्तंगृहानप्रास्थापयत्तदा ३४
दुःशलायाश्चतंपौत्रंबालकंभरतर्षभ स्वराज्येथपितृभिर्मान्यस्यःप्रोसाम्यवेशयत ३५ नृपतींश्चैवतान्सर्वान्सुविभक्तान्
सुपूजितान् प्रस्थापयामासवशीकुरुराजोयुधिष्ठिरः ३६ गोविंदंचमहात्मानंबलदेवंमहाबलं तथान्यान्वृष्णिवीरां
श्चप्रद्युम्नाद्यान्सहस्रशः ३७ पूजयित्वामहाराजयथाविधिमहाद्युतिः भ्रातृभिःसहितोराजाप्रस्थापयदरिंदमः ३८
एवंवभूवयज्ञःसधर्मराजस्यधीमतः बहुन्नधनरत्नौघःसुरामैरेयसागरः ३९ सर्पिःपंकाह्रदायत्रबभूवुश्चान्नपर्वताः
रसालाःकर्दमानद्योबभूवुर्भरतर्षभ ४०

© (O) Dharmartha Trust J&K. Digitized By eGangotri

खांडवरागः पिप्पलीशुंठियुक्तो मुद्गयूषः खांडवः सत्वगशर्करायुक्तो रागखांडवः ४४ अथायः पितामहस्येत्यादि श्रियः कृशाजितं न्यायतः स्वयज्ञयागस्यात्रेपितं अश्वमेधाय

भक्ष्यखांडवरागाणां क्रियतां भुज्यतां तथा पशूनां वध्यतां चैव नांतं ददृशिरे जनाः ५१ मत्तप्रमत्तमुदितं सुप्रीतयुवतीजनं
मृदंगशंखनादैश्च मनोरममभूत्तदा ५२ दीयतां भुज्यतां चेति दिवारात्रमवारितं तं महोत्सवसंकाशं हृष्टपुष्टजनाकुलं ५३
कथयंति स्म पुरुषा नानादेशनिवासिनः वर्षित्वा धनधाराभिः कामै रत्नैस्तथा विपाप्मा भरतश्रेष्ठः कृतार्थः प्राविशत्पुरं
५४ इत्याश्वमेधिके पर्वणि जनमेजय उवाच पितामहस्य मे यज्ञे धर्मराजस्य धीमतः यदाश्चर्यमभूत्किंचित्तद्भवा
न्वक्तुमर्हति १ वैशंपायन उवाच श्रूयतां राजशार्दूल महदाश्चर्यमुत्तमं अश्वमेधे महायज्ञे निर्वृत्ते यदभूद्विभो २
तर्पितेषु द्विजाग्र्येषु ज्ञातिसंबंधिबंधुषु दीनांधकृपणे वापि तदा भरतसत्तम ३ घुष्यमाणे महादाने दिक्षु सर्वासु भार
त पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्धनि ४ नीलाक्षस्तत्र नकुलो रुक्मपार्श्वस्तदानघ वज्राशनिसमं नादममुंचत
स्थापि च ५ सकृदुत्सृज्य तं नादं त्रासयानो मृगद्विजान् मानुषं वचनं प्राह धृष्टो बिलशयो महान् ६ सक्तुप्रस्थेन वा
नायं यज्ञस्तुल्यो नराधिपाः उंछवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ७

आश्वमेधिकमिति क्रोधजनयमश्वमेधयाकर्तत्र १ २ ३ ४ ५ ६ ७ ॥ ॥ ॥

© (O) Dharmartha Trust J&K. Digitized by eGangotri

अश्व० प०
१३८

तस्य तद्वचनं श्रुत्वा नकुलस्य विशांपते विस्मयं परमं जग्मुः सर्वे ते ब्राह्मणर्षभाः ८ ततः समेत्य नकुलं पर्यपृच्छन्त ते द्विजाः कुतस्त्वं
समनुप्राप्तो यज्ञं साधुसमागमं ९ किंबलं परमं तुभ्यं किं श्रुतं किं परायणं कथं भवन्तं विद्याम यो नो यज्ञं विगर्हसे १० अवि
लुप्यागमं कृत्स्नं विविधैर्यज्ञकर्मभिः कृतं यथागमं यथान्यायं कर्तव्यं च तथा कृतं ११ पूजार्हाः पूजिताश्चात्र विधिवच्छास्त्रदर्शनात्
मन्त्राहुतिहुतश्चाग्निर्दीयते च विमत्सरं १२ तृप्ता द्विजातयश्चात्र दानैर्बहुविधैरपि क्षत्रियाश्च सुयुद्धेन श्राद्धैश्चापि पितामहाः
१३ पालनेन विशस्तुष्टाः कामैस्तुष्टा वरस्त्रियः अनुक्रोशैस्तथा शूद्रा दानशेषैः पृथग्जनाः १४ ज्ञातिसंबन्धिनस्तुष्टाः शौ
चेन च नृपस्य नः देवा हविर्भिः पुण्यैश्च रक्षणैः शरणागताः १६ यदत्र तथ्यं तद्ब्रूहि सत्यं सत्यं द्विजातिषु यथाश्रुतं यथादृष्टं पृ
ष्टो ब्राह्मणकाम्यया १७ श्रद्धेयवाक्यः प्राज्ञस्त्वं दिव्यं रूपं बिभर्षि च समागतश्च विप्रैस्त्वं तद्भवान्वक्तुमर्हसि १८ इति पृ
ष्टो द्विजैस्तैस्स प्रहसन्नकुलोऽब्रवीत् नैषा मृषा मया वाणी प्रोक्ता दर्पेण वा द्विजाः १९ यन्मयोक्तमिदं वाक्यं युष्माभिश्चाप्युपश्रुतं
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो द्विजर्षभाः २० इत्यवश्यं मयैतद्वो वक्तव्यं द्विजसत्तमाः शृणुताव्यग्रमनसः शंसतो मे यथातथं २१

राम०
१३८

© (Ch)Dharmartha Trust J&K Digitized By eGangotri

गमेदृंपवेत्रेनिशेषः २४ कापोतिःकपोतवर्णैकंकणंश्चादनेसकापोतिः ३० उंछंकणशश्चादानंच ॥ ॥ ॥

स्वनुभूतंचदृष्टंचयन्मयाद्भुतदर्शनं उंछवृत्तेर्वदान्यस्यकुरुक्षेत्रनिवासिनः २२ स्वर्गंयेनद्विजःप्राप्तःसभार्यस्ससुतस्नु
षः यथाचार्द्धंशरीरस्यममेदंकांचनीकृतं २३ नकुलउवाच हंततेवर्तयिष्यामिदानस्यफलमुत्तमं न्यायलब्धस्य
सूक्ष्मस्यविप्रदत्तस्ययद्द्विजाः २४ धर्मक्षेत्रेकुरुक्षेत्रेधर्मज्ञैर्बहुभिर्वृते उंछवृत्तिर्द्विजःकश्चित्कापोतिरभवत्तदा २५
सभार्यःसहपुत्रेणसस्नुषस्तपसिस्थितः बभूवशुक्लवृत्तःसधर्मात्मानियतेंद्रियः २६ षष्ठेकालेसदाविप्रोभुंक्तेतैः
सहसुव्रतः षष्ठेकालेकदाचित्तस्याहारोनविद्यते २७ भुंक्तेन्यस्मिन्कदाचित्सषष्ठेकालेद्विजोत्तमः कदाचिद्ध
र्मिणस्तस्यदुर्भिक्षेसतिदारुणे २८ नाविद्यतततदाविप्रास्संचयस्तंनिबोधत क्षीणौषधिसमावेशेद्रव्यहीनोभव
त्तदा २९ कालेकालेस्यसंप्राप्तेनैवविद्येतभोजनं क्षुधापरिगताःसर्वेप्रातिष्ठंततदातते ३० उंछंतदाशुक्ल
पक्षेमध्यंतपतिभास्करे उष्णार्तश्चक्षुधार्तश्चसविप्रस्तपसिस्थितः ३१ उंछमप्राप्तवानेवब्राह्मणःक्षुत्श्रमान्वि
तः सतथैवक्षुधाविष्टःसार्द्धंपरिजनेनह ३२ क्षपयामासतंकालंकृच्छ्रप्राणोद्विजोत्तमः अथषष्ठेगतेकालेय
वप्रस्थमुपार्जयन् ३३ यवप्रस्थंतुतंसक्तूनकुर्वंततपस्विनः कृतजप्याह्निकास्तेतुहुत्वाचाग्निंयथाविधि ३४

© (O) Dharmartha Trust J&K. Digitized By eGangotri

स्कं॰ प
१३९

कुरुष्वं कुरु देवेश सर्वं सम्मतं तपस्विनः अथागतो द्विजः कश्चिदतिथिर्भोजनान्तदा ३५ तेइदं स्थानतिथिं प्राप्तं सग्रहस्थम
नमोभवत् तेभिवाद्य ततस्तं सगृहस्थानमतिथिं तदा ३६ विशुद्धमनसो दान्ताः श्रद्धादमसमन्विताः अनसूया वि
क्रोधाः साधवो वीतमत्सराः ३७ सत्कमानमदक्रोधाधर्मसत्ता द्विजसत्तमाः सत्यब्रह्मचर्यगोत्रं तेन तस्याभ्योत्तापार्स्यरं ३८
कुटीं प्रवेशयामासुः स्वर्यात्तमतिथिं तदा इदमर्घ्यं च पाद्यं च दत्तं पादेपतवानघ ३९ सुचयः सक्तवस्त्रमेनिषमोषा
जिताः प्रभो प्रतिगृह्णीष्व भद्रं ते मया दत्तानि द्विजर्षभ ४० इत्युक्तः प्रतिगृह्याथ सक्तूनां कुडवं द्विजः भक्षयामास रा
जेंद्र न च तुष्टिं जगाम सः ४१ स उंछवृत्तिस्तं प्रेक्ष्य क्षुधापरिगतं द्विजः आहारं चिंतयामास कथं तुष्टो भवेदिति ४२
तस्य भार्याब्रवीद्वाक्यं मद्भागो दीयतामिति गच्छत्वयं यथाकामं परितुष्टो द्विजोत्तमः ४३ इति ब्रुवंतीं तां साध्वीं भार्यां स
द्विजसत्तमः क्षुधापरिगतां ज्ञात्वा तान् सक्तून्नाभ्यनंदत ४४ आत्मानुमानतो विद्वान् स तु विप्रर्षभस्तदा जानन्
वृद्धां क्षुधार्तां च श्रांतां ग्लानां तपस्विनीं ४५ त्वगस्थिभूतां वेपंतीं ततो भार्यामुवाच ह अपि कीटपतंगानां मृगाणां
चैव शोभने ४६ स्त्रियो रक्ष्याश्च पोष्याश्च न त्वेवं वक्तुमर्हसि अनुकंप्यो नरः पत्न्या पुष्टो रक्षित एव च ४७

एम
१३९

CC-0. Dharmartha Trust J&K. Digitized by eGangotri

धर्मकामार्थकार्याणि शुश्रूषाकुलसंततिः दारेष्वधीनधर्मश्च पितॄणामात्मनस्तथा ४७ नेवेतिकर्मतो भार्या रक्षणीया प्रयत्नतः
पुमान् अयशो महदाप्नोति नरकांश्चैव गच्छति ४८ प्रपतेद्यशसो दीप्तात्सवज्ञो कान्तवाप्नुयात् इत्युक्का मातत्तः प्राह धर्मार्थी
नो मम मो द्विज ४९ सत्कुमन्दुचरभोगान्नानामन्नसीदृम समोतिसृष्टधर्मस्य स्वर्गश्चागुणानिर्जितः ५० स्त्रीणांपतिसमा
धीनं कांक्षितं च द्विजर्षभ कालमातुःपितुर्वीजं दैवतं परमपतिः ५१ भर्तुःप्रसादो नारीणां गतिपुत्रफलं तथा पालनाधिपति
त्वमेमर्तातिभराणां च मे ५२ पुत्रप्रदानाद्दूरस्ताभ्यामस्तकन्ययश्च मे नरणपीणितो वृद्धःश्रुत्वा तौ दुर्वलो मृशं उपवासप
रिश्रांतो पश्चात्तमपि कर्षितः इत्युक्तः सतयामन्तकन्यप्रगल्भेनं वचोब्रवीत् ५४ द्विजसत्तनिमानभयः प्रतिगृह्णीष्वसत्तम
सतानप्रगल्भमुक्ता चनतविमगामद्विजः ५५ तमंशुष्कप्रतिगलपतत्सिंतापोभवत् पुत्रउवाच सत्क्वि मानप्रगल्भ
लं देहि हि विप्राय सत्तम इत्येवमुक्ततंममेतस्मादितत्करोम्यहं ५७ भवान्तिपरिपाल्यो मे सर्वदैवमयत्नतः साधूनां कांक्षि
तं यस्मात्सितं देहस्य पालनं ५८ पुत्रार्थो विहितो ह्येषवाईकेपरिपालनं श्रुतिरेषा हि विप्रर्षे त्रिषुलोकेषु शाश्वती ५९
प्राणाधारणमात्रं हि शक्यं कर्तुं तपस्त्वया प्राणा हि प्राणिनां धर्म स्थितो देहेषु देहिनां ६० पितोवाच अपि वर्षसहस्राणि बाल
एवमेतो मम उत्साय पुत्रे हि पिताकृतकृत्सो भवेत्स तान् ६१ बालानां ह्ननवतीजानाम्येतदहं प्रभो रक्षोहं धारयिष्यामि

© Dharmartha Trust J&K. Digitized by eGangotri

स्कं०
१५०

त्वं वली भव पुत्रक ६२ जीर्णोनवयसा पुत्र नमे सुहृद्यथैतेपि च दीर्घकालं तनयस्त्वं नमे मरणतो भयं ६३ पुत्र उवाच श्वयस
मस्मि ते पुत्र स्वाणास्त्वं इति श्रुतिः आत्मा पुत्र स्मृतिस्तस्मात्त्वात्मानमिहात्मना ६४ पिता उवाच ह्येतास दृशास्त्वं मे शीले
न यह मेन च परिक्षितस्त्वं बहुधा सत्कृतार्पितेसुत ६५ इत्युक्त्वा ह्यपतान्सत्कृत्य नृपो नात्मा ह्निजसत्तम: प्रहृष्टं नित्यविमायसक्त
स्मै मह हैतन्हा ६६ भुक्त्वा तानपि सत्कृत्य सैन्ये व तत्स्योवमुवह उच्छ्रर तत्सुखमन्विद्याब्रीडा मनुजगाम ह ६७ ते चैव व: स्त्रि
तामा श्वीब्राह्मणा प्रियकाम्यया सत्कृत्य ताश्यसं दृष्टा श्वश्रूं वाक्यमब्रवीत ६८ संतानं तव संतानं मम मत्रि प्रभविष्यति
सत्कृत्य निमानतिथ्ये गृहीत्वा संप्रयच्छमे ६९ तवप्रसादा ज्जित्वैंता मम लोका: किलाक्षया: शेते त्वाणता न वा प्रोतिपत्न्या गत्वा
न शोचति ७० धर्मो यथा हि पश्चात्रैनावह्निवेतां तथैव च तथैव पुत्रपौत्राणां स्वर्गहेतां किलाक्षय: ७१ पितॄन त्राणान्तार
यति पुत्र इत्यनुशुश्रुम: पुत्रपौत्रैश्च नियतं साधुलोकानुपाश्नुते ७२ श्वश्रु उवाच तानातपविशी र्णांगी त्वां विवर्णां
निराश्रवै कर्षितां हव्रताचारेश्चधा विकृत्वेचेतसा ७३

ए
१५०

© (C) Dharmartha Trust J&K Digitized By eGangotri

स्वेच्छयापालनीया चिंतयापरिरक्षणीया ७६ ८० ८१

कथं सक्तून्ग्रहिष्यामि मत्वा धर्मोपघातकः कन्यामात्रं हि नैकस्यापि नैवं त्वं वक्तुमर्हसि ७४ षष्ठे काले व्रतवती
शौचशीलतपोन्वितं कृच्छ्रवृत्तं निराहारां द्रक्ष्यामि त्वां कथं शुभे ७५ बाला क्षुधार्ता नारी च रक्ष्या त्वं सततं मया उप
वासपरिश्रान्ता त्वं हि बांधवनंदिनि ७६ स्नुषोवाच गुरोर्मम गुरुस्त्वं वै यतो दैवतदैवतं देवातिदेवस्तस्मात्त्वं सक्तून्
आदत्स्व मे प्रभो ७७ देहः प्राणश्च धर्मश्च शुश्रूषार्थमिदं गुरोः तव विप्र प्रसादेन लोकान्प्राप्स्यामहे शुभान् ७८
स्वेच्छयापालनीया चिंतयापरिरक्षणीया हि द्विज चिंतयाम मे यमिति वा सक्तून्नाहर्तुमर्हसि ७९ श्वशुर उवाच अनेन नित्यं
साध्वी त्वं शीलवृत्तेन शोभसे तस्मात्सक्तून्ग्रहिष्यामि वधु नार्हसि वंचनां ८० गृहाणिमान्महाभागे त्वं हि धर्मभृ
तांवरे इत्युक्त्वा तानुपादाय सक्तून्प्रादात द्विजातये ८१ ततस्तुतोष भगवान्विप्रस्तस्य साधोर्महात्मनः प्रीतात्मा स
तं तदा वाक्यमिदं प्राह द्विजर्षभं ८२ वाग्मी नररूपो द्विजश्रेष्ठो धर्मः पुरुषविग्रहः शुद्धेन तव दानेन न्यायोपात्तेन धर्मतः
८३ यथाशक्ति विसृष्टेन प्रीतोस्मि द्विजसत्तम अहो दानं घुष्यते ते स्वर्गे स्वर्गनिवासिभिः ८४ गगनात्पुष्पवर्षं च
पश्येदं पतितं भुवि सुरर्षिदेवगंधर्वा ये च देवपुरःसराः ८५ स्तुवंतो देवदूताश्च स्थिता दानेन विस्मिताः ब्रह्मर्षयो

कांक्षंतोदर्शनंतुभ्यंदिवंधेनद्विजर्षभ पितृलोकगताःसर्वेतारिताःपितरस्त्वया ८७ अनागताश्चबहवःसुबहूनियुगान्युत
अक्षय्यंर्पणातदानेनयतेनतपसातथा ८८ असंकीर्णधर्मेणतस्मात्कृत्स्नंदिवंद्विज अक्षुद्रयापरयायत्वंतपश्चारित्सुव्रत ८९
तस्माद्दिवाऽस्वदानेनप्रीतात्राह्मणसत्तम सर्वमेतद्विपस्माते दत्तंशुद्धेनचेतसा ९० कृच्छ्रकालेततःस्वर्गोविजितःकर्मणात्वया
क्षुधानिर्णुदतिप्रज्ञांधर्म्यांबुद्धिंव्यपोहति ९१ क्षुधापरिगतज्ञानोधृतिंत्यजतिचैवह बुभुक्षांजयतेयस्तुसस्वर्गंजयतेध्रुवं ९२
यदादानरुचिःस्याद्वैतदाधर्मोनसीदति अनवेक्ष्यसुतस्नेहंकलत्रस्नेहमेवच धर्ममेवगुरुंज्ञात्वातस्मान्नगणितात्वया
द्रव्यागमोनृणांसूक्ष्मःपात्रेदानंततःपरं कालःपरतरोदानात्श्रद्धाचैवततःपरा स्वर्गद्वारंसुसूक्ष्मंहिनरैर्मो
हान्नदृश्यते ९५ स्वर्गार्गलंलोभबीजंरागगुप्तंदुरासदं तंतुपश्यंतिपुरुषाजितक्रोधाजितेंद्रियाः ९६ ब्राह्मणास्तपसायु
क्तायथाशक्तिप्रदायिनः सहस्रशक्तिश्चशतंशतशक्तिर्दशापिच दद्यादपश्चयःशक्त्यासर्वेतुल्यफलाःस्मृताः रंतिदेवो
हिनृपतिरपःप्रादादकिंचनः ९८ शुद्धेनमनसाविप्रनाकपृष्ठंततोगतः नधर्मःप्रीयतेतातदानैर्दत्तैर्महाफलैः
९९ न्यायलब्धैर्यथासूक्ष्मैःश्रद्धापूतैःसतुष्यति गोप्रदानसहस्राणिद्विजेभ्योऽदात्नृगोनृपः १००

© Dharmartha Trust J&K. Digitized by eGangotri

एकोऽस्त्यामपार्थक्यानारकं समधस्त आत्ममांसप्रदानेन शिबिरौशीनरो नृपः १ प्राप्य पुण्यकृतां लोकानमोदत दिवि सुव्रतः वि
भवो हि नराणां पुण्यं स्वशक्त्या त्वर्जितं सता २ न यज्ञैर्विविधैर्विप्र यथान्यायेन संचितैः कोऽपि ह्यानफलं हंति लोभात् स्वर्गं न गच्छ
ति ३ न्यायप्राप्तेर्हि तपसा दानेन वित्तस्वर्गमश्नुते नराजसूयैर्बहुभिरिष्ट्वा विपुलदक्षिणैः ४ नचाश्वमेधैर्बहुभिः फलं समभिरं
तेव सक्तुप्रस्थेन विजितो ब्रह्मलोकस्त्वयाक्षयः ५ विरजो ब्रह्मसदनं गच्छ विप्र यथासुखं सर्वेषां वो द्विजश्रेष्ठ दिव्यं यानमुप
स्थितं ६ आरोहत यथाकामं धर्मोऽस्मि द्विज पश्यतां तारितो हि त्वया देहो लोके कीर्तिः स्थिरा च ते ७ सभार्यः सहपुत्र
श्च सस्नुषश्च दिवं व्रजा इत्युक्तवाक्ये धर्मे तु यानमारुह्य स द्विजः ८ सदाराः ससुतश्चैव सस्नुषश्च दिवं गतः तस्मिन् वि
प्रगते स्वर्गं ससुते ससुषे तदा ९ भार्या चतुर्थे धर्मज्ञे ततोऽहं निःसृतो बिलात् ततस्तु सक्तुगंधेन क्लेदेन सलिलस्य च १०
दिव्यपुष्पावमर्दाच्च साधोर्दानलवैश्च तैः विप्रस्य तपसा तस्य शिरो मे कांचनीकृतं ११ तस्य सत्याभिसंधस्य सक्तुदानेन चैव ह
शरीरार्धं च मे विप्राः शातकुंभमयं कृतं १२ पश्यतेमं सुविपुलं तपसा तस्य धीमतः कथमेवंविधं स्याद्धि पार्श्वमन्यदिति द्वि
जाः १३ तपोवनानि यज्ञांश्च हृष्टोऽभ्येमि पुनः पुनः यज्ञं त्वहमिमं श्रुत्वा कुरुराजस्य धीमतः १४

© (c) Dharmartha Trust J&K. Digitized by eGangotri

श्व०
१४२

११० अध्यायः यज्ञसमाप्तनपतनपरत्वाध्यायो १ २ ३ ४ ५ ६

श्रद्धयापरमप्राप्तोनचाहंकांचनीकृतः ततोमयोक्तंतद्वाक्यंप्रहस्यब्राह्मणर्षभाः १५ सक्तुप्रस्थेनयज्ञोयं संमि
तोनेतिसर्वथा सक्तुप्रस्थलवैस्तैर्हिनयदाहंकांचनीकृतः १६ नहियज्ञोमहानेषसदृशस्तैर्मतोमम इत्युक्त्वान
कुलः सर्वान्यज्ञेद्विजवरांस्तदा जगामादर्शनंतेषांविप्रास्तेनययुर्गृहान् १७ वैशंपायनउवाच एतत्तेसर्व
माख्यातंमयापरपुरंजय यन्महाश्चर्यमभवत्तत्रवाजिमेधेमहाक्रतौ १८ नविस्मयस्तेनृपतेयज्ञेकार्यः कथंचन ऋषि
कोटिसहस्राणितपोभिर्येदिवंगताः १९ अद्रोहः सर्वभूतेषुसंतोषःशीलमार्जवं तपोदमश्चसत्यंचप्रदानंचेतिसं
मितं १२० इत्याश्वमेधिकेपर्वणि जनमेजयउवाच यज्ञेसक्तानृपतयस्तपःसक्तामहर्षयः शांतिव्यवस्थितावि
प्राः शमोदमइतिप्रभो १ तस्माद्यज्ञफलैस्तुल्यंनकिंचिदिहदृश्यते इतिमेवर्ततेबुद्धिस्तथाचैतदसंशयं २
यज्ञैरिष्ट्वाहिबहवोराजानोद्विजसत्तम इहकीर्तिंपरांप्राप्यप्रेत्यस्वर्गमवाप्नुयुः ३ देवराजःसहस्राक्षःक्रतुभिर्भू
रिदक्षिणैः देवराज्यंमहातेजाःप्राप्तवानखिलंविभुः ४ यथायुधिष्ठिरोराजाभीमार्जुनपुरःसरः सदृशोदेवराजेन
समृध्याविक्रमेणच ५ अथकस्मात्सनकुलोगर्हयामासतंक्रतुं अश्वमेधंमहायज्ञंराज्ञस्तस्यमहात्मनः ६

श्व०
१४२

CC-0. Dhamarth Trust J&K. Digitized By eGangotri

हिंसामिश्रश्चधर्मस्यनिंस्पर्थे १९ रसैःपयोघृतादिभिः २०

वैशंपायनउवाच यतस्तस्मिन्विधिमग्ने वैकल्येव्यापिनराधिपः गर्हतःस्तुतमेराजन्मध्यावहिहभारत ७ पुराशक्रस्ययज
तःसर्वऊचुर्महर्षयः ऋत्विक्षुकर्मव्यग्रेषुविततेयज्ञकर्मणि ८ हूयमानेतथावन्हौहोत्रेगुणसमन्विते देवेष्वाहू
यमानेषुस्थितेषुपरमर्षिषु ९ स्तूयमानेस्तथाविप्रैःस्वागमैःस्वरैर्नृप अश्रान्तेस्वापिलघुभिरध्वर्युवृषभैस्तथा
१० आलंभसमयेतस्मिन्गृहीतेषुपशुष्वथ महर्षयोमहाराजबभूवुःकृपयान्विताः ११ ततोदीनान्पशून्दृष्ट्वा
ऋषयस्तेतपोधनाः ऊचुःशक्रंसमागम्यनायंयज्ञविधिःशुभः १२ अपरिज्ञानमेतत्तेमहान्तंधर्ममिच्छतः नहियज्ञे
पशुगणाविधिदृष्टाःपुरंदर १३ धर्मोपघातकस्त्वेषसमारंभस्तवप्रभो नायंधर्मःकृतोयज्ञोनहिंसाधर्मउच्यते १४
आगमेनैवतेयज्ञंकुर्वंतुयदिचेच्छसि विधिदृष्टेनयज्ञेनधर्मस्तेसुमहान्भवेत यजबीजैःसहस्राक्षत्रिवर्षपरमोषितैः
१६ एषधर्मोमहानशक्रमहागुणफलोदयः शतक्रतुस्तुतद्वाक्यमृषिभिस्तत्वदर्शिभिः १७ उक्तोनप्रतिजग्राहमा
ह१ नमोहवशानुगः तेषांविवादःसुमहान्शक्रयज्ञेतपस्विनां १८ जंगमैःस्थावरैर्वापियष्टव्यमितिभारत तेतुखि
न्नाविवादेनऋषयस्तत्वदर्शिनः १९ ततःसंधायशक्रेणपप्रच्छुर्नृपतिंवसुं महाभागकथंयज्ञेष्वागमोनृपसत्तमः
यष्टव्यंपशुभिर्मुख्यैरथोबीजैरसैरिति २०

© Dharmartha Trust J&K. Digitized By eGangotri

स्कं०
१४२

वितथं हिंस्रयोः स्वल्पोः तस्य सायायरनागरनतं २२ २३ २४ २५ २६ २७ २८ ३० ३१ ३२ ३३

निंद

तच्छ्रुत्वा तु वचस्तेषाम् अविचार्य बलाबलं यज्ञोपनीतैर्यष्टव्यमिति प्रोवाच पार्थिवः २१ एवमुक्त्वा स नृपतिः प्रविवेश रसात
ले उक्त्वाथ वितथं प्रश्नं चेदीनामीश्वरः प्रभुः २२ तस्मान्न वाच्यं ह्येकेन बहुज्ञेनापि संशये प्रजापतिमपाहाय स्वयंभुवमृते
प्रभुं २३ तेन दत्तान्यदत्तानि पापेनाशुद्धबुद्धिना तानि सर्वाण्यनादृत्य नश्यन्ति विपुलान्यपि २४ तस्याधर्मप्रवृत्तस्य हिंसक
स्य दुरात्मनः दानेन कीर्तिर्भवति न प्रेत्येह च दुर्मतेः २५ अन्यायोपगतं द्रव्यमभीक्ष्णं यो ह्यपंडितः धर्माभिकांक्षी
यजते न स धर्मफलं लभेत् २६ धर्मवैतंसिको यस्तु पापात्मा पुरुषाधमः ददाति दानं विप्रेभ्यो लोकविश्वासकारणात्
२७ पापेन कर्मणा विप्रो धनं प्राप्य निरंकुशः रागमोहान्वितः सोऽन्ते कलुषां गतिमश्नुते २८ अपि संचयबुद्धिर्हि लो
भमोहवशंगतः उद्वेजयति भूतानि पापेनाशुद्धबुद्धिना २९ एवं लब्ध्वा धनं मोहाद्यो हि दद्याद्यजेत वा न तस्य स फ
लं प्रेत्य भुंक्ते पापधनागमात् ३० उंछं मूलं फलं शाकमुदपात्रं तपोधनाः दानं विभवतो दत्त्वा नराः स्वर्यांति धार्मिकाः
३१ एष धर्मो महायोगो दानं भूतदया तथा ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा ३२ सनातनस्य धर्मस्य
मूलमेतत्सनातनं श्रूयंते हि पुरावृत्ता विश्वामित्रादयो नृपाः ३३

रम
१४३

© (p) Dharmartha Trust J&K. Digitized By eGangotri

२६ अध्यायः धर्मागतेनेत्यध्यायः सर्वकामधनहीना अपि महान्तो यत्नं निवर्तयंस्तेवेति वक्तुमारभ्यते ५ मरीचपास्त्वङ्गमरीचियानमात्रताः ६ परिपक्वैरेव

विश्वामित्रोऽसितश्चैव जनकश्च महीपतिः कक्षसेनोऽर्ष्टिषेणश्च सिन्धुद्वीपश्च पार्थिवाः २४ एते चान्ये च बहवः सिद्धिं
परमिकां गताः नृपाः सत्यैश्च दानैश्च न्यायलब्धैस्तपोधनाः २५ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवाश्रितास्तपः दा
नधर्माग्निना शुद्धास्ते स्वर्गं यान्ति भारत २६ इत्याश्वमेधिके पर्वणि जनमेजय उवाच धर्मागतेन त्यागेन भगवन्नस्य
गमस्ति चेत् एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि भाषितुं १ तस्योञ्छवृत्तेर्यद्वृत्तं सक्तुदाने फलं महत् कथितं तु मम ब्र
ह्मन् तथ्यमेतदसंशयं २ कथं हि सर्वयज्ञेषु निश्चयः परमो भवेत् एतदर्हसि मे वक्तुं निखिलेन द्विजर्षभ ३ वैशंपा
यन उवाच अत्राप्युदाहरन्तीममितिहासं पुरातनं अगस्त्यस्य महायज्ञे पुरावृत्तमरिंदम ४ पुरागस्त्यो महातेजा दीक्षां
द्वादशवार्षिकीं प्रविवेश महाराज सर्वभूतहिते रतः ५ तत्राग्निकल्पा होतार आसन् सत्रे महात्मनः मूलाहाराः फ
लाहाराः साश्मकुट्टा मरीचिपाः ६ परिपृष्टिका वैघसिकाः प्रक्षालास्तथैव च यतयो भिक्षवश्चात्र बभूवुः पर्यवस्थि
ताः ७ सर्वे प्रत्यक्षधर्माणो जितक्रोधा जितेन्द्रियाः दमे स्थिताश्च सर्वे ते दंभमोहविवर्जिताः ८ वृत्ते शुद्धे स्थिता नि
त्यमिन्द्रियैश्चाप्यबाधिताः उपातिष्ठंत तं यज्ञं यजंतं ते महर्षयः ९

शुद्धा विनाशयेति परिपृष्टिकाः पाठांतरे परिघृष्टिका अपि लवणप्रसंख्यानात्तत्कालमात्रसंग्रहाः अप्रक्षाला इति पाठो धनहीनाः ८ ९

© Dharmartha Trust J&K. Digitized by eGangotri

स्मृ० ७५४

चिंतापत्तंमानसंपत्तं संकल्पमात्रेणैवरेवानदीमुत्तर्पयिष्यामी सर्वथः १७ स्पर्शपत्तंउपादूतदूपसमपमकृत्वातस्पर्शेनैवतांस्तर्पयिष्यामि एवंदूषिपत्तोपिज्ञेयः १८ सि

यथाशक्त्याभगवतानरत्नंसमुपार्जितं तस्मिन्सत्रेनुपहूतंयद्योगंचतत्राभवत् १० तथाप्यनेकैर्मुनिभिर्महात्मभिः कृत
वः कृता एवंविधेलागमस्यवर्तमानेतथाद्यो नववर्षसहस्राणितत्रभारतसत्तम ११ ततः कुम्भोतोऽजगस्त्यस्य
महात्मनः कथ्यमभिनिर्वृत्तामुनीनांभावितात्मनां ११ अगस्त्योयजमानोसौदशसत्रेविमत्सराः नचवर्षतिपर्ज
न्यःकथमन्नंभविष्यति १२ सत्रेचेदंमहर्द्धिमामुनेर्द्वादशवार्षिकं नवर्षिष्यतिदेवश्चवर्षाण्येतानिद्वादश १३
एतद्ब्रुवंतःसंविग्नमहर्षेर्मेधावन्तः अगस्त्यस्यातितपसः कर्तुमर्हस्यनुग्रहं १४ इत्येवमुक्तेवचनेततोगस्त्यःप्रता
पवान् प्रोवाचवाक्यंमतिमान्प्रसादयंस्तान्मुनीन् यदिद्वादशवर्षाणिनवर्षिष्यतिवासवः १६ चिंतायत्तंकरिष्या
मिविधिरेषसनातनः यदिद्वादशैववर्षाणिनवर्षिष्यतिवासवः १७ स्पर्शपत्तंकरिष्यामिविधिरेषसनातनः
यदिद्वादशवर्षाणिनवर्षिष्यतिवासवः १८ आयामेनाहरिष्यामियत्तानन्यानतिव्रतान् बीजयज्ञोमयापोयैव
दुर्वर्षसमाचितः १९ बीजैर्हितंकरिष्यामिनात्रविघ्नोभविष्यति नेदंशक्यंवृथाकर्त्तुंममसत्रंकथंचन २०
वर्षिष्यतीहवादेवोनवादेवोभविष्यति २१

दुस्त्याभविष्यानमात्रेणादूस्त्यापांदूरिष्यामीसाहूश्वेयंनियांठतेरआयामेनशारीरक्लेशेन १९ २० २१ ॥

स्मृ० ७५५

धेयात्मनेसमप्रपंचोपचेसाद्दिः २२ २३ २४ २५ २६ २७ २८ ३० ३१ ३२ ३३ ॥

अथवाभ्यर्थनामिंद्रोनकरिष्यतिकामतः तदापिंद्रोभविष्यामिजीवयिष्यामिचप्रजाः योयदाहारजातस्तुसत्तथैव
भविष्यति २२ विशेषंचैवकर्त्तास्मितुनःपुनरतोवहि अघेहल्लगोमप्येतपत्रान्यद्दृह्रकिंचन २३ विधुलोकेषुय
त्वास्तितदिहागम्यतांत्वया दिव्यास्त्वाप्सरसांसंघागंधर्वाश्चसकिंनराः २४ विश्वावसुश्चपेचान्येतेपूपासंतमेम
त्वं उर्वरम्यःकुलमश्चयत्किंचिद्दुहविद्यते २५ सर्वंतदिहयत्तेषुतत्पमेवोपतिष्ठतु स्वर्गःस्वर्गसदश्चैवधर्मश्चत्व
यमेवतु २६ इहलोकेसर्वमेवैतद्भवत्तपसामुनेः तस्यहोमाग्निमहतस्तस्यसपातितेजसः ततस्तेमुनयोदृष्ट्वा
दृष्ट्वातुतपसोबलं विस्मिताववनंप्राहुर्विंदुसर्वमहार्थवत् २८ अथयऊचुः प्रीतास्मस्तववाक्येननत्विच्छाम
स्तपोभयं नैववयंतत्तद्दाक्ष्यस्मायेनत्वच्छामहेवयं २९ यज्ञेश्वरभांतथाहोमान्मंत्रान्मयाग्यामहे स्वायेनोपार्जिता
हाराःस्वकर्मभिरतावयं ३० वेदांश्चब्रह्मचर्यंतान्मापनःप्रार्थयामहे न्यायेनोनरकान्सर्वगर्हेभ्योनिस्तरतावयं ३१
धर्मदृष्टेविधिद्दृष्टेस्तपलस्यामहेवयं भवतःसम्यगिष्टात्तुबुद्धिर्हिंसाविवर्जिता ३२ यत्नामहिंसांयत्तेशुश्रूपात्वंसत
तंप्रभो प्रीतास्ततोभविष्यामोवयंप्रहृद्विजसत्तम ३३ विसर्जिताःप्रमाशोचस्त्वाहस्माहुजामहे तथाकथयतांते
षांदेवराजःपुरंदरः ३४

© Dharmarth Trust J&K. Digitized by eGangotri

अ० १
२४५

कोसाविय्यादिशेषकस्याक्रोधनयस्योत्कर्षवर्णनाध्यो ५१ पितरं धर्मसाविशतत पयःपीतवानिसर्यः ५५ गोवत्सल्यमेवमिथ्यारोपस्पर्जितलालया ५६ ५७ ॥

ववर्षसहमहातेजाहस्वात्तस्यतपोबलं आसमाप्तेस्वयज्ञस्यतस्यामिततपराक्रमः ३५ निकामवर्षीपर्जन्योबभूवजन्न
मेजयप्रसादयामासचतंमगरक्षंत्रिदशेश्वरः ३६ सयज्ञमेसप्तानवैपुरन्दरःसहहस्पति आनोपयज्ञसमाप्तोतान्विसर्ज
महामुनीन् आगस्त्यःपरमप्रीतःपूजयित्वायथाविधि ३८ जनमेजयउवाच कोसौनकुलरूपेणशिरसाकांचनेनवै
प्राहमानुषवद्वाचमेतन्मेपृच्छतोवदस्वमे ३९ वैशंपायनउवाच एतत्पूर्वंनपृष्टोहंनचास्माभिःप्रभाषितं श्रूयतांनकुलो
योसौयथावाक्तस्यमानुषं ५० आहुःसंकल्पयामासजमदग्निःपुराकिल होमधेनुस्तमागाच्चस्वयमेवदुदोहतां ५१
तस्यपःस्थापयामासनवेभांडेदृढेशुचौ तच्चक्रोधःस्वरूपेणपितरंधर्ममाविशत ५२ जिज्ञासुस्तमृषिश्रेष्ठंकिंकुर्या
द्विप्रियेकृते इतिसंचिन्त्यसधर्मःसधर्षयामासतत्पयः ५३ तमाज्ञायमुनिःक्रोधंनैवास्यसचुकोपह सतुक्रोधस्ततो
राजन्ब्राह्मणीमूर्तिमास्थितः ५४ जितेतस्मिन्भृगुश्रेष्ठमभ्यभाषदमर्षणः जितोस्मीतिभृगुश्रेष्ठभृगवोह्यतिरो
षणाः लोकेमिथ्याप्रवादोयंयत्त्वयास्मिविनिर्जितः ५५ वशस्थितोहंत्वय्यद्यक्षमावतिमहात्मनि बिभेमितपसः
साधोप्रसादंकुरुमेप्रभो ५६

एम०
१९५

५४ ॥इतिश्रीमत्सर्वार्थप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेआश्वमेधिकेपर्वार्थप्रकाशःसमाप्तिमगमत ॥

जमदग्निरुवाच साक्षाद्दृष्टोसिमेक्रोधगच्छत्वंविगतज्वरः नत्वयापकृतंमेद्यनचमेमन्युरस्तिवै ४८ यान्
समुद्दिश्यसंकल्पःपयसोस्यकृतोमया पितॄंस्तेमहाभागास्तेभ्योबुध्यस्वगम्यतां ४९ इत्युक्तोजातसंत्रास
स्तत्रैवांतरधीयत पितॄणामभिषंगाच्चनकुलत्वमुपागतः ५० सतान्प्रसादयामासशापस्यांतोभवे
दिति तैश्चाप्युक्तःक्षिपन्धर्मंशापस्यांतमवाप्स्यसि ५१ तैश्चोक्तंयज्ञियान्देशान्धर्मारण्यंतथैवच
जुगुप्समानोधावंस्तंयज्ञंसमुपासदत् ५२ धर्मपुत्रमथाक्षिप्यसक्तुप्रस्थेनतेनसः मुक्तःशापात्ततः
क्रोधोधर्मोप्यासीद्युधिष्ठिरः ५३ एवमेतत्तदावृत्तंयज्ञेतस्यमहात्मनः पश्यतांचापिनस्तत्रनकुलो
न्तर्हितस्तदा ५४ ॥ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांआश्वमेधिकंपर्वसमाप्त

अध्यायः ९२ श्रीश्रीश्रीश्रीश्री ॥०॥ श्रीरामरामरामरामराम ॥ श्रीशिवशिवशिवशिवशिव ॥ श्रीकृष्णकृष्णकृष्णकृष्णकृष्ण ॥०॥॥

© Dharmarth Trust J&K. Digitized by eGangotri

अश्वमेधपर्व
१४६

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K Digitized By eGangotri